पण्डितराज-श्रीस्नेहिरामजिशास्त्रि[चिडावा-जयपुर]सम[illegible]

श्रीराजस्थान-संस्कृत-कालज-ग्रन्थम[illegible]

४९ तमङ्कुसुमम्

महामहोपाध्यायश्रीभट्टनारायणप्रणीतं

वेणीसंहारम्

'अभिनवराजलक्ष्मी'-'भाषा'-टीकाद्वयविराजितम्

टीकाकार

श्रीगुरुप्रसादशास्त्री,

व्याकरणाचार्य, न्यायाचार्य, दर्शनाचार्य,

[प्रिन्सिपल-श्रीराजस्थान-संस्कृत-कालेज, मीरघाट, काशी]

[परीक्षोपयोगिश्रेष्ठं संस्करणम्]

सम्पादकः—

श्रीनन्दकिशोरशास्त्री, आयुर्वेदाचार्यः।

[प्रोफेसर-श्रीराजस्थान-संस्कृत-कालेज, काशी]।

प्रकाशकः

भार्गवपुस्तकालयः,

गायघाट, बनारस।

प्रथमं संस्करणं } १९३९ { मूल्यं १॥) सजिल्द १॥=)

मुद्रक—
पं० कैलासनाथ भार्गव,
भार्गवभूषण प्रेस, गायघाट, बनारस।

वेणीसंहारभूमिका

अथेदं वीररसप्रधानं नाटकेषु मुख्यं वेणीसंहारं नाम नाटकरत्नं टीकाद्वयोपेतं संमुद्रय भवतां सहृदयाणामधिकरकमलं ललितमुपह्रियते ।

इदं हि नाटकं नितरां प्राचीनमिति बहवोऽत्र नानाविधाः पाठाः परस्परविरुद्धाश्च पुनरुक्तप्रायाश्च, नानाविधेष्वादर्शेषु दरीदृश्यन्ते । तत्र दाक्षिणात्यपाठो मुम्बईपूनादिमुद्रितेष्वादर्शेषु प्राधान्येनोपलभ्यते । पौरस्त्यः पाठश्च कलिकातादिमुद्रितेष्वादर्शेषूपलभ्यते । परस्परं चानयोः पाठयोर्महान् भेदो दृश्यते इति कतरः पाठो युक्तः कतरश्चादरणीय इति हन्त ! महान्भारो टीकाकरणप्रवृत्तेषु, अध्यापकेषु, तदनुच्छात्रेषु च ।

तत्र पाठशुद्धौ नितरां प्रयतमानैरस्माभिरुचिताः, सम्प्रदायशुद्धाः, मनोहराः, विशिष्टाश्च पाठाः गमादृता मुद्रिताश्चेति निवेदयामः ।

अस्य नाटकस्य च महत्त्वमेतावतैव निश्चप्रचमवगम्यते—यत्साहित्यदर्पणकारैरस्य नाटकाङ्गाद्युदाहरणावसरे पदे–पदे समुल्लेखो विहितः । ततोऽपि प्राचीनैर्वामनादिमहाकविभिरप्यस्य नाटकस्य स्वस्वकृतिषु प्रमाणोदाहरणादिप्रसङ्गेन समुल्लेखो विहित इति च ।

यद्यपि नाटकेऽत्र क्वचन पाणिनीयव्याकरणविरुद्धा अपि प्रयोगा दृश्यन्ते—यथा द्रौणायनिपदे फिञ्प्रयोगो नोचितः, 'द्रौणायन' इत्येव पाठः समुचितः, 'द्रोणपर्वतजीवन्तादन्यतरस्याम्' इति पाणिनिसूत्रात्, द्रोणायनो द्रौणिरित्यनयोरेव शुद्धत्वात् । तथा 'संयमितुमारब्धः' इत्यत्र 'संयन्तुमारब्धः' इत्येव पाठो युक्तः । 'संयमयितु'मिति स्वार्थिकेन णिचा वा कश्चित्पठन्ति । तथापि ते दोषा लेखकादिभ्रमप्रमादादागताः, कारणान्तरेणापतिताः, व्याकरणान्तरसरणिमनुसृत्य वा तेषां साधुत्वं समर्थयितुं शक्यमिति प्रायोऽस्माभिस्ते तथैव स्थापिताः ।

क्वचन तु यथाबुद्धि यथासम्प्रदायञ्च पाठा अस्माभिरुद्धृता इति महात्मभिर्विद्वद्भिरौचित्यन्तद्भिन्नं वा तत्र स्वयमेव निर्धारयितुं शक्यम् ।

ग्रन्थकर्त्तुः समयः ।

श्रीमान् भट्टनारायणः। अयं भट्टनारायणो विक्रमस्य तृतीयायां शताब्द्यां (३०० संवति) गुप्तराज्यकाले प्रादुर्भूत इतिकेचनमन्यन्ते ।

काव्यालङ्कारसूत्रप्रणेत्रा वामनेन वेणीसंहारवाक्यानामुल्लेखःकृत इति ततः प्राचीनोऽयमिति स्पष्टं वक्तुं शक्यते । भट्टवामनश्च **काशिकादिव्याकरण-ग्रन्थप्रणेता** महावैयाकरणः प्रसिद्ध एव ।

सच प्रायः षष्ठ्यां विक्रमशताब्द्यां खिस्तीयषष्ठशताब्द्यां (६०० ईसवीये) वा वर्त्तते स्मेतीतिहासविदः । केचन ततोऽपि प्राचीनं भट्टवामन निर्दिशन्ति । परन्तु **भट्टवामनात्प्राचीनो भट्टनारायण** इति तु निर्विवादम् । भट्टवामनामति-प्राचीनत्वाऽभावेऽर्वाचीनस्याऽप्रथितस्य ग्रन्थस्योदाहरणदानमसङ्गतं स्यादिति तृतीयशताब्द्यां (३०० ई०) भट्टनारायण आसीदिति निर्णेतुं शक्यते एव ।

केचित्तु—काव्यालङ्कारसूत्रकर्त्ता **वामनो** महावैयाकरणकाशिकाकार-वामनाद्भिन्न एव काश्मीराधिपतेर्जयापीडस्य मन्त्रीति—

'मनोरथः शङ्खदत्तश्चटकः सन्धिमांस्तथा ।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः' ॥

—इति **राजतरङ्गिणीश्लोकाद्** गम्यते इत्याहुः । जयापीडश्च प्रायः ७५० ईसवीये काश्मीरेषु राज्यं चक्रे । एवञ्च ततः पूर्ववर्त्ती भट्टनारायणः पञ्चम्यां षष्ठ्यां वा शताब्द्यां (५५०-६०० ईस्वीये) सम्भवतीति सम्भावयन्ति ।

३०० ईशवीये **भट्टनारायणः** प्रादुर्बभूवेति तु वयम् । तत्त्वन्तु भगवानेव तत्त्वविदः ऐतिहासिका वा विदन्तीति शिवम् ।

श्रीराजस्थान-संस्कृत-कालेज,
मीरघाट, काशी ।
५।११।३९

इति
श्रीगुरुप्रसादशास्त्रिणः ।

भार्गव भूषण प्रेस, काशी। ४४

समर्पणपत्रम्

धर्मसंरक्षणैकदक्षस्य

विद्यानुरागिणः

श्रेष्ठिकुलकमलिनीराजहंसस्य

विनयावनतस्य

श्रेष्ठिवरश्रीजानकीप्रसाद्पोद्दारमहोदयस्य

अधिकरकञ्जं मञ्जुलमेतत्प्राभृतकं

सादरं सविश्रम्भं च

समुपनयति—

श्रीगुरुप्रसादशास्त्री ।

* श्रीः *

वेणीसंहारपात्रादिपरिचयः।

पुरुषपात्रादि

सूत्रधारः–नटमुख्यः

पारिपार्श्विकः–सूत्रधारसहचरः

जयन्धरः–पाण्डवकञ्चुकी

श्रीकृष्णः–वासुदेवः

युधिष्ठिरः–पाण्डवराजः

भीमः– } पाण्डवाः
अर्जुनः– }

नकुलः } माद्रीपुत्रौ
सहदेवः }

विनयन्धरः दुर्योधनस्य कञ्चुकी

दुर्योधनः–कौरवराजः

रुधिरप्रियः–पाण्डवपक्षपाती राक्षसः

अश्वत्थामा–द्रोणपुत्रः

अश्वसेनः–द्रोणसारथिः

कृपः–द्रोणश्यालः, अश्वत्थाममातुलः।

कर्णः–राधेयः, दुर्योधनसखा।

जयद्रथः–दुर्योधनभगिनीपतिः

सुन्दरकः–कर्णभृत्यः।

धृतराष्ट्रः–दुर्योधनपिता।

सञ्जयः–व्यासशिष्यो धृतराष्ट्रपरिचारकः

बुधकः–युधिष्ठिरराजपुरुषः। सन्देशहरः

पाञ्चालकः–सन्देशहरः।

राक्षसः–दुर्योधनमित्रं,चार्वाकनामा।

स्त्रीपात्रादि

द्रौपदी–पाण्डववधूः प्रधाननायिका।

बुद्धिमतिका– } द्रौपदीदासी
चेटी– }

भानुमती–दुर्योधनमहिषी।

सुवदना–भानुमतीसखी

तरलिका–भानुमतीदासी

दुःशला–दुर्योधनभगिनी

माता–जयद्रथमाता।

वसागन्धा–पाण्डवपक्षपातिनी राक्षसी

हिडिम्बा–भीमपत्नी

गान्धारी–दुर्योधनमाता

कुन्ती–पाण्डवमाता।

प्रतिहारी–कुरुराजवेत्रवती

द्वाररक्षिका।

विहङ्गिका–कौरवपक्षपातिनी दासी।



ॐ

श्रीगणेशाय नमः ।

अथ वेणीसंहारम् ।

नाटकम् ।

श्रीगुरुप्रसादशास्त्रिकृतया अभिनवराजलक्ष्मीटीकया
बालमनोरमाख्यया भाषाटीकया चालङ्कृतम् ।

प्रथमोऽङ्कः ।

* अभिनवराजलक्ष्मीः *

साध्यानां कर्मणां सिद्धिर्यत्प्रसादात्प्रवर्त्तते ।
गणेशं शारदां नौमि पितरौ च पितामहान् ॥ १ ॥
वन्देऽनवद्यसद्ग्रन्थविद्योद्भासितदिङ्मुखान् ।
मरुमण्डलमार्त्तण्डस्नेहिरामाभिधान् गुरून् ॥ २ ॥

महाकविर्भट्टनारायणो रङ्गविघ्नोपशान्त्यर्थमादाववश्यं कर्त्तव्यां नान्दीं द्वादशपदां निबध्नाति—निषिद्धैरिति ।

नाटके हि वर्णनीयकथावस्तुनः पूर्वमेव पूर्वरङ्गः प्रयुज्यते । तदुक्तं साहित्यदर्पणे—'तत्र पूर्वं पूर्वरङ्गः' इति । पूर्वरङ्गलक्षणञ्च दर्पणे—

'यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते' ॥ इति ।

कुशीलवाः—सूत्रधारप्रमुखा नटाः । प्रकुर्वन्तीत्यस्य—'देवस्तुतिगीत-वादित्रादिक'मिति शेषः । यस्मादङ्गे प्रयोगोऽयं पूर्वमेव

निषिद्धैरप्येभिर्लुलितमकरन्दो मधुकरैः
करैरिन्दोरन्तश्छुरित इव संभिन्नमुकुलः ।

दयं पूर्वरङ्गः-' इति च । अस्य पूर्वरङ्गस्य बहूनि प्रत्याहारादिकान्यङ्गानि नाट्यशास्त्रे वर्णितानि । तदन्तर्गता च नान्दी । तत्र साङ्गस्य पूर्वरङ्गस्य कुतोऽपि हेतोर्यथावदनुष्ठानाऽभावेऽपि नान्दी त्ववश्यमनुष्ठेया । तदुक्तं—

'प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि ।
तथाऽप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये' ॥ इति ।

तदित्थं शिष्टाचारपरिप्राप्तां विघ्नविघाताय नाट्यादाववश्यानुष्ठेयाम्—

'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति सञ्ज्ञिता ॥
माङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी ।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥'

इत्युक्तलक्षणां—श्लोकत्रयस्य द्वादशपादात्मकतया-द्वादशपदां नान्दी महाकविरादौ निबध्नाति (—निषिद्धैरिति) ।

[अन्वयः] निषिद्धैरपि एभिः मधुकरैः लुलितमकरन्दः, इन्दोः करैः अन्तश्छुरित इव संभिन्नमुकुलः, हरिचरणयोः प्रकीर्णः, अयं पुष्पाणामञ्जलिः-अस्य सदसः नयनसुभगां नः सिद्धिं विधत्ताम् ।

[समासः] लुलितो मकरन्दो यस्यासौ-लुलितमकरन्दः । संभिन्नः मुकुलो यस्यासौ संभिन्नमुकुलः । नयनयोः सुभगा नयनसुभगा, ताम्-नयनसुभगाम् । हरेश्चरणौ हरिचरणौ, तयोः हरिचरणयोः ।

[व्याख्या] निषिद्धैरपि=मुहुर्मुहुर्निवारितैरपि । हस्तचालनादिना निरुद्धप्रसरैरपि । यद्वा 'छिद्राणि कीटदष्टानि कुसुमानि विवर्जयेत्' इति मनूक्त्या

[भाषाटीका] बारम्बार हटाए जाने पर भी भ्रमरों ने जिनके मकरन्द (पुष्प रस) को इधर उधर बिखेर दिया (आस्वादन किया) है, जो

१ इयं त्रिभिःश्लोकैर्द्वादशपदा नान्दी ।

विधत्तां सिद्धिं नो नयनसुभगामस्य सदसः
प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् ॥ १ ॥

तेषां सम्पर्कस्य निषिद्धत्वाद्धर्मशास्त्रनिषिद्धैः। एभिः=पुरोवर्त्तिभिः। मधुकरैः=भ्रमरैः। मकरन्दसौरभलोभात्सरभसमापतद्भिर्मधुपैः। भ्रमरकुलैः। **लुलितमकरन्दः**=विलुलितपुष्परसः। विक्षिप्तमकरन्दः। चालितरसः। पीतरस इति यावत्। **अन्तः**=अभ्यन्तरे। **इन्दोः**=चन्द्रमसः। **करैः**=किरणैः। छुरित इव=भरित इव। संस्पृष्ट इव। व्याप्त इवेति वा। **संभिन्नमुकुलः**=प्रफुल्लकुड्मलः। विकसितकलिकः। अन्यदपि वस्तु केनचिद्वस्त्वन्तरेणाऽन्तर्निविष्टेन भृतमुत्फुल्लमिव भवति तथैव चन्द्रकिरणैरतिमात्रमयमन्तर्निविष्टैर्नितरां भृत इति तत्संपर्कादिवास्य प्रफुल्लतेति भावः।

'लुलितमकरन्द' इत्यनेन च पुष्पाञ्जलिरयं भ्रमरैः कथंचिच्चालितमकरन्द एव न तूपभुक्तमकरन्दः, निवारणेन तेषां स्वच्छन्दमकरन्दास्वादसौख्यस्य विघ्नितत्वादिति सूचितम्।

छुरित इव=लिप्त इव। अत्र च्छुरितपदोपादानेनान्येषां वस्तूनां चन्द्रकिरणैः सम्बन्धमात्र एव। पुष्पाञ्जलेस्तु सुधास्यन्दिचन्द्रकिरणैरन्तर्दिग्धतयाऽमृतनिधानतैवेति सूचितम्। किञ्च नायं मकरन्दरसः किन्तु चन्द्रकिरणानामस्मिन् पुष्पाञ्जलावनितरामन्तर्बहिश्च सम्बन्धात्तत्रैकीभूतं पीयूषमेव पुष्पेषु भृतेषु सत्सु बहिर्द्रवतीति कवेरभिप्रायो बोध्यः। एतेन तत्रत्यकुसुमानामिवाऽत्रत्यगद्यपद्यानामपि सुधारसवर्षित्वमित्यपि सूचितम्। **संभिन्नमुकुलः**=विदलितकलिकः। विकाशित इति यावत्। **हरिचरणयोः**=श्रीकृष्णचन्द्रचरणयोः। **प्रकीर्णः**=सभक्तिनिक्षिप्तः। **अयं**=पुरोवर्त्ती। **पुष्पाणामञ्जलिः**=लक्षणया अञ्जलिपरिमितानि पुष्पाणि। यथाश्रुते अञ्जलेर्विकिरणस्याऽसम्भवादेवं व्याख्यातम्।

सदसः=सभायाः। सभास्थितानां भावुकानामिति यावत्। **नयन-**

चन्द्रमा की अमृतमय किरणों से अन्तर्भाग में लिप्त-से हो रहे हैं, और चन्द्र-किरणों द्वारा अमृत रस से ऊपर तक भर जाने के कारण ही

सुभगां=लोचनानन्ददायिनीम् । स्पृहणीयाम् । दृश्यकाव्यत्वादस्यैतदभिनयसम्पदो वागङ्गाभिनयदर्शनद्वारा नयनाभिरामता बोध्या । नः=अस्माकम् । सिद्धिम्=अभिनयसिद्धिम् । अभिनयसाफल्यम् । विधत्तां=विदधातु । करोतु । प्रार्थनायां लोट् । शिखरिणी वृत्तम् । 'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी'त्युक्तेः ।

[कोशः] 'मधुव्रतो मधुकरो मधुलिण्मधुपाऽलिनः' इत्यमरः । 'भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्' इत्यमरः । 'भिन्नौ दारितसङ्गतौ' इत्यमरः । 'तौ युतावञ्जलिः पुमा'नित्यमरः । 'सदः समिति संयति' इति शाश्वतः ।

अत्रेदमवधेयं—निषिद्धैरित्यादिना प्रकृतप्रबन्धविषयोऽपि कथाबीजं कथंचिद्वर्णयितुं शक्यते । तथाहि-नः=अस्माकं । सदसः=पञ्चानां पाण्डवानाम् । तदनुगतानाञ्च । नयनसुभगां जगदाह्लाददायिनीं, सिद्धिं—श्रीकृष्णचन्द्रचरणयोरर्पितः पुष्पाञ्जलिः-भगवत्परिचरणं-विधत्ताम् ॥

यद्वा कथम्भूतः पुष्पाञ्जलिः ? । निषिद्धैः=भीष्मविदुरादिभिर्मुहुर्वारितैरपि, एभिः मधुकरैः=दुर्योधनकर्णशकुन्यादिभिः । लुलितमकरन्दः=विलुप्तराज्यसम्पत्तिः । परन्तु इन्दोः=श्रीकृष्णचन्द्रस्य, किरणैः=अनुग्रहप्रभावादिभिः । अन्तश्छुरित इव=अन्तराप्यायित इव । संभिन्नमुकुलः=त्यक्तमुखमुद्रः । स्वभागप्राप्तये विहितोद्योगः । हरिचरणयोः-श्रीकृष्णचरणयोः । प्रकीर्णः=कुन्त्या द्रौपद्या च निक्षिप्तः । भगवच्छरणागत इति वा । पुष्पाणामञ्जलिः=पुष्पतुल्यानां-निर्दोषाणां सज्जनाह्लादकानां पञ्चानां पाण्डवानां सङ्घः । सिद्धिं=राज्यलाभं, विधत्तां=प्राप्नोतु । आसादयतु । इत्येवमर्थोऽप्यनुसन्धेयः ।

परे तु इह 'निर्वाणवैरिदहनाः' इत्यनेन प्रबन्धार्थसूचनस्य करिष्यमाणतया नान्द्यां तत्सूचनायासो मुधैवेत्याहुः ॥ १ ॥

जिनकी कलिकाएं विकसित हो गई (खुल गई) हैं ऐसे पुष्पों की यह भगवान् के चरणों में चढाई गई अञ्जलि इस सभा (नाट्यशाला) में उपस्थित सज्जनों के नेत्रों को प्रीति व आनन्द देने वाली (इस) नाटक की शोभा को बढाती हुई हमारे कार्य की सिद्धि को करे ॥ १ ॥



वेणीसंहार-नाटक-सूत्रधारो भगवान् वासुदेवः

अपि च—

कालिन्द्याः पुलिनेषु केलिकुपितामुत्सृज्य रासे रसं
गच्छन्तीमनुगच्छतोऽश्रुकलुषां कंसद्विषो राधिकाम् ।
तत्पादप्रतिमानिवेशितपदस्योद्भूतरोमोद्गते-
रक्षुण्णोऽनुनयः प्रसन्नदयितादृष्टस्य पुष्णातु वः ॥ २ ॥

द्वादशचरणरूपद्वादशपदात्मिकेयं नान्दीति सूचयन्नाह—अपि चेति। निषिद्धै-रितिवदिदमपि पद्यं नान्द्यवयवभूतमित्यर्थः । तदेव पद्यमाह—कालिन्द्या इति ।

[अन्वयः] कालिन्द्याः पुलिनेषु केलिकुपितां रासे रसम् उत्सृज्य गच्छन्तीम् अश्रुकलुषां राधिकाम् अनुगच्छतः तत्पादप्रतिमानिवेशितपदस्य उद्भूतरोमोद्गतेः प्रसन्नदयितादृष्टस्य कंसद्विषः अक्षुण्णः अनुनयः वः पुष्णातु ।

[व्याख्या] कालिन्द्याः=यमुनायाः । पुलिनेषु=तोयोत्थितेषु सैकत-तटप्रदेशेषु । 'तोयोत्थितं तत्पुलिनम्' इत्यमरः । केल्या केल्यां वा कुपिता केलिकुपिता, तां केलिकुपितां=प्रणयकुपिताम् । मानिनीम् । क्रीडाकुपितां वा । कृतककोपवतीं वा । अत एव—रासे=रासक्रीडायाम् ।

'रासो विदग्धगोष्ठ्यान्तु क्रीडायामपि गोदुहाम्' इति विश्वः । रसम्= अनुरागम् । उत्सृज्य=विहाय । गच्छन्तीं=यान्तीम् । निलीयमानाम् । अश्रुभिः कलुषा अश्रुकलुषा, ताम्—अश्रुकलुषाम्=रुदतीम् । अनुगच्छतः= अनुनयार्थं तामनुधावतः । तस्याः पादयोः प्रतिमासु च निवेशितं पदं येनासौ तत्पादप्रतिमा-निवेशित-पदः, तस्य—तत्पादप्रतिमानिवेशितपदस्य=राधिका-चरणचिह्नपङ्क्तिविनिवेशितस्वचरणस्य । स्वप्रियाचरणचिह्नस्पर्शेनैव स्वविरह-

[भाषाटीका] कालिन्दी—(यमुना) के किनारे कछार (बालुका-मय प्रदेश) में होनेवाली रासक्रीडा में किसी कारणवश भगवान् श्रीकृष्ण चन्द्र से योंही अप्रसन्न हो राधिकाजी रोती हुई कहीं जाकर छिप गई । भगवान् भी उनको खोजते हुए इधर उधर घूमने लगे । जहाँ २ उन्हें राधिका जी के पैरों के चिह्न मिलते थे वहाँ वे उन्हीं पर अपना पैर

अपि च—

दृष्टः सप्रेम देव्या, किमिदमिति भयात्संभ्रमाच्चासुरीभिः,

व्यथामपनयतः। प्रियाचरणचिह्नस्पर्शेनाऽलौकिकसुखमनुभवतः। अत एव तत्र चाऽत्यन्तानुरागवशात्—रोम्णामुद्गतिः, रोमोद्गतिः, उद्भूता रोमोद्गतिर्यस्यासौ तस्य–उद्भूतरोमोद्गतेः=उदञ्चितरोमाञ्चस्य। जातपुलकोद्भेदस्य। रोमाञ्चितस्य। 'मत्पादस्पृष्टधूलिस्पर्शेनाऽप्यस्य रोमोद्भेदस्तर्हि मत्सङ्गमे किमु वक्तव्यमिति मयि दृढानुरागोऽयं प्रिय' इति निश्चित्य–प्रसन्नया दयितया राधिकया दृष्टस्तस्य–प्रसन्नदयितादृष्टस्य=व्यपेतप्रणयकोपप्रसन्नप्रियाविलोकितस्य। कुपितयाऽपि कान्तया सप्रसादं विलोकितस्य। धन्यस्य। कंसं द्वेष्टीति कंसद्विट्, तस्य कंसद्विषः=भगवतः कंसारेः श्रीकृष्णचन्द्रस्य। न क्षुण्णः–अक्षुण्णः=अमोघः। सफलः। झटिति प्रियाप्रसादादनुनयस्य साफल्यम्। अनुनयः=प्रियाप्रसादः। प्रियाप्रार्थनाप्रकारः। वः=युष्मान्। सामाजिकान्। सभ्यान्। पुष्णातु=पोषं नयतु। अभिवर्द्धयतु। अत्र पूर्वार्द्धेन द्रौपद्याः कोपरोदने, उत्तरार्द्धेन च भीमकृतसफलानुनयो द्रौपद्याः प्रसादश्चेत्यपि कथावस्तु सूचितम्। शार्दूलविक्रीडितं वृत्तम्। 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इत्युक्तेः॥ २॥

द्वादशचरणात्मकद्वादशपदनान्दीरूपस्यार्थस्याद्याप्यपर्यवसानादाह—अपि चेति। किञ्चेत्यर्थः। इदमपि पद्यं नान्द्यामन्तर्भाव्यमित्यर्थः। दृष्ट इति।

[अन्वयः] मयपुरदहने–देव्या सप्रेम (दृष्टः)। किमिदमिति भयात्

रखते थे, और राधिकाजी के पैरों के चिह्नों की धूलि से संस्पर्श होते ही भगवान् को रोमाञ्च हो जाता था। जिसे छिपी हुई राधिकाजी नें देख लिया, और भगवान् के प्रेम को दृढ जानकर राधिकाजी उन पर प्रसन्न हो गईं। इस प्रकार सफल हुआ भगवान् का प्रियाऽनुनय आप सभासदों के मनोरथों को पूर्ण करे॥ २॥

त्रिपुरदाह के अवसर पर भगवती पार्वतीजी से सप्रेम देखे

१ 'संभ्रमादासुरीभिः' इति पाठा०।

शान्तान्तस्तत्त्वसारैः सकरुणमृषिभिर्विष्णुना सस्मितश्च ।

सम्भ्रमाच्च असुरीभिः (दृष्टः), शान्तान्तस्तत्त्वसारैः ऋषिभिः सकरुणं (दृष्टः), विष्णुना सस्मितेन (दृष्टः), अस्त्रमाकृष्य उपशमितवधूसम्भ्रमैः सगर्वैः दैत्यवीरैः (दृष्टः), देवताभिः सानन्दं दृष्टः धूर्जटिः युष्मान् पातु ।

[व्याख्या] मयस्य—मयासुरस्य—पूः पुरं वा मयपुरम् । मयेन निर्मितं वा पुरं मयपुरम् । तस्य दहनं मयपुरदहनं, तस्मिन् मयपुरदहने=त्रिपुरदाहावसरे । देव्या=भगवत्या पार्वत्या। प्रेम्णा सहितं सप्रेम=सस्नेहं-यथा स्यात्तथा। 'दृष्टः=विलोकितः।'धन्याऽहं वीरपत्नी यत्प्रियेणातिबलो दुर्दान्तोऽसुरोऽयं विनिपातित' इत्येवं प्रीत्यतिशयेन भगवत्या कटाक्षित इत्यर्थः। तथैव—मयपुरदहनावसरे एव—असुरीभिः=असुरस्त्रीभिः । असुरवधूभिः । आसुरीभिरिति पाठे—असुराणामिमाः-आसुर्यस्ताभिरसुरवधूभिरित्यर्थो बोध्यः । किमिदम्=किमिदं जातम् । किमिदमापतितम् । किमेतत् । इति=इत्थम् । इत्येवम् । इति कृत्वा । भयात्=त्रासात् । साध्वसात् । सम्भ्रमाच्च=उद्वेगाच्च । दृष्टः=विलोकितः । यदीदृशस्याप्यसुराधिपस्येयं दारुणा दशा तर्हि अस्मत्स्वामिनामपि देवद्रुहामित्थमेव दुर्दशा स्यादिति भयादुद्वेगाच्चाऽसुरकान्ताभिर्विलोकित इत्याशयः । शान्तमन्तस्तत्त्वम्—अन्तःकरणं तदेव सारो बलं येषान्तैः,—शान्ताऽन्तस्तत्त्वसारैः=शान्ताऽन्तःकरणबलैः । यद्वा-—शान्तं यत्—अन्तः=अन्तःकरणं, तेन तत्त्वं—तात्त्विकं, सत्यं, सारो बलं येषान्तैरिति वा । यद्वा—शान्तान्तः=शान्तान्तःकरणैः, तत्त्वं—यथार्थं सत्यं ज्ञानमनन्तं च ब्रह्म—सारः=वेद्यतया प्रधानं येषान्तैः—तत्त्वसारैश्चेत्यर्थः । शान्तान्तरात्मभिर्ब्रह्मवेदिभिश्चेति यावत् । ऋषिभिः=वसिष्ठादिभिर्ऋषिभिः । करुणया सहितं सकरुणं=

गए, और 'अरे ! यह क्या हुआ' इस प्रकार के भय व उद्वेग से असुरों की स्त्रियों से देखे गए, शान्तात्मा ब्रह्मज्ञानी वसिष्ठ आदि

१ 'सस्मितेन' पा० ।

आकृष्यास्त्रं सगर्वैरुपशमितवधूसंभ्रमैर्दैत्यवीरैः
सानन्दं देवताभिर्मयपुरदहने धूर्जटिः पातु युष्मान् ॥ ३ ॥

सदयं यथा स्यात्तथा दृष्टः। ऋषीणां करुणाप्रधानतया तादृशे दुष्टेऽपि त्रिपुरासुरे हते करुणा युज्यत एव।

विष्णुना=नारायणेन। स्मितेन सहितं सस्मितं=सेषद्धासं यथा स्यात्तथा। दृष्टः=निरीक्षितः। त्रैलोक्योद्वेजकस्याऽसुरस्य भगवता धूर्जटिना सहसैवोन्मूलनं कृतमिति दैत्यारेर्मम भारलाघवमित्युत्साहेन हासः, त्रिपुरतृणदाहे कोऽयं भगवत आडम्बरविधिरिति वा हासो भगवत इत्यवधेयम्। अस्त्रं=कोदण्डादिकमस्त्रजातम्। आकृष्य=उद्यम्य। उपशमितो वधूनां सम्भ्रमो यैस्ते उपशमितवधूसम्भ्रमाः, तैः=उपशमितवधूसम्भ्रमैः= उपशमितस्वप्रियोद्वेगैः। गर्वेण सहितैः सगर्वैः=साभिमानैः। साऽहङ्कारैः। दैत्यानां वीराः, दैत्याश्च ते वीरा इति वा दैत्यवीराः, तैः—दैत्यवीरैः=दैत्यसेनाभटैः। दृष्टः=सेर्ष्यमवलोकितः। अस्त्रपाणिष्वस्मासु सन्नद्धेषु को वा भयस्योद्वेगस्य वाऽवसर इति स्वस्ववधू-

ऋषियों से बड़ी करुणा से देखे गए, भगवान् विष्णु से हँसते हुए देखे गए, हाथों में धनुष आदि शस्त्रास्त्रों को लेकर अपनी स्त्रियों के भय को दूर करते हुए दैत्यवीरों द्वारा बड़े गर्व के साथ देखे गए, इन्द्र आदि

१ 'आदायास्त्रं'। २ पाठान्तरे नान्दी—

'जयति स नाभिर्जगतां रत्ननाभिरन्भोजभवजगद्बीजः।
दामोदरो निजोदरगह्वरकनिविष्टजगदण्डः ॥ १ ॥
जयति स भगवान्कृष्णः शेते यः शेषभोगशय्यायाम्।
मध्येपयः पयोधेरपर इवाऽम्भोनिधिः कृष्णः ॥ २ ॥

अपि च—

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसे वहन्त्याः।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥३॥

(नान्द्यन्ते)

सूत्रधारः—अलमतिप्रसङ्गेन ।

भयमुपशमयद्भिर्वैत्यैः सशङ्कग्राहं दृष्ट इति भावः । देवताभिः=इन्द्रादिदेवैः । आनन्देन सहितं सानन्दं=शत्रुवधात् सहर्षं यथा स्यात्तथा । दृष्टः=विलोकितः । धूर्जटिः=शिवः । 'धूर्जटिर्नीललोहितः' इत्यमरः । युष्मान्=सभ्यान् । रसिकान् । पातु = रक्षतु । स्रग्धरावृत्तम् । 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' इति तल्लक्षणात् । प्रकृते महाभारतसङ्ग्रामोऽपि असुरीभिरिवाऽसुरीभिः—दुर्योधनादिवधूभिर्भयोद्वेगाभ्यां दृष्टः, कारुणिकैः—नारदव्याससञ्जयादिभिश्च सकरुणं दृष्टः, विष्णुना—श्रीकृष्णेन च भूभारावतारात्सस्मितं दृष्टः, दैत्यवीरैर्घटोत्कचाऽलम्बुसादिभिः सगर्वं दृष्टः, इन्द्रादिभिश्च देवैः सानन्दं दृष्ट इत्येवं प्रकृतार्थसूचनमप्यत्रेति वाच्यार्थसूचनादियं पत्रावली नाम नान्दी । 'वाच्यार्थबीजरचिता शङ्करादिपदाऽन्विता । संयुक्ता चन्द्रपद्माभ्यां पत्रावल्यभिधीयते' इत्युक्तेः ॥ २ ॥

नान्द्यन्त इति । इत्येवं सूत्रधारकृतद्वादशपादयुतनान्दीपाठानन्तरं । सूत्रधारः—तत्सदृशगुणाकृतिः स्थापकः । प्रविशति वदति वेति शेषः ।

ननु नान्द्यनन्तरमत्र प्रस्तावनैवोपनिबध्यते, तत्कथम् ? । प्रस्तावनातः पूर्वमन्येषामपि नाट्याङ्गानां नाट्यशास्त्रे कर्तव्यतयोक्तेस्तेषामप्यत्र करणस्यावश्यकत्वात्, तदुक्तं भरताचार्यैः—'रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः । ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत् । भेदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः । सूत्रधारो नटीं ब्रूते मार्षं वाऽथ विदूषकम् । स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम्' । इति ।

अत आह—अलमिति । पूर्वोक्तानि नाट्यस्यावश्यानुष्ठेयानि अङ्गानि न

देवताओं से सहर्ष देखे गए, भगवान् शिवजी—रङ्गशाला में उपस्थित आप सभी सभ्य लोगों की रक्षा करें ॥ २ ॥

सूत्रधार—रहने दो । ज्यादा विस्तर की आवश्यकता नहीं है ।

१ 'अलमतिविस्तरेण' ।

श्रवणाञ्जलिपुटपेयं विरचितवान्भारताख्यममृतं यः ।
तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे ॥ ४ ॥

भवन्ति, किन्तु परिषदोऽभिमुखीकरणान्येव । सा चेत्परिषत् स्वयमेव कृतावधानाऽभिनवनाटकदर्शनोत्सुका च वर्त्तते तर्हि अन्यत्प्रयुज्यमानं रसविच्छेदायैव स्यादतोऽलमतिभूयसा रसविच्छेदकेन प्रयुज्यमानेनेत्यर्थः ।

इत्थं रङ्गं प्रसाद्य—'**रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः । रूपकस्य कवेराख्यां गोत्राद्यपि च कीर्त्तयेत्**' इत्युक्तेः कविनामादि निर्दिक्ष्यन् कविर्नाटककथामूलमहाभारतकर्त्तारं व्यासं स्तौति—**श्रवणेति** । यः=यो व्यासः । **श्रवणं**—कर्ण एवाञ्जलिपुटं तेन पेयं—**श्रवणाञ्जलिपुटपेयं**=कर्णाञ्जलिपुटकपानयोग्यं । भारतमित्याख्या यस्य **तद्भारताख्यं**=भारतनामकम् । **अमृतम्**=अमृतमिव, आप्यायकत्वात्सुधावर्षित्वाच्च । **विरचितवान्**=कृतवान् । तम् । नास्ति रागो यस्यासौ अरागः, तम् **अरागं**=रागशून्यम् । विषयासक्तिरहितम् । रजोगुणानभिभूतञ्च । अत एव—न कृष्णः—अकृष्णः, तम्—**अकृष्णं**=निष्पापम् । तमोगुणानभिभूतं वा । कृष्णश्चासौ द्वैपायनश्च—कृष्णद्वैपायनः, तं—**कृष्णद्वैपायनं**=व्यासम् । **वन्दे**=नमस्करोमि । एवञ्च यन्महाभारतं श्रवणाञ्जलिभिरहमहमिकया रसिकैः पेयं, यच्च मोक्षाख्यामृततत्त्वं गीतासनत्सुजातीयादिभिरुपनयति, यस्य च कर्त्ता भगवान्सकलज्ञाननिधिः कृष्णद्वैपायनस्तन्मूलभूतस्यास्य नाटकस्य चतुर्वर्गप्रदत्वमैहिकामुष्मिकनिःश्रेयससाधकत्वं स्वतः सिद्धमिति नाटकप्रशंसैवैवमुपनिबद्धेति तत्त्वम् । आर्या जातिः ॥ ४ ॥

[भाषाटीका] कानरूपी दोनों (कटोरों) से पीने लायक महाभारत नामक अमृत जिन्होंने उत्पन्न किया है और जो रागद्वेष व आसक्ति तथा अज्ञान से रहित हैं ऐसे भगवान् वेदव्यासजी को हमारा प्रणाम है ॥ ४ ॥

१ 'अतृष्णम्'

(समन्तादवलोक्य)

तत्रभवतः परिषदग्रेसरान्विज्ञाप्यं नः किंचिदस्ति ।
कुसुमाञ्जलिरपर इव प्रकीर्यते काव्यबन्ध एषोऽत्र ।
मधुलिह इव मधुबिन्दून्विरलानपि भजत गुणलेशान् ॥ ५ ॥

सभ्यानभिमुखीकर्तुमाह—तत्रेति । तत्रभवतः=मान्यान् । परिषदग्रेसरान्=सभापुरोगमान् प्रति । सभामुख्यान् प्रति । नः=अस्माकम् । विज्ञाप्यं=निवेदनीयम् । विज्ञाप्यमेवाह—कुसुमेति । एषः=अयम् । काव्यस्य बन्धः—काव्यबन्धः=काव्यसङ्ग्रहः । इदं नाटकमिति यावत् । अपरः=द्वितीयः । अन्यः । कुसुमस्य अञ्जलिः—कुसुमाञ्जलिः । कुसुमाञ्जलिरिव = पुष्पाञ्जलिरिव । प्रकीर्यते=विस्तार्यते । प्रस्तूयतेऽस्माभिः ।

अत्र=अस्मिन् काव्यबन्धे । विरलानपि=स्वल्पानपि । गुणस्य लेशाः—गुणलेशाः, तान्—गुणलेशान्=गुणकणान् । [हे सभ्याः यूयं] भजत=गृह्णीत । सेवध्वम् । जुषध्वम् । यथा कुसुमाञ्जलौ भ्रमरा मधुबिन्दून्स्वल्पानपि गृह्णन्ति तथाऽस्मिन्काव्यबन्धे स्वल्पोऽपि गुणोरसश्चेद्भवद्भिरास्वादनीय इत्यर्थः। एतेनात्र

(चारों ओर देखकर—) माननीय सभासदों के प्रति मैं कुछ निवेदन करता हूँ कि—

पुष्पाञ्जलि की तरह मैं इस काव्यबन्ध (नाटक) को आपलोगों की सेवा मे उपस्थित करता हूँ । इसमें यदि कहीं २ भी गुण के कुछ अंश हों तो भी आप लोग उनका-भ्रमरों की तरह-आस्वादन करे । अर्थात् जैसे भ्रमर गण पुष्पों में स्थित यत्किञ्चित् थोड़े से मधु का भी

१ अयं पाठः क्वचिन्न । २ 'अलमतिप्रसङ्गेने'ति पाठः क्वचिदिहैव दृश्यते । ३ 'भवन्तः परिषदग्रेसराः । विज्ञाप्यं नः किंचिदस्ति' । 'तत्रभवन्तः' । ४ 'सर्वान्' 'परिषदग्रेसरान्' । ५ 'विज्ञापयामि' ।

यदिदं कवेर्मृगराजलक्ष्मणो भट्टनारायणस्य अभिनवकृतिं वेणीसंहारं नाम नाटकं प्रयोक्तुमुद्यता वयम् । तत्र च कवि-

नाटके स्वल्पा अपि गुणा भवद्भिर्ग्राह्या इत्युक्त्या कविना स्वाऽनौद्धत्यं प्रकटीकृतमिति वेदितव्यम् । आर्या जातिः ॥ ५ ॥

यत्=यस्मात् । इदं=प्रस्तूयमानम् । कवेः मृगराजलक्ष्मणः=सिंहचिह्नितस्य कवेः । कविसिंहस्येत्यर्थः । वीररसप्रधानकाव्यनिर्मातृत्वेन चाऽस्य कविसिंह इत्युपाधिः सर्वथाऽनुरूप एवेति तत्त्वविदो वदन्ति । एतेन सिंहचिह्नस्य शौर्यप्रधानेषु क्षत्रियेष्वेवोचितत्वाद्द्विजराजलक्ष्मण इति पाठं तथाऽर्थं च कल्पयन्तः परास्ताः।भटन्ति रटन्ति शास्त्रार्थमिति भट्टाः, भट्टेषु-विद्वत्सु नारायण इवेति, भट्टश्चासौ नारायण इति वा विग्रहः। तस्य । नारायणभट्टस्येत्यर्थः । एतेन कविनाम सूचितम् । अभिनवां-नवीनां, कृतिं=रचनाम् । वेण्या-लम्बमानजटीभूतद्रौपदीकेशरचनाविशेषेण संहारो दुर्योधनादीनां विनाशो यत्र तत्-वेणीसंहारम् । द्रौपदीवेणीसंहारमधिकृत्य कृतं वा । वेण्याः-असंस्कारजटीभूतानां केशानां संहारो मोक्षणं यत्र तत्-वेणीसंहारमिति वा विग्रहः ।

नाटकमिति । 'नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् । प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् । दिव्योऽथ दिव्याऽदिव्यो वा गुणवान्नायको मतः । एक एव भवेदङ्गी शृङ्गारो वीर एव वा'॥ इत्युक्तलक्षणं दृश्यकाव्यविशेषम् ।

प्रयोक्तुं=रङ्गस्थल्यां दर्शयितुम् । उद्यताः=कृतप्रयत्नाः । वयं=सूत्रधार-

आस्वादन करते हैं वैसे ही इस काव्यबन्ध के स्वल्प गुणों का भी आप लोग रसास्वादन करें ॥ ५ ॥

हम लोग कवियों में सिंह भट्टनारायणनामक कविकृत इस वेणीसंहार

१ 'तदिदम्'। २ 'रसकवेः'। ३ 'कृतिः' 'कृतिं'। ४ 'कृतिर्वेणीसंहारं नाम नाटकं तत्प्रयोक्तुमुद्यता'। ५ 'तदत्र च'।

परिश्रमानुरोधाद्वा, उदात्तकथावस्तुगौरवाद्वा, नवनाटकदर्शन-कुतूहलाद्वा भवद्भिरवधानं दीयमानमभ्यर्थये।

(नेपथ्ये)

भाव! त्वर्यतां त्वर्यताम्। एते खल्वार्यविदुराज्ञया पुरुषाः

प्रमुखा नटाः। तत्र च=तस्मिन्नाटके च। कवेर्भट्टनारायणस्य, 'परिश्रमे-नवकाव्यनिर्माणश्रमे-योऽनुरोधः=आदरः, तस्मात्। उदात्तम्=औदार्यादिगुणवत्, हृद्यम्। रुचिरम्। वीररसोर्जितमिति यावत्। यत् कथावस्तु=प्रकृतनाटक-कथाऽर्थः, कथाप्रधानं नायक इत्यर्थो वा। तत्र यद्गौरवं=समादरः, आह्लादः, श्रद्धातिरेकश्च, तस्माद्वा हेतोः। नवनाटकेति। वीररसाप्लुताभिनवनाटक-दर्शनकौतुकाद्वेत्यर्थः। भवद्भिः=सभ्यैः। अवधानम्=एकत्र चित्तसम्बन्धः, चित्तैकाग्रता। दीयमानं=क्रियमाणम्। अभ्यर्थये=याचे। प्रार्थये। 'अहं सूत्र-धारः' इति, 'स्थापकोऽहम्' इति वा शेषः।

नेपथ्ये-रङ्गभूमौ। नाट्यशालान्तर्वर्त्तिजवनिकाऽऽवृते प्रदेशे इति यावत्। 'नेपथ्यं रङ्गभूमौ स्यान्नेपथ्यं तु प्रसाधनम्' इति विश्वः। 'इत्थं श्रूयते' इति शेषः। इदं कविवाक्यम्। श्रूयमाणमेव निर्दिशति-भावेति। भाव=मान्य। भाव-हे विद्वन्निति वा। 'भावो विद्वान्' इत्यमरः। त्वर्यतां=त्वरा कार्या। सम्भ्रमे

नाटक का अभिनय करना चाहते हैं, उसमें कवि के परिश्रम को देखकर, या उत्कृष्ट वीररसपूर्ण कथा के प्रति अनुराग से, या नवीन नाटक के देखने की इच्छा से ही आपलोग सावधानतापूर्वक इसका निरीक्षण करें यह प्रार्थना हम करते हैं।

[नेपथ्य में]

भाव! (भाऊ या भाई) जल्दी करिए जल्दी करिए। देखिए-आर्य-

१ 'क्वचिन्न'।

सकलमेव शैलूषजनं व्याहरन्ति—'प्रवर्त्त्यन्तामपरिहीयमानं[1]-मातोद्यविन्यासादिका विधयः। प्रवेशकालः किल तत्रभगवतः, पाराशर्यनारदतुम्बरुजामदग्न्यप्रभृतिभिर्मुनिवृन्दारकैरनुगम्य-मानस्य, भरतकुलहितकाम्यया[2] स्वयं प्रतिपन्नदौत्यस्य[3], देवकी-

---

द्वित्वम्। एते खलु=एते हि। खलु शब्दो वाक्यालङ्कारे वा। आर्यः–पूज्यः, स चासौ विदुरश्च–आर्यविदुरः। तस्याज्ञया=आदेशेन। शासनेन। पुरुषाः= राजपुरुषाः। **शैलूषजनं**=नटवृन्दम्। **व्याहरन्ति**–कथयन्ति। कथनमेवानुव-दति–**प्रवर्त्त्यन्तामिति**।

'शैलूषा इत्यपि नटा' इत्यमरः। **अपरिहीयमानम्**–अपरित्यज्यमानं यथा स्यात्तथा। निरन्तरमिति यावत्। आतोद्यानां विन्यास आदिर्येषान्ते **आतोद्यविन्यासादिकाः** = वीणा वादिनादिकाः। 'चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्' इत्यमरः। **विधयः**=अनुष्ठानानि। कार्याणीति यावत्। नृत्यगीतादिविधय आदिशब्दग्राह्याः। किमर्थमेतदत आह–**प्रवेशेति**। किलेति निश्चये। **पाराशर्यः**=व्यासः। **नारद–तुम्बुरू**–मुनिविशेषौ। **जामदग्न्यः** = **परशुरामः**। मुनयो वृन्दारका इव मुनिवृन्दारकाः तैः–**मुनिवृन्दारकैः**=मुनिश्रेष्ठैः। 'वृन्दारकौ रूपिमुख्यौ' इत्यमरः। **अनुगम्यमानस्य**=अनुस्रियमाणस्य। भरतानां कुलं-भरतकुलं, तस्य यद्धितं तस्य काम्या–इच्छा-तया **भरतकुलहितकाम्यया**= युधिष्ठिरदुर्योधनादिवंशमङ्गलेच्छया। **स्वयम्**=आत्मना। दूतस्य भावः कर्म वा दौत्यम्। प्रतिपन्नं स्वीकृतं=दौत्यं येनासौ तस्य **प्रतिपन्नदौत्यस्य**= स्वीकृतदूतकर्मणः। देवक्याः **सूनुः**–पुत्रः, तस्य **देवकीसूनोः**=भगवतो

विदुर जी की आज्ञा से ये राजा के सिपाही सभी नटों को यह हुक्म सुना रहे हैं–कि आप लोग गाना–बजाना प्रारम्भ करिए। और रुकिए मत। निरन्तर गाते बजाते जाइए। क्योंकि–व्यास नारद तुम्बुरु परशुराम

---

१ क्वचिन्न। २ 'काङ्क्षया'। ३ 'दूत्यस्य'।

सूनोर्देवस्य[1] चक्रपाणेर्महाराजदुर्योधनशिबिरसंनिवेशं[2] प्रति प्रस्थातुकामस्य' इति।

सूत्रधारः—(आकर्ण्य सानन्दम्) अहो नु खलु भोः !, भगवता सकलजगत्प्रभव[3]स्थितिनिरोधप्रभविष्णुना विष्णुना-

वासुदेवस्य। 'सूनुः पुत्रकनिष्ठयोः' इति विश्वः। देवस्य=सकलनियन्तुर्दिव्यानुभावस्य। चक्रं पाणौ यस्यासौ चक्रपाणिः, तस्य चक्रपाणेः=चक्रायुधस्य। श्रीकृष्णस्य। महाराजश्चासौ दुर्योधनश्च महाराजदुर्योधनः, तस्य यः शिविरसन्निवेशः=सैन्यविन्यासः। सेनावस्थानभूः। महाराजदुर्योधनशिविरसंनिवेशः, [छावनी], तं प्रति=महाराजसुर्योधनसेनासंनिवेशम्प्रति। प्रस्थातुकामस्य=प्रयातुमनसः। प्रवेसकालः=आगमनकालः। प्रवेशवेलेयमिति पूर्वेणास्य सम्बन्धः। 'इति='इति व्याहरन्ति राजपुरुषा' इति च पूर्वेणान्वयः। एतेन भगवान् श्रीकृष्णो भ्रातृयुद्धनिवारणाय गृहीतदूतभावो युधिष्ठिरसेनासंनिवेशात्प्रचलितुं सन्नद्ध इति कथावस्तु सूचितम्। अयि नटाः ! संनिहित एव भवेद्भगवान् श्रीकृष्णो दुर्योधनं प्रति गन्तुमिति शुभेऽस्मिन्समये सर्वैरेव नटैर्मङ्गलगानादिकमारम्भणीयमिति आर्यविदुरस्याज्ञां युधिष्ठिरपक्षनिविष्टा राजपुरुषाः श्रावयन्तीति भावः। यद्वा प्रस्थातुमनसः श्रीकृष्णस्य [तद्भूमिकाभृतो नटस्य] रङ्गस्थलप्रवेशकाल इत्यर्थः। आकर्ण्य=नेपथ्ये शब्दं श्रुत्वा। सानन्दं=सहर्षं यथा स्यात्तथा। 'पारिपार्श्विकं ब्रूते' इति शेषः। 'अहो नु खलु भोः' इति निपातसमूहः—अत्याश्चर्यद्योतकः। सकलस्य=निखि-

प्रभृति मुनि श्रेष्ठों से पुत्र अनुगम्यमान चक्रपाणि भगवान् श्रीकृष्णचन्द्र भरतकुल (कुरुपाण्डव वंश) की हित कामनासे स्वयं दूतभाव ग्रहण कर दुर्योधन की सेना के पडाव पर जारहे हैं। उनके—जाने का समय अब हो गया है।

सूत्रधार—(सुनकर बडे आनन्दसे) वाह ! जगत् की उत्पत्ति

१ कश्चिन्न। २ 'शिबिरम्प्रति'। ३ 'दुत्पत्ति'।

ऽद्याऽनुगृहीतमिदं भरतकुलं, सकलं च राजकमनयोः कुरुपाण्डवराजपुत्रयोराहवकल्पान्तानलप्रशमहेतुनाऽनेन स्वयं सन्धिकारिणा कंसारिणा दूतेन। तत्किमिति पारिपार्श्विक !

लस्य, जगतः=संसारस्य, यः-प्रभवः-उत्पत्तिः, स्थितिः-रक्षणम्, निरोधः-लयः। विनाशः। तेषु प्रभविष्णुना=प्रभुणा। समर्थेन। विष्णुना=नारायणेन। श्रीकृष्णेन। इदं=सकलमेतत्। भरतकुलं=कौरवपाण्डववंशः। सकलञ्च=निखिलञ्च। राज्ञां समूहः-राजकं=राजसमूहः। 'राजचक्र'मिति पाठेऽपि राजसङ्घ इत्यर्थः। कुरुश्च पाण्डवश्च कुरुपाण्डवौ, तयोः राजपुत्रौ कुरुपाण्डवराजपुत्रौ, तयोः=दुर्योधनयुधिष्ठिरयोः। आहवः—युद्धम्। स एव क्षयकरत्वात्—कल्पान्तस्तस्य=प्रलयस्य, अनलः-वह्निः-तस्य प्रशमः-उपशान्तिः, तस्य हेतुना=कारणभूतेन। स्वयम्=आत्मनैव, सन्धिकारिणा=सन्धिकरणप्रवृत्तेन। 'स्वयं प्रतिपन्नदौत्येन सन्धिकारिणा' इति क्वाचित्कः पाठस्तु न शोभनः,सन्धेर्भीमाद्यनुमतत्वाऽभावात्। सन्धिं करोति तच्छीलः-सन्धिकारी, तेन। कंसस्य अरिः-शत्रुः—कंसारिः। तेन-कंसारिणा=श्रीकृष्णेन। तत्=तस्मात्। ईदृशे मङ्गलसमये। किमिति=कुतो हेतोः ?। हे पारिपार्श्विक=हे नटमुख्य। (सूत्रधारस्यानुचरः पारिपार्श्विकः)।

'सूत्रधारस्य पार्श्वे यः प्रकरोत्यमुना सह।
काव्यार्थसूचनाऽऽलापं स भवेत्पारिपार्श्विकः' ॥

—इति भरतोक्तो नटमुख्यः सूत्रधारसहचरः पारिपार्श्विकः।

रक्षा व प्रलय में स्वतन्त्र कंसारि भगवान् श्रीकृष्णचन्द्र नें किया कुरु-पाण्डव वंश के इन दुर्योधन व युधिष्ठिर नामक दोनों राजपुत्रों के युद्धरूपी-प्रलयाग्नि को शान्त करने के लिए स्वयं दूतभाव स्वीकारकर भरतकुल व सम्पूर्ण राजा लोगों पर महान् अनुग्रह प्रदर्शन किया है।

१ 'राजकम्'। 'राजन्यकम्'। २ 'प्रशमन'। ३ 'स्वयंप्रतिपन्नदौत्येन' पा०।

नारम्भयसि कुशीलवैः सह सङ्गीतकमेलकम् ? ।

(प्रविश्य ।)

पारिपार्श्विकः—भवतु । आरम्भयामि । कतमं समयमाश्रित्य गीयताम् ? ।

सूत्रधारः—नन्वमुमेव तावच्चन्द्रातप-नक्षत्र-ग्रह - क्रौञ्च-हंसकुल-सप्तच्छद-कुमुद-कोकनद-काश-कुसुम-परागधवलित-

नारम्भयसि=किं स्ववर्ग्यैर्नटैर्न प्रवर्त्तयसि ? । सङ्गीतकस्य मेलकं सङ्गीतकमेलकं=सङ्गीतसमारोहम् । त्वरितं तथा कुर्वित्याशयः ।

कुशीलवैः=नटैः । 'भरतास्तु कुशीलवाः' इत्यमरः । प्रविश्य=पटाक्षेपेण स्वयं प्रविश्य । आहेति शेषः । पटाक्षेपेण पात्रप्रवेशे प्रविश्येत्युच्यते इति नाटकसमयः । भवतु=अस्तु । भवदुक्तमनुतिष्ठामीत्यर्थः । समयं=वसन्तादिकम् । 'कथ्यता'मिति शेषः । ननु—इत्यवधारणे । 'प्रश्नावधारणाऽनुज्ञाऽनुनयाऽऽमन्त्रणे ननु' इत्यमरः । चन्द्रस्यातपः—चन्द्रातपः, चन्द्रातपश्च, नक्षत्राणि च, क्रौञ्चाश्च, हंसकुलानि च सप्तच्छदाश्च कुमुदानि च कोकनदानि च काशाश्च कुसुमानि च ('काशकुसुमानि चेति वा) तानि

हे पारिपार्श्विक ! तब क्यों नहीं आप भी नटलोगों के साथ गाना बजाना प्रारम्भ करते हैं ? ।

पारिपार्श्विक—(सूत्रधार का प्राइवेट सेक्रेटरी)

(प्रविष्ट होकर) जो आज्ञा ! संगीत प्रारम्भ करता हूँ । कहिए किस समय (ऋतु) को लेकर गाना प्रारम्भ किया जाए ? ।

सूत्रधार—इसी शरदृतु का आश्रयणकर । जिसने चन्द्रिका, नक्षत्रगण, क्रौञ्च पक्षी, हंसकुल, सतौने के पुष्प, कुमुद (कोई), पुण्डरीक

१ 'सङ्गीतकम्' पा० । २ 'कम्' । ३ 'सङ्गीतकमारम्भयामि' । ४ क्वचिन्न ।

५ 'कोकनद' इत्येतस्य स्थाने 'पुण्डरीक' इति पाठः क्वचिद्दृश्यते ।

२

दिङ्मण्डलं स्वादुजलजलाशयं शरत्समयमाश्रित्य प्रवर्त्त्यतां सङ्गीतकम्। तथा ह्यस्यां शरदि,—

सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।
निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥ ६ ॥

चन्द्रातपनक्षत्रक्रौञ्चहंसकुलसप्तच्छदकुमुदकोकनदकाशकुसुमानि । तेषां परागः, तेन धवलितं दिङ्मण्डलं येनासौ तं तथोक्तम् । चन्द्रिकया, अश्विन्यादिनक्षत्रैश्च, बुधगुर्वादिग्रहैश्च, क्रौञ्चादिभिः पक्षिभिः, सप्तच्छद-कैरव-रक्तकमल-काशपुष्पादीनां परागैश्च मधुरजलजलाशयं=मधुरजलयुक्तजलाशयशोभितम् । शरदः समयः, तं-शरत्समयं=शरत्कालम् । आश्रित्य=अधिकृत्य । 'रक्तोत्पलं कोकनद'मित्यमरः । 'सिते कुमुदकैरवे' इत्यमरः । शरत्समयमेव वर्णयति-तथाहीति । हि=यतः । यथा मया पूर्वमुक्तं तथैवेत्यर्थः ।

'श्लेषच्छायोपदेशैश्च समुद्दिष्टं विसर्पति ।
यत्फलोदयपर्यन्तं तद्बीजमिति कीर्त्तितम्' ॥

इति भरतोक्तं प्रबन्धप्रतिपाद्यं बीजं श्लेषेण सूचयन्नटः स्तौति—सत्पक्षा इति । सन्तः पक्षा येषान्ते—सत्पक्षाः=श्रेष्ठपक्षयुक्ताः । दुर्योधनादिपक्षे—बलवत्सैन्यवन्तश्च । मधुरा गिरो येषान्ते मधुरगिरः=कलालापाः, मधुरवाचश्च । प्रसाधिता भूषिता आशा दिशा यैस्ते-प्रसाधिताशाः=विभूषितदिङ्मण्डलाः । दुर्योधनादिपक्षे-प्रकर्षेण साधिता दिशः प्रत्याशा वा यैस्ते प्रसाधिताशाः=

(श्वेत कमल) काश आदि पुष्पों के पराग से दिशाओं के मण्डलको सफेद कर दिया है, जिस ऋतु में मीठे जल से जलाशय भरे हुए रहते हैं,-(उसी ऋतु के वर्णन में) सङ्गीत का प्रारम्भ करो। अर्थात् शरद ऋतु के वर्णन में ही कुछ गान प्रारम्भ करो।

क्योंकि—इस शरद ऋतु में—जैसा कि मैने पहिले ही कहा है—

१ गगनदिङ्मण्डलम्' ।

पारिपार्श्विकः—(ससम्भ्रमम्) भाव ! शान्तं पापम् । प्रतिहतममङ्गलम् ।

स्वायत्तीकृतसकलदिग्विभागा आशान्विताश्च । मदेन उद्धताः मदोद्धताः, मदोद्धता आरम्भा येषान्ते मदोद्धतारम्भाः=हर्षतरलितव्यापाराः । हर्षचञ्चलगतयः । दुर्योधनादिपक्षे—मदोद्धतारम्भाः = गर्वोद्धुरप्रयत्नाः । उद्धतव्यवहाराः । धार्त्तराष्ट्राः—सितेतरचञ्चुचरणान्विता हंसविशेषाः । 'धार्त्तराष्ट्राः सितेतरैः' इत्यमरः । पक्षे—धृतराष्ट्रस्यापत्यानि धार्त्तराष्ट्राः=दुर्योधनादयश्च । कालवशात्=शरन्माहात्म्यात् । समयानुसारेण । पक्षे—कालवशात्=मृत्युवशात् । मेदिनीपृष्ठे=भूतले । निपतन्ति=मानसं नाम सरोवरं परित्यज्याऽऽयान्ति । दुर्योधनादिपक्षे—निपतन्ति=नितरां पतन्ति । म्रियन्ते । आर्या वृत्तम् ।

पारिपार्श्विकः सूत्रधारकृतं शरत्समयवर्णनं श्रुत्वाऽऽशङ्किताऽमङ्गलः ससम्भ्रमं प्राह—भावेति । ससम्भ्रमं=सोद्वेगम् । सत्वरम् । क्रियाविशेषणमेतत् । प्राहेति शेषः । भाव=विद्वन् । श्रेष्ठ । शान्तं पापम्=नैवं पापवाक्यं वाच्यम् । आस्तां तावदित्यर्थः । 'शान्तं पापमनाकाङ्क्षे' इति भरतः । अमङ्गलम्=अशिवम् । अकल्याणञ्च । भवदुक्त्या सम्भावितममङ्गलञ्चेत्यर्थः । प्रतिहतं=प्रतिहतं भवतु । विनश्यतु । अनिष्टशान्तिर्भवत्विति यावत् । 'प्रतिहतं—प्रतिघातेन अनवधानेन भवतोच्चारित'मित्यर्थ इति केचित् ।

सुन्दर पाँख वाले (पक्ष में-प्रबल सेना वाले), मीठी बोली बोलने वाले, दिशाओं को अलङ्कृत करने वाले (पक्ष में—दसों दिशाओं पर राज्य करने वाले), मद से मस्त (पक्ष में—उन्मत्त) धार्त्तराष्ट्र (हंस या दुर्योधन आदि) समय (शरदृतु) के प्रभाव से (मानसरोवर से) पृथ्वी पर आकर गिर रहे हैं । (दुर्योधन पक्ष में दुर्योधन आदि कालवश मृत्यु को प्राप्त हो भूतलपर गिर रहे हैं) ॥ ६ ॥

पारिपार्श्विक—(घबड़ाकर) हैं हैं ! भाव ! रहने दीजिए, रहने दीजिए । भगवान् मङ्गल करें । आप ऐसा मत कहिए ।

सूत्रधारः—(सवैलक्ष्य[1]स्मितम्) मारिष ! शरत्समयवर्णनाशंसया हंसा 'धार्तराष्ट्रा' इति व्यपदिश्यन्ते [[3]तत्किं शान्तं पापं प्रतिहतममङ्गलमिति ?।]

पारिपार्श्विकः-भाव[2] ! न खलु न जाने। किंत्वमङ्गलाशंसयाऽस्य वो वचनस्य-यत्सत्यं-कम्पितमिव मे हृदयम्।

सवैलक्ष्यस्मितम्=सलज्जं, सस्मितञ्च। प्राहेति शेषः। **मारिष**=आर्य। 'किञ्चिन्न्यूनस्तु मारिषः' इति भरतः। 'आर्यस्तु मारिषः' इत्यमरः। **शरत्समयेति**। शरदृतुवर्णनप्रस्तावेन मया हंसा एव धार्त्तराष्ट्रपदेन व्यपदिश्यन्ते=अभिधीयन्ते। तत्किं पापं यस्य शान्तये शान्तं पापमित्यादि वदसीति प्रश्नः।

न खलु न जाने=न जाने इति न खलु। किन्तु जानाम्येव। भवता शरद्वर्णने हंसा एव धार्त्तराष्ट्रपदेनोच्यन्ते इति जानामि। **किन्तु**=परन्तु। **अमङ्गलस्य**=दुर्योधनादिधार्त्तराष्ट्रपतनरूपार्थस्य, **आशंसया**=सम्भावनया। आशङ्कया। तत्सूचकतया। **वः**=युस्माकम्। **वचनस्य**-'निपतन्ति धार्त्तराष्ट्रा' इत्यस्य पूर्ववाक्यस्य। **यत्सत्यम्**- नाऽसम्भाव्यमेतदित्यर्थः।

यत्सत्यम्-इदं सत्यं यदित्यर्थः। 'यत्सत्यं नाऽसम्भाव्येऽर्थे' इति भरतः। **कम्पितमिव**=अमङ्गलाशङ्कया त्रस्तमिव। चञ्चलमिव। **हृदयं**=मानसम्।

सूत्रधार—(कुछ लज्जितसा होकर, हंसता हुआ) आर्य ! मैंने तो शरदृतु के वर्णन प्रसङ्ग में हंसों को ही धार्त्तराष्ट्र कहा है, न कि दुर्योधन आदि को, अतः आप ऐसा क्यों घबडा गए हैं, और कौन ऐसा पाप हुवा है जिसके लिए आप 'शान्तं पापं' 'भगवान् मङ्गल करें' ऐसा कहरहे हैं ?।

पारिपा०—भाव ! आप के हार्दिक भाव को तो मैं जानता हूँ। परन्तु आपके कथन से जो दूसरा अर्थ भी [दुर्योधन आदि का विनाश] प्रतीत होता है उसे समझ कर ही-सच मानिएगा-मेरा तो हृदय काँप उठा है।

---

१ 'सवैलक्ष्यं' पा०। २ कश्चिन्न।

३ 'न तु राजपुत्रास्तत्किं प्रलपसि शान्तं पापं प्रतिहतममङ्गलमिति' पा०।

सूत्रधारः—**मारिष ! ननु सर्वमेवेदानीं प्रतिहतममङ्गलं स्वयं प्रतिपन्नदौत्येन सन्धिकारिणा कंसारिणा । तथा हि—**

निर्वाणवैरदहनाः प्रशमादरीणां

नन्दन्तु पाण्डुतनयाः सह माधवेन ।

केचित्तु—असम्भावितकम्पनमपि मद्धृदयं भवद्वचनश्रवणेन कम्पितमिवेत्येवं योजयन्ति सत्सत्यमित्यस्याऽसम्भावनीयार्थकतामभ्युपगच्छन्तः ।

ननु=निश्चयेन । **सर्वमेव**=सर्वविधमेव । **अमङ्गलम्**=अशिवम् । दुर्योधनवधाशङ्कादिकम् । **प्रतिहतं**=निरस्तम् । ध्वस्तम् । दूरीभूतमेव । प्रतिपन्नदौत्येन=अङ्गीकृत्यदूतकर्मणा । **कंसारिणा**=श्रीकृष्णेन ।

कथं भगवताऽमङ्गलं निरस्तमत आह-**निर्वाणेति** ।

[**अन्वयः**] अरीणां प्रशमात् निर्वाणवैरदहनाः पाण्डुतनयाः माधवेन सह नन्दन्तु । च रक्तप्रसाधितभुवः क्षतविग्रहाः सभृत्या धृतराष्ट्रसुताः स्वस्था भवन्तु ।

[व्याख्या] **अरीणां**=शत्रूणाम् । दुर्योधनादीनाम् । **प्रशमात्**=उपशमात् । शान्तत्वात् । अनुकूलभावग्रहणात् । निर्वाणो वैरमेव दहनो येषां ते-**निर्वाणवैरदहनाः**=उपशान्तवैराग्नयः । निवृत्तद्वेषभावाः । **पाण्डुपुत्राः**=पाण्डवा युधिष्ठिरादयः । **माधवेन सह**=श्रीकृष्णेन साकम् । **नन्दन्तु**=प्रसीदन्तु । आनन्दमनु-

सूत्रधार—मारिष ! घबड़ाओ मत । सभी प्रकार के अमङ्गलों की आशङ्काओं को तो भगवान् श्रीकृष्णनें ही सन्धिकराने के लिए दूत भाव (पाण्डवों का दूत बनकर दुर्योधन के पास जाना) स्वीकार कर दूर कर दिया है ।

क्योंकि—शत्रुओं के शान्त हो जाने से जिनकी वैर की अग्नि शान्त (बुझ) गई है ऐसे पाण्डव गण भगवान् श्रीकृष्ण के साथ आनन्द करें । और अनुराग से वशीभूत किया है पृथ्वी मण्डल जिन्होंने, तथा दूर

१ कचिन्न ।

रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥ ७ ॥

भवन्तु । च=पुनः । रक्तेभ्यः—अनुरक्तेभ्यः—प्रसाधिता दत्ता भूर्यैस्ते रक्तप्रसाधित—भुवः=सानुरागभृत्यप्रदत्तभूभागाः । भृत्यवितीर्णपारितोषिकाः । रक्तेन—अनुरागेण प्रसाधिता स्वायत्तीकृता भूर्यैस्ते इत्यर्थो वा । स्नेहवशीकृतलोका इति यावत् । क्षतो विग्रहो येषान्ते क्षतविग्रहाः=अपगतयुद्धाः । दूरीभूतयुद्धभयाः । सभृत्याः=भृत्यपरिवृताः । कुरुराजसुताः=धृतराष्ट्रसुता दुर्योधनादयः । स्वस्थाः=सुस्थिताः । प्रसन्नाः । प्रकृतिस्थाः । सुखिनः । भवन्तु=तिष्ठन्तु । कथाबीजसूचनपक्षे तु—

अरीणां=दुर्योधनादीनां । प्रशमात् विनाशात्, निर्वाणवैरदहनाः=शान्तवैराग्नयः । पाण्डुपुत्राः श्रीकृष्णेन सह नन्दन्तु । सभृत्याः कुरुराजसुताः—दुर्योधनादयस्तु—रक्तप्रसाधितभुवः=रुधिराऽलङ्कृतयुद्धभुवः । क्षतविग्रहाश्च=क्षतशरीराः, विनष्टदेहाः सन्तः, स्वस्थाः=स्वर्गस्थाः, मृता वा भवन्त्वित्यर्थः श्लेषेण बोध्यः । 'विग्रहः समराङ्गयोः' इति धरणिः । 'सुस्थिते च मृते स्वस्थः' इति विश्वः ।

[श्लेषेण कथावस्तुनः सूचनादिदं श्लेषगण्डाख्यं नाटकाङ्गमुपक्षिप्तम् । तदुक्तं भरतेन—'द्व्यर्थता यत्र वाक्यानां श्लेषेनाऽपि प्रतीयते । श्लेषभङ्गीगतो योऽर्थो लेशगण्डः स उच्यते' इति । पताकास्थानकं चैतत् । 'वचः सातिशयश्लिष्टं नानाबन्धसमन्वितं । पताकास्थानमुद्दिष्टम्—'इति दर्पणोक्तेः ।] वसन्ततिलका वृत्तम् । 'उक्ता वसन्ततिलका तभजा जगौ गः' इति तल्लक्षणात् ॥७॥

हो गया है युद्ध का भय जिनका ऐसे कुरुराज के पुत्र दुर्योधन आदि भी अपने नौकर चाकरों के साथ सुखसे रहें ।

[दूसरा अर्थ-शत्रुओं के मारे जाने से जिनकी वैर की अग्नि शान्त हो गई है ऐसे पाण्डुपुत्र—कृष्ण के साथ आनन्द करें । और कुरुराज

१ अत्र—'खर्परे शरी'त्यनेन वा विसर्गलोपो द्रष्टव्यः ।

(नेपथ्ये । साधिक्षेपम्)

आः पाप ! दुरात्मन् ! वृथामङ्गलपाठक ! शैलूषापसद !,
लाक्षागृहाऽनल-विषान्न-सभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।

नेपथ्ये-जवनिकाभ्यन्तरप्रदेशे । 'इत्थं श्रूयते' इति शेषः । यच्छ्रूयते तदेवाह-**साधिक्षेपमिति** । सभर्त्सनमित्यर्थः । सनिन्दमिति वा । भीमसेन आहेति शेषः । **आ** इति कोपे, आक्षेपे, पीडायाञ्च । 'आस्तु स्यात्कोपपीडयोः' इत्यमरः । **पाप**=पापात्मन् । **दुरात्मन्**=दुष्टात्मन् । **वृथामङ्गलपाठक**=मुधैव मङ्गलश्लोकपाठक ! वस्तुतोऽमङ्गलपाठक । **शैलूषापसद**=नटाधम । 'शैलूषा इत्यपि नटाः' इत्यमरः । 'निहीनोऽपसदो जाल्मः' इत्यमरः ।

लाक्षेति । लाक्षाप्रधानं गृहं लाक्षागृहं, तस्मिन् लाक्षागृहे योऽनलः, लाक्षागृहानलश्च विषान्नं च सभाप्रवेशश्च लाक्षागृहाऽनल-विषान्न-सभाप्रवेशाः, **तैः**=जतुगृहाग्नि-विषमिश्रिताऽन्न-कपटद्यूतैः । **नः**=अस्माकम् । **प्राणेषु**=असुषु । जतुगृहाग्निना विषान्नेन प्राणेषु । सभाप्रवेशेन 'च-**वित्तनिवहेषु**=नो धनसञ्चयेषु च । **प्रहृत्य**=प्रहारं कृत्वा । किञ्च-परिधीयते यत्परिधानं, वस्त्रं, पाण्डवानां या वधूः तस्या यत्परिधानञ्च केशाश्च-पाण्डववधूपरिधानकेशाः, तान्-पाण्डव-

धृतराष्ट्र के पुत्र—अपनें नौकरों के साथ रुधिर से पृथ्वी को लाल करते हुए क्षतविक्षत शरीर हो मृत्यु को प्राप्त हों) ॥ ७ ॥

(नेपथ्य में डपटते व बुरा भला कहते हुए)

अरे ! पापी ! दुष्ट ! नीच नट ! तूँ झूठे मङ्गलश्लोकों का ही पढने वाला है । क्योंकि—

जिन धार्त्तराष्ट्रों (कौरवों) नें लाक्षागृह में आग लगाकर, जहर के बने लड्डू आदि खिलाकर हमारे प्राणोंपर आघात किया है, जिन्होंने जूवा खेलकर हमारा सब धन छीन लिया है, जिन्होंने पाण्डवों

१ क्वचिन्न । २ 'वित्तनिवहेषु' ।

आ[1]कृष्य पाण्डववधूपरिधानकेशा-
न्स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः ! ॥ ८ ॥

सूत्र[3]धारः—(आकर्ण्य सभयं नेपथ्याभिमुखमवलोक्य च)

पारिपार्श्विकः—भावं !, कुत एतत् ? ।

सूत्रधारः-(पृष्ठतो विलोक्य सभयम्) अये ! कथमयं वासुदेव-

कलत्रद्रौपदीपरिधानीयवसनकेशान् । आकृष्य=अभिमृष्य । तेषामाकर्षणं कृत्वा । धार्त्तराष्ट्राः=धृतराष्ट्रसुता दुर्योधनादयः । मयि=भीमसेने । जीवति= विद्यमाने । प्राणान्दधाने सति । स्वस्थाः=सुखिनः । भवन्तु=भवन्तु किम् ? । भविष्यन्ति किम्, नैव भविष्यन्तीत्यर्थः । यद्वा 'स्वस्था भवन्तु'इति पूर्वश्लोकोक्त-स्यानुवादोऽयम् । एवंविधा धार्त्तराष्ट्रास्त्वया किं 'स्वस्था भवन्त्वि'त्युच्यन्ते इति सासूयमुक्तिरिति तत्त्वम् । भवन्तीति पाठे तु काकुः । न भवन्तीत्यर्थः । वसन्ततिलका वृत्तम् ॥ ८ ॥

आकर्ण्य=नेपथ्ये कथ्यमानमिदं भीमसेनवाक्यं श्रुत्वा । नेपथ्याभिमुखं= नेपथ्यं प्रति । सभयं=ससाध्वसं यथा स्यात्तथा । अवलोक्य=दृष्ट्वा । स याव != त्किञ्चिद्वक्ति तावदेव मध्ये पारिपार्श्विकः सूत्रधारं पृच्छति–भावेति । भाव != विद्वन् । एतत्=इदं वाक्यम् । कुतः=कस्मात् ।

अये–इति निपातः कार्यान्तरव्यासङ्गादिनाऽनाकलितस्याऽऽकलने सम्भ्रमं

की प्यारी स्त्री द्रौपदी के वस्त्र व केश खींचे हैं वे धार्त्तराष्ट्र क्या मेरे जीते जी सुखसे रह सकते है ? । कभी–नहीं ॥ ८ ॥

सूत्रधार—यह सुनकर डरता हुआ सा नेपथ्य की ओर (जहाँ से शब्द आ रहा हे उधर ही) देखता है—

परिपा०-(घबडाकर !) भाव ! यह शब्द कहाँ से आरहा है ? ।

सूत्रधार–(पीछे देखकर डरता हुआ) हैं ! यह क्या ?, भगवान्

---

१ 'आकृष्टपाण्डववधूपरिधानकेशाः' । २ 'भवन्ति' । ३ 'सूत्रधारपारिपार्श्विकौ—आकर्ण्य ।' 'आकर्णयतः' । ४ 'आः कुत एतत्' । ५ क्वचिन्न ।

गमनात्कुरुसन्धानममृष्यमाणः पृथुललाटतटघटितविकट-भ्रुकुटिना दृष्टिपातेनाऽऽपिबन्निव नः सर्वान्सहदेवेनानुगम्यमानः क्रुद्धो भीमसेन इत एवाऽभिवर्तते । तन्न युक्तमस्य पुरतः स्थातुम् । [तदित आवामन्यत्र गच्छावः] । (इति निष्क्रान्तौ ।)

प्रस्तावना

द्योतयति । 'अयं चित्रेऽवधारणे'इति भरतः । **वासुदेवगमनात्**=कृष्णगमनात् । प्रतिपन्नदौत्यस्य श्रीकृष्णस्य हस्तिनापुरं प्रति गमनात् । कुरूणां सन्धानं **कुरुसन्धानं**, तत्=कुरुभ्यो दुर्योधनादिभ्यः सन्धिम् । 'सम्भाव्यमान'मिति शेषः । **अमृष्यमाणः**=असहमानः । पृथु च तत् ललाटतटं च पृथुललाटतटं, तस्मिन् घटिता विकटा भ्रुकुटिर्यस्मिन्नसौ पृथुललाटतटघटितभ्रुकुटिः, तेन=विशालभालस्थलप्रान्तघटितकुटिलभ्रूभङ्गेण । **दृष्टिपातेन** = नेत्रनिक्षेपेण । अवलोकनेन । **नः** = अस्मान् । **सर्वान्** = सकलान् नटान् । **आपिबन्निव**=आचामन्निव । **सहदेवेन**=स्वानुजेन माद्रीपुत्रेण । **अनुगम्यमानः**=अनुस्रियमाणः । **क्रुद्धः**=नितरां कुपितः । **भीमसेनः** = वृकोदरः । **इत एव**=अस्मिन्नेव प्रदेशे । **अभिवर्त्तते**=आयाति । तिष्ठतीति वा । **तत्**=तस्मात् । तस्य क्रुद्धत्वात् । **अस्य पुरतः**=भीमसेनाग्रतः । **स्थातुम्**=अवस्थातुम् । **न युक्तं**=नोचितम् । **तत्**-तस्मात् । **इतः**=अस्मात्प्रदेशात् । **आवां**=सूत्रधारपारिपार्श्विकौ । **अन्यत्र**=अन्यस्मिन्प्रदेशे । **इति**=इत्युक्त्वा । **निष्क्रान्तौ**=रङ्गान्निर्गतौ । इतीयं कवेरुक्तिः ।

प्रस्तावना=इति प्रस्तावना । समासमामुखमित्यर्थः । प्रस्तावना च

श्रीकृष्ण दूत बनकर शान्ति की चेष्टा करने दुर्योधन के पास गए हैं यह जान अप्रसन्न हो भृकुटिको चौडे ऊलाट के कोने तक चढाकर, भीषण मुख बनाकर हम लोगों को इस प्रकार घूरते हुए मानो सबको खा जाना चाहते हैं–ऐसे ये क्रुद्ध भीमसेन–जिसके पीछे २ सहदेव भी हैं–इधर

---

१ 'विकटवीनाशतोरणत्रिशूलायमानभीषणभ्रकुटिरापिबन्निव नः सर्वान्दृष्टिपातेन' । पा० । २ 'भृकुटिना' । ३ क्वचिन्न ।

(ततः प्रविशति सहदेवेनानुगम्यमानः क्रुद्धो भीमसेनः)।

भीमसेनः—आः[1] पाप ! दुरात्मन् ! वृथामङ्गलपाठक ! शैलूषापसद ! । ('लाक्षा[2]गृहानल–' (८) इत्यादि पुनः पठति ।)

सूत्रधारेण सह तदनुचराणामालापः । तदुक्तं नाट्यशास्त्रे—

'सूत्रधारेण सहिताः संलापं यत्र कुर्वते ।
नटी विदूषको वाऽपि पारिपार्श्विक एव वा ॥
आमुखं नाम तस्यैव सैव प्रस्तावना मता' ॥ इति ।

इयं च प्रस्तावना कथोद्धातरूपा । सूत्रधारोक्तवाक्यार्थमादाय भीमसेनस्य प्रवेशात् । तथाच साहित्यदर्पणे–'सूत्रधारस्य वाक्यं वा समादायाऽर्थमेव वा । भवेत्पात्रप्रवेशश्चेत्कथोद्धातस्तदोच्यते ।' इति ।

ततः=भीमप्रवेशसूचनानन्तरम् । असूचितस्य पात्रस्य नाट्येऽप्रवेशात्सूचनाऽऽवश्यकता । 'नाऽसूचितस्य पात्रस्य प्रवेशः' इति भरतोक्तेः ।

पाप=पापपुरुष । इत्यादि=इत्यादिश्लोकम् । पुनः=पुनरपि ।

ही आ रहे हैं । इनके सामने ठहरना अब ठीक नहीं है । अतः चलो यहाँ से दूसरी जगह चलें । (दोनों जाते हैं)

इति प्रस्तावना ।

(तदनन्तर सहदेव के साथ क्रुद्ध भीमसेन प्रवेश करते हैं) ।

भीमसेन—अरे पापी दुष्ट नीच नटाधम ! तूं झूठे-झूठे मङ्गलश्लोक पढता है । क्या जिन कौरवों नें हम लोगों के साथ नाना प्रकार के अत्याचार किए हैं वे मेरे जीते रहते सुखसे रह सकते हैं । (इत्यादि बातें पहिले की तरह पुनः कहता है) ।

---

१ 'आः दुरात्मन्' । २ 'लाक्षागृहेत्यादि पुनः' । 'लाक्षागृहानल इति पूर्वोक्तं पठति' ।

सहदेवः—(सानुनयम्) आर्य ! मर्षय मर्षय । अनुमतमेव नो भरतपुत्रस्याऽस्य वचनम् । पश्य–['निर्वाणवैरदहनाः' (७) इति पठित्वाऽन्यथाभिनयति] ।

भीमसेनः—(सोपालम्भम्) न खलु न खल्वमङ्गलानि चिन्तयितुमर्हन्ति भवन्तः कौरवाणाम् । सन्धेयास्ते भ्रातरो युष्माकम् ।

सानुनयं = सविनयं, सप्रार्थनञ्च । आर्य=पूज्य । ज्येष्ठभ्रातः । मर्षय=क्षमस्व । सहस्व । शैलूषं प्रति कोपं मा कार्षीः । यतः । नः= अस्माकम् । अनुमतम्=अभिप्रेतमेव । अस्य='स्वस्था भवन्तु कुरुराजसुताः' इति पठतः । भरतपुत्रस्य=नटस्य । पश्य=मनागर्थं विचारय । अन्यथा= मरणार्थकतया । अभिनयति=मरणस्याऽमङ्गलतया तथार्थं वाचाऽनुक्त्वा 'दुर्योधनादीनां मरणमेव तदर्थं' इति हस्तमुद्रयैव सूचयति ।

सोपालम्भम्=उपालम्भपूर्वकम् । सतिरस्कारम् । साधिक्षेपम् । न खलु न खलु=नैव कदाचित् । वीप्सितो 'नखलु'शब्दोऽत्यन्तनिषेधवचनः । अमङ्गलानि=मरणादन्यशुभानि । चिन्तयितुं=तर्कयितुमपि । विचारयितुमपि । कौरवपक्षिपातिनो भवन्त इत्याशयः । ते=दुर्योधनादयः । युष्माकं–युधिष्ठिरप्रमुखानां भवताम् । सन्धेयाः=सन्धानार्हतयाऽभिमताः ।

सहदेव—(खुशामद करता हुआ) भैयाजी ! क्षमा करिए, इस नट को क्षमा करिए । क्योंकि इसके वचन तो हमारे अनुकूल ही हैं, क्योंकि इसनें तो हमारे मनलायक ही बात कही है । देखिए—

('निर्वाणवैरदहनाः' इस श्लोक को पढ़कर ऐसी हाथों की मुद्रा बनाता है जिससे श्लोक का यह अर्थ स्पष्ट प्रतीत हो कि धृतराष्ट्र के पुत्र धराशायी हों, मृत्यु को प्राप्त हों) ।

भीमसेन–नहीं, ऐसा कभी नहीं हो सकता । तुम लोग कभी कौरवों के

१ 'निर्वाणवैरदहना इति यथार्थमेव । सभृत्याः कुरवः क्षतजालङ्कृतवसुन्धराः क्षतशरीराश्च स्वर्गस्था भवन्त्विति ब्रवीति' इति पाठान्तरम् । २ कश्चिन्न ।

सहदेवः—(सरोषम्) आर्य !

धृतराष्ट्रस्य तनयान्कृतवैरान्पदे पदे ।
राजा न चेन्निषेद्धा स्यात्कः क्षमेत तवानुजः ॥ ९ ॥

भीमसेनः—(सरोषम्) एवमिदम् । अत एवाऽद्यप्रभृति भिन्नोऽहं भवद्भ्यः । पश्य—

सरोषं=सक्रोधम् । 'इत्थमुत्तरमाहे'ति शेषः ।

धृतेति । धृतराष्ट्रस्य=आम्बिकेयस्य, तनयान्=सुतान् दुर्योधनादीन्, पदे पदे = प्रतिस्थानम् । प्रत्यवसरम् । कृतवैरान्=अस्मासु प्रदर्शितविरोधान् । चेत्=यदि । राजा=युधिष्ठिरः । निषेद्धा=अवरोधकः । न स्यात्=न भवेत्तर्हि । तव=भवतः । अनुजः=कनिष्ठो भ्राता । कः क्षमेत=को नु सहेत । न कोऽपीत्यर्थः । युधिष्ठिरेणाऽननुमता एव वयं शत्रुकृतानपराधान्सहामहे नतु तदनुरागादित्याशयः ।

एवमिदं—यथात्वं कथयसि तथैवेदम् । युधिष्ठिराननुमता एव सहामहे इत्यर्थः । अतएव=युधिष्ठिरस्यावरोधकत्वादेव । अद्यप्रभृति = अद्यारभ्य । कृष्णदौत्यप्रसङ्गादारभ्य । भिन्नः=पृथग्भूतः ।

अमङ्गल का विचार भी कर सकते हो, क्योंकि वे तो तुमारे भाई हैं, उनके साथ तो तुमलोग सन्धि कर रहे हो ।

सहदेव—(बड़े क्रोध से) आर्य !

धृतराष्ट्र के पुत्रों को–जिन्होंने पग-पग पर, बात-बातमें–हमलोगों से विरोध किया है, आपके छोटे भाई (हम लोग) कभी क्षमा नहीं कर सकते हैं ! यदि राजा युधिष्ठिर न रोकते तो हमारे कार्यों को आप देखते ! ॥ ९ ॥

भीमसेन—(बडे क्रोध से) यही बात है, इसीलिए आज से मैं आप लोगों अलग होता हूँ । देखो—

१ क्वचिन्न ।

प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभि-
र्न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम् ।
जरासन्धस्योरःस्थलमिव विरूढं पुनरपि
क्रुधा सन्धिं भीमो विघटयति, यूयं घटयत ॥ १० ॥

भ्रातृभ्यो भेदे कारणं दर्शयन्स्वव्यवसितमाह-प्रवृद्धमिति ।

[अन्वयः] शिशोरेव मम खलु कुरुभिः यद्वैरं प्रवृद्धं तत्र आर्यो न हेतुः, किरीटी (हेतुः) न भवति, न च युवां (हेतू भवतः) । जरासन्धस्य उरःस्थलमिव विरूढं सन्धिं क्रुधा भीमः पुनरपि विघटयति । यूयं घटयत ।

[व्याख्या] शिशोरेव=बालस्यैव । मम = भीमसेनस्य । खलु=निश्चयेन । कुरुभिः=कौरवैर्दुर्योधनादिभिः सह । यद्वैरं=यच्छत्रुत्वं । यो विरोधः । प्रवृद्धं=प्ररूढं । वृद्धिं गतम् । उपचितम् । तत्र=तस्मिन् प्ररूढे वैरे । आर्यः=मान्यो ज्येष्ठभ्राता युधिष्ठिरः । न हेतुः=नैव कारणम् । 'हेतुर्न भवती'ति वाऽन्वयः । किरीटी=अर्जुनः । [हेतुः] न भवति=कारणं नैव भवति । न च=नैव वा । युवां=युवां माद्रीसुतौ नकुलसहदेवावपि । 'हेतू भवतः' इति शेषः । अतश्च जरासन्धस्य=पुराणप्रसिद्धस्य मगधराजस्य जरासन्धस्य । उरःस्थलमिव=वक्षःस्थलमिव, विरूढं=दृढीभूतम् । जातञ्च । सन्धिं=सन्धानं । मैत्रीम् । सन्धिबन्धनं वा । क्रुधा=क्रोधेन । भीमः=भीमसेनोऽयम् । अहमिति यावत् । पुनरपि=पूर्ववदेव । विघटयति=विलुम्पति । विनाशयति । अनुपदमेव विनाशयिष्यतीति वा । वर्त्तमानसामीप्ये भविष्यति लट् । यूयं=युधिष्ठिराद्या यूयन्तु । घटयत=तैः सह सन्धिं

मेरा जो कौरवों के साथ बाल्य अवस्था से ही वैर बढा हुआ है उसमें न तो राजा युधिष्ठिर और न तो अर्जुनही कारण है, और न तुम दोनों भाई—नकुल सहदेव—ही कारण हो, अतः जैसे मैंने जरासन्ध की छाती (की सन्धि) को चीरकर दो टुकडा कर दिया था उसी तरह क्रोध से मैं सन्धि (श्रीकृष्ण जिसे करने गए हैं) को भी फाड कर फेंक

१ यूयं च कुरुत' ।

सहदेवः-(सानुनयम्) आर्य ! एवमतिसम्भृतक्रोधेषु युष्मासु कदाचित्खिद्यते गुरुः ।

भीमसेनः—(सहासं) किं नाम मयि खिद्यते गुरुः ? । (सामर्षं) वत्स ! गुरुः खेदमपि जानाति ? । पश्य—

कुरुत नाम । यूयं सन्धिं कुरुत नाम, परमहं तु तं सन्धिं सपदि विघटयिष्ये इत्यर्थः । यद्वा-यूयं सन्धिं घटयत नाम, भीमस्तु पुनरपि सन्धिं विघटयतीत्येवमन्वयो बोध्यः । 'सन्धिर्ना सङ्घटनके सन्धानेऽपि च कथ्यते' इति विश्वः ।

सानुनयं=सविनयं । सप्रार्थनम् । एवम्=इत्थम् । अतिसम्भृतक्रोधेषु=अतितरां धृतक्रोधावेगेषु । युष्मासु=भीमसेने त्वयि । गुरुः=ज्येष्ठो भ्राता-युधिष्ठिरः । कदाचित्=कस्मिंश्चित्समये । सम्भाव्यते एतत् । खिद्यते=अप्रसन्नः स्यात् । खिन्नः स्यात् । क्रुद्धः स्यात् ।

किं नाम=किं स्वित् । मयि=भीमे । खिद्यते=खेदं करोति । पाठान्तरे-'कदाचित्खिद्यते गुरु'रिति किं नाम ? । 'कथयसी'ति शेषः । एवञ्च गुरुः खेदमपि कर्त्तुं जानाति किमिति साक्षेपं प्रश्नः । सामर्षं=सक्रोधम् ।

दूंगा । तुम लोग चाहे सन्धि किया करो । [जरासन्ध सिर से पैर तक अलग २ दो टुकडों में उत्पन्न हुआ था, उसकी सन्धि को जरा नामक राक्षसी ने जोड दिया था, इसी से उसका नाम जरासन्ध पड गया था। युद्ध में भीमसेन ने उसकी सन्धि (शरीर के जोड) को चीरकर जरासन्ध को मारा था] ॥ १० ॥

सहदेव—(खुशामद के साथ) आर्य ! आप को इस तरह ज्यादा क्रोध से भरे हुए जानकर कहीं बडे भैया (महाराज युधिष्ठिर) आप से खिन्न व अप्रसन्न न हों जाए ।

भीमसेन—(हंसकर) क्या कहते हो—मेरे ऊपर बडे भैया अप्रसन्न (नाराज) होंगे ? । (क्रोध व झुझलाहट के साथ) क्या राजा (युधिष्ठिर) क्रोध करना भी जानते हैं ? । देखो—

१ 'किंनाम कदाचित्खिद्यते' । २ 'सबाष्पक्रोधं' । ३ क्वचिन्न ।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां,
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्याऽऽवासे स्थितमनुचितारम्भनिभृतं,
गुरुः खेदं, खिन्ने मयि भजति, ! नाद्यापि कुरुषु ॥११॥

गुरुः खेदं न जानातीति समर्थयते—**तथाभूतामिति** ।

नृपसदसि=राजसभायाम् । तथाभूतां=कृतकेशाम्बराकर्षणाम् , ऋतुमतीं, नग्नप्रायाञ्च । दृष्ट्वा=विलोक्य । किञ्च—वने=कानने । व्याधैः= मृगयुभिः । सार्द्धं=साकम् । धरन्तीति धराः, वल्कलस्य धराः वल्कलधराः, तैः=वल्कलधारिभिरस्माभिः । सुचिरं=चिरकालं यावत् । उषितं=निवासः कृतः । 'तद्दृष्ट्वे'ति शेषः । किञ्च—विराटस्य=मत्स्यराजस्य । आवासे= भवने । अनुचितारम्भैर्निभृतं यथा स्यात्तथा—अनुचितारम्भनिभृतं= दासकर्मगुप्तं यथा स्यात्तथा । कन्यानर्त्तन-पाचन-गोपालनादिनिकृष्ट-कर्मभिरात्मानं गोपायित्वा । स्थितं=निवासः कृतः । 'अस्माभि'रिति शेषः । तद्दृष्ट्वा च। गुरुः=युधिष्ठिरः । अद्यापि=इदानीमपि । इत्थं धर्षणाम्प्राप्याऽपि। कुरुषु=कौरवेषु । न=नैव खेदं धत्ते । विपरीतं—खिन्ने=दुःखैः क्लिष्टे । मयि= भीमे ।.खेदं=दुःखम् । मनःपीडाम् । अप्रसन्नताम् । क्रोधं वा । भजति=धत्ते । इत्याश्चर्यमित्यर्थः । केचित्तु—'मयि खिन्नेऽपि गुरुः कुरुषु खेदं न भजतीति गुरुः खेदं न जानाती सिद्ध'मित्यर्थमाहुः । शिखरिणी वृत्तम् ॥ ११ ॥

[भाषाटीका] जब राजसभा में ऋतुमती द्रौपदी की केश पकड नङ्गीकर दुर्दशा की गई थी उसे देख राजा को दुःख व क्रोध नहीं हुआ, जब हम लोग वल्कल धारणकर वन में वर्षों तक व्याधों (बहेलियों) के साथ रहते थे उसे देख राजा को कुरुवों पर क्रोध व दुःख नहीं हुआ, जब हम सब विराट (जयपुर के राजा) के महल में नाचना-गाना, रोटी बनाना गौ-चराना आदि नीचकर्म करके किसी तरह लुक-छिपकर दिन काटते थे उसे देखकर राजा को उनपर खेद व आज तक दुःख नहीं हुआ । पर

तत्सहदेव, निवर्त्तस्व। एवं चा[1]ऽतिचिरप्रवृद्धामर्षोद्दीपितस्य भीमस्य वचनाद्विज्ञापय राजानम्।

सहदेवः—आर्य[2]! किमिति।

भीमसेनः—

युष्मच्छासनलङ्घनां[3]ऽहसि मया मग्नेन नाम स्थितं,
प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि।

तत्=तस्मात्। गुरोः खेदानभिज्ञत्वात्। एवम्=इत्थम्। अतिचिरकालेन प्रवृद्धो योऽमर्षस्तेनोद्दीपितः, तस्य—अतिचिरप्रवृद्धाऽमर्षदीपितस्य= अतिचिरन्तनप्रवृद्धक्रोधोद्दीपितस्य। भीमस्य=भीमसेनस्य मम। वचनात्= वाक्यात्। राजानं=युधिष्ठिरम्। विज्ञापय=कथय।

आर्य=गुरो! किमिति=किमिति विज्ञापयामि कथय। भीमसेनः सन्देशं कथयति—युष्मदिति। युष्माकं यत् शासनं तस्य यल्लङ्घनं तदेव अंहः—पापं, तस्मिन्—युष्मच्छासनलङ्घनांऽहसि=भवदाज्ञोल्लङ्घनमहापातके। मग्नेन=निमग्नेन। मया=भीमेन। नाम—इति प्रसिद्धौ। स्थितम्=अवस्थितम्। अहं भवदाज्ञोल्लङ्घनरूपे पापे निमग्नोऽस्मि। 'युष्मच्छासनलङ्घनाम्भसि' इति पाठे- युष्मदाज्ञोल्लङ्घनात्मके जले निमग्नोऽस्तीत्यर्थः। किञ्च—स्थितिमतां= मर्यादापालकानाम्। धैर्यशालिनाम्। विनीतानाम्। अनुजानामपि मध्य= भ्रातृणामपि मध्ये। मया=भीमेन, विगर्हणा=निन्दा। प्राप्ता=लब्धा। नाम-

मेरे दुःखिया पर राजा को क्रोध व खेद हो रहा है!। क्यों नहीं अभी तक कुरुवों पर क्रोध व खेद उन्हें नहीं होता? ॥ ११ ॥

इसलिए सहदेव! तुम जाओ, और बहुत दिनों से बढ़े हुए क्रोध से उद्दीप्त भीमसेन के वचन से (मेरे कथनानुसार) महाराज से यों कहो कि- मैं आपकी आज्ञा का उलङ्घन करने के पाप (या जल) में डूब रहा हूँ।

१ 'चाऽपि प्रवृद्ध'। २ 'आर्य किं विज्ञापयामि'। ३ 'लङ्घनाऽम्भसि'।



'वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः'

क्रोधोल्लासितशोणितारुणगदस्योच्छिन्दतः कौरवा-
न्नद्यैकं दिवसं ममासि न गुरुर्नाहं विधेयस्तव ॥ १२ ॥
(इत्युद्धतं परिक्रामति)।

सम्भावनायाम्। 'नाम-प्राकाश्यसम्भाव्योपगमे.कुत्सने तथे'ति विश्वः। क्रोधेनोल्लासिता शोणितेनाऽरुणा गदा येनासौ—**क्रोधोल्लासित-शोणिताऽरुण—गदः, तस्य=**क्रोधोत्तोलित-रुधिराक्त-गदस्य । रुधिरदिग्धां गदां भ्रामयतः । **कौरवान्**=दुर्योधनादीन्। **उच्छिन्दतः**=विनाशयतः । **मम** = भीमस्य । **अद्य** = सम्प्रति । अस्मिन्नहनि । **एकं दिवसम्**=एकं दिनं व्याप्य । **(मम) गुरुः**=ज्येष्ठो भ्राता । **नाऽसि=**त्वं न भवसि । **अहम्**=अहमपि च । **तव**= भवतः । **विधेयः**=विनयग्राही कनिष्ठो भ्राता । **न**=नैव भवामि । एकं दिनं यावदावयोर्न कोऽपि सम्बन्धः, यथेच्छमहं भवदाज्ञामनादृत्य शत्रुरुधिरारुणां गदां भ्रामयन् कौरवान् निहन्मीति भावः ।

[अत्र हि कार्यस्य कौरवविनाशस्य हेतुर्गदोल्लासनम् , अकार्यस्य निन्दाप्राप्तेर्हेतुराज्ञोल्लङ्घनञ्चोपात्तमिति कार्याऽकार्यहेतूनामुक्तेश्च परिकरो नाम सन्धिस्थानम्। 'कार्याऽकार्यस्य हेतूनामुक्तिः परिकरो मतः'इति नाट्यशास्त्रात् । शार्दूलविक्रीडितं वृत्तम् ।

इति = इत्युक्त्वा । **उद्धतं**=यथा स्यात्तथा । **साटोपमिति** पाठे-साऽहङ्कारमित्यर्थः ॥ १२ ॥

बड़े लोगों की आज्ञा मानने वाले सब भाइयों में भी मैं (अविनय के कारण) निन्दितहो रहा हूँ। पर एक दिन में ही मैं क्रोध से (या अनायास ही) तानी हुई रुधिर से लिप्त गदा से कौरवों का नाश कर दूँगा-तब तक-केवल एक दिन के लिए-आप मेरे बड़े भाई नहीं, और मैं आपकी आज्ञाकारी छोटा भाई नहीं। अर्थात् इतने दिन आपने मेरा अविनय क्षमा किया, तो अब एक दिन और क्षमा करें, १ दिन में तो मैं कौरवों का नाश ही कर दूँगा, तब सब क्लेश ही नष्ट हो जाएंगे ॥ १२ ॥

१ 'हेलोल्लासित'। २ 'इति साटोपं परिक्रामति'।

सहदेवः—(तमेवानुगच्छन्नात्मगतम्) अये ! कथमार्यः पाञ्चाल्याश्चतुःशालकं प्रविष्टः[1]। भवतु तावदहमत्रैव तिष्ठामि। (इति स्थितः)।

भीमसेनः—(प्रतिनिवृत्त्या[2]ऽवलोक्य[3] च) सहदेव ! गच्छ त्वं गुरुमनुवर्तस्व। अहमप्यायुधागारं प्रविश्यायुधसहायो भवामि।

सहदेवः—आर्य ! नेदमायुधागारम्, पाञ्चाल्या[4]श्चतुःशालक[5]मिदम्।

परिक्रामति=प्रचलति । (अकड के चलता है) ।

तमेव=गच्छन्तं भीमसेनमेव । **अनुगच्छन्**=पश्चाद्गच्छन् । **आत्मगतं**=स्वगतम् । 'यत्तु श्रव्यं न सर्वस्य स्वगतं तदिहोच्यते' इत्युक्तेः । **पाञ्चाल्या इति** । पञ्चालानां राजा पाञ्चालः । पाञ्चालस्य राज्ञोऽपत्यं स्त्री पाञ्चाली=द्रौपदी । **तस्याः**=द्रौपद्याः । **चतुःशालकं**=सद्मवनं । चौसाल इति प्रसिद्धम् । **प्रविष्टः**=निविष्टः । **भवतु**=अस्त्वेवम् । **अत्रैव**=बहिरेव । **इति**=इत्यभिधाय ।

प्रतिनिवृत्त्य=पुनर्बहिरागत्य । **अवलोक्य**=सहदेवं दृष्ट्वा च । **आयुधा-**

(ऐसा कहके भीमसेन बडा अकड़कर चलता है)

सहदेव—(भीमसेन के पीछे जाता हुआ, मन ही मन कहता है) अरे ! यह क्या ! आर्य तो द्रौपदी के भवन (चौशाल) में जा रहे हैं । अच्छा, मैं बाहर ही बैठता हूँ ।

(ऐसा कहकर बाहर बैठ जाता है) ।

भीमसेन—(वापिस लौटकर, सहदेव को देखकर) सहदेव ! तुम जाओ और महाराज युधिष्ठिर की सेवा में रहो । मैं भी शस्त्रागार में जाकर शस्त्र धारण करता हूँ ।

सहदेव—आर्य ! यह शस्त्रागार नहीं है, यह तो द्रौपदी का भवन है ।

१ 'शालं प्रति प्रस्थितः' । २ 'परानिवृत्य' । ३ क्वचिन्न ।
४ पञ्चाल्याः । ५ 'शालमिदम्' ।

भीमसेनः—(सवितर्कम्) किं नाम! नेदमायुधागारं,पाञ्चाल्याश्चतुःशालकमिदम्[2]। (विचिन्त्य[3], सहर्षम्)। आमन्त्रयितव्यैव[4] मया पाञ्चाली। (सप्रणयं सहदेवं हस्ते गृहीत्वा) वत्स ! आगम्यताम्।

सहदेवः--यदादिशत्यार्यः।

भीमसेनः[5]—वत्स ! यदार्यः कुरुभिः सन्धानमिच्छन्नस्मान्पीडयति तद्भवानपि पश्यतु।

गारं=शस्त्रशालाम्। आयुधसहायः=आयुधद्वितीयः। धृतायुधः।

इदं=यत्र भवान्प्रविशति तदिदं। सवितर्कं=ससंशयम्। किं नाम=किमित्थं कथयसि यत्। यद्वा—किमिदमित्यर्थः। आमन्त्रयितव्या=आमन्त्रणीया। आभाषणीया। तया सह मया परामर्शः करणीय इति यावत्। सप्रणयं=सस्नेहम्। आहेति शेषः। यत्=यदेव। यथा वा। आदिशति=आज्ञापयति।

वत्स=सहदेव। आर्यः=युधिष्ठिरः। सन्धानं=सन्धिम्। अस्मान्=भीमसेनद्रौपद्यादीन्। पीडयति=क्लेशयति। दुःखाकरोति। भवानपि=

भीमसेन—(कुछ आगा पीछा सोचता हुआ) क्या कहा—क्या यह शस्त्रागार नहीं है ? क्या यह द्रौपदी का भवन है ? (कुछ सोचकर, हर्षित हो) मुझे द्रौपदी का कुशल क्षेम जानना है। (या द्रौपदी से बातचीत कर सब हाल कहना है)। (बड़े प्रेम से, सहदेव का हाथ पकड़कर) वत्स ! आओ चलें।

सहदेव—आर्य की जो आज्ञा।

भीमसेन—वत्स ! कुरुओं के साथ सन्धि की इच्छा करते हुए

---

१ क्वचिन्न। २ 'शालमिदम्'।

३ 'किञ्चिद्विहस्य'।

४ आमन्त्रयितव्या=कुशलादिकं प्रष्टव्या। सकलं वृत्तान्तं बोधनीयेति वा।

५ 'एवः' क्वचिन्न।

(परिक्रम्य[1] उभौ प्रवेशं[2] नाटयतः) ।

भीमसेनः–सक्रोधं भूमावुपविशति ।

सहदेवः—(ससम्भ्रमम्) आर्य ! इदमासनमास्तीर्णम् । अत्रोपविश्य[3] मुहूर्त्तमार्यः पालयतु कृष्णाऽऽगमनम् ।

भीमसेनः–(उपविश्य, स्मृत्वा) वत्स ! 'कृष्णागमन'मित्यनेनो-

सहदेवोऽपि । पश्यतु=द्रौपदीविलोकनभाषणादिना विभावयतु । परिक्रम्य=किञ्चिच्चलित्वा । गृहप्रवेशं = द्रौपदीभवनप्रवेशम् । नाटयतः = कुरुतः । तथाऽभिनीय रङ्गस्थजनेभ्यो दर्शयतः ।

सक्रोधं=सकोपं यथा स्यात्तथा । क्रोधं नाटयन् । ससम्भ्रमं=सत्वरम् । सादरं वा । 'सम्भ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपि' इति विश्वः । इदमिति आस्तीर्णमासनं दर्शयति । आस्तीर्णं=विस्तीर्णम् । भूमौ विस्तारितम् । अत्र=आसने । उपविश्य=स्थित्वा । मुहूर्त्तं=क्षणमात्रम् । (४ मिनिट) । पालयतु=प्रतीक्षताम् । कृष्णाऽऽगमनं=द्रौपदीसमागमनम् । शीघ्रमेव पाञ्चाली समेष्यति, तिष्ठेत्यर्थः ।

उपविश्य=आसने उपविश्य । स्मृत्वा=स्मृतिमभिनीय । इत्यनेन=

आर्य (राजा युधिष्ठिर) जो हमे कष्ट दे रहे है, उसे तुम भी देख लो ।

(थोडा चलकर दोनो द्रौपदी के भवन में प्रवेश करते हैं) ।

क्रोध से भरा हुआ भीमसेन भूमि पर ही बैठता है ।

सहदेव—(जल्दी से या हडबडा कर) आर्य ! यह देखिए आसन बिछा है इस पर बैठे, और क्षणभर (५ मिनिट) कृष्णागमन (द्रौपदी के आने) की प्रतीक्षा करें ।

भीमसेन--वत्स ! 'कृष्णागमन' इस कथन से प्रसङ्गवश वह

---

१ क्वचिन्न । २ 'गृहप्रवेशं' ।

३ अत्रोपविश्यार्यः पालयतु कृष्णागमनम् ।'

पोद्घातेन स्मृतम्[2] । अथ भगवान्कृष्णः केन पणेन[3] सन्धिं कर्तुं सुयोधनं प्रति प्रहितः[4] ? ।

सहदेवः—**आर्य ! पञ्चभिर्ग्रामैः ।**

भीमसेनः—(कर्णौ पिधाय) **अहह ! कथं तस्य देवस्याऽजातशत्रोरप्ययमीदृशस्तेजोऽपकर्ष इति–यत्सत्यं कम्पितमिव मे हृदयम् ।**

इत्येवं त्वयोक्तेन । **उपोद्घातेन**=वचनेन । 'उपोद्घात उदाहारः' इत्यमरः । यद्वा–**उपोद्घातेन**=प्रकृतानुकूलया चिन्तया । कृष्णागमनपदेन हि कृष्णाया आगमनं, कृष्णस्य वा आगमनमित्युभयथाऽर्थोऽत्र प्रतीयते । कृष्णस्मरणे च तदीयसन्धिकार्यस्मरणमित्याशयः । **स्मृतं** = तदिदं कृष्णदौत्यं बुद्धिविषयीभूतम् ।

अथेति प्रश्ने । **भगवान्**=ज्ञानैश्वर्यादिमान् । **केन पणेन**=केन पणबन्धेन । 'केन प्रकारेणे'ति पाठे कया रीत्येत्यर्थः । **सुयोधनं प्रति**=दुर्योधनं प्रति । **प्रहितः**=राज्ञा युधिष्ठिरेण प्रेषितः ।

पञ्चभिरिति । पञ्चग्रामदानपणेनेत्यर्थः । **पिधाय**=हस्ताभ्यां कर्णावाच्छाद्य । अहहेत्याश्चर्ये खेदे वा । 'अहहेत्यद्भुते खेदे' इत्यमरः । **देवस्य**=राज्ञः । विदुषो वा । **अजातशत्रोरपि**=युधिष्ठिरस्यापि । **अयम्**=एषः । **तेजोऽपकर्षः**=पराक्रमविनाशः । सत्त्वक्षयः । अधःपातः । वीर्यविलोपः । **यत्सत्यं**=

बात भी स्मरण हो गई । हाँ, राजा ने किस शर्त्त पर सन्धि करने को भगवान् श्रीकृष्ण को दुर्योधन के पास भेजा है ? ।

सहदेव—आर्य ! केवल पाँच गाँव वापिस देने की शर्त्त पर ।

भीमसेन-(कानों पर हाथ रखता हुआ) हाय ! उस दिव्यशक्ति तेजस्वी वीर राजा युधिष्ठिर की इतनी कायरता ! इतना पतन ! ठीक कहता हूँ–यह ज्ञान कर तो मेरा हृदय ही काँप उठा है । (मुँह फेर कर) यह

१ 'कथोद्घातेन' । २ 'तत्स्मृतम् ।'
३ 'प्रकारेण' । ४ 'प्रेषितः' । ५ 'अहह देवस्य' ।

(परिवृत्य[1] स्थित्वा[3])।

तद्वत्स ! न त्वया कथितं, न च मया भीमेन[2] श्रुतम्[4] ।
यत्तदूर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः ।
दीव्यताऽक्षैस्तदाऽनेन नूनं तदपि हारितम् ॥ १३ ॥

(नेपथ्ये)

समस्ससदु समस्ससदु भट्टिणी । [अवणइस्सदि दे मण्णु

निश्चितमेतत्। परिवृत्य स्थित्वा=सहदेवं पृष्ठतः कृत्वा स्थित्वा। अनभिमतश्रवणोद्वेजितस्यायं परिवर्त्तनप्रकारः। न त्वया कथितमिति। सन्धिवृत्तान्तोऽयं राज्ञस्तेजोऽपकर्षसूचको न त्वया मह्यमभिहितो न च मया श्रुत इति त्वया मन्तव्यम्। नेदृशी पापकथा केनाऽपि वक्तव्या, श्रोतव्या वा। अहमत्राऽर्थे सर्वथा विरुद्ध इति यावत्।

यत्तदिति। अस्य भूपतेः=युधिष्ठिरस्य राज्ञः। यत्तत्=प्रसिद्धम्। ऊर्जितं=बलवत्। अत्युग्रम्=अतिभयानकम्। क्षात्रं=क्षत्रियोचितम्। तेजः=वीर्यम्। आसीदिति शेषः। तदा=तस्मिन्काले। अक्षैः=पाशकैः। दीव्यता=अक्षैर्द्यूतेन क्रीडमानेन। अनेन=राज्ञा। तदपि=तदपि क्षात्रं तेजः। नूनं=निश्चयेन। हारितं=द्यूते विनाशितम्। (जुए में हार गया) ॥१३॥

(सन्धि की बात) न तुमने मुझसे कही, और न मैंनें सुनी यही समझो। अर्थात् मैं इस सन्धि की बात को सुनने को भी तैयार नहीं हूँ। इसका सुनना भी क्षत्रियत्व का घोर अपमान समझता हूँ।

इस राजा (युधिष्ठिर) का वह जो जगत्प्रसिद्ध अति प्रचण्ड क्षात्र तेज (प्रताप व पराक्रम) था उसे भी इसने जुवा खेलते समय मानों जुए में ही हार दिया है। अर्थात् इसका वह तेज व शौर्य पराक्रम न मालूम कहाँ चला गया है ॥ १३ ॥

(नेपथ्य में)

१ इदमत्र क्वचिन्न। २ 'भीमसेनेन'।
३ इतोऽग्रे-'परिवृत्य स्थित्वा' इतिपाठः क्वचित्। न पूर्वत्र। ४ क्वचिन्न।

णिच्चाणुबद्धकुलुवेलो कुमालो भीमसेणो] ।

[समाश्वसितु समाश्वसितु भट्टिनी, अपनेष्यति ते मन्युं
नित्यानुबद्धकुरुवैरः कुमारो भीमसेनः] ।

सहदेवः—(कर्णं दत्वा नेपथ्याभिमुखमवलोक्याऽऽत्मगतम्) **अये ! कथं याज्ञसेनी मुहुरुपचीयमानबाष्पपटलस्थगितनयना आर्यसमीपमुपसर्पति । तत्कष्टतरमापतितम् ।**

यद्वैद्युतमिव ज्योतिरार्ये क्रुद्धेऽद्य सम्भृतम् ।
तत्प्रावृडिव कृष्णेयं नूनं संवर्द्धयिष्यति ॥ १४ ॥

कर्णं दत्वा=कर्णदानमभिनीय । आत्मगतं=स्वगतम् । 'यत्तु श्राव्यं न सर्वस्य स्वगतं तदिहोच्यते' इति भरतः । याज्ञसेनी=द्रौपदी । मुहुः=वारंवारम् , उपचीयमानं=वर्द्धमानं । यद्बाष्पस्य=अश्रुणः, पटलं=समूहः, तेनाऽऽवृते=पिहिते नयने यस्याः सा । भूयःप्रवर्द्धमानबाष्पौघस्थगितलोचना । अश्रुणः पूर्वावस्था बाष्पः। आर्यसमीपं=भीमसेनसमीपम् । उपसर्पति=शनैरागच्छति । तत्=तदेतत्। कष्टतरं=महाकष्टप्रदम्। आपतितम्=आयातम्। जातम्। कुत एतदत आह—यदिति । अद्य=सम्प्रति । क्रुद्धे=कुपिते ।

दासी—स्वामिनी ! धैर्य धारण करो, धैर्य धारण करो। आपके इस क्लेश व दुःख को कौरवों के कट्टर शत्रु कुमार भीमसेन दूर करेंगे ।

सहदेव—(कान लगाकर, नेपथ्य की ओर देखकर, मन ही मन) हैं !, यह क्या ?, बारंबार पोंछे जाने पर भी जिसकी आखों में बाष्प (आँसू) भरते जारहे हैं और बाष्प (आँसुओं) से जिसकी आँखें डबडबाई हुई है ऐसी यह द्रौपदी आर्य भीमसेन के पास धीरे २ आ रही है । यह तो बड़ा बुरा हुआ । क्योंकि-

इस समय क्रोध से भरे हुए आर्य भीमसेन में जो बिजली की-सी ज्योति व कडक भरी हुई है उसे यह द्रौपदी वर्षाऋतु की तरह और

१ 'कुमारो' । २ क्वचिन्न । ३ 'मुहुर्मुहुरुपचितबाष्पपटलावृत' । ४ पिहितनयना ।

[ततः प्रविशति यथानिर्दिष्टा द्रौपदी चेटी च]।

[द्रौपदी सास्त्रं[1] निःश्वसिति]

चेटी—**समस्ससदु समस्ससदु भट्टिणी । अवणइस्सदि दे मण्णुं णिच्चाणुबद्धकुलुवेलो[2] कुमालो भीमसेणो।**

[समाश्वसितु समाश्वसितु भट्टिनी । अपनेष्यति ते मन्युं नित्यानुबद्धकुरुवैरः कुमारो भीमसेनः]।

आर्ये=भीमे । **यत्**=यद्धि । **वैद्युतं**=विद्युत्सम्बन्धि । **ज्योतिः**=तेजः । **सम्भृतं**=जातम् । समुद्भूतम् । **तत्**=तज्ज्योतिः । **इयं कृष्णा**=इयं द्रौपदी । **प्रावृडिव**=वर्षर्तुरिव । वर्षाकाल इव । **नूनं**=निश्चयेन । **संवर्द्धयिष्यति**=प्रवर्द्धयिष्यति । समुद्दीपयिष्यति ॥ १४ ॥

ततः=तदनन्तरम् । **यथानिर्दिष्टा**=पूर्वोक्तावस्था । उपचीयमानबाष्पौघविहितलोचना । **चेटी**=दासी । **सास्त्रं**=साश्रु । **निःश्वसिति**=उच्छ्वसिति ।

समाश्वसितु=धैर्यं धारयतु । शोकं माकार्षीत् । **भट्टिनी**=स्वामिनी । **अपनेष्यति**=दूरीकरिष्यति । **मन्युं**=शोकम् । दैन्यम् । 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः । नित्यम्–अजस्रम् , **अनुबद्धः**=हृदि स्थापितः, दृढं बद्धश्च, **कुरुवैरः**=कुरुकुलविरोधो येनासौ–**नित्यानुबद्धकुरुवैरः** । **कुमारः**=राजपुत्रः ।

बढा देगी । वर्षाऋतु में बिजली की चमक बहुत बढ जाती है । अर्थात् क्रोध से भरे हुए भीमसेन द्रौपदी के वचनों से और भी क्रोधान्ध हो जाएँगे ॥ १४ ॥

[तत्र पूर्ववर्णित अवस्थावाली (आँखों में आँसु भरे हुए) द्रौपदी नौकरानी के साथ लिए हुए प्रवेश करती है] ।

द्रौपदी—आँखों से आंसू गिराती है और जोर से उसांस (उच्छ्वास) लेती है ।

चेटी–स्वामिनि ! धैर्य रखिए धैर्य रखिए । आपके इस दुःख व शोक को कुमार भीमसेन जिनका वैर कौरवों पर नित्य बढता व दृढ होता जा रहा है–अवश्य दूर करेंगे ।

---

१ 'सबाष्पं' । २ 'कुलुवेरो' 'कुरुवेरो' ।

द्रौपदी—हञ्जे बुद्धिमदिए ! होदि एदं जइ महाराओ पडिऊलो ण भवे। ता णाहं पेक्खिदुं तुवरदि मे हिअअं। आदेसेहि मे णाहस्स वासभवणं।

[हञ्जे बुद्धिमतिके ! भवत्येतद्यदि महाराजः प्रतिकूलो न भवेत्। तन्नाथं प्रेक्षितुं त्वरते मे हृदयम्। तदादेशय मे नाथस्य वासभवनम्।]

(इति परिक्रामतः)।

चेटी—एदु एदु भट्टिणी।

[एत्वेतु भट्टिनी]।

चेटी—एदं वासभवणं। एत्थ पविसदु भट्टिणी।

[एतद्वासभवनम्। अत्र प्रविशतु भट्टिनी]।

हञ्जे=हे चेटि। 'हण्डे हञ्जे हलाऽऽह्वाने नीचां चेटीं सखीं प्रती'त्यमरः। एतद्भवति=मच्छोकं भीमो व्यपनयति। महाराजः=युधिष्ठिरः। प्रतिकूलः=विरुद्धः। निषेधकः। तत्=तस्मात्। नाथं=भीमम्। प्रेक्षितुं=द्रष्टुम्। हृदयं=मनः। तत्=तस्मात्। आदेशय=दर्शय। वासभवनं=निवासगृहम्।

द्रौपदी—अरी बुद्धिमतिके ! जैसा तू कहती है वैसा ही होता यदि राजा (युधिष्ठिर) इसके विरुद्ध न होते तो। मेरा जी अब प्राणप्रिय स्वामी (भीमसेन) से मिलने के लिए उत्कण्ठित है,अतः उनके वासस्थान का मार्ग मुझे दिखा।

(दोनों चलती है)

चेटी—स्वामिनि ! आइए, चली आइए।

चेटी-यह भीमसेन का वासस्थान है, (यहाँ भीमसेन बैठे हैं)। स्वामिनी ! इसमें प्रवेश करिए।

---

१ अत्र वङ्गपुस्तके-'द्रौपदी-हञ्जे, होदि एदं जइ महाराओ पडिऊलो ण भवे। चेटी (विलोक्य)-एसो कुमालो चिट्ठदि। ता णं उवसप्पदु भट्टिणी। द्रौपदी-हञ्जे ! एव्वं करेह्म। (उभे प्रविशतः)। चेटी-जअदु जअदु कुमालो। भीमः-अपश्यन्नेव (सक्रोधं) 'यत्तदूर्जितम्' इति पुनः पठति' इति पा०।

द्रौपदी—**हञ्जे ! कहेहि णाहस्स मह आगमणं।**

[हञ्जे ! कथय नाथस्य ममागमनम्]।

चेटी--**जं देवी आणवेदि।** (इति परिक्रम्योपसृत्य च) **जयदु जअदु कुमालो।**

[यद्देव्याज्ञापयति। जयतु जयतु कुमारः]।

[भीमसेनोऽश्रृण्वन् 'यत्तदूर्जितम्' (१३) इति पुनः पठति]।

चेटी—[परिवृत्य[1]] **भट्टिणि ! पिअं दे णिवेदेमि। परिकुविदो विअ कुमालो लक्खीअदि।**

[भट्टिनि ! प्रियं ते निवेदयामि। परिकुपित इव कुमारो लक्ष्यते]।

द्रौपदी--**हञ्जे ! जइ एवं ता अवहीरणावि एसा मं आसासअदि ज्जेव। ता ऐअन्ते[2] उवविट्ठा भविअ सुणुमो दाव णाहस्स ववसिदं।**

[हञ्जे ! यद्येवं तदवधीरणाप्येषा मामाश्वासयत्येव। तदेकान्ते[3] उपविष्टा भूत्वा श्रृणुमस्तावन्नाथस्य व्यवसितम्]।

यत्=यथा। **परिक्रम्य**=परिवृत्य। **उपसृत्य**=समीपं गत्वा । **अवधीरणा**= तिरस्कारः।

द्रौपदी–अरी बुद्धिमतिके ! मेरे प्राणनाथ को मेरे आने की सूचना दें।

चेटी—जैसी देवी (महारानी) की आज्ञा। (चलकर और भीमसेन के पास पहुँचकर)। कुमार की जय जयकार हो।

(भीमसेन उसकी बात बिना सुने ही 'यत्तदूर्जितम्' इस (१३वें) श्लोक को पुनः पढता है)।

चेटी—(वापिस आकर) स्वामिनी ! आपको खुशखबर सुनाती हूँ। कुमार क्रुद्ध (नाराज) से मालूम होते है।

द्रौपदी--अरी ! यदि ऐसी बात हो तो इस अपमान में भी मुझे

---

१ क्वचिन्न। २ 'ता एत्थ'। ३ 'तदत्रोपविष्टा'।

(उभे तथा कुरुतः) ।

भीमसेनः—[सक्रोधं सहदेवमधिकृत्य] किं नाम पञ्चभिर्ग्रामैः सन्धिः ?।

मथ्नामि कौरवशतं समरे न कोपा-
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ॥ १५ ॥

मथ्नामीति। समरे=युद्धे। कौरवशतं=धृतराष्ट्रपुत्रशतं। कोपात्=क्रोधात्। न मथ्नामि=न मथिष्यामि किम् ?। अवश्यं मथिष्यामि । विमर्दयिष्यामि । वर्त्तमानसामीप्ये लट् । दुःशासनस्य=दुर्योधन भ्रातुर्दुःशासनस्य । उरस्तः=वक्षःस्थलतः। रुधिरं=रक्तम् । न पिबामि=न पास्यामि किं ? । पास्याम्येव । सुयोधनोरू=दुर्योधनसक्थिनी। गदया=गदाघातेन। न सञ्चूर्णयामि=न सञ्चूर्णयिष्यामि ? । किन्तु चूर्णयिष्याम्येव । भवतां=युष्माकम् । नृपतिः=राजा । युधिष्ठिरः । पणेन=पञ्चग्रामीपणेन । येन केन वा पणेन । सन्धिं=सन्धानम् । करोतु=करोतु नाम । वसन्ततिलका वृत्तम् ॥ १५ ॥

कुछ धैर्य मिले । अच्छा तो चल एकान्त में बैठकर (छिपकर) प्राणनाथ की बातें व विचार सुनें ।

(दोनों उसी प्रकार करती हैं, अर्थात् एकान्त में छिपकर बैठ जाती है)।

भीमसेन—(बडे क्रोध से सहदेव के प्रति) क्या पाँच गाँव लेकर राजा सन्धि का विचार कर रहे हैं ?। करें ।

युद्ध में धृतराष्ट्र के १०० पुत्रों को क्रोध से क्या मैं नहीं मारूँगा ?, जरूर मारूँगा । दुःशासन की छाती से क्या मैं रुधिर नहीं पीऊँगा ?, जरूर पीऊँगा । दुर्योधन की जङ्घा को गदा से क्या मैं नहीं चूर्णित (चूर-चूर) करूँगा ? । जरूर करूंगा । चाहे तुम

१ क्वचिन्न । २ 'इति तथा' ।

द्रौपदी—(सहर्षम्। जनान्तिकम्) णाह ! अस्सुदपुव्वं ख्रु[1] दे पदिसं वअणं। ता पुणो[2] पुणो दाव भणाहि।

[नाथ ! अश्रुतपूर्वं खलु ते ईदृशं वचनम्। तत्पुनःपुनस्तावद्भण।]

(भीमसेनोऽश्रृण्वन्नेव[3] 'मथ्नामि कौरवशतम्–' (१५) इति पुनः पठति)।

सहदेवः—आर्य ! किं महाराजस्य सन्देशोऽयमार्येणा[4]ऽव्युत्पन्न इव गृहीतः।

भीमसेनः—का पुनरत्र[5] व्युत्पत्तिः ?।

सहर्षं=सानन्दम्। जनान्तिकमिति। 'अन्योन्यमन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्।' इति भरतोक्तेर्नायकमश्राव्यान्योन्यामन्त्रणं जनान्तिकमित्युच्यते। रङ्गस्थलोकानां समक्षं नायको यथा न शृणुयात्तथा भाषणं–त्रिपताककरेणान्यानपवार्याऽन्तरा कथा–जनान्तिकमिति यावत्। अश्रुतपूर्वम्=अनाकर्णितपूर्वम्। ईदृशं=वीरोचितम्।

महाराजस्य=युधिष्ठिरस्य। अयं सन्देशः=पञ्चग्रामीरूपः सन्धिपणसन्देशः। अव्युत्पन्न इव=असार इव। व्युत्पत्तिः=तत्त्वम्। गूढोऽभिसन्धिः।

लोगों के राजा (युधिष्ठिर) किसी भी शर्त पर दुर्योधन से सन्धि किया करें। परन्तु मैं तो उसे नहीं मानूंगा ॥ १५ ॥

द्रौपदी—(बड़े हर्ष से जनान्तिक में) नाथ ! ऐसा वचन तो आप के मुख से आज तक नहीं सुना, नया ही सुन रही हूँ। अतः एकवार पुनः कहिए। [रङ्गशाला के दूसरे लोग सुने पर जिससे बात होती हो वह न सुने–इस प्रकार कहने को 'जनान्तिक' कहते हैं]।

भीमसेन—सहदेव ! देखो। (और 'मथ्नामि कौरवशतं' इस श्लोक को पुनः पढ़ता है)।

१ 'कच्चिन्न'। २ 'ता पुणो बि भणाहि'। ३ 'भीमः—सहदेव ! पश्य। 'मथ्नामि कौरवशत' मित्यादि पुनः पठति।'

४ अयमार्येणेति कचिन्न। ५ 'का पुनस्तत्र'।

सहदेवः-- आर्य ! एवं गुरुणा सन्दिष्टम् ।

भीमसेनः--कस्य ? ।

सहदेवः--सुयोधनस्य ।

भीमसेन--किमिति ? ।

सहदेवः--

इन्द्रप्रस्थं वृकप्रस्थं जयन्तं वारणावतम् ।
प्रयच्छे[1] चतुरो ग्रामान्कश्चिदेकं च पञ्चमम्[2] ॥ १६ ॥

इन्द्रप्रस्थमिति । इन्द्रप्रस्थं=खाण्डवप्रस्थम् । तच्च सम्प्रति जयपुरराज्ये 'खण्डेला'इति ख्यातं स्यादिति मन्ये । वृकप्रस्थं=सम्प्रति जयपुरान्तर्वर्त्ति-खेतडीराज्ये 'बाघपत' इति प्रसिद्धं स्यात् । जयन्तं=सम्प्रति'जीन्द'इति प्रसिद्धं 'जीणमाता' इति प्रसिद्धं वा स्थानं स्यात् । वारणावतं='वरणावा' इति (मेरठप्रान्ते) प्रसिद्धम् । एषु च चतुर्षु ग्रामेषु कौरवैः पाण्डवानामुपरि विषदा-नादिना पीडनं कृतम् । वक्ष्यमाणविषभोजनादेश्च ग्रामैः सह यथायथं सम्बन्धो बोध्यः ॥ १६ ॥

सहदेव—आर्य ! आपने महाराज के (दुर्योधन के प्रति भेजे गए 'पाँच ग्राम लेकर सन्धि करने को हम तैयार हैं') इस सन्देश के गूढतत्त्व को ठीक २ नहीं समझा ।

भीमसेन—तो कहो इसमें क्या गूढतत्त्व है ? ।

सहदेव—सुनिए ! इस प्रकार गुरुवर (महाराज) ने सन्देश दिया है कि—।

भीमसेन—किसको सन्देश दिया है ? ।

सहदेव—दुर्योधन को ।

सहदेव-(वह सन्देश यों है-) "इन्द्रप्रस्थ, वृकप्रस्थ, (बाघपत ?) जयन्त, (जींद स्टेट), वारणावत (वरणावा—मेरठ) इन चार ग्रामों

१ क्वचिन्न । २ 'देहि मे चतुरो ग्रामान्पञ्चमं कञ्चिदेव तु' पाठा० ।

भीमसेनः—ततः किम् ?।

सहदेवः—तदेवमनया प्रतिनामग्रामप्रार्थनया पञ्चमस्य चाऽकीर्तनाद्विषभोजन-जतुगृहदाह-द्यूतसभा-द्यपकारस्थानोद्घाटनमेवेदं मन्ये।

भीमसेनः—(साटोपम्) वत्स ! एवं कृते किं भवति ?।

सहदेवः—आर्य ! एवं कृते लोके तावत्स्वगोत्रक्षयाशङ्कि हृदय-

ततः किम्=एवं कथनेन किं जातम्?। कोऽत्र गूढ आशय इति प्रश्नः। **प्रतिनामेति**। ग्रामनामोच्चारणपूर्वकं ग्रामप्रार्थनयेत्यर्थः। **पञ्चमस्य**=पञ्चमस्य ग्रामस्य। **अकीर्त्तनात्**-अकथनात्। **अपकारेति**। अत्याचारस्थाननामप्रकाशनमित्यर्थः। **साटोपं**=सक्रोधम्। **एवं कृते**=इत्थं गूढमभिप्रायमास्थाय सन्धिप्रस्तावे कृते। **लोके**=जगति। स्वगोत्रक्षयमाशङ्कते इति **गोत्रक्षयाशङ्कि**=स्ववंशक्षयभयातुरम्। **असन्धेयता**=सन्धानाऽयोग्यता।

को और पाँचवाँ ग्राम जो तुमारी इच्छा हो सो, इस प्रकार पाँच ग्राम हमे दो ॥ १६ ॥

भीमसेन—इसे क्या हुआ ?। (इसमें क्या गूढ रहस्य है ?)।

सहदेव—इस प्रकार चार ग्रामों को नाम लेकर मांगने से तथा पाँचवे का नाम न लेने से महाराजनें कौरवों द्वारा उन उन ग्रामों में किए गए विषदेना, जतुगृह में आग लगाना, जूंवा में धन हरण कर लेना आदि अत्याचारों की उन्हें याद दिलाई है।

भीमसेन—(बड़े आवेश से) इस प्रकार याद दिलाने से क्या लाभ है ?।

सहदेव—आर्य ! इस प्रकार सन्धि की चर्चा से महाराज ने जगत् को तो यह दिखा दिया कि—महाराज युद्ध में भाई-बन्धुओं के

---

१ क्वचिन्न। २ 'मन्यामहे'। ३ 'किङ्कृते'।

[1]माविष्कृतं भवति, कुरुराजस्य तावदसन्धेयता तदैव प्रतिपादिता भवति।

भीमसेनः—मूढ ! सर्वमप्येतदनर्थकम् । कुरुषु[2] तावदसन्धेयता तदैव प्रतिपादिता[3] यदैवाऽस्माभिरितो वनं गच्छद्भिः सर्वैरेव कुरुकुलस्य निधनं प्रतिज्ञातम्[4]। [प्रसिद्धश्च[5] लोकेऽपि धृतराष्ट्रकुलक्षयः]। लोकेऽपि च धार्तराष्ट्रकुलक्षयः किं लज्जाकरो

मूढ=अज्ञ !। सर्वमेतत्=गूढाभिप्रायादिकम्। अनर्थकं=वृथैव। असन्धेयता=सन्धानाऽयोग्यता । निधनं=मरणम्। वधः । प्रसिद्धश्चेति । अस्माकं चेयं प्रतिज्ञा लोकेऽपि प्रसिद्धा जाता, न गुप्तेत्यर्थः । किं लज्जाकर

मारे जाने से बड़े दुःखी हैं और ५ ग्राम लेकर ही सन्धि करलेना चाहते हैं, उधर दुर्योधन को पूर्वकृत अत्याचारों की याद दिलाकर यह दिखाया है कि तुम्हारा हमारा मेल कैसा ?, याद करो उन घटनाओं को।

भीमसेन—यह सब व्यर्थ है, कुरुवों के साथ हमारा मेल नहीं हो सकता यह तो उसी समय हम लोगोंने कह दिया था जिस समय वन में जाते समय कौरवों कुल के विनाश की हम सबनें प्रतिज्ञा की थी। और वह हमारी (कुरुकुल विनाश की) प्रतिज्ञा भी सबको मालूम ही है किसी से छिपी तो है नहीं।

[सहदेव—लज्जित हो चुप हो जाता है]।

भीमसेन--क्या धृतराष्ट्र कुल के विनाश करने में तुम लोगों

१ 'आविष्कृतं, कुरुराजस्याऽसन्धेयता च दर्शिता भवति'।

२ 'कुरुराजस्य' ३ 'निवेदिता'।

४ 'प्रसिद्धश्च लोकेऽपि धार्तराष्ट्रकुलक्षयः । सहदेवो लज्जां नाटयति।' भीमः—धृतराष्ट्रकुलक्षयः किं लज्जाकरो भवताम्!। अपि च रे मूर्ख' इति पा०।

५ क्वचिन्न ।

भवताम् ! । अपि च रे मूर्ख !

युष्मान्ह्रेपयति क्रोधाल्लोके शत्रुकुलक्षयः ।
न लज्जयति दाराणां सभायां केशकर्षणम् ! ॥ १७ ॥

द्रौपदी—(जनान्तिकम्) णाह ! ण लज्जन्ति एदे । तुमं वि दाव मा विसुमरेहि ।

(नाथ ! न लज्जन्त एते । त्वमपि तावन्मा विस्मार्षीः) ।

भीमसेनः— [सस्मरणं] वत्स ! कथं चिरयति पाञ्चाली ?। त्वरते मे मनः संग्रामावतरणाय ।

सहदेवः—आर्य ! का खलु वेलाऽत्रभवत्याः प्राप्तायाः । किंतु

इति । किं धृतराष्ट्रकुलवधो भवतां=भवद्भ्यो लोके लज्जां ददातीत्यर्थः ।

युष्मानिति । ह्रेपयति=लज्जामावहति । क्रोधात्=द्रौपदीकेशाकर्षणादिसमुद्भूतात्कोपात् । शत्रुकुलक्षयः=कुलवंशविनाशः । दाराणां=भार्याया द्रौपद्याः । न लज्जयति=न ह्रेपयति । केशकर्षणं लज्जायां कर्तृभूतम् ॥ १७ ॥

जनान्तिकम्=त्रिपताककरेणापवार्य । एते=युधिष्ठिरादयः । मा विस्मार्षीः=नैव विस्मर ।

चिरं करोति चिरयति=विलम्बते । का खलु वेला=कियती वेला । भूय-

को लज्जा मालूम होती है ! । अरे मूर्ख !

शत्रु के कुल के विनाश करने में तो तुम्हें लज्जा मालूम होती है, परन्तु अपनी स्त्री के बाल[1] पकड़ कर सभा में बेइज्जत किए जाने से लाज नहीं लगती है ? ॥ १७ ॥

द्रौपदी—(जनान्तिक मे) नाथ ! इन लोगों को तो लज्जा (लाज) है नहीं, परन्तु आप तो मत भूल जाइएगा ।

भीमसेन—वत्स ! द्रौपदी ने बहुत देर लगाई, क्या कारण है ? । मेरा मन युद्ध मे उतर पड़ने के लिए लालायित हो रहा है ।

सहदेव—आर्य ! बहुत देर हुई माननीया आर्या द्रौपदी को

---

१ क्वचिन्न । २ 'तत्र भवत्याः' ।



न लज्जयति दाराणां सभायां केशाकर्षणम्!'।

प्रथम अङ्क १७

रोषावेशवशादार्याऽऽगताप्यार्येण नोपलक्षिता।

भीमसेनः—[दृष्ट्वा, सादरम्] देवि ! समुद्धतामर्षैरस्माभिरागतापि भवती नोपलक्षिता। अतो न मन्युं कर्तुमर्हसि।

द्रौपदी—णाह ! उदासीणेसु तुम्हेसु मह मण्णु, ण उण कुविदेसु।

[नाथ ! उदासीनेषु युष्मासु मम मन्युर्न पुनः कुपितेषु]।

भीमसेनः—यद्येवमपगतपरिभवमात्मानं समर्थयस्व।

द्रौपदी—सखेदं निःश्वसिति।

सी वेला जाता। प्राप्तायाः=आगतायाः। रोषावेशवशात्=क्रोधावेशवशात्। आर्य्या=द्रौपदी। दृष्ट्वा=देवीं दृष्ट्वा। समुद्धतामर्षैः=प्रवृद्धक्रोधैः। आगताऽपि=इह प्राप्ताऽपि। भवती=श्रीमती। मन्युं=क्रोधम्। उदासीनेषु=उदासीनवदास्थितेषु। प्रतीकारमकुर्वाणेषु। अकुपितेषु। कुपितेषु=क्रुद्धेषु।

अपगतपरिभवम्=व्यपगतपरिभवक्लेशम्। आत्मानं=स्वम्। समर्थयस्व=

आए तो, किन्तु आपनें क्रोध के आवेश में उन्हे देखा ही नहीं।

भीमसेन-(देखकर आदर के साथ) देवि ! क्रोध के आवेश में हम लोगों नें आपको आजाने पर भी नहीं देखा। इसके लिए आप नाराज न होवें।

द्रौपदी-नाथ ! आप उदासीन हो बैठे रहते तो मुझे दुःख होता। जब आप शत्रुओं पर इस प्रकार कुपित हो मेरे अपमान का बदला लेना चाहते हैं तो मुझे दुःख कैसे हो सकता है।

भीमसेन-तो अब आप अपनें अपमान का बदला चुक गया समझिए। अर्थात् तुमारे शत्रुओं का विनाश निकट ही समझो।

द्रौपदी-खिन्न मन हो लम्बे सांस छोडती है।

१ 'वशादार्येण' पा०। २ 'न लक्षिता'। ३ 'वर्द्धिताऽमर्षैः'।
४ 'कुप्यमानेषु'। ५ 'कश्चिन्न'।

भीमसेनः—[हस्ते गृहीत्वा, पार्श्वे समुपवेश्य, मुखमवलोक्य च]

किं पुनरत्र भवतीमुद्विग्नामिवोपलक्षयामि ।

द्रौपदी—**णाह ! किं वि उव्वेअकालणं तुम्हेसु सण्णिहिदेसु ।**

[नाथ ! किमप्युद्वेगकारणं युष्मासु संनिहितेषु ?] ।

भीमसेनः—**किमिति नावेदयसि ? ।**

[केशानवलोक्य निःश्वस्य] **अथवा किमावेदितेन ।**

जीवत्सु पाण्डुपुत्रेषु दूरमप्रोषितेषु च ।

जानीहि । किं=किमिति । अत्रभवतीं=माननीयाम् । उद्विग्नामिव=दुःखितामिव । खिन्नामिव । उपलक्षयामि=अवगच्छामि । विलोकयामि ।

नाथ=स्वामिन् । युष्मासु=भवादृशेषु वीरेषु । सन्निहितेषु=निकटस्थितेषु । 'किमिव कारण'मिति पाठे किं कारणं भवेत्, न किमपीत्यर्थः । 'न किमपी'ति पाठेऽर्थः स्पष्टः । 'किमपी'ति पाठेऽकथनीयमित्यर्थः । भीमसेनः पुनरपि पृच्छति–किमितीति । कुतो हेतोरित्यर्थः । नावेदयसि=न कथयसि । किमित्युद्वेगकारणं निह्नुषे ? । आवेदितेन=कथितेन । किं=किं प्रयोजनम् ? ।

जीवत्सु=विद्यमानेषु । प्राणान् दधानेषु । अमृतेषु ।ताननादृत्येत्यर्थः । यस्य च भावेनेति सप्तमी । दूरमप्रोषितेषु च=दूरदेशमप्रयातेषु च ।

भीमसेन–(द्रौपदी का हाथ पकड़ बगल में बैठा उसका मुख देखकर) मैं आपको उद्विग्न व उदास-सी देखता हूं क्या कारण है ? ।

द्रौपदी—नाथ ! आपलोगों के रहते मेरे उद्वेग का क्या कारण हो सकता है ?, अर्थात् कोई कारण नहीं है ।

भीमसेन !—क्यों नहीं कहती हो ? । (उसके बालों को देखकर) अथवा कहने से ही क्या होगा ।

पाण्डवों के जीते रहते हुए भी, उनके कहीं दूर न जाकर पास ही

१ क्वचिन्न । २ 'न किं वि' । 'न किमपि' । 'किमिव' । ३ अप्रोषितेष्वपि' ।

पाञ्चाल[1]राजतनया वहते[2] यदिमां दशाम् ॥ १८ ॥

द्रौपदी--हञ्जे बुद्धिमदिए ! [3]कहेहि दाव णाहस्स सव्वं व[4]वसिदं । को अण्णो मह परिहवेण खिज्जइ ।

[हञ्जे बुद्धिमतिके ! कथय तावन्नाथस्य सर्वं व्यवसितम् । कोऽन्यो मम परिभवेण खिद्यते] ।

चेटी--जं देवी आणवेदि ।

[भीममुपसृत्य । अञ्जलिं बद्ध्वा] [5]सुणादु कुमालो । इदो वि अहि[6]अदरं अज्ज उव्वे[7]अकालणं आसी देवीए ।

पाञ्चालराजतनया=पाञ्चालराजदुहिता द्रौपदी ।

इमाम्=ईदृशीम् । दशां=दुर्दशाम् । वहते=धत्ते ॥ १८ ॥

द्रौपदी कुलवधूत्वेन दासीं मध्ये कृत्वा प्राणप्रियमपमानकारणमभिधत्ते-हञ्जे इति । नाथस्य=भीमस्य । व्यवसितं=वृत्तान्तम् । व्यापारम् । यज्ज्ञातम् । परिभवेण=अपमानेन । आज्ञापयति=आज्ञां करोति । कथयति । उपसृत्य=

में उपस्थित रहने पर भी द्रौपदी की जब यह दशा हो रही है ॥ १८ ॥

द्रौपदी—हञ्जे बुद्धिमतिके ! नाथ से भानुमती वाली आज की सब घटना कह दो । दूसरा कौन है जो मेरे अपमान से खिन्न होगा । (अर्थात् यही एक ऐसे हैं जिन्हें मेरे अपमान से दुःख होता है, अतः इनको वह घटना न सुनाई जाएगी तो किसे सुनाई जाएगी । अतः हे दासी भानुमतीवाली घटना उन्हें सुना दो)।

चेटी—जैसी देवी की आज्ञा । (भीमसेन के पास जाकर हाथ जोडकर) कुँवरजी ! इस (केशाकर्षण) से भी अधिक देवी के दुःख व क्रोध का एक और भी कारण हुआ है ।

१ 'पञ्चाल' । २ 'वहतीयमिमां दशाम्' । ३ 'णिवेदेहि' ।
४ क्वचिन्न । ५ 'कुमाल ! इदो विं' । ६ 'अहिअं' । ७ 'मण्णुकालणं' ।

[यद्देव्याज्ञापयति । शृणोतु कुमारः । इतोऽप्यधिकतरमद्योद्वेगकारणमासीद्देव्याः ।]

भीमसेनः—**किं नामाऽस्मादप्यधिकतरम् ? । बुद्धिमतिके ! तत्कथय कथय ।**

कौरव्यवंशदावेऽस्मिन्क एष शलभायते ? ।
बद्धवेणीं स्पृशन्नेनां कृष्णां धूमशिखामिव ॥ १९ ॥

तस्य समीपं गत्वा । **उद्वेगकारणं**=खेदहेतुः । **मन्युकारणमिति** पाठे—मन्युकारणं दैन्यकारणम् । ग्लानिकारणम् । **देव्याः**=द्रौपद्याः । **तत्कथय कथय**=कारणं शीघ्रं कथय ।

धूमशिखामिव=धूमपटलमिव । **बद्धवेणीं**=निबद्धकेशपाशाम् । जटीभूतकेशपाशाम् । मुक्तवेणीमिति पाठे—उन्मुक्तकेशपाशाम् । **एनां कृष्णाम्**=इमां द्रौपदीम् । **स्पृशन्**=संस्पृशन् । आमृशन् । पीडयन् ।

कौरव्येति । प्रज्वलिते कुरुवंशदावानले । उद्दीप्ते वंशतुल्यकुरुकुलवनवह्नौ । **कौरववंशवह्नौ** द्रौपद्यामिति, मयीति वा । **क एष**=को वै । कः खलु । **शलभ इवाचरति शलभायते**=पतङ्गायते । कः किल द्रौपदीं क्लेशयन्नेतत्क्रोधाग्नौ पतङ्गवन्मर्तुमिच्छति ॥ १९ ॥

भीमसेन—हैं ! क्या इससे भी अधिक ! तो उसे जल्दी कहो ।

इस द्रौपदी को जिसके केश खुले हुए हैं और जटा की तरह आपुस में उलझ गए हैं, जो धूम की शिखा की तरह मालूम होते हैं—उसे छेडकर—इसके कौरव वंश (वंश=बांस व खान्दान) को जलाने वाली क्रोधरूपी दावाग्नि मे कौन पतिङ्ग की तरह जलना चाहता है ? ॥१९॥

१ 'अधिकमद्यो' । २ अधिकम् । ३ क्वचिन्न । ४ 'कथय' । ५ 'मुक्तवेणीम्' । ७ 'न्नेताम्' ।

चेटी—**सुणादु कुमालो । अज्ज क्खु देवी अम्बासहिदा सुभद्दाप्पमुहेण सवत्तिवग्गेण परिवुदा अज्जाए गान्धालीए पादवन्दणं कादुं गेदा आसी ।**

[शृणोतु कुमारः । अद्य खलु देवी अम्बासहिता सुभद्राप्रमुखेन सपत्नीवर्गेण परिवृता आर्याया गान्धार्याः पादवन्दनं कर्तुं गता आसीत्]।

भीमसेनः—**युक्तमेतत् । वन्द्याः खलु गुरवः । ततस्ततः ?।**

चेटी—**तदो पडिणिवुत्तमाणा भाणुमदीए देवी दिट्ठा ।**

[ततः प्रतिनिवर्त्तमाना भानुमत्या देवी दृष्टा]।

भीमसेनः—(सक्रोधम्) **आः ! शत्रोर्भार्यया दृष्टा !!।**

देवी=द्रौपदी । स्वामिनीति पाठेऽपि स एवार्थः । **अम्बासहिता**=मातृसहिता । कुन्तीसहिता । 'सखीभिः सहिते'ति पाठः क्वचित् । **सुभद्राप्रमुखेन**=सुभद्राप्रधानेन । सुभद्रा=अर्जुनपत्नी । **सपत्नीवर्गेण परिवृता**=स्वपतिपत्नीवर्गेण समन्विता । **आर्यायाः**=पूज्यायाः । **गान्धार्याः**=दुर्योधनमातुर्गान्धार्याः । **युक्तमेतत्**=उचितमेतत् । **खलु**=निश्चयेन । **वन्द्याः**=वन्दनीयाः । नमस्कार्याः । **ततस्ततः**=अग्रे कथय किं जातम् ? । **ततः**=तदनन्तरम् । गान्धार्या भवनाद्वा । **प्रतिनिवर्त्तमाना**=प्रत्यावर्त्तमाना । **भानु-**

चेटी–अच्छा तो कुँवर जी, सुनिए, आज प्रातःकाल महारानी द्रौपदी-माता कुन्ती जी, तथा सुभद्रा आदि सपत्नियों के साथ आर्या गान्धारी (दुर्योधन की माता) के दर्शन करने गई थीं ।

भीमसेन–बहुत ठीक है। गुरुजनों की बन्दना करनी ही चाहिए। हाँ, फिर क्या हुआ ? ।

चेटी–वहाँ से वापिस लौटते समय रास्ते मे देवी को भानुमती ने देख लिया ।

१ क्वचिन्न ।　　२ 'अज्ज क्खु भट्टिणी सहीए सहिदा' ।
३ 'अद्य खलु स्वामिनी सखीसहिता । ४ 'युज्यते । यतोऽभिवन्दनीया गुरवः' ।

हन्त ! स्थानं क्रोधस्य साम्प्रतं देव्याः। ततस्ततः ? ।

चेटी--तदो ताए देवीं पेक्खिअ सहीजणदिण्णदिट्ठिए सगव्वं ईसिं विहसिअ भणिअं।

[ततस्तया देवीं प्रेक्ष्य सखीजनदत्तदृष्ट्या सगर्वमीषद्विहस्य भणितम्] ।

भीमसेनः--न केवलं दृष्टा, उक्ता च, अहो ! किं कुर्मः ! । ततस्ततः ? ।

चेटी--अइ जण्णसेणि ! पञ्च गामा पत्थीअन्ति त्ति सुणि आदि कीस दाणीं वि दे केसा ण संजमीअन्ति ? ।

[अयि याज्ञसेनि ! पञ्च ग्रामाः प्रार्थ्यन्ते इति श्रूयते तत् कस्मा-

---

मत्या=दुर्योधनपत्न्या । आ इत्याक्षेपे । शत्रोः=दुर्योधनस्य । हन्त-विषादे अनुकम्पायां वा । 'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः' इत्यमरः' । स्थानम् = अवसरः । 'देव्याः क्रोधस्य स्थान'मित्यन्वयः । ततस्ततः=ततः किं जातं कथय । तया=दुर्योधनभार्यया । देवीं=द्रौपदीम् । प्रेक्ष्य=दृष्ट्वा । सखीजने दत्ता दृष्टिर्यया तया-सखीजनदत्तदृष्ट्या= स्वसहचरीलोकनिक्षिप्तलोचनया । सखीवदनेति क्वचित्पाठः । सखीमुखेत्यर्थः । सगर्वं=साभिमानम् । भणितं=कथितम् । याज्ञसेनि=हे द्रौपदि । युष्माकं=

भीमसेन-(क्रोध से) अह ! शत्रु की भार्या ने देवी को देखा ?, ओह ! यह तो देवी के क्रोध का जरूर उचित अवसर है ! हाँ तब फिर क्या हुआ ?।

चेटी-तब उस भानुमती ने देवी को देखकर-अपनी सखियों की ओर नजर घुमाकर बड़े घमण्ड के साथ हंस के कहा कि—।

भीमसेन-हैं ! शत्रु की स्त्री भानुमती ने देवी को देखा ही नहीं बल्कि कुछ कहा भी, हे ! इतनी धृष्टता ! क्या करें ! अच्छा तब क्या हुआ ?।

चेटी-उसने कहा कि अरी द्रौपदी ? हम सुन रही हैं कि पाँच

---

१ 'स्थानं खेदस्य' । २ क्वचिन्न । ३ 'सखीवअण' 'सखीवदन' । ४ 'जण्णसेणि कीस तुम्हाणं अज्ज वि केसा' । ५ 'याज्ञसेनि किमिति युष्माकमद्यापि केशा न' ।

दिदानीमपि ते केशा न संयम्यन्ते ?] ।

भीमसेनः—सहदेव ! श्रुतम् ? ।

सहदेवः--आर्य ! उचितमेवैतत्तस्याः । दुर्योधनकलत्रं हि सा । पश्य-

स्त्रीणां हि साहचर्याद्भवन्ति चेतांसि भर्तृसदृशानि ।
मधुराऽपि हि मूर्च्छयते विषविटपिसमाश्रिता वल्ली ॥२०॥

भवत्याः । इदानीमपि=सन्धिमहोत्सवेऽपि । न संयम्यन्ते=न नियम्यन्ते । न बध्यन्ते ।

श्रुतमिति । अपि श्रुतं त्वया शत्रूणामधिक्षेपवाक्यमित्यर्थः । एतत्= ईदृशं वाक्यम् । सा=भानुमती । कलत्रं=भार्या । 'कलत्रं श्रोणिभार्ययोः' इति विश्वः ।

साहचर्यात्=पतिसाहचर्यात् । स्त्रीणां-चेतांसि=मनांसि । भर्तृसदृशानि= पतितुल्यानि भवन्ति । हि=यतः । मधुराऽपि=माधुर्यशालिन्यपि । वल्ली= लता । विषविटपीति । विषवृक्षाश्रितेत्यर्थः । मूर्च्छयते=मूर्च्छां कुरुते ॥२०॥

गाँव लेकर ही अब तो सन्धि की जा रही है ! तो अब भी केश क्यों नहीं बांधती हो ? । (द्रौपदी की प्रतिज्ञा थी कि कौरवों का विनाश होने पर ही मैं अपने बालों को बाधूँगी, ऐसे नहीं) ।

भीमसेन-सहदेव ! सुना ! तुमने !

सहदेव-आर्य ! उस (भानुमती) का यह ताना मारना उचित ही है, क्योकि वह दुर्योधन की ही तो स्त्री है । देखिए-

स्त्रियो की चित्तवृत्तियाँ भी पति के साथ रहते २ उसी की तरह हो जाती हैं । मीठी भी लता यदि विष के वृक्ष पर चढ जाती है तो उसके भी खाने से मूर्च्छा व मृत्यु हो जाती है ॥ २० ॥

१ 'आर्य, किमिहोच्यते । दुर्योधनकलत्रं हि सा' ।

२ 'मधुराणि हि' । ३ 'विषविटपसमाश्रिता' ।

भीमसेनः—बुद्धिमतिके ! ततो देव्या किमभिहितम् ? ।

चेटी—कुमाल ! जइ परिजणहीणा भवे तदो देवी भणादि ।

[कुमार ! यदि परिजनहीना भवेत्तदा देवी भणति] ।

भीमसेनः—किं पुनरभिहितं भवत्या ? ।

चेटी—कुमाल ! मए एवं भणिदं—'अइ भाणुमदि ! तुम्हाणं अमुक्केसु केसहत्थेसु कधं अम्हाणं देवीए केसा संजमीअन्ति' त्ति ।

[कुमार ! मयैवं भणितम्—'अयि भानुमति ! युष्माकममुक्तेषु केशहस्तेषु कथमस्माकं देव्याः केशाः संयम्यन्ते' इति] ।

परिजनहीना=सेविकारहिता । सत्यां मयि दास्यां कथं स्वामिनी उत्तरं दद्यात् । मयैवोत्तरं दत्तमिति यावत् । पाठान्तरे—परिहीनं=विकलम् । न्यूनम् । अकुशलम् । भवत्या=चेट्या त्वया ।

अमुक्तेषु=अद्यापि युष्मद्भर्तृवधाऽभावादनुन्मुक्तेषु । केशहस्तेषु=केशकलापेषु । संयम्यन्ते=बध्यन्ते । यदा भवतीनां केशा मुक्ताः स्युस्तदा मम स्वामिन्याः केशा बध्यन्ते इत्याशयः ।

भीमसेन—बुद्धिमतिके ! तब देवी ने क्या उत्तर दिया ? ।

चेटी—कुँवर जी ! यदि देवी के साथ नौकर चाकर न होते तो देवी जवाब देती । (अर्थात् जब मैं साथ थी तो देवी को जवाब देने की जरूरत ही क्या थी, मैंने ही उत्तर दे दिया) ।

भीमसेन-तो तुमने क्या उत्तर दिया ? ।

चेटी-कुँवर जी ! मैंने ऐसा कहा-अरी भानुमती ! जब तक तुम लोगों के केश बँधे हैं तब तक हमारी देवी के केश कैसे बाँधे जा सकते हैं ? । (पति के मरने पर ही स्त्रियों के केश खुलते हैं, अतः जब तुमारे पति मारे जाएंगें तभी हमारी देवी के केश संवारे जाएंगें, अभी तो तुम्हारे पति जीवित हैं, अतः इनके केश अभी कैसे बँध सकते हैं) ।

१ 'पडिहीणं मम वअणं भवे' । २ 'यदि परिहीनं मम वचनं' ।

३ 'तदो मए परिकुव्विअ भणिअं' । ४ 'केसेपु' । ५ 'केसेसु' ।

भीमसेनः—(सपरितोषम्) साधु बुद्धिमतिके ! साधु । तदभि-हितं यदस्मत्परिजनोचितम्। (स्वाभरणानि बुद्धिमतिकायै प्रयच्छति)। (सावष्टम्भमासनादुत्तिष्ठन्) अयि पाञ्चालतनये ! अलं विषादेन, किं बहुना, यत्करिष्ये तच्छ्रूयताम्। अचिरेणैव कालेन—

चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।

सपरितोषं=ससन्तोषम् । सानन्दम् । साधु=युक्तं कृतम् । तत्=तद्वाक्यम् । अभिहितं=त्वयोक्तम् । यत्=यद्वाक्यम् । अस्मत्परिजनोचितम्=अस्मद्भृत्यजनोचितम् । इति पारितोषिकतया स्वाभरणान्युन्मुच्य ददाति । पाञ्चालराजतनये=पाञ्चालदेशपतिद्रुपदपुत्रि । विषादेन=शोकेन । अलं=प्रयोजनं नास्ति । किं बहुना-'प्रलपितेने'ति शेषः । अचिरेणैव=अल्पीयसैव । स्वल्पेनैव । 'कालेने'त्यस्य अग्रिमश्लोकेन सहान्वयः ।

चञ्चदिति । हे देवि=हे द्रौपदि । चञ्चन्तौ च तौ भुजौ च चञ्चद्भुजौ, ताभ्यां भ्रमितया चण्डया-भीषणया-गदया संचूर्णितम् ऊरुयुगलं यस्याऽसौ तस्य-चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य=चलद्बाहुभ्रमितप्रचण्डगदाघातसञ्चूर्णितसक्थिद्वयस्य । सुयोधनस्य=दुर्योधनस्य । अस्य शोणिते-

भीमसेन-(प्रसन्न होकर) वाह बुद्धिमतिके वाह, हमारे नौकरों को जैसा उत्तर देना चाहिए वैसा ही उत्तर तुमने दिया । (अपने आभूषण उतार कर बुद्धिमतिका को देता है। बडे आवेश व अधीरता से उठता हुआ-) अयि द्रौपदी !। सोच मत करो । ज्यादा कहने से क्या फल है । जो मैं करूँगा सो सुनो !

शीघ्र ही मैं फडकती हुई भुजाओं से घुमाकर फेकी गई गदा के आघात से दुर्योधन की जांघों को चूर्ण करके उसके खूब दृढता

१ तदभिहितं भवत्या' ।२ क्वचिन्न । ३ 'अधीरमासना' । ४ 'भवति पाञ्चालराजतनये ! श्रूयताम्' ।'अत्रभवति पाञ्चालराजतनये, किं बहुना । श्रूयताम् । ५ 'पञ्चाल' ।

स्त्यानावनद्धघनशोणितशोणपाणि-

उत्तंसयिष्यति कचांस्तव देवि ! भीमः ॥ २१ ॥

द्रौपदी—किं णाह ! दुक्करं तुए परिकुविदेण । सव्वहा अणुगेह्णन्तु एदं ववसिदं दे भादरो ।

[किं नाथ ! दुष्करं त्वया परिकुपितेन । सर्वथानुगृह्णन्त्वेतद्व्यवसितं ते भ्रातरः] ।

ऽन्वयः । स्त्यानश्च तदवनद्धं च यत् घनशोणितं, तेन शोणः पाणिर्यस्यासौ—स्त्यानावनद्धघनशोणितशोणपाणिः=स्तिमितलिप्तगाढरक्तलोहितकरतलः । गाढलग्नघनरुधिररक्तहस्तयुगलः । 'स्त्यानं स्तिमितसङ्घयोः' इति विश्वः । भीमः=भीमसेनः । तव=भवत्याः । कचान्=जटीभूतान् केशान् । असंस्कृतान् वेणीभूतान् केशान् । उत्तंसयिष्यति=भूषयिष्यति । 'उत्तम्भयिष्यती'ति पाठे—बन्धयिष्यतीत्यर्थः । वसन्ततिलका वृत्तम् ॥ २१ ॥

'किं नाथे'त्यत्र 'किं नाम नाथे'ति केचित् पठन्ति । किं=किङ्कार्यम् । सर्वं सुकरमित्यर्थः । अनुगृह्णन्तु=स्वीकुर्वन्तु । वस्तुतस्तु—"नाथ ! अतिदुष्करं त्वया परिकुपितेन व्यवसितं, तदनुमन्यन्तामेतद्व्यवसितं देवताः" इति वा

से चपके हुए गाढे २ रुधिर से लाल हो गए है हाथ जिसके ऐसा भीमसेन तुमारे इन खुले हुए बालों को अपने हाथों से बाँधेगा । (बालों को सँवारेगा) ॥ २१ ॥

द्रौपदी-नाथ ! यदि आप क्रोध करे तो फिर कौन कार्य अशक्य है । भगवान् करे आपकी इस प्रतिज्ञा को आपके भाई भी मान

१ 'अवबद्ध' । 'अवनद्ध' । २ उत्तम्भयिष्यति' ।

३ क्वचिन्न । ४ तथापि अणुगेह्णन्तु तुए एदं ववसिदं देवदाओ' ।

५ 'देवदाओ' ६ 'देवताः' ।

सहदेवः—अनुगृहीतमेतदस्माभिः ।

[नेपथ्ये महान्कलकलः । सर्वे सविस्मयमाकर्णयन्ति] ।

भीमसेनः-[(सानन्दम्) आर्ये ! किमेतत् ?] ।

मन्थायस्ताऽर्णवाऽम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः

कोणाघातेषु गर्जत्प्रलयघनघटाऽन्योन्यसङ्घट्टचण्डः ।

'तथाप्यनुगृह्णन्तु व्यवसितं देवता' इति वा प्राचीनपाठः, स एव सर्वोत्तमः। अन्ये पाठास्तु न तथा युक्ताः ।

अनुगृहीतं=स्वीकृतम् । एतत्=भीमोक्तम् । अस्माभिः=भ्रातृभिः ।

कलकलः=अकस्मादुत्थितो महाशब्दः । सर्वे=सर्वे सभासदः ।

मन्थेति । मन्थः-मथनं, यद्वा मन्थनदण्डः, तेन आयस्तं क्षिप्तं चालितं यदर्णवस्य-समुद्रस्य अम्भः-जलम्, तेन प्लुतं=व्याप्तं, कुहरं= छिद्रं=यस्यासौ मन्थायस्तार्णवाऽम्भःप्लुतकुहरः, स चासौ चलंश्च यो मन्दरः=मन्दराचलः, तस्य यो ध्वानः-शब्दस्तद्वत् धीरः-गम्भीरः ।

जाए। [पाठान्तर में-नाथ ! क्रोध के आवेश में आपने दुष्कर प्रतिज्ञा की है, अच्छा भगवान् आपकी सहायता करें] ।

सहदेव-हम लोगों को यह स्वीकार है ।

(नेपथ्य में बडा कोलाहल होता है)

(सब लोग आश्चर्य से सुनते हैं)

भीमसेन—सहर्ष, देवि ! यह—

मन्थन से या मन्थन दण्ड (मन्दराचल) से विक्षुब्ध जो समुद्र उसके जल से व्याप्त हो गए दरी-कन्दरा जिसके ऐसा जो घूमता हुआ मन्दराचल, उसकी ध्वनि की तरह ध्वनि है जिसकी, तथा

१ कचिन्न । २ 'मन्थायस्ताऽर्णवाऽर्णः' । मन्थो मथनमिति गौडाः । ३ 'वलन्' ।

कृष्णाक्रोधाग्रदूतः कुरुकुल[1]निधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसित[2]सखो[3] दुन्दुभिस्ताडितोऽयम् ॥२२॥

मन्थन(दण्डाघात)विक्षुब्धसमुद्रजलभृतकन्दरच्छिद्रभ्रमन्मन्दराद्रिध्वनिगम्भीर-रव इति यावत्। 'कुहरं गह्वरे च्छिद्रे क्लीबं नागान्तरे पुमा'निति मेदिनी। किञ्च=कोणेन दण्डेन ये आघातास्तेषु=दण्डाघातेषु सत्सु। तदाघातसमये। गर्जतां=ध्वनतां, प्रलयघनानां=कल्पान्तजलधराणां, घटायाः=समूहस्य योऽन्योन्यं सङ्घट्टः=सङ्घर्षः, तद्वत् चण्डः=भीषणः। दण्डघातवेलायां गर्जत्प्रलयजलदघटासङ्घर्षघोरः। केचित्तु-'ढक्काशतसहस्राणि भेरीशतशतानि च। एकदा यत्र हन्यन्ते कोणाघातः स उच्यते' इति विशिष्यकोणाघातशब्दार्थमाहुः। कृष्णायाः=द्रौपद्याः, क्रोधस्य=कोपस्य, अग्रदूतः=प्रथमसूचकः। कुरुकुलस्य कुरुपतेर्वा यत् निधनं-मरणं तस्य सूचक उत्पातरूपो निर्घातवातः = अशुभः प्रचण्डोऽनिलः। अस्माकं-पाण्डवानां यो सिंहनादः, तस्य यत्प्रतिरसितं=प्रतिध्वनिः, तस्य सखा=मित्रम्। अस्मत्सिंहनादसदृशः। अयं दुन्दुभिः=भेरी। केन=केन खलु। ताडितः=आहतः। 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः। 'कोणो वीणादिवादनम्' इत्यमरः। स्रग्धरा वृत्तम्॥ २२॥

दुन्दुभि (नगाडा) के बजाने का जो डण्डा उसके आघात के समय-घोर गर्जना करने वाले प्रलयकाल के मेघों की घटाओं की परस्पर टक्कर होने की तरह भीषण ध्वनि जिससे निकल रही है, तथा द्रौपदी के क्रोध के परिणाम का प्रथम बताने वाला ('नकीब', 'बधाउडा'), एवं कुरुपति दुर्योधन की मृत्यु के सूचन करने वाले उत्पातरूप झञ्झावात की तरह, तथा हमारे सिंहनाद की तरह शत्रुओं के हृदयों को दहलाने वाला--यह दुन्दुभि (नगाडा) किसने वजाया है ? ॥ २२ ॥

---

१ 'कुरुपति'। २ 'समो'। ३ 'ताड्यते'।

(प्रविश्य सम्भ्रान्तः-)

कञ्चुकी-'कुमार ! एष खलु भगवान्वासुदेवः—' ।

(सर्वे कृताञ्जलयः समुत्तिष्ठन्ति) ।

भीमसेनः-(ससम्भ्रमम्[1]) क्वासौ क्वासौ[2] भगवान् ? ।

कञ्चुकी—पाण्डवपक्षपातामर्षितेन सुयोधनेन संयैमितु[3]मारब्धः ।

(सर्वे सम्भ्रमं नाटयन्ति) ।

भीमसेनः—किं[4] संयतः ? ।

सम्भ्रान्तः=व्याकुलः । सत्वरः । काञ्चुकी=सौविदल्लः । राजपार्श्वचरः । (मुसाहब)। एष खलु=अयं किल । वासुदेवः=कृष्णः ।'एष' इत्यारभ्य 'संयमितुमारब्ध' इत्यन्तमेकं वाक्यं, तत्र 'भगवान् वासुदेव' इत्यर्द्धोक्ते एव भीमेनोक्तं-'क्वासाविति ?'। तदश्रृण्वन् कञ्चुकी स्ववाक्यं पूरयति-पाण्डवेति । पाण्डव-

(घबडाया हुआ कञ्चुकी—राजा का चोबदार या मुसाहब-प्रविष्ट होता है)

कञ्चुकी—कुँवर जी ! ये भगवान् श्रीकृष्ण... ...,।

(सब हाथ जोडकर खडे हो जाते हैं)

भीमसेन-कहाँ है कहाँ हैं भगवान् श्रीकृष्ण ? ।

कञ्चुकी-पाण्डवों के पक्षपाती होने के कारण उनको दुर्योधन बाँध ... ... ।

[सब घबडाते है]

भीमसेन-क्या भगवान् को बाँध लिया ? ।

१ 'ससम्भ्रमम्' इति क्वचिन्नास्ति ।

२ 'क्वासौ भगवान्' । ३ 'संयन्तुम्' ।

४ 'कथं स भगवान्वासुदेवः संयतः' पा० ।

कञ्चुकी—नहि नहि, संयमितुमारब्धः।

भीमसेनः—किं कृतं देवेन ?।

कञ्चुकी—ततः स महात्मा दर्शितविश्वरूपतेजःसम्पातमवधूय कुरुकुलमस्माच्छिबिरसंनिवेशमनुप्राप्तः कुमारमविलम्बितं द्रष्टुमिच्छति।

भीमसेनः—(सोपहासम्) किं नाम दुरात्मा सुयोधनो भगवन्तं संयमितुमिच्छति !। (आकाशे दत्तदृष्टिः) आः ! दुरात्मन् !

पक्षपातकुद्धेनेत्यर्थः। संयमितुं=बन्धेन योजयितुम्। संयतः=बद्धः।'बद्धे कीलितसंयतौ' इत्यमरः। देवेन=कृष्णेन। सः = श्रीकृष्णः। दर्शितं यत् विश्वरूपं=विराड्रूपं, तस्य यत्तेजः, तस्य यः सम्पातः=मण्डलम्—तेन यो मूर्च्छितः, तं-दर्शितविश्वरूपतेजःसम्पातमूर्च्छितं = प्रकटितविराट्ज्योतिःसञ्जातमूर्च्छितम्। कुरुकुलं=दुर्योधनादिकं कुरुवंशम्। अवधूय=तिरस्कृत्य। शिबिरसंनिवेशः=सेनानिवेशभूः। अनुप्राप्तः=आयातः। कुमारं=त्वां भीमसेनम्। अविलम्बितं=त्वरितमेव द्रष्टुमिच्छति=वासुदेवो दिदृक्षते।

कञ्चुकी—नहीं, नहीं, बाँधा नहीं, किन्तु बाँधना चाहता था।

भीमसेन—तब भगवान् ने क्या किया ?।

कञ्चुकी—भगवान् ने अपना विराट् रूप धारण किया उससे निकले हुए तेजो मण्डल से सब कौरव मूर्छित हो गए, तब उनको यों ही छोड कर भगवान् अपने पडाव (छावनी) पर चले आए है। और आप से तुरन्त मिलना चाहते है।

भीमसेन—(हँसकर) क्या ! दुष्ट दुर्योधन भगवान् को भी बान्धना चाहता था। (आकाश में देखता हुआ) अरे ! दुष्ट !

१ 'भीमः—(सपरितोषम्) हन्त ! विघटितः सन्धिर्भग्नावूरू च सुयोधनस्य। अथ किं कृतं देवेन' इत्यपि क्वचित्पाठः।

२ 'विहस्य'।



भगवतो विराट रूपम

स दर्शितविश्वरूपतेजःसम्पातमूर्च्छितमवधूय कुरुकुलम

कुरु-कुल-पांसुल[1] ! एवमतिक्रान्तमर्यादे त्वयि निमित्तमात्रेण पाण्डवक्रोधेन भवितव्यम् ! ।

सहदेवः—आर्य ! किमसौ दुरात्मा सुयोधनहतको[2] वासुदेवमपि भगवन्तं स्वरूपेण[3] न जानाति ? ।

भीमसेनः—वत्स ! मूढः खल्वयं दुरात्मा कथं जानातु ? । पश्य—

आत्मारामा विहितरतयो[4] निर्विकल्पे समाधौ
ज्ञानोत्सेकाद्[5] विघटिततमोग्रन्थयः सत्त्वनिष्ठाः ।

आत्मेत्यादि । सत्त्वनिष्ठाः सात्त्विकभावापन्ना मुनयो यं भगवन्तं वीक्षन्ते साक्षात्कुर्वन्ति । कीदृशाः ? । आत्मैवारामो वनं येषां ते । तथा चात्मवनयोस्तुल्यत्वेनात्यन्तमौदास्यमाविष्कृतम् । यद्वा— आ त्मनि आसमन्ताद्भावेन रमन्त इति–आत्मारामाः । त्यक्तेतरसङ्गा इत्यर्थः । पुनः कीदृशाः ? । निर्विकल्पे= निष्कलुषे निर्णीते त्यक्तभेदे वा, समाधौ=नियमविशेषे, विहितरतयः=कृतानुरागाः । 'विहितधृतयः' इत्यपि पाठः । तत्र विहिता धृतिर्धारणा यैस्ते । इदं त्वत्यन्ताऽभ्यासवैराग्याभ्यां भवति । तथा च गीता—'असंशयं महाबाहो ! मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥' इति ।

पापी कुलाङ्गार ! इस प्रकार तूने सभी मर्यादाओं को भङ्ग कर दिया है । तेरे लिए पाण्डवों का क्रोध तो निमित्त मात्र होगा । असल में तूँ अपनें पाप से ही नष्ट होगा ।

सहदेव–आर्य ! यह दुष्ट दुर्योधन क्या भगवान् श्रीकृष्ण के स्वरूप को भी नहीं पहिचानता है ? ।

भीमसेन—वत्स ! वह मूढ दुष्टात्मा भगवान् को क्या जानें । देखो—

आत्माराम, निर्विकल्प समाधि में निरत रहने वाले, ज्ञान से

१ 'पांसन' । 'पांशुर' । २ 'सुयोधनो' ।
३ 'स्वेन रूपेण' । ४ 'मतयः' । 'धृतयः' । ५ 'ज्ञानोद्रेकात्' ।

यं वीक्षन्ते[१] कमपि[३] तमसां ज्योतिषां वा परस्ता-
त्तं मोहान्धः[२] कथमयममुं वेत्ति[४] देवं पुराणम् ॥ २३ ॥

यद्वा-आत्मारामे=आत्मनीवाऽऽरामेऽप्यासमन्ताद्विहितरतयः कृतानुरागाः। यद्वा-आत्मैवारामो—वनं, तत्राऽऽसमन्ताद्भावेन विहितरतयः। अर्थद्वये निर्विकल्पे समाधौ सति यं वीक्षन्त इत्यर्थः। पुनः कीदृशाः? ज्ञानोत्सेकात्-तत्त्वज्ञानमाहात्म्याद्विनाशिततामसगुणाः, विनाशितमिथ्याज्ञाना वा। अनेन धृतेः फलमुक्तम्। 'ज्ञानोद्रेकात्' इत्यपि पाठः। उद्रेकः-प्रौढिः। अनेन तत्राऽऽसङ्ग उक्तः। अत्र तु प्रथमं वनवासः, ततः समाधिलाभः, ततस्तत्त्वज्ञानेन मिथ्याज्ञानविनाशः, ततः सत्त्वनिष्ठता, ततः साक्षात्कार इति तत्त्वज्ञानोत्पादकः क्रमोऽपि बोद्धव्यः। यद्वा-अन्यत्र सङ्गत्यागः; ततो धृतिः, ततः प्राज्ञप्रौढिः, ततोऽविद्यालक्षणतमोग्रन्थिभेदः, ततो राजसप्रवृत्त्युच्छेदो मूलोच्छेदात्, ततः सात्त्विकी प्रवृत्तिः, तस्याः फलमीश्वरप्रसादः, तेन भगवान्समस्ततमःप्रकाशयोः परतरो दृश्यते। तमेव तादृशपुरुषोऽपि न पश्यति, किं पुनर्मूढो दुर्योधन इति भावः। तं कीदृशम्?। कमपि-अनिर्वचनीयम्। तमसां-मिथ्याज्ञानानां, ज्योतिषां तत्त्वज्ञानानां परस्तात्परम्। ताभ्यामप्यगम्यमित्यर्थः। अत एव 'कमपी'त्युक्तम्। तं देवं कथमयं मोहान्धो जानातीति। पुनः कीदृशम्?। पुराणमनादिसिद्धम्। तथा च यमनियमादिसिद्धपुरुषधौरेयगम्यमिति ध्वनितमिति जगद्धरव्याख्या ॥ २३ ॥

जिनके हृदय की अज्ञानता की ग्रन्थियाँ खुल गई हैं, ऐसे सात्त्विक योगी लोग भी जिस को अन्धकार से व ज्योति से परे त्रिगुणातीत परात्पर रूप से देखते हैं—उन पुराण पुरुषोत्तम भगवान् को यह मोहान्ध अज्ञानी दुष्ट क्या जाने? ॥ २३ ॥

---

१ 'ध्यायन्ते'। २ 'मोहात्मा'। ३ 'किमपि'। ४ 'वेत्तु'।

आर्य जयन्धर ! किमिदानीमध्यवस्यति गुरुः ?[1] ।

कञ्चुकी—स्वयमेव गत्वा महाराजस्याध्यवसितं ज्ञास्यति कुमारः । (इति निष्क्रान्तः) ।

[६३ पृष्ठे]—

दुरात्मा=दुष्टप्रकृतिः । कुरुकुलपांसुल=कुरुवंशकलङ्क । एवम्=इत्थम् । अतिक्रान्ता मर्यादा येनाऽसौ तस्मिन् । अतिक्रान्तमर्यादे=उल्लङ्घितसन्मार्गे । त्वयि=दुर्योधने । निमित्तेति । वस्तुतस्तु स्वपापेनैव त्वं प्रनङ्क्ष्यतीति भावः । भगवन्तं=षड्विधैश्वर्यसम्पन्नम् । स्वरूपेण=तत्त्वतः । साक्षाद्ब्रह्मत्वेन । किं न जानाति=कथं नावगच्छति । यद्वा किं न जानाति=किमसौ न जानातीत्यर्थः । मूढः=तमसावृतः । ६४ पृष्ठस्थस्य २४ तमस्य श्लोकस्य—

गौडी व्याख्या-आत्मेति । आत्मा आनन्दस्वरूपत्वात्-आराम इव, तस्मिन् आ समन्ताद्विहिता रतिर्यैस्ते तथा । परे तु—आत्मारामाः=आत्मरताः । निर्विकल्पे=असम्प्रज्ञातसमाधौ, विषयज्ञानशून्ये । विहितरतयः= बद्धानुरागा इत्यर्थमाहुः । ज्ञानोद्रेकात्=प्रौढज्ञानात् । विगलिततमोग्रन्थयः=विध्वस्ताऽज्ञानबन्धनाः । सत्त्वनिष्ठाः=सात्त्विका योगिनः । तमसां = तमःकार्याणां, ज्योतिषां=रजःकार्याणां, सत्त्वकार्याणां वा । परस्तात्=परतः । वर्त्तमानमिति शेषः । देवं=चित्स्वरूपम् । तममुं=वेदान्तवेद्यम् । पुराणं=चिरन्तनम् । त्रिगुणाऽतीतं प्रपञ्चसाक्षिभूतं ब्रह्मस्वरूपमित्यर्थः । मोहान्धः=अज्ञानान्धः । अयं=दुर्योधनः । कथं=कथङ्कारम् । वेत्तु=जानातु । इत्यर्थः । मन्दाक्रान्ता वृत्तम् ॥ २३ ॥

जयन्धरनामा—कञ्चुकी । अध्यवस्यति—करोति ॥

अध्यवस्यन्ति=निश्चिन्वन्ति । गुरवः=पूज्यो युधिष्ठिरः । श्रीकृष्णयुधिष्ठिरादयो वा । अध्यवसितं=विचारम् । निर्णयं वा । कलकलः=कोलाहलः । 'कोलाहलः कलकलः' इत्यमरः ।

आर्य जयन्धर ! अब महाराज का क्या विचार है ? ।

कञ्चुकी—आप स्वयं ही जाकर महाराज का विचार जान

---

१ 'आर्य मैत्रेय ! किमिदानीमध्यवस्यन्ति गुरुवः' ।

(नेपथ्ये कलकलानन्तरम्) ।

भो भो ! द्रुपदविराटवृष्ण्यन्धकसहदेवप्रभृतयोऽस्मदक्षौहिणीपतयः, कौरवचमूप्रधानयोधाश्च ! शृण्वन्तु भवन्तः !,

यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं
यद्विस्मर्तुमपीहितं शमवता शान्तिं कुलस्येच्छता ।
तद्द्यूतारणिसंभृतं नृपसुताकेशाम्बराकर्षणैः[1]
क्रोधज्योतिरिदं महत्कुरुवने[2] यौधिष्ठिरं जृम्भते ॥२४॥

यदिति । यत्=क्रोधरूपं ज्योतिः । सत्यमेव व्रतं-नियमः, तस्य भङ्गः—विलोपः, तेन भीरु भीतं मनो यस्य तेन—सत्यव्रतभङ्गभीरुमनसा=सत्यपालननियमविलोपभयातुरमानसेन युधिष्ठिरेण । यत्नेन=विपुलेन प्रयत्नेन । अमन्दं मन्दं सम्पद्यमानं कृतं-मन्दीकृतं=कथञ्चिन्मन्दवेगतां नीतम् । स्वल्पीकृतम् । कुलस्य=स्वबन्धुबान्धवकौरवादिवंशस्य ।

शान्तिं=कल्याणम् । इच्छता=वाञ्छता । शमवता=शान्तस्वभावेन युधिष्ठिरेण । विस्मर्त्तुमपि=स्मृतिविषयतोऽपसारयितुमपि । ईहितं=चेष्टितम् । नृपसुताकेशाम्बराकर्षणैः=द्रुपदराजपुत्रीकेशवसनाकर्षणैः । द्यूतमेवाऽरणिस्तेन सम्भृतं-द्यूतारणिसम्भृतं=द्यूताऽरणिकाष्ठोद्भूतम् । 'द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि' इत्यमरः । यद्वा द्यूताऽरणिसम्भृतं सत् नृपसुताकेशाम्बरा-

सकेंगे । [ऐसा कहकर कञ्चुकी जाता है] ।

(नेपथ्य में कोलाहल के बाद)

अहो ! द्रुपद विराट वृष्णि अन्धक सहदेव प्रभृति पाण्डव सेना के अक्षौहिणीपति वीरों ! तथा कौरव सेना के सेनापतियों ! आप लोग सुनें—

जिस क्रोध को सत्यरूपी अपने व्रत के भङ्ग होने के डर से महा-

१ 'नृपवधूकेशा' । २ 'कुरुकुले' ।

वेणीसंहार



क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिरं जृम्भते !

भीमसेनः—(आकर्ण्य[1] सहर्षामर्षम्) **जृम्भतां जृम्भतामप्रतिहत-[2] प्रसरमार्यस्य क्रोधज्योतिः ।**

द्रौपदी—[सविस्मयं] **णाह ! किं[3] दाणीं एसो चण्डघोस-[4] दालुणो पलअजलहरत्थणिदमंसलोद्धोसो क्खणे क्खणे समर-दुन्दुही ताडीअदि ! ।**

[**नाथ ! किमिदानीमेष चण्डघोषदारुणः प्रलयजलघनस्तनित-मांसलोद्घोषः क्षणे क्षणे समरदुन्दुभिस्ताड्यते ?**] ।

कर्षणैः-महत्=महद्भूतम् । प्रवृद्धमित्यर्थः । युधिष्ठिरस्येदं यौधिष्ठिरं=युधिष्ठिरस्य सम्बन्धि । तदिदं क्रोधो ज्योतिरिव **क्रोधज्योतिः**=क्रोधात्मकं ज्योतिः । कुरव एव वनं, तस्मिन् **कुरुवने**=कुरुकुलाख्ये वने । **जृम्भते**=प्रवर्द्धते । कुरुकुलदाहाय सम्प्रति प्रवर्द्धते । युद्धघोषणेयम् । शार्दूलविक्रीडितम् ॥ २४ ॥

सहर्षाऽमर्षाभ्यां सहितं यथा स्यात्तथा **सहर्षामर्षं**=सहर्षं सक्रोधञ्च । **अप्रतिहतप्रसरम्**=अनवरु[illegible]डशब्दभीषणः । **प्रलयजलधरघनस्तनितमांसलः**=प्रलयकालिक-मेघ निरन्तरध्वनि-गम्भीरः ।

राज युधिष्ठिर ने बड़े प्रयत्न से रोका था, तथा अपने कुल की शान्ति की इच्छा से जिस क्रोध को महाराज ने भूलने का भी बहुत प्रयत्न किया था, वह द्रौपदी के केश व वस्त्रों के खींचने से, जूवा रूपी अरणि से निकला हुआ युधिष्ठिर का क्रोधरूपी अग्नि कुरुवंशरूपी वन को जलाने के लिए अब प्रचण्ड रूप धारण कर रहा है ॥ २४ ॥

भीमसेन–(सुनकर हर्ष व क्रोध के साथ)

खूब बढ़े, आर्य का क्रोध रूपी अग्नि विना रुके खूब बढ़े ।

(नेपथ्य में कोलाहल होता है)

द्रौपदी–(आश्चर्य से) नाथ ! यह भीषण ध्वनि वाला, प्रलय-काल के मेघ की तरह गम्भीर, युद्ध दुन्दुभि (नगाडा) क्षण क्षण में क्यों बजाया जा रहा है ? ।

१ 'आकर्ण्य सहर्षं'। २ 'सम्प्रत्यप्रतिहत'। ३ 'कहं'। 'कथं'। ४ क्वचिन्न । 'घोसो'।

भीमसेनः—देवि ! किमन्यत् । यज्ञः प्रवर्तते ।

द्रौपदी—(सविस्मयम्)। को एसो जण्णो ! ।
[क एष यज्ञः ?] ।

भीमसेनः—रणयज्ञः । तथाहि—

चत्वारो वयमृत्विजः, स भगवान्कर्मोपदेष्टा हरिः,
सङ्ग्रामाध्वरदीक्षितो नरपतिः, पत्नी गृहीतव्रता ।
कौरव्याः पशवः, प्रियापरिभवक्लेशोपशान्तिः फलं,
राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः ॥२५॥

समरदुन्दुभिः=युद्धभेरी । ताड्यते=आहन्यते । प्रवर्त्तते= प्रारभ्यते । कः= किंनामा । तथाहि=अस्य रणस्य यज्ञत्वमित्थम् ।

चत्वार इति । वयं=भीमादयः । चत्वारः=चतुःसङ्ख्याका भ्रातरः । ऋत्विजः=रणयज्ञप्रवर्त्तका होतारः । स भगवान्=जगत्प्रसिद्धो भगवान् । हरिः=श्रीकृष्णः । कर्मोपदेष्टा=कार्योपदेष्टा आचार्यः । नरपतिः=राजा युधिष्ठिरः । सङ्ग्राम एव अध्वरस्तत्र दीक्षितः-सङ्ग्रामाध्वरदीक्षितः=रणयज्ञदीक्षितो यजमानः । पत्नी=भार्या द्रौपदी । गृहीतव्रता=गृहीतनियमा । कौरव्याः=दुर्योधनादयः कौरवाः । पशवः=पशुस्थानीयाः । प्रियाया यः परिभवः स एव तेन वा, यः क्लेशस्तस्य उपशान्तिः=उपशमः । प्रियाऽपमानक्लेशोपशान्तिः । फलं=

भीमसेन-देवि ! यह यज्ञ का प्रारम्भ हो रहा है ।

द्रौपदी-(आश्चर्य से) यह कौन यज्ञ है ? ।

भीमसेन-देवि ! यह युद्धयज्ञ है ! क्योंकि—

इस यज्ञ में हम (भीमसेन आदि) चार भाई ऋत्विक् हैं, वे भगवान् श्रीकृष्ण इसके (विधि बताने वाले) आचार्य हैं, राजा युधिष्ठिर इस यज्ञ में दीक्षित यजमान हैं, द्रौपदी-गृहीतव्रता (केश संस्कार रहिता) पत्नी है, दुर्योधन आदि कौरव पशु हैं, प्रिया द्रौपदी के

१ 'ह्यसौ' इति गौडाः । 'हतो'

सहदेवः—आर्य ! गच्छामो वयमिदानीं गुरुजनानुज्ञाता विक्रमानुरूपमाचरितुम् ।

भीमसेनः—वत्स !, एते वयमुद्यता आर्यस्यानुज्ञामनुष्ठातुमेव । (उत्थाय) [2]तत्पाञ्चालि ! गच्छामो वयमिदानीं कुरुकुलक्षयाय ।

द्रौपदी—(बाष्पं धारयन्ती) णाह ! असुरसमराहिमुहस्स हरिणो विअ मङ्गलं तुम्हाणं होदु । [[3]जं च अम्बा कुन्दी आसा-

रणयज्ञफलम् । राजन्यानां—क्षत्रियाणाम् । उपनिमन्त्रणम्=आह्वानं, तस्मै । युद्धवीरक्षत्रियाह्वानाय । यशोजनको दुन्दुभिः यशोदुन्दुभिः=यशोभेरी । युद्धदुन्दुभिः । 'हत' इति पाठः सुन्दरः । स्फीतं यथा स्यात्तथा । रसति=गंभीरं ध्वनति । शार्दूलविक्रीडितं वृत्तम् ॥ २५ ॥

विक्रमानुरूपं=स्वपराक्रमतुल्यं कर्म । आचरितुं=विधातुम् । आर्यस्य=युधिष्ठिरस्य । बाष्पम्=अश्रु । धारयन्ती=मङ्गलभङ्गभीरुः सती बाष्पं चक्षुषोरेव दधाना । बाष्पावृतलोचना ।

असुरसमराभिमुखस्य=दैत्ययुद्धोद्यतस्य । असुरान्योद्धुं प्रचलिष्यतः । हरेः=श्रीविष्णोः । मङ्गलं=कल्याणम् । आश्वासयितव्या=धैर्यं लम्भनीया । अलीकाश्वासनेन=मिथ्याश्वासनप्रदानेन ।

परिभवेन या क्लान्तिः लज्जा च तया विधुरितम् म्लानम्

अपमान का बदला ही इसका फल है, और युद्ध वीर क्षत्रियों को बुलाने के लिए यह यशोदुन्दुभि गुरु गम्भीर ध्वनि से बज रहा है ॥ २५ ॥

सहदेव-आर्य ! गुरुजनो की आज्ञा से अपने २ पराक्रम के अनुसार युद्धमें कौशल दिखलाने को अब हम लोगों को चलना चाहिए।

भीम-वत्स ! हम आर्य युधिष्ठिर की आज्ञा का पालन करने को सन्नद्ध हैं। (उठकर) देवि ! हम लोग कुरुकुल के नाश के लिए जाते हैं।

द्रौपदी—(आँखो में आँसू भरकर) नाथ ! असुरों से युद्ध करने को जाते समय भगवान् विष्णु को जो मङ्गल हुए थे वे मङ्गल आपको हों।

१ 'उद्यता एव' । २ 'देवि गच्छामः' । ३ क्वचिन्न ।

सदि तं तुम्हाणं होदु]। [नाथ ! असुरसमराभिमुखस्य हरेरिव मङ्गलं युष्माकं भवतु । यच्चाम्बा[1] कुन्त्याशास्ते तद्युष्माकं भवतु]।

उभौ—प्रतिगृहीतं मङ्गलवचनमस्माभिः।

चेटी—अण्णं[2] च देवी भणादि, णाह ! तुम्हेहि पुणो वि समरादो आअच्छिअ अहं आसासइदव्वा ।

[अन्यच्च देवी भणति-नाथ ! त्वया पुनरपि समरादागत्याहमाश्वासयितव्या]

भीमसेन—ननु[3] पाञ्चालराजतनये ! किमद्याप्यलीकाश्वासनेन[3],

भूयः[4] परिभवक्लान्तिलज्जाविधुरिताननम् ।
अनिःशेषितकौरव्यं न पश्यसि[5] वृकोदरम् ॥२६॥

आननं यस्यासौ तम्-परिभवक्लान्तिलज्जाविधुरिताननम्=अनादरक्लेशत्रपादीनवदनम् । अनिःशेषिताः कौरव्या येनासौ तम्-अनिश्शेषितकौरव्यम्=अविनाशितकुरुकुलम् । वृकोदरं=भीमसेनं माम् । भूयः=पुनः । इतः परम् । न पश्यसि=न विलोकयसि । न द्रक्ष्यसि । भूय इति परिभवविशेषणतया समस्तमेव केचिद्व्याचक्षते । भूयान् यः परिभव इति च तदा विग्रहः॥२६॥

और भी माता कुन्ती जो मङ्गल कामना आप के लिए करती हो वह भी हो। [द्रौपदी तो पत्नी है, अतः वह तो आशीर्वाद दे नहीं सकती, अतः माताजी का नाम लेकर ही आशीर्वाद दे रही है]।

चेटी—और भी देवी यों कहती है कि—युद्ध से लौटकर मुझे अवश्य आप आश्वासन दीजिएगा (धीरज बँधाएगा)।

भीमसेन—देवि ! झूठे आश्वासन में क्या रखा है-

अपमान से दुःख व लज्जा से अवनत मुखवाले, तथा कौरवों को जड मूल से नष्ट न करने वाले, भीमसेन को अब तुम फिर नहीं देखोगी। अर्थात् सब कौरवों को मार कर ही मैं तुमारे पास आऊँगा॥ २६ ॥

१ क्वचिन्न । २ द्रौपदी—अण्णं च णाह ! पुणो वि तुम्हहिं समरादो आअच्छिअ अहं समास्सासइदव्वा । [अन्यच्च नाथ ! पुनरपि युष्माभिः समरादागत्याऽहं समाश्वासयितव्या]। ३ 'देवि ! किमिवाऽलीकाश्वासनाभिः'। 'श्वासनया'।

४ 'परिभवक्षान्तिलज्जाबन्धुरिताननम्' इत्यपि पाठः । ५ 'द्रक्ष्यति'।

द्रौपदी–णाह ! मा क्खु[1] जण्णसेणीपरिहवुद्दीविदकोवाणला अणवेक्खिदसरीरा सञ्चरिस्सध। जदो अप्पमत्तसञ्चरणिज्जाइं रिउबलाइं सुणीअन्ति।

[नाथ ! मा खलु याज्ञसेनीपरिभवोद्दीपितकोपानला अनवेक्षितशरीराः सञ्चरिष्यथ। यतोऽप्रमत्तसञ्चरणीयानि रिपुबलानि श्रूयन्ते]।

भीमसेनः–अयि सुक्षत्रिये ! समर्थाः[3] वयमस्मिन्रणे परिक्रमितुम्[2]।
अन्योन्यास्फालभिन्नद्विपरुधिरवसामांसमस्तिष्कपङ्के[5]
मग्नानां स्यन्दनानामुपरिकृतपदन्यासविक्रान्तपत्तौ[4]।

याज्ञसेनीति। द्रौपदीतिरस्कारोद्दीपितक्रोधाग्नयः। अनपेक्षितशरीराः= अनवेक्षितवपुषः। अतितरां साहसमाचरन्तः।

अप्रमत्तेति। सावधानानुसरणीयानीत्यर्थः। रिपुबलानि=शत्रुसैन्यानि।

अन्योन्येति। अन्योन्यं–परस्परं। य आस्फालः=सङ्घर्षः, तेन भिन्नो= विदारितो यो द्विपः=हस्ती, तस्य यद्रुधिरं च वसा च मांसं च मस्तिष्कं च तैर्यः पङ्कः–तस्मिन् अन्योन्यास्फालभिन्नद्विपरुधिरवसामांसमस्तिष्क-पङ्के= परस्पराघातदारितगजरुधिरमेदोमांसमस्तिष्कस्नेहकर्दमे। मग्नानां= निमग्नानाम्। स्यन्दनानां=रथानाम्। उपरि कृताः पदन्यासा यैस्तादृशा विक्रान्ताः पत्तयो यस्मिन्–तस्मिन्- उपरिकृतपदन्यासविक्रान्तपत्तौ=रथोपरि-

द्रौपदी-नाथ ! आपलोग मेरे अपमान से क्रोधोन्मत्त हो अपने प्राणों का ख्याल न करके युद्ध में साहस न करें। आगा—पीछा जरूर देखें। क्योंकि—शत्रुओं से युद्ध के समय बड़ी सावधानी की जरूरत है- यह मैं सुना करती हूँ।

भीमसेन-हे वीर क्षत्रियपुत्रि ! सुनो।

हम लोग युद्ध में पराक्रम दिखाने में खूब समर्थ हैं।

परस्पर (आपुस) में टक्कर खाने से जिनके मस्तक फट गए हैं ऐसे हाथियों

१ 'मा क्खु मा क्खु'। २ 'परिक्रमिस्सध'। ३ शृणु सुक्षत्रिये ! समर्था वयं सङ्क्रमितुम्'। ४ क्वचिन्न। ५ 'वसासान्द्रमस्तिष्कपङ्के'।

स्फीतासृक्पानगोष्ठीरसदशिवशिवातूर्यनृत्यत्कबन्धे
सङ्ग्रामैकार्णवान्तःपयसि विचरितुं पण्डिताः पाण्डुपुत्राः ॥२७॥

(इति निष्क्रान्ताः) ।

*** इति वेणीसंहारे प्रथमोऽङ्कः ***

कृतपदन्यासशूरपद्गातिसेनाभूषिते । स्फीतं यदसृक्=रुधिरं, तस्य च या पानगोष्ठी, तस्यां रसन्त्यः शब्दायमानाः अशिवाः=अमङ्गध्वनयः शिवाः—शृगाल्यः ता एव तूर्यं वाद्यभेदः, तेन नृत्यन्तः कबन्धाः—छिन्नमस्तकाः शवाः यस्मिन् तस्मिन्—स्फीताऽसृक्-पानगोष्ठी-रसदशिवशिवा-तूर्य-नृत्यत्कबन्धे=मसृणतररुधिरपानगोष्ठी-शब्दायमानाऽमङ्गलजम्बुकीतूर्यध्वनिनृत्यदपमूर्धकलेबराऽन्विते । सङ्ग्राम एकार्णव इव सङ्ग्रामैकार्णवः, तस्य अन्तःपय इव तस्मिन्—सङ्ग्रामैकार्णवान्तःपयसि=युद्धप्रलयसमुद्रगम्भीरजले । विचरितुं=सञ्चरितुम् । पाण्डुपुत्राः=पाण्डवा । पण्डिताः=कुशलाः । सन्तीति शेषः । स्रग्धरा वृत्तम् ॥ २७ ॥

निष्क्रान्ता इति । 'पात्रैस्त्रिचतुरैरङ्कस्तेषामन्ते च निर्गमः' इति भरतोक्तेरङ्कान्ते सर्वेषां निर्गमस्योचितत्वादिति भावः ।

इति श्रीगुरुप्रसादशास्त्रिकृतायां वेणीसंहारटीकायामभिनवराजलक्ष्म्यां प्रथमोऽङ्कः ।

के रुधिर, मांस, चर्बी, मस्तिष्क (भेजा) आदि से जो कीचड हो रहा है, उसमें डूबे हुए रथों पर पैर रखकर लडने वाले वीर पदाति (पैदल योद्धा) जिस युद्ध में हैं, तथा चमकीले रुधिर के पीने की गोठ (भोजनोत्सव) में चीखती हुई अमङ्गलध्वनिवाली जम्बुकी (गीदड) रूपी तूर्य (तुरही) पर जहाँ कबन्ध (रुण्ड) नाच रहे हैं ऐसे सङ्ग्राम रूपी महाप्रलय के समुद्र के गहरे जल में विचरण करने में हम पाण्डव खूब पण्डित (कुशल) हैं। (सब जाते हैं) ।

इति वेणीसंहारभाषाटीकायां प्रथमोऽङ्कः ।

अथ द्वितीयोऽङ्कः ।

(ततः प्रविशति कञ्चुकी) ।

कञ्चुकी—आज्ञापितोऽस्मि[1] महाराजदुर्योधनेन [यथा-][2] "विनयन्धर, सत्वरं गच्छ त्वम् । अन्विष्यतां देवी भानुमती, अपि निवृत्ता अम्बायाः पादवन्दनसमयान्न वेति । यतस्तां विलोक्य[3] निहताऽभिमन्यवो [द्रोण] राधेयजयद्रथप्रभृतयोऽस्मत्सेनापतयः[4] समरभूमिं गत्वा संभाजयितव्या[5] इति, तन्मया[6] द्रुततरं

ततः=तदनन्तरम् । आज्ञापितः=आदिष्टः । यथा—यत् । अन्विष्यताम्—अनुसन्धीयताम् । देवी=राजमहिषी । 'देवीकृताऽभिषेकायाम्' इत्यमरः । अपि=किम् । अपिः प्रश्ने, सम्भावनायां वा । निवृत्ता=लब्धावकाशा । अम्बायाः=मज्जनन्या गान्धार्याः । 'अम्बा माता' इत्यमरः । पादयोर्वन्दनम्—अभिवादनमेव समयः=नियमः, आचारो वा, तस्मात् । पादप्रणामाचारादित्यर्थः । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । तां=देवीं भानुमतीम् । विलोक्य=दृष्ट्वा । निहतोऽभिमन्युर्यैस्ते निहताऽभिमन्यवः=घातिताऽभिमन्यवः । निहतार्जुनपुत्रा । राधेयः=कर्णः ।

समरभूमिं=युद्धभुवम् । सभाजयितव्याः = पारितोषिकादिदानेन

(लम्बा चोगा पहिने हुए दर्बारी वेषभूषा में कञ्चुकी प्रवेश करता है)

कञ्चुकी—महाराज दुर्योधन ने मुझे आज्ञा दी है कि 'हे विनयन्धर ! तुम शीघ्र जाओ, देखो महारानी भानुमती माताजी (गान्धरी) को प्रणाम करके लौटी कि नहीं' । क्यों कि उससे मिलकर युद्धभूमि में जाकर द्रोण, कर्ण

---

१ 'आदिष्टोऽस्मि' ।   २ क्वचिन्न ।

३ 'यतो मया तामवलोक्य'   ४ 'राधेयजयद्रथप्रभृतयः क्षत्रियाः' ।

५ 'सम्भावयि' ।   ६ मया दुर्योधनेन, कञ्चुकिना वा ।

गन्तव्य"मिति । अहो ! प्रभविष्णुता महाराजस्य, यन्मम जरसाभिभूतस्य मर्यादामात्रमेवावरोधव्यापारः[1] । अथवा किमिति जरामुपालभेय[2], यतः सर्वान्तःपुरिकाणामयमेव[3] व्यावहारिको

सत्कार्याः । 'सम्भावयितव्या' इति प्राचीनलिखितपुस्तकपाठे तु—सन्निहितीकर्त्तव्या इत्यर्थः । **इति**—'इत्याज्ञप्तोऽस्मी'ति पूर्वेणाऽन्वयः ।

प्रभविष्णुता=प्रभावशालिता । प्रभुता । आग्रह इत्यन्ये । **महाराजस्य**= दुर्योधनस्य । **जरसाऽभिभूतस्य**=जरातुरस्य । वार्धक्येन वैकल्यं नीतस्य । कार्यकरणाऽशक्तस्याऽपि ।

मर्यादामात्रमेव=मर्यादाफलक एव । प्रतिष्ठामात्रमेव । राजकुलपरम्परागतपरिपाटीपालनार्थमेव वा । अवरोधे=व्यापारः निवासः—**अवरोधव्यापार** = अन्तःपुरकर्म । अन्तःपुररक्षानियोगः । महाराजदुर्योधनप्रभावेणैवाऽविनयादिसकलदोषनिरासान्मम वृद्धस्य राजाऽन्तःपुराधिकारो'ऽन्तःपुरे रक्षायै कञ्चुकिनः स्थाप्या'इति मर्यादापरिपालनमात्रमेव, रक्षाया दुर्योधनप्रभावेणैव सिद्धेः । कथमन्यथा वृद्धोऽहं रक्षासमर्थः स्यामित्याशयः । अन्ये तु—प्रभविष्णुता—बलात्कर्मकारितेत्याद्यभिप्रायेण व्याचक्षाणास्तत्त्वाऽनभिज्ञा एव ।

अथवेति । 'जरसाभूतस्ये'त्येवं जरसाऽऽत्मनो वैकल्यं किमिति कथयामि, जरसाऽनभिभूतानामपि सर्वेषामेव राजपुरुषाणां वृद्धवद्व्यवहारादित्यर्थः । **सर्वान्तःपुरिकाणाम्**=अन्तःपुराधिकृतानां वृद्धानामवृद्धानां वा ।

व्यावहारिकः=व्यवहारपरम्पराजन्यः । व्यवहारपरिपाटीपरिप्राप्तः ।

जयद्रथ आदि सेनापतिओं से वार्त्तालाप करना है, तथा उनको यथोचित परितोषिक (इनाम) देना है । इस लिए मुझे (दुर्योधन को या कञ्चुकी को) जल्दी ही जाना है ।

अहो ! महाराज का बड़ा प्रचण्ड प्रभाव व प्रताप है कि—देखो इस वृद्धावस्था में

१ 'निवासः' २ 'उपालभामहे' । 'उपालभे' ।

३ 'सर्वान्तःपुरचारिणामयमेव वैहारिको वेषः' ।

वेषश्चेष्टा च । तथाहि—

नोच्चैः सत्यपि चक्षुषीक्षितुमलं[1] श्रुत्वापि नाकर्णितं[2]
शक्तेनाप्यधिकार इत्यधिकृता यष्टिः समालम्ब्यते[3] ॥

वेषः=आकल्पः । नेपथ्यम् । वस्त्रपरिधानादिकम् । 'आकल्पवेषौ नेपथ्यम्' इत्यमरः । चेष्टा=कायव्यापारः । उक्तमुपन्यस्यति–तथा हीति । वृद्धस्यान्तःपुराधिकृतस्य च साम्यमाह–नोच्चैरिति । चक्षुषि=लोचने । सत्यपि=विद्यमानेऽपि । उच्चैः=ऊर्ध्वम् । उपरि । ईक्षितुं=यथावद्द्रष्टुं । नाऽलं=नाहं समर्थः । वृद्धोऽपि सत्यपि लोचने द्रष्टुमशक्तः । श्रुत्वाऽपि=आकर्ण्यापि । नाऽऽकर्णितं=मया न श्रुतम् । तत्र हि बधिरवद्वर्त्तितव्यम् । शक्तेनाऽपि=गन्तुं शक्तेनाऽपि मया । अधिकार इति=मम कञ्चुकिनोऽधिकारोयमिति कृत्वा । अधिकृता=योग्या । स्वाधिकारोचिता । राजाधिकारचिह्नभूता । यष्टिः=वेत्रलता ।

भी मुझे यहाँ के कानून कायदे इतनी कड़ाई से पालने पड़ते है । या महाराज का इतना रौब है कि मैं अन्तःपुरके इन कार्यों की व्यवस्था इस वृद्धावस्था में भी सुचारु रूपसे कर लेता हूँ । अर्थात् महाराज की मेहरवानी से मुझे नाममात्रको (बहुत कम) काम करना पड़ता है । या महाराज के प्रताप से सब काम अपने आप हो जाते है, मैं तो केवल नाम मात्र के लिए ही इस प्रतिष्ठित पद पर रखा गया हूँ ।

अथवा वृद्धावस्था को क्यों उलहना दूँ । अन्तःपुरके सभी कार्यकर्त्ताओं व नौकरों का इसी प्रकार [वृद्धवत्] का वेश (पहिनावा) और कार्य हैं । जैसे मैं—

इस अन्तःपुरकी नौकरी में नेत्र रहते हुए भी अच्छी तरह ऊपरको नजर उठाकर नहीं देख सकता, यहाँ बाते सुनकर भी अनसुनी करनी पड़ती हैं । चलने फिरने में

१ 'चक्षुषीक्षितमलम्' । २ 'नाकर्णितुम्' । ३ 'लम्बिता' ।

सर्वत्र स्खलितेषु दत्तमनसा यातं मया नोद्धतं
सेवास्वीकृतजीवितस्य जरसा किं नाम यन्मे कृतम् ! ॥१॥
(परिक्रम्य दृष्ट्वा आकाशे) विहङ्गिके ! अपि श्वश्रूजनपाद-

समालम्ब्यते=ध्रियते। किञ्च **सर्वत्र**=सर्वस्मिन्देशे। समे विषमे वा। **स्खलितेषु**=व्यापारप्रच्यवेषु, **त्रुटिषु**=दत्तं मनो येन तेन—**दत्तमनसा**=दत्तचित्तेन। सर्वदा सावधानेन । **मया**=कञ्चुकिना। **उद्धतं**=समुद्धतं यथा स्यात्तथा। सत्वरं। **न यातं**=न गमनं कृतम्। अविनयभयादित्याशयः। **सेवास्वीकृतजीवितस्य**=सेवार्थं धृतजीवनस्य। 'सेवान्धीकृते'ति पाठे-सेवार्थम्-**अन्धीकृतं**=व्यर्थीकृतं जीवितं जीवनं येन तस्येत्यर्थः। **किं नाम**=कि तत्। **यत् मे कृतं**=यन्मम-नवीनं कृतम्। न किमपीत्यर्थः। यज्जरसा लोकानां क्रियते तस्य सर्वस्यापि सेवयैव खल्वस्माकं कृतत्वादित्यर्थः।

एवञ्च—सेवार्थमेव ममाऽन्ध्यादिकं, न जरसा कृतमिति राजसेवाया गर्हेति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥

परिक्रम्य=किञ्चिच्चलित्वा। **आकाश इति**। 'दूरस्थाऽऽभाषणं यत्स्या-

अच्छी तरह समर्थ होते हुए भी मुझे छड़ी–[अधिकारसूचक राजचिह्न] लेकर चलना पडता है, क्यों कि नियम ऐसा ही है। कहीं कुछ भूल चूक न हो जाए इस डर से [समझ कर ही] बड़े कायदे से चलना पड़ता है, तेजी से नहीं चल सकता। इस प्रकार जो जो बातें वृद्धावस्था से होती हैं वे सब तो इस नौकरी में भी होती हैं। अतः वृद्धावस्था को दोष देना व्यर्थ है। क्योकि ऐसी कौनसी बात है जो राजाकी नौकरी में न हो और वृद्धावस्था ने की हो ?। अर्थात् कुछ नहीं। अतः नौकरी बुढापे से भी बुरी है जिसमें असमय में ही वृद्ध होना पडता है ॥ १ ॥

१ 'जातं तथा'। २ 'सेवान्धीकृत'।

वदनं कृत्वा प्रतिनिवृत्ता भानुमती ?। (कर्णं दत्वा) किं कथयसि—'आर्य ! एषा भानुमती देवी पत्युः समरविजयाऽऽशंसया निर्वर्तितगुरुदेवपादवन्दना अद्यप्रभृत्यारब्धनियमा देवगृहे बालोद्याने तिष्ठती'ति ?। तद्भद्रे ! गच्छ त्वमात्मव्यापाराय,

दशरीरं निवेदनम्। परोक्षान्तरितं वाक्यं तदाकाशं निगद्यते' इति भरतोक्तेः–स्वयमेवोक्तिप्रत्युक्ती 'आकाशे' इत्युच्यते । **विहङ्गिका**–भानुमत्याः सखी चेटी वा। सारिकाऽऽख्या पक्षिवधूरिति प्राञ्चः । **श्वश्रूजनपादवन्दनं कृत्वा**=गान्धारीकुन्त्यादिश्वश्रूलोकचरणप्रणामं कृत्वा । अपीति प्रश्ने । **कर्णं दत्त्वा**=कर्णदानमभिनीय।

स्वयमेवोत्तरं कल्पयन्नाह—**किं कथयसीति**। किमेवं कथयसीत्यर्थः। **पत्युः**=दुर्योधनस्य । **विजयाशंसया**=विजयेच्छया। **निर्वर्त्तितगुरुदेवपादवन्दना**=कृतगुरुदेवताचरणप्रणामा। **आरब्धनियमा**=स्वीकृतव्रता। धृतब्रह्मचर्यादिव्रता। **देवगृहे**=देवमन्दिरे यत् बालोद्यानं तस्मिन्–**देवगृहबालोद्याने**=देवतायतनसहिते प्रमदारामे । **'बाह्योद्याने'** इति पाठे—देवमन्दिरप्रधाने स्त्रीजनोचिते बाह्यवने । **इति**=इत्येवं कथयसि किमिति योजना ।

[कुछ चलकर आकाश में। [अर्थात् शून्य में अपने आपही] आवाज देता है]।

अरी विहङ्गिके ! राजमाता को प्रणामकर महारानी अभीतक लौटीं कि नहीं ?। (कान देकर) है ? क्या कहा कि—"आर्य ! महारानी भानुमती राजमाता को प्रणामकर तथा देव पूजनकर अपने पति की विजय कामनासे आज से ही ब्रह्मचर्य आदि नियम पूर्वक रहने की इच्छा से बालोद्यान (महल के बगीचे) में बैठी है !"। अच्छा तो हे भद्रे ! तूं जा अपना कामकर, मै भी महाराज को 'महारानी बगीचे में है' यह समाचार सुनाने जाता हूं।

---

१ कश्चिन्न। २ 'बाह्योद्याने'।

यावदहमप्यत्रस्थां देवीं महाराजस्य निवेदयामीति । (परिक्रम्य) साधु पतिव्रते ! साधु, स्त्रीभावेऽपि[2] वर्तमाना वरं भवती, न पुनर्महाराजो, योऽयमुद्यतेषु बलवत्सु[3], अबलवत्सु वा वासुदेवसहायेषु पाण्डुपुत्रेष्वरिषु च[1], अद्याप्यन्तःपुरविहारसुखमनुभवति । (विचिन्त्य) इदमपरमयथातथं स्वामिनश्चेष्टितम्[4] । कुतः?।

इत्थं विहङ्गिकोक्तमुत्तरं श्रुत्वा कञ्चुकी स्वयमेव प्राह—तदिति । तस्मात् । भद्रे=सुभगे विहङ्गिके ! । आत्मव्यापाराय=स्वकार्यकरणाय । स्वनियोगमनुष्ठातुम् । अत्रस्थाम्=देवोद्यानस्थाम् । देवीं=भानुमतीम् । परिक्रम्य=चलित्वा । साधु=साधु कृतं भवत्या । पतिव्रते=पतिपरायणे भानुमति ! । स्त्रीभावेऽपि=स्त्रीत्वेऽपि । स्वभावतः कामोपभोगप्रवणे स्त्रीत्वेऽपि । भवति=श्रीमति । वरं=मनागिष्टा । महाराजः=दुर्योधनः । न नैव । वरमिति शेषः । यतः—उद्यतेषु=समुद्यतेषु । योद्धुं सन्नद्धेषु । बलवत्सु=बलिषु । अबलवत्सु वा=कौरवापेक्षया स्वल्पसेनावत्त्वेनाऽल्पबलेषु वा । परं वासुदेवसहायेषु=कृष्णसहायेषु । भगवदनुगृहीतेषु । अद्यापि=प्रवृत्तेऽपि युद्धे । अन्तःपुरविहारसुखम्=शुद्धान्तक्रीडासुखम् । अवरोधक्रीडारसम् । कामोपभोगरसम् । अनुभवति=सेवते । अयथातथम्=अनुचितम् । अयोग्यम् ।

(कुछ चलकर) वाह ! पतिव्रते ! वाह ! स्त्री होते हुए भी आप (महाराज से) जितनी श्रेष्ठ हैं उतने महाराज श्रेष्ठ नहीं । क्योंकि जब शत्रुलोग-जो स्वयं बलवान् हैं या भगवान् कृष्ण ऐसे बली की सहायता से बलवान् हो रहे हैं—चढ़ाई कर रहे हैं उस समय महाराज महलों में ही आनन्द ले रहे हैं ! ।

(सोचकर) और महाराज की यह दूसरी बात भी अनुचित है कि—

---

१ कश्चिन्न । २ 'स्त्रीस्वभावे वर्त्त' । ३ 'अथवा किं बलवत्सु वासु' ।
४ 'इदमयथातथं स्वामिनश्चेष्टितम्' । 'इदमपरमयथार्थचेष्टितं स्वामिनः' ।

आ शस्त्रग्रहणादकुण्ठपरशोस्तस्यापि जेता मुने-
स्तापायास्य न पाण्डुसूनुभिरयं भीष्मः शरैः शायितः।
प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो
बालस्याऽयमरातिलूनधनुषः प्रीतोऽभिमन्योर्वधात्॥ २॥

सर्वथा दैवतं[1] नः स्वस्ति करिष्यतीति[2]।, यावदत्रस्थां[3] देवीं

आ शस्त्रेति। आ शस्त्रग्रहणात्=शस्त्रग्रहणमारभ्य। अकुण्ठः परशुर्यस्याऽसौ तस्य—अकुण्ठपरशोः=अमोघपरशोः। अनवरुद्धशस्त्रस्य। तस्य=जगद्विदितस्य। मुनेरपि=परशुरामस्य मुनेरपि। जेता=विजेता। अयम्=एषः। भीष्मः=गाङ्गेयः। पाण्डुसूनुभिः=पाण्डुपुत्रैः। शरैः=बाणैः। शायितः=अधःपातितः। तत्=भीष्मशरशयनम्। अस्य=राज्ञो दुर्योधनस्य। न तापाय=न तथा सन्तापं करोति। किन्तु—प्रौढाश्च ते अनेके धनुर्धराश्च त एव अरयः, तेषां विजयेन श्रान्तस्य—प्रौढानेकधनुर्धरारिविजयश्रान्तस्य=प्रवृद्धानेकमहारथशत्रुविजयपरिश्रान्तस्य। एकाकिनः=एकस्य। असहायस्य। किञ्च अरातिभिर्लूनं धनुर्यस्यासौ तस्य—अरातिलूनधनुषः=शत्रुच्छिन्नकोदण्डस्य। शस्त्ररहितस्य। बालस्य=अप्रौढस्य। बालकस्य। अभिमन्योः अर्जुनसूनोरभिमन्योः। वधात्=विनाशात्। प्रीतः=प्रसन्नः। 'इदमपरमयथातथं स्वामिन'इत्यनेनेदमन्वेति। शार्दूलविक्रीडितं वृत्तम्॥ २॥

दैवतं=देवः। भगवान् शिवः। नः=अस्माकम्। सर्वथा=सर्वतो भावेन।

जिस भीष्म पितामहने दिग्विजयी जन्मसे ही अपराजित वीर मुनि परशुरामजी को भी जीत लिया था वे पाण्डवों द्वारा शरशय्या पर सुला दिए गए—इसकी तो उनको कुछ चिन्ता व शोक नहीं है, परन्तु—बड़े २ महावीर महारथियों के द्वारा—थके हुए, एकाकी व जिसका धनुष टूट गया है—ऐसा बालक अभिमन्यु के मारे जाने से महाराज बड़े प्रसन्न हो रहे हैं। छिः! छिः॥ २॥

अच्छा भगवान् सब मङ्गल करेंगे। मैं भी 'महारानी भानुमती महल के

१ 'दैवं'। २ 'करिष्यति'। ३ 'तद्यावदत्रस्थां'।

महाराजस्य निवेदयामि। [इति निष्क्रान्तः]।

[विष्कम्भकः]।

[ततः प्रविशत्यासनस्था देवी भानुमती सखी चेटी च]।

सखी—**सहि भाणुमदि ! कीस दाणीं तुमं सिबिणअदंसणमत्तस्स किदे अहिमाणिणो महाराअदुज्जोहणस्स महिसी-भविअ एव्वं बिअलिअधीरभावा अतिमेत्तं संतप्पसि ?।**

[सखि भानुमति ! कस्मादिदानीं त्वं स्वप्नदर्शनमात्रस्य कृते अभिमानिनो महाराजदुर्योधनस्य महिषी भूत्वा एवं विगलितधीरभावा अतिमात्रं सन्तप्यसे ?]।

चेटी—**भट्टिणि ! सोहणं भणादि सुवअणा[1], सिविणन्तो जणो किं ण क्खु प्पलबदि ?।**

स्वस्ति=कल्याणम् । **यावत्**=यावत्पर्यन्तम् । **अत्रस्थां**=देवाराधनार्थं बालोद्यानस्थाम् ।

विष्कम्भक इति। भूतभविष्यत्कथांशसूचकं प्रकरणं विष्कम्भक इति कथ्यते। 'वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः । सङ्क्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः'इति साहित्यदर्पणोक्तः। अत्र च कञ्चुकिना–वृत्तस्याभिमन्यु-भीष्मवधस्य, वर्त्तिष्यमाणस्यान्तःपुरविहारस्य च सूचनाद्विष्कम्भकत्वमुक्तमेव । **भणति**=कथयति । **सुवदनेति** । सखीनामेदम् । **किं न खल्विति** । उचितमनुचितं वा सर्वमेव प्रलपतीत्यर्थः ।

देवोद्यान (बगीचे) में हैं–इस वृत्तान्त को चल कर महाराज कहूँ । (जाता है)।

इति विष्कम्भकः ।

[आगे पीछे के समाचारों की सूचना समाप्त]

(सखी व सेविका सहित देवी–भानुमती का प्रवेश)

सखी—सखि भानुमती ! निर्भय व अभिमानी महाराज दुर्योधन की स्त्री

---

१ **भानुमती**—एव्वं ण्णेदं । २ 'सिविणअन्तो जणो ण हु किं वि ण प्पलवदि'।

[भट्टिनि! शोभनं भणति सुवदना, स्वपन् जनः किं न खलु प्रलपति ?] ।

भानुमती—**हञ्जे ! एव्वं णेदं, मम उण अकुसलदंसणं पडिभादि सिविणअम् ।**

[हञ्जे ! एवं न्विदं, मम पुनरकुशलदर्शनं प्रतिभाति स्वप्नदर्शनम्] ।

सखी—**पिअसहि ! जइ एव्वं ता कधेहि सिविणअं जं अह्मेवि पडिट्ठावअंतीओ धम्मप्पसंसाए देवदाणं संकीत्तणेण दुव्वादिपडिग्गहेण अ पडिहडिस्सामो ।**

स्वप्नदर्शनमात्रस्य कृते=स्वप्नदर्शनमात्रेणैव । **अभिमानिनः**=मानवतः । मनस्विनः । **महिषीभूत्वा**=पट्टमहिषीपदमलङ्कुर्वाणा । विगलितो धीरभावो यस्याः सा विगलितधीरभावा=च्युतधैर्या । विकलतां वहन्ती । **अतिमात्रं**=नितराम् । **सन्तप्यसे**=सन्तापमुरीकरोषि । **शोभनं**=सुन्दरम् ।

हञ्जे इति । चेट्याः सम्बोधनम् । **एवं नु इदम्**=यथा त्वं कथयसि तथैव भवेत् । **पुनः**=किन्तु । **अकुशलदर्शनम्**=अमङ्गलदर्शनम् । **प्रतिभाति**=प्रतिभासते । **यद्येवं**=यद्यशुभदर्शनः स्वप्नः । **तत्**=तर्हि । **प्रतिष्ठापयन्त्यः**=शुभोऽयं स्वप्न इति मुहुः प्रशंसन्त्यः । **धर्मप्रशंसया**=धर्मस्तुत्या । **सङ्कीर्त्तनेन**=नामो-

(महारानी) होकर तुम एक मामूली स्वप्न के कारण इतनी घबड़ाती हो और दुःखकरती हो ! ।

चेटी—भट्टिनी ! (स्वामिनी !) सुवदना ठीक कहती है । क्योंकि सुता हुआ मनुष्य क्या क्या बातें नहीं बकता (कहता) है ? ।

भानुमती—हञ्जे ! कदाचित् ऐसा ही हो । परन्तु मुझे तो यह स्वप्न बहुत ही अशुभ [बुरा] मालुम होता है । मुझे तो कुशल नहीं मालुम होती ।

सखी-यदि ऐसी बात है तो आप हम लोगोंसे भी उसे कहिए । जिससे हम भी उस स्वप्न को 'बहुत अच्छा स्वप्न है' इस प्रकार उसकी प्रशंसा-करके, देवताओंका सङ्कीर्त्तन (स्तुति) करके, दूर्वाङ्कुर दिखाकर, (या दूबका स्पर्श करके या ब्राह्मणों

१ 'किं किं' ।　　२ 'एवमेतत्' ।　　३ 'धम्मे'ति क्वचिन्न ।

४ 'दुजादिपडिग्गहेण' ।

[प्रियसखि ! यद्येवं तत्कथय स्वप्नं, यद्वयमपि प्रतिष्ठापयन्त्यः धर्म-प्रशंसया, देवानां सङ्कीर्त्तनेन, दूर्वादिपरिग्रहेण[1] च परिहरिष्यामः] ।

चेटी—सोहणं क्खु भणादि सुवअणा, अकुसलदंसणा वि सिविणआ देवदाणं प्पसंसाए कुसलपरिणामा होंति त्ति सुणीअदि ।

[शोभनं खलु भणति सुवदना, 'अकुशलदर्शना अपि स्वप्ना देवानां प्रशंसया कुशलपरिणामा भवन्ती'ति श्रूयते] ।

भानुमती—जइ एव्वं ता कहइस्सं, अवहिदा दाव होहि ।

[यद्येवं तत्कथयिष्ये, अवहिता तावद्भव[2]] ।

सखी—[3]अवहिदह्मि, कहदु पिअसही ।

[[3]अवहिताऽस्मि, कथयतु प्रियसखी] ।

चारणेन । स्तोत्रपाठेन । दूर्वादिप्रतिग्रहेण=दधिदूर्वाङ्कुरादिमाङ्गलिकवस्तुग्रहण-स्पर्शादिना । 'दुजादिपडिग्गहेणे'ति पाठे—द्विजातिप्रतिग्रहेण=ब्राह्मणेभ्यो दानेन, स्वस्तिवाचनपुण्याहवाचनादिना, ब्राह्मणेभ्य आशीर्वादस्य ग्रहणेन वेत्यर्थः । अवहिता=सावधाना ।

को दान देकर) अशुभ फल का परिहार कर शुभ फल देने वाला कर सकें । (क्योंकि अशुभ स्वप्न—उसकी प्रशंसा करने से, देवताओं के मङ्गलमय नामों से, तथा दधि दूब आदि माङ्गलिक वस्तुओं के दर्शन व स्पर्श करने से तथा ब्राह्मणों को दान देने व आशीर्वाद से शुभ फल देने वाला हो जाता है) ॥

चेटी—सुवदना ठीक कहती है । अशुभ स्वप्न भी देवताओं की स्तुति करने से [तथा ब्राह्मणों को दान देने से तथा माङ्गलिक वस्तुओं के स्पर्श से] शुभ फल देने वाला हो जाता है ऐसी बात विद्वानों से मैंने सुनी है ।

भानुमती—यदि ऐसी बात हैं तो मैं स्वप्न का हाल कहती हूँ, सावधान हो सुनो ।

सखी—प्रियसखी ! हम लोग सावधान हैं, कहिए ।

---

१ [द्विजातिप्रतिग्रहेण] । २ 'द्विंत' 'भवतम्' । ३ क्वचिन्न ।

भानुमती—हला ! भएण बिसुमरिदह्मि, ता चिट्ठ जाव सव्वं सुमरिअ कहइस्सं । [इति चिन्तां नाटयति] ।

[सखि ! भयेन विस्मृताऽस्मि, तत्तिष्ठ यावत्सर्वं स्मृत्वा कथयिष्ये] ।

[ततः प्रविशति दुर्योधनः कञ्चुकी च] ।

दुर्योधनः—सूक्तमिदं कस्यचित्—

गुप्त्या साक्षान्महानल्पः स्वयमन्येन वा कृतः ।
करोति महतीं प्रीतिमपकारोऽपकारिषु[2] ॥ ३ ॥

येनाद्य द्रोणकर्णजयद्रथादिभिर्हतमभिमन्युमुपश्रुत्योच्छ्वसितमिव नश्चेतसा ।

सूक्तं=सुभाषितम् । तत्सुभाषितमेवाह—गुप्त्येति । अपकारिषु=अपकारपरेषु शत्रुषु । अपकारः=अपकृतिः । अनिष्टम् । प्रतीकारः । गुप्त्या=गोपनेन । निभृतम् । परोक्षम् । साक्षात्=प्रत्यक्षम् महान्=विपुलः । अल्पः=स्वल्पः । स्वयम्=आत्मना । अन्येन वा=परेण वा । कृतः=विहितः । महतीं प्रीतिं=महान्तं हर्षम् । करोति=जनयति ॥ ३ ॥

येन=येन हेतुना । यतोऽपकारिष्वल्पोऽपि कृतोऽपकारो हर्षं जनयत्यतः । उच्छ्वसितमिवेति । चेतसा सुखेन श्वासो गृहीत इत्यर्थः। सुखितोऽस्मीति यावत् ।

भानुमती—हला [हे सखी] भयके मारे मैं उस स्वप्न को भूल गई हूँ, अतः थोडा ठहरो सब याद करके कहती हूँ । (सोचती है) ।

(**दुर्योधन** तथा **कञ्चुकी** प्रवेश करते हैं) ।

दुर्योधन—किसीनें बहुत अच्छा सुभाषित श्लोक कहा है, कि—

अपकारी शत्रुकी हानि—वह चाहे गुप्त हो या प्रकट, ज्यादा हो या थोडी, स्वयं की गई हो या दूसरे से हुई हो—चित्त को बहुत प्रिय मालुम होती है ॥३॥

इसी लिए 'द्रोण, कर्ण, जयद्रथ, आदिनें अभिमन्यु को मार दिया' यह सुनकर मेरे मनने सुखसे सांस ली । अर्थात्—मुझे बहुत हर्ष हुआ है ।

---

१ 'मुहुत्तं चिट्ठ जाव सव्वं सुमरिस्सम्' । २ 'पकारिणाम्' ।

कञ्चुकी—देव ! नेदमतिदुष्करमाचार्य्यशस्त्रप्रभावाणां[1] कर्णजयद्रथयोर्वा, काऽत्र श्लाघा ? ।

राजा—विनयन्धर ! किमाह भवान् ?—'एकाकी[2] बहुभिर्बालो लूनशरासनश्च निहत इति । [अत्र[3] का श्लाघा कुरुपुङ्गवानाम्' । तदत्र न खलु कश्चिद्दोषः] । पश्य—

हते जरति गाङ्गेये पुरस्कृत्य शिखण्डिनम् ।
या श्लाघा[4] पाण्डुपुत्राणां सैवाऽस्माकं भविष्यति ॥ ४ ॥

इदम्=एतत्कर्म । अभिमन्युविनिपातनम् । आचार्येति । द्रोणाचार्यशस्त्रप्रभावाणां नेदमतिदुष्करमित्यर्थः । कर्णजयद्रथयोर्वा नेदमतिदुष्करमित्यन्वयः । अत्र=अभिमन्युवधे । श्लाघा=आचार्यकर्णजयद्रथादेर्भवतो वा प्रशंसा । विनयन्धरेति कञ्चुकिनो नामधेयम् । लूनशरासनः=छिन्नधन्वा ।

हत इति । जरति=वृद्धे । गाङ्गेये=भीष्मे । शिखण्डिनं=तन्नामानं महारथम् । पुरस्कृत्य=अग्रतः कृत्वा । हते=घातिते सति । या=यादृशी । श्लाघा=प्रशंसा जाता । सैव=तादृश्येव । अस्माकं=कौरवाणाम् । भविष्यति । यथा भीष्मे छद्मना हते पाण्डवानां शाश्वती किलाऽपकीर्त्तिस्तथैवाऽस्माकं बालेऽभिमन्यौ हते भविष्यतीत्याशयः ॥ ४ ॥

कञ्चुकी—महाराज ! द्रोणाचार्यजी के शस्त्र व अस्त्रों के प्रभाव के सामने तथा कर्ण व जयद्रथ के लिए भी एक बालक को मार लेना कौनसी श्लाघा व प्रशंसा की बात है ? । कुछ नहीं ।

राजा—विनयन्धर ! तुम क्या कहते हो कि 'इकले बालक को उसके धनुष के टूट जाने पर बहुतों ने मिलकर मारा।' (इसमें कौरवों की क्या प्रशंसा है?) । परन्तु इसमें कोई दोष नहीं है । देखो—

शिखण्डी की आड लेकर पाण्डवों के द्वारा वृद्ध भीष्म पितामह के मारे जाने से जो श्लाघा (प्रशंसा या निन्दा) उनकी हुई है वही बालक को मारने से हमारी होगी । अर्थात् हमारा बालक अभिमन्यु को मारना अनुचित है

१ 'नैमवतिदुष्करमाचार्यस्य, शस्त्रप्रभावात्' इति शोभनः पाठः ।
२ 'एको' । ३ अयं पाठः क्वचिन्न । ४ याऽश्लाघेति केचिच्छिन्दन्ति ।

कञ्चुकी—[सवैलक्ष्यम्] देव ! नैवेदं कल्पयितुमर्हसि, यतस्तव पौरुषप्रतीघातोऽस्माभिर्नावलोकितपूर्व इत्यत एवं विज्ञापयामि ।

राजा—एवमिदम्[२] ।

सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् ।
स्वबलेन निहन्ति संयुगे न चिरात्पाण्डुसुतः सुयोधनम् ॥५॥

सवैलक्ष्यं=सलज्जम् । देव=राजन् । इदम्=इत्थम् । कल्पयितुम्=विभावयितुम् । नार्हसि=न योग्योऽसि । महावीरस्य ते नैवमुचितं बालवधहर्षित्वमित्याशयः । पौरुषप्रतीघातः=पुरुषार्थावरोधः । पराक्रमनैष्फल्यम् । असाफल्यम् । नावलोकितपूर्वः=न दृष्टचरः । सर्वथा भवतो विजयः सिद्ध एवेति कुतो भवाननुचितं भावयसीति भावः । एवमिदं=युक्तमेतत् । सर्वथा विजयोऽस्माकमित्यर्थः ।

सहेति । सभृत्यसङ्घम् । ससुतं=सपुत्रम् । बलं=सैन्यम् । सहानुजं=सभ्रातृवर्गम् । संयुगे=युद्धे । नचिरात्=अचिरादेव । नशब्दस्य सुप्सुपेति समासः । निहन्ति=निहनिष्यति ॥ ५ ॥

तो उनका भीष्म पितामह शिखण्डी की ओट में मारना भी अनुचित है । अतः हम दोनों बराबर है ॥ ४ ॥

कञ्चुकी—(लज्जित होकर) महाराज ! ऐसा आप विचार क्रोध न करें । हमनें आजतक आपके पराक्रम की निष्फलता कभी नहीं देखी है । इसी लिए मैने यह कहा है । (अर्थात् आपके प्रताप से ही विजय होगी यह निश्चित है) ।

राजा—ठीक है—

भृत्यों सहित, बन्धु बान्धवों सहित, मित्रों सहित, तथा पुत्र व भाइयों सहित दुर्योधन को शीघ्र ही अपने बलसे पाण्डुपुत्र (भीम) मारेगा । यहाँ पर 'दुर्योधन मारेगा' ऐसा कहना था, पर भावीवश उलटा ही कहा गया है ॥ ५ ॥

---

१ 'न ममायं सङ्कल्पः, किन्तु वः पौरुषप्रतीघातोऽस्माभिरनालोचितपूर्वः' । 'यतस्तव पौरुषप्रती' । २ 'एवमेवैतत्' । 'एवमेव' ।

कञ्चुकी--[कर्णौ पिधाय सभयम्] शान्तं पापं, प्रतिहतममङ्गलम् ।

राजा—विनयन्धर ! किं मयोक्तम् ? ।

कञ्चुकी—सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् ।
स्वबलेन निहन्ति संयुगे नचिरात्पाण्डुसुतं सुयोधनः ॥ ६ ॥
—एतद्विपरीतमभिहितं देवेन ।

राजा—विनयन्धर ! अद्य खलु भानुमती यथापूर्वं मामनामन्त्र्य वासभवनात्प्रातरेव निष्क्रान्तेति व्याक्षिप्तमिव मे मनः, तदादेशाय तमुद्देशं यत्रस्था भानुमती ।

कञ्चुकी—इत इत एतु देवः ।

पापम्=अमङ्गलहेतुभूतं पापम् । प्रतिहतं=विध्वस्तम् । एतद्विपरीतम्=मत्पठितश्लोकविरुद्धं 'न चिरात्पाण्डुसुतः सुयोधन'मित्येवम् ॥ ६ ॥

विपरीतभाषणे हेतुमाह—अद्येति । यथा पूर्वं सा मामापृच्छयैव क्वचिद्गच्छतिस्म नैवमद्येत्यर्थः । व्याक्षिप्तं=व्याकुलम् । विषयान्तरासक्तमिति वा । एवञ्च व्याक्षिप्तचित्ततया मया विरुद्धमभिहितमित्याशयः । इत इतः=अमुना मार्गेण ।

कञ्चुकी—[कान पर हाथ रख कर, डरते हुए] भगवान् करें यह पाप व अमङ्गल शान्त हो, विघ्न दूर हों । भगवान् मङ्गल करे ।

राजा—विनयन्धर ! मैने क्या कह दिया ? ।

कञ्चुकी—"सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् । स्वबलेन निहन्ति संयुगे नचिरात्पाण्डुसुतं सुयोधनः' इससे विपरीत (उलटा) ही महाराजनें ('पाण्डुसुतः सुयोधनम्') कहा है ॥ ६ ॥

राजा—विनयन्धर ! और दिनों तो भानुमती मुझसे पूछकर कहीं जाती थी परन्तु आज तो वह मुझसे विना पूछे ही अपने महल से सबेरे ही कहीं चली गई है—इससे मेरा चित्त विक्षिप्त-सा हो रहा है । (इसीसे उलटा-पलटा मैं बोल गया हूँ) । इसलिए जहाँ भानुमती है उस स्थान का मुझे मार्ग बताओ ।

१ 'शान्तं पापं शान्तं पापम्' । २ 'सहभृत्यगणमित्यादि पठित्वा, एतद्वि' । ३ 'आक्षिप्तं मे' । ४ 'चेतः' । ५ 'इत एतु' । ६ क्वचिन्न ।

[उभौ परिक्रामतः]।

कञ्चुकी—[पुरोऽवलोक्य, समन्ततो गन्धमाघ्राय] । देव ! पश्य पश्य, एतत्तुहिनकणशिशिरसमीरणोद्वेल्लितवृन्तबन्धुर-शेफालिकाविरचितकुसुमप्रकरम्, ईषदालोहितमुग्धवधूकपोल-पाटललोध्रप्रसूनविजितश्यामलतासौभाग्यम्, उन्मीलितबकुल-कुन्दकुसुमसुरभिशीतलं, प्रभातकालरमणीयम्, अग्रतस्ते-

देव आगच्छत्वित्यर्थः । अत्र देवी तिष्ठतीत्याशयः । उभौ=राजकञ्चुकिनौ । परिक्रामतः=गमनं नाटयतः । समन्ततः=सर्वतः । 'समन्ततस्तु परितः सर्वतो विष्वगित्यपि' इत्यमरः ।

तुहिनस्य-हिमस्य, कणैः—अणुभिः, शिशिरः=शीतलो यः, समीरणः= वायुः,तेन उद्वेल्लितं=चालितं यद्वृन्तं=प्रसवबन्धनं,तेन बन्धुरा नम्रा, उन्नतानता वा—या शेफालिकाः,निर्गुण्डीलताः ताभिर्विरचितः कुसुमस्य प्रकरो यस्मिन् तत् तथा भूतम् । शिशिरतरपवनान्दोलितनम्रशेफालिकावृन्तच्युतपुष्पसमूहशोभ-मानमित्यर्थः । 'बन्धूरबन्धुरौ रम्ये नम्रे' इति विश्वः । 'बन्धुरं तून्नतानतम्' इत्यमरश्च । मुग्धवधूः=नवोढा कामिनी । ईषदालोहितमुग्धवधूकपोलवत्पा-टलम्—श्वेतरक्तं यत् लोध्रप्रसूनं—लोध्रपुष्पं, तेन विजितं श्यामलतायाः सौभाग्यं—सौन्दर्यं यत्र तत् । उन्मीलितानि=विकसितानि यानि बकुलानां

कञ्चुकी—महाराज इधर से पधारें । (रास्ता दिखाता है) ।

(दोनो जाते हैं) ।

कञ्चुकी—(सामने देखकर, कुछ सूंघता हुआ सा) महाराज ! देखिए देखिए !—बर्फ व ओस के कणों से ठण्ढी वायुके झोंकों से हिलाए गए शेफालिका (निर्गुण्डी) के पौधों से टूटे हुए फूलोंका ढेर जहाँ लगा हुआ है, लज्जा से कुछ २ लाल नववधू के कपोलों (गालों) की तरह गुलाबीपन लिए हुए इन लोध्र (लोध) के पुष्पों से जहाँ श्यामलता (प्रियङ्गुलता) का सौभाग्य भी जीत लिया है, खिले हुए

१ 'लिप्तबन्धनच्युतशे'। २ 'शेफालिका तु सुवहा निर्गुण्डी नीलिकाऽपि सा' इत्यमरः । ३ 'कपोलपाण्डुफलिनीविजितश्यामलता' । ४ बहुल ।

बालोद्यानं। तदवलोकयतु देवः। तथा हि—

प्रालेयमिश्रमकरन्दकरालकोशैः[1]
पुष्पैः समं निपतिता रजनीप्रबुद्धैः[2]।
अर्कांऽशुभिन्नमुकुलोदरसान्द्रगन्ध-
संसूचितानि कमलान्यलयः पतन्ति[3] ॥ ७ ॥

कुन्दानाञ्च कुसुमानि, तैः सुरभि=सुगन्धि च शीतलं च। अग्रतः—पुरतो दृश्यमानम्। बालोद्यानं=प्रमदवनम्। अस्तीति शेषः।

प्रालेयेति। प्रालेयेन—तुषारेण, मिश्रः—मिलितो यो मकरन्दः—पुष्परसः, तेन करालः=दन्तुरः—निम्नोन्नत इति यावत्, कोशो मध्यभागो येषान्तैः—प्रालेयमिश्रमकरन्दकरालकोशैः—हिममिलितपुष्परसदन्तुरितमध्यभागैः। 'करालो दन्तुरे तुङ्गे' इत्यमरः। रजनीप्रबुद्धैः=रात्रिविकसितैः। पुष्पैः=कुसुमैः। समं=सहैव। निपतिताः—पतिताः। अलयः=भ्रमराः। अर्कस्यांशुभिर्भिन्नानां मुकुलानां यान्युदराणि, तेषां यः सान्द्रो गन्धस्तैः संसूचितानि=अर्कांशुभिन्नमुकुलोदरसान्द्रगन्धसंसूचितानि=सूर्यकिरणविकसितकलिकाभ्यन्तर-

नाना प्रकार के बकुल (मौलश्री) कुन्द आदि पुष्पों से सुगन्धित, व शीतल, प्रभात-काल में अत्यन्त रमणीय यह अन्तःपुर का बालोद्यान (स्त्रियों का बगीचा) आपके सामने है।

महाराज! देखिए। यहाँ पर—

ओस व बरफ से मिश्रित (मिला हुआ) जो पुष्परस उससे जिन पुष्पों का कोश (मध्यभाग) टेढा व ऊँचा-नीचा हो गया है, ऐसे जो रात्रि में खिलने वाले कुमुद, (कोई) आदि पुष्प उनके से एक साथ ही गिरे हुए भ्रमरगण उनसे निकलकर प्रातःकाल सूर्य की किरणों से खिली है कलियाँ जिनकी ऐसे जो कमल, उनकी भीनी-भीनी सुहावनी सुगन्ध से आकृष्ट हो कमलों की ओर दौड रहे है। (रात्रि में खिलने वालें कुमुद आदि पुष्प सङ्कुचित हो मुरझा गए है, और उनके साथ ही भ्रमर भी बन्द हो गिर गयेथे, पर उन पुष्पोंमें बर्फ व ओससे मिला हुआ मकरन्द इतना अधिक

१ 'तुषारस्तुहिनं हिमं, प्रालेय'मित्यमरः। २ 'विबुद्धैः'। ३ 'प्रयान्ति'।

राजा—[समन्तादवलोक्य] । विनयन्धर ! इदमपरममुष्मिन्नुषसि रमणीयतरम्[2] । पश्य—

जृम्भारम्भप्रविततदलोपान्तजालप्रविष्टै-
　　र्हस्तैर्भानोर्नृपतय इव स्पृश्यमाना विबुद्धाः[3] ।
स्त्रीभिः सार्द्धं घनपरिमलस्तोकलक्ष्याङ्गरागा
　　मुञ्चन्त्येते विकचनलिनीगर्भशय्यां द्विरेफाः ॥ ८ ॥

सुरभिगन्धसूचितानि । विकासोन्मुखानि सरोजानि । पतन्ति=गच्छन्ति । कमलोदरगन्धवहः पवनो वहतीति यावत् । वसन्ततिलका वृत्तम् ॥ ७ ॥

अपरं=द्वितीयम् । उषसि=प्रभाते । रमणीयतरं=शोभनम् । जृम्भेति । जृम्भणं-जृम्भः-विकाशः, तस्यारम्भः-उपक्रमः, तेन विततानि यानि दलानि-पत्राणि, तेषामुपान्तः-समीपभागः स एव जालं, छिद्रं गवाक्षश्च तेन प्रविष्टास्तैः-जृम्भारम्भप्रविततदलोपान्तजालप्रविष्टैः=विकासोन्मुखविस्तृतपत्रोपान्तच्छिद्रविष्टैः । भानोः=सूर्यस्य । हस्तैः=करैरिव किरणैः । स्पृश्यमानाः=संस्पृश्यमानाः । नृपतय इव=राजान इव । विबुद्धाः=उद्बुद्धाः, त्यक्तनिद्राः । घनपरिमलेन स्तोकं लक्ष्योऽङ्गरागो येषां ते-घनपरिमल-स्तोकलक्ष्याङ्गरागाः=गुरुतरपरिमल-लेशानुमेयाङ्गरागाः । एते=इमे । द्विरेफाः=भ्रमराः । स्त्रीभिः सार्द्धं=महिषीभिरिव भ्रमरीभिः सह । विकचनलिनीगर्भशय्यां=विकसित-

हो गया था कि उनकी कलियाँ कुछ २ खुली हुई रह गई, अतः उनमें से किसी तरह निकल कर ये भ्रमरगण सबेरे खिलते हुए कमलों से निकली हुई सुगन्धिसे आकृष्ट हो एक साथ उन कमलों पर पहुँच रहे हैं) ॥ ७ ॥

राजा—(चारों ओर देखकर) विनयन्धर ! इस प्रभात काल में यह और भी सुन्दर है । देखो—

थोड़े-थोडे खिलते हुए पुष्पों के पत्तों के (कोने व अवकाशरूपी) झरोखों से भीतर प्रविष्ट सूर्य की किरणों से-कोमल हस्तों के स्पर्श से जगाए जाते हुए राजाओं

१ क्वचिन्न ।　　२ 'तरमवलोकय' ।
३ 'भाभि र्भानो' ।　　४ 'प्रबुद्धाः' ।

कञ्चुकी—देव[1] ! नन्वेषा भानुमती सुवदनया तरलिकया च पर्य्युपास्यमाना[3] तिष्ठति, तदुपसर्पतु देवः।

राजा—[दृष्ट्वा] आर्य्य विनयन्धर ! गच्छ त्वं साङ्ग्रामिकं रथमुपकल्पयितुम्। अहमपि[4] देवीं दृष्ट्वाऽनुपदमागत एव ।

कञ्चुकी—एष कृतो[5] देवादेशः। [इति निष्क्रान्तः]।

सखी[6]—पिअसहि ! अवि सुमरिदं तुए ?।

[प्रियसखि ! अपि स्मृतं त्वया ?]।

कमलिनीकोशाभ्यन्तरशय्याम्। मुञ्चन्ति=त्यजन्ति। कमलोदरान्निस्सरन्तीत्यर्थः। राजानोऽपि जालप्रविष्टभानुकरणैः स्पृश्यमाना देवीभिः सह प्रातः शय्यां त्यजन्तीति समानमेव ॥ ८ ॥

सुवदना=भानुमत्याः सखी। तरलिका च चेटी। उभे—सख्यावेवेति वा। पर्युपास्यमाना=सेव्यमाना। उपसर्पतु=समीपं गच्छतु। साङ्ग्रामिकं=युद्धोपयोगिनम्। उपकल्पयितुं=सज्जं विधातुम्। अनुपदं=त्वरितम्। कृतः=अनुष्ठितः। देवादेशः=राजशासनम्। गच्छामीति यावत्। इति=इत्युक्त्वा।

की तरह—जगाए गए, ये भ्रमर जिनके शरीरों पर गहरे परिमल (सुगन्ध) से अङ्गराग भी साफ २ नहीं (थोडा २) मालूम हो रहा हैं—अपनी स्त्रियों के साथ विकसित कमलिनी के पुष्पों के गर्भ (अन्तर्भाग) रूपी शय्या से उठ रहे हैं ॥८॥

कञ्चुकी—महाराज ! ये सुवदना और तरलिका के साथ भानुमती महारानी बैठी हुई हैं, आप पधारें।

राजा—(देखकर) आर्य विनयन्धर ! तुम जाओ और मेरा युद्ध का रथ तैयार करो, मैं भी देवी से मिलकर अभी तुरन्त ही आता हूँ।

कञ्चुकी—महाराज की आज्ञा का अभी पालन करता हूँ। अर्थात् जाता हूँ।

(ऐसा कहकर जाता है)।

सखी—प्रियसखि ! क्या तुमको उस स्वप्न का स्मरण हुआ ?।

---

१ 'राजन्'। 'महाराज'। २ कच्चित्र। ३ 'सुखोपविष्टा'। ४ 'अहमप्येषः'। ५ 'यथाज्ञापयति देवः। ६ 'उभे'।

भानुमती—**सहि ! सुमरिदं** । [सखि ! स्मृतम्] ।

सखी—**कहेदु पियसही** । [कथयतु प्रियसखी] ।

भानुमती—**अज्ज किल प्पमदवणे आसीणाए मम अग्गदो एव्व² केणावि अदिसइददिव्वरूवेण णउलेण अहिसदं वावादिदं** ।

[अद्य किल प्रमदवने आसीनाया मम अग्रत एव² केनाप्यतिशयितदिव्यरूपेण नकुलेन अहिशतं व्यापादितम्] ।

उभे—[अपवार्य्य आत्मगतम्] । **सांतं पावं ! पडिहदं अमङ्गलम्** । [प्रकाशम्] । **तदो तदो ?** ।

[शान्तं पापम् ! प्रतिहतममङ्गलम् ! । ततस्ततः ?] ।

भानुमती—**संदावावगहीदहिअआए पुणो वि मए विसुमरिदं** ।

[सन्तापाऽवगृहीतहृदयया पुनरपि मया विस्मृतम्] ।

राजा—[अवलोक्य] । **अहो ! देवी भानुमती सुवदना-**

अपि **स्मृतं**=किं स्वप्रदृष्टं स्मृतम् । **प्रमदवन**=अन्तःपुरवने । बालारामे । **आसीनायाः**=स्थितायाः । **अग्रतः**=पुरतः । **अतिशयितदिव्यरूपिणा**=अतिसुन्दरकमनीयरूपेण । अलौकिकेनेति वा । **अहिशतं**=सर्पशतम् । शत्रुशतञ्च । **व्यापादितं**=हतम् । **अपवार्यं**=निभृतम् । रङ्गस्थं लोकं प्रति रहस्यं प्रकाश्य । 'तद्भवेदपवारितम् । रहस्यन्तु यदन्यस्य परावृत्त्य प्रकाश्यते' इति विश्वनाथः । **प्रकाशमिति** । सर्वश्राव्यमित्यर्थः । 'सर्वश्राव्यं प्रकाशं स्यात्' इति विश्वनाथः ।

सन्तापाऽवगृहीतहृदयया=अतिसन्तापव्याकुलमानसया । सन्तापोद्विग्नहृदयया । **विस्मृतं**=स्वप्रदृष्टं विस्मृतम् ।

भानुमती—सखी ! याद आ गया, आज प्रमदवन (बगीचे) में जब मैं बैठी थी तो एक सुन्दर दिव्य रूपवाले नकुल (न्योला) ने मेरे सामनेही सौ सर्पों को मार डाला ।

सखी व दासी—(भानुमती से छिपाकर अलग से, अपने आपही) भगवान् इस पाप व अमङ्गल को दूर करें । (प्रकट) सखी ! तब क्या हुआ ? ।

---

१ 'अपि सुमरिदं' । २ क्वचिन्न । ३ 'अदिसंदावोव्विग्गहिअ' । [अतिसन्तापोद्विग्नहृदय] । ४ 'विस्मृतं मया' ।

तरलिकाभ्यां सह किमपि मन्त्रयमाणा तिष्ठति । भवतु, अनेन लताजालेनाऽन्तरितः शृणोमि तावदासां विश्रम्भालापम् ।

[इति तथा कृत्वा स्थितः] ।

सखी—अइ ! अलं सदावेण, कहेदु पिअसही ।

[सखि ! अलं सन्तापेन, कथयतु प्रियसखी] ।

राजा—किं नु खल्वस्याः सन्तापकारणम् ? अथवाऽनामन्त्र्य मामियमद्य वासभवनान्निष्क्रान्तेति समर्थित एवास्या मयाँ कोपः । अयि भानुमति ! अविषयः खलु दुर्योधनो भवत्याः कोपस्य । पश्य—

किमपि=रहस्यभूतम् । मन्त्रयमाणा=विचारयन्ती । आलपन्ती । भवतु=अस्तु । लताजालेन=वल्लीवितानेन । अन्तरितः=प्रच्छन्नः । विश्रम्भालापान्=विश्रब्धवार्तालापम् । विश्वस्तकथाम् । तथा कृत्वा= लतान्तरितो भूत्वा । अस्याः=भानुमत्याः । किंतु=किं स्वित् । अनामन्त्र्य=अनापृच्छ्य । अनुज्ञामनासाद्य । इयं=भानुमती । वासभवनात्=प्रासादात् । केलिगृहात् । समर्थितः=सम्भावितः । समुचितः । योग्य इति वा । अविषयः=अस्थानम् । तदेव समर्थयते—किमिति । मया—प्रमादात्=

राजा (देखकर) अहो ! सुवदना और तरलिका के साथ बैठी हुई यह भानुमती कुछ बातें कर रही है । अच्छा इस लताओं के झुण्ड के पीछे छिपकर इनकी विश्वस्त बातें सुनता हूँ । (ऐसा विचार कर छिपकर बैठ जाता है) ।

सखी—अयि ! प्रियसखी दुःख व चिन्ता मत करो, कहती चलो ।

राजा—है ! इसके सन्ताप का क्या कारण है?। मेरे पूछे विना ही यह महल से आ गई है इसी से मालूम होता है कि यह असन्तुष्ट व नाराज हो गई है । अयि भानुमति ! मैं तुम्हारे क्रोध के योग्य नहीं हूँ अतः मेरे ऊपर क्रोध न करो, देखो ।

१ 'विश्रब्धा' । २ क्वचिन्न । ३ 'उभ' । ४ 'इमामद्य'. ५ 'न्तोऽस्मीति' । ६ '[illegible]' ।

किं कण्ठे शिथिलीकृतो भुजलतापाशः प्रमादान्मया ?,
निद्राच्छेदविवर्त्तनेष्वभिमुखी नाद्यासि सम्भाविता ? ।
अन्यस्त्रीजनसङ्कथालघुरहं स्वप्ने त्वया लक्षितो ?,
दोषं पश्यसि कं ? प्रिये ! परिजनोपालम्भयोग्ये मयि ॥ ९ ॥

[विचिन्त्य] । अथवा—

इयमस्मदुपाश्रयैकचित्ता मनसा प्रेमनिबद्धमत्सरेण ।
नियतं कुपिताऽतिवल्लभत्वात्स्वयमुत्प्रेक्ष्य ममापराधलेशम्॥१०॥

अनवधानतया । कण्ठे=गले । भुजलतापाशः=तव मम वा बाहुलतापाशः । शिथिलीकृतः=श्लथीकृतः किम्? । नैव कृत इत्यर्थः । किञ्च निद्राच्छेदविवर्त्तनेषु= निद्राभङ्गकालिकपार्श्वपरिवर्त्तनेषु । अभिमुखी=अभिमुखं स्थिता । मत्संमुखं वर्त्तमाना त्वम् । अद्य=सम्प्रति । न सम्भाविता=न प्रीतिमधुरालापादिभिः सत्कृता किम् ? । अपितु सत्कृतैव । अन्यस्त्रीजनस्य, ताभिर्वा या संकथा-आलापः-तत्र लघुः=लघुचित्तः, आसक्तः, परस्त्रीकथाप्रसक्तः । स्वप्ने=स्वप्नेऽपि । त्वया= भवत्या । आलक्षितः किं=दृष्टः किं ? । लक्षित इति वा छेदः । हे प्रिये=भानुमति । परिजनोपालम्भयोग्ये=परिचारकवच्छासनार्हे । त्वदाज्ञाकारिणि सेवके । मयि= दुर्योधने । कं दोषं=कमपराधम् । पश्यसि=विलोकयसि । कथय केन दोषेण मपि कुपिताऽसीत्याशयः । शार्दूलविक्रीडितं वृत्तम् ॥ ९ ॥

इयमिति । वयमुपाश्रयः—अवलम्बनं यस्य तत्तथाभूतम् एकं चित्तं यस्याः सा अस्मदुपाश्रयैकचित्ता=मद्गतप्राणा । मदाश्रयचित्ता । अतिवल्लभत्वात्=

क्या कभी गले से मैंने भुजलता का पास भूलकर भी ढीला किया है ? निद्रा से जागने पर करवट लेते समय आज तुमको मैंने क्या सन्मुख नहीं किया है व आलिङ्गन आदि नहीं किया है ? । दूसरी स्त्री के साथ अनुचित बातें करते हुए स्वप्न में भी कभी तुमने मुझे देखा है क्या ? । प्रिये ! मैं तो सेवक की तरह तुम्हारा अनुगत हूँ ! तुमने मेरा क्या दोष देखा है कि तुम अप्रसन्न हो ! ॥ ९ ॥

अथवा—

इसका मन मेरे में ही बसता है, और इसके मनमें मेरे प्रति दृढ प्रेम भाव

---

१ 'ष्वभिमुखं' । २ 'विबद्ध' ।

तथाऽपि किं वक्ष्यतीति शृणुमस्तावत् ।

भानुमती—**हलो ! अहं तदो तस्स अदिसइददिव्वरूविणो णउलस्स दंसणेण उस्सुआ जादा [हिदेहिअआ अ। तदो उज्झिअ तं आसणट्ठाणं लदामण्डलं पविसिदुं आरद्धा] ।**

मम=दुर्योधनस्य । **अपराधलेशम्=**अपराधलवम् । **प्रेमनिबद्धमत्सरेण=**प्रेम्णा निबद्धो=निरुद्धो मत्सरो येनेत्यर्थः । 'मात्सर्यमपि मत्सरः' इति कोशः । स्नेहाविष्टमात्सर्येण वा । अनुरागोद्भूतमत्सरेणेति वा । **मनसा=**मानसेन । **स्वयम्=**आत्मनैव । **उत्प्रेक्ष्य=**वितर्क्य । उद्भाव्य । **नियतं=**नूनम् । **कुपिता=**मयि क्रुद्धा । "मनसा करणभूतेन अस्मदुपाश्रयैकचित्ते"त्यन्वयं केचिदिच्छन्ति । 'प्रेमनिबद्धमत्सरेण मनसा उपलक्षिता—तादृशमानसे'त्यर्थं तु गौडाः कल्पयन्ति । औपच्छन्दसकं वृत्तम् ॥ १० ॥

उत्सुका=उत्कण्ठिता । **हृतहृदया=**कामवशीकृतस्वान्ता । **सवैलक्ष्यं=**सलज्जम् । **माद्रीसुतः=**नकुलः । **विप्रलब्धाः=वञ्चिताः** । 'विप्रलम्भो-विसंवादः' इत्यमरः । **सोत्प्रेक्षं=**सवितर्कं । सस्मरणं वा । **कुलटाविप्रलभ्य-मानम्=**असतीवञ्चितम् । **आत्मानं=**स्वम् । **बहु=**धन्यम् । **मन्यमानः=**भावयन् ।

है, और मुझे भी यह अत्यन्त प्यारी है । और इसी कारण मेरे किसी अपराध की स्वयं कल्पना करके यह रूठ गई है—ऐसा मालूम होता है ॥ १० ॥

अच्छा तो भी सुनना चाहिए कि यह क्या कहती है ।

भानुमती—हे सखि ! तब उस दिव्य अतिसुन्दररूपवाले नकुल को देखकर मेरा मन उस पर उत्कण्ठित हो गया (उसपर आसक्तगया)। और उसने मेरे हृदय को अपने वश में करलिया । तब मैं उस स्थान (प्रमदवन) को छोडकर इस लतामण्डप में प्रविष्ट होने लगी ।

---

१ 'तथापि शृणुमस्तावत् किंनु वक्ष्यतीति' । २ क्वचिन्न । ३ 'तदो अहं' ।

[अहं ततस्तस्यैं अतिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता, हृतहृदया च । तत उज्झित्वा तदासनस्थानं लतामण्डपं प्रवेष्टुमारब्धा] ।

राजा-(सवैलक्ष्यं) किं नाम 'अतिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता [हृतहृदया च] !' तत्किमनया पापया माद्रीसुतांऽनुरक्तया वयमेवं विप्रलब्धाः ? । [सोत्प्रेक्षम्] ['इयमस्म'दित्यादि(१०)पठित्वा] । मूढ दुर्योधन ! । कुलटाविप्रलभ्यमानमात्मानं बहु मन्यमानोऽधुना किं वक्ष्यसि ? । [किं कण्ठे' इत्यादि(९) पठित्वा दिशोऽवलोक्य] अहो ! एतदर्थमेवास्याः प्रातरेव विविक्तस्थानाभिलाषः, सखीजनसंकथासु च पक्ष-

किं वक्ष्यसि=किं कथयिष्यसि ? । 'इयमस्मदुपाश्रयैके'त्यादेरिदानीं वक्तुमशक्यत्वादित्यर्थः ।

एतदर्थं=जारकथायारसास्वादार्थम् । अस्याः=कुलटायाः । विविक्तस्थानेति । एकान्तप्रमदवनस्थित्यनुराग इत्यर्थः। 'विविक्तौ पूतविजनौ' इत्यमरः। सखीति । सखीलोकपरस्परालापेष्वित्यर्थः । पक्षपातः=अनुरागः । अविज्ञातो बन्धकीहृदयस्य सारः-स्थैर्यं तत्त्वं येनासौ-अविज्ञातबन्धकीहृदयसारः=

राजा—(लज्जितसा होकर) हैं क्या कहा-'सुन्दर रूपवाले नकुल को देख कर में उसपर आसक्त हो गई'! और मेरा हृदय उसने चुरा लिया !'। तो क्या यह पापिनी माद्री के पुत्र नकुल पर आसक्त है, और आजतक यह हमें धोखा देती रही है ! । (सोच विचार कर) ['इयमस्मदुपाश्रयैकचित्ता' (१०) इस श्लोक को पढकर] अरे मूर्ख दुर्योधन ! तूं तो मन में समझता रहा कि यह तेरे ऊपर पूर्ण अनुरक्त है पर तैने खूब धोखा खाया, अब क्या कहेगा ? ['किं कण्ठे शिथिलीकृतः' (९) इस श्लोकको पढकर] अहो ! यही कारण हैं कि यह प्रातःकाल ही

१ 'ततोऽहन्तस्य' । २ दाक्षित्यः पाठोऽयं क्वचिन्न । ३ क्वचिन्न ।
४ 'सुतेऽनुरक्तया' । ५ 'किं किं न' । 'किं न' ।

पातः ! । दुर्योधनस्तु मोहादविज्ञातकुलटाहृदयसारः क्वापि परिभ्रान्तः । आः पापे ! मत्परिग्रहपांसुले !—

तद्भीरुत्वं तव मम पुरः, साहसानीदृशानि !,
श्लाघा साऽस्मद्वपुषि, विनयव्युत्क्रमेऽप्येष रागः ! ।
तच्चौदार्य्यं मयि जडमतौ, चापले कोऽपि पन्थाः,
ख्याते तस्मिन् वितमसि कुले जन्म, कौलीनमेतत् ! ॥११॥

अज्ञातकुलटामनोरथः । अविदितव्यभिचारिणीहृद्गतभावः । 'हृदयाऽऽसारः' इति पाठान्तरम् । परिभ्रान्तः=अन्यथैव चिन्तितवान् । वञ्चितः ।

मत्परिग्रहपांसुले=मत्पत्नीकलङ्करूपे । मत्कलत्राऽधमे । पांसुला=असती । 'तव परस्परविरुद्धं कथमिदं चेष्टित'मिति प्रतिनिर्दिशति-तद्भीरुत्वमिति ।

तव=भवत्याः । मम पुरः=मदग्रे । तद्भीरुत्वं=सा भीरुता । त्वया मदग्रे तु भीरुता मुहुः प्रकटीकृता । ईदृशानि=परपुरुषासक्तिरूपाणि, एकान्ते स्थित्वा परपुरुषानुरागसङ्कथापक्षपातादिरूपाणि वा । साहसानि=पराक्रमाद्यतिशयः । अस्मद्वपुषि=मच्छरीरे । सा श्लाघा=विशिष्टा प्रशंसा । तवेति सम्बध्यते । विनयव्युत्क्रमेऽपि=शीलखण्डनेऽपि । पातिव्रत्यभङ्गेऽपि । एषः=पुरतो दृश्यमानः । रागः=अनुरागः । पक्षपातः । मयि जडमतौ=मूढबुद्धौ मयि । तच्च=पूर्वमनुभूतम् । औदार्य्यम्=तव उदारता । स्नेहातिशयप्रदर्शनम् । आनुकूल्यम् । चापले=चाञ्चल्ये । शीलविलोपे । कोऽपि=परैरतर्कितः कोप्यभिनवः ।

इस एकान्त स्थान में आकर बैठी है और सखियों से घुल-घुल कर बातें कर रही है । यह दुर्योधन तो आजतक मोह में ही पड़ा था, इस कुलटा के मन की छिपी बात व चरितों को न जानने के कारण खूब भ्रान्ति (धोखे) में पड़ा रहा ।

अरी पापे ! (मेरी) दुष्ट स्त्री !

कहाँ तो तू मेरे सामने इतनी डरपोक और भोली बनती थी, और कहाँ तेरे ये पाप कर्म ! । कहाँ तो तूं मेरी सुन्दरता की इतनी बड़ाई किया करती थी और कहा तूं इस तरह अपनी इज्जत वं सतीत्वं को नष्ट करने में लगी है । कहाँ तो

सखी—तदो तदो ? ।

[ततस्ततः] ।

भानुमती—[तदो अहं तरिदं आसणट्ठाणं एदं लदामंडवं पविट्ठा,] सो वि मं अणुसरंतो एव्व लदामंडवं पविट्ठो ।

[ततोऽहं त्वरितमासनस्थानमेतल्लतामण्डपं प्रविष्टा, सोऽपि माम-नुसरन्नेव लतामण्डपं प्रविष्टः] ।

राजा—अहो ! कुलटोचितमस्याः पापाया अशालीनत्वम् ।

पन्थाः=मार्गः । तस्मिन्=सुप्रसिद्धे । विस्रम्भमिलिते=विश्वासे । कुले=क्षत्रियाणां विशुद्धे महति वंशे । जन्म=तव उत्पत्तिः । एतत=इदम् । ईदृशम् । कौलीनं=कलङ्कः[1] अपवादः । 'कौलीनं पशुभिर्युद्धे कुलीनत्वापवादयोः' इति विश्वः । परस्परविरुद्धमेतत्तव कुलटाया इत्याशयः । मां भीरुत्वादिना वञ्चयित्वा त्वया कुलटामार्गोऽयं निरातङ्कं सेव्यते, न चैतत्तवोचितमित्याकूतम् । मन्दाक्रान्ता वृत्तम् ॥११॥

आसनस्थानं=विश्रामस्थानम् । सोऽपि=नकुलोऽपि । कुलटोचितं=बन्धकीयोग्यम् । अशालीनत्वं=धृष्टत्वम्[3] । निर्लज्जत्वम् । निर्लज्जतामेव

मुझ मूर्ख के सामने तेरी वह उदारता, और कहाँ तेरा यह चपलता (व्यभिचार परायणता) का रास्ता ग्रहण करना ! । कहाँ तो तेरा बड़े निष्कलङ्ककुल में जन्म और कहाँ तेरा यह कलङ्क ! ॥ ११ ॥

सखी—तब आगे क्या हुआ ? ।

भानुमती—तब मैं जल्दी से इस लताभण्डप में प्रविष्ट हो गई । और वह नकुल भी मेरे पीछे २ इस लता मण्डप में प्रविष्ट हुआ ।

राजा—अहो ! देखो, वेश्याओं की तरह इस पापिनी की कैसी निर्लज्जता है । हे पापिनी ! जिस सखीजन के सामने व जिस जगह चिर काल से बढ़े हुए प्रेम से तथा अत्यन्त आसक्ति पूर्वक मेरे प्रेम व क्रीडाओं की कथा कही थी उसी

1 क्वचिन्न । 2 'एतस्याः' । 3 'दुःशीलत्वम्' ।

यस्मिंश्चिरप्रणयनिर्भरबद्धभाव-
मावेदितो रहसि मत्सुरतोपभोगः ।
तत्रैव दुश्चरितमद्य निवेदयन्ती
ह्रीणाऽसि पापहृदये ! न सखीजनेऽस्मिन् ? ॥ १२ ॥

उभे—ततो तदो ? ।

[ततस्ततः ?] ।

भानुमती—तदो तेण स[1]प्पगब्भं प्पसारिअकरेण अवहरिदं मे त्थणंसुअम् ।

राजा—(विचि[2]न्त्य) ['सप्र[3]गल्भं प्रसारितकरेणाऽपहृतं मे स्तनां-

---

विशदयति-यस्मिन्निति ।

यस्मिन्=यस्मिन् लतामण्डपे । सखीजने वा । चिरप्रणयेन—चिरन्तनानुरागेण, चिरप्ररूढविश्वासेन च, निर्भरं=प्रातिशयं यथा स्यात्तथा बद्धो भावः=अनुरागो यस्मिन् कर्मणि तद्यथा स्यात्तथा । क्रियाविशेषणमेतत् । परे तु 'भावे' इति सप्तम्यन्तं सखीजनविशेषणमेतदिति वदन्ति । रहसि=एकान्ते । मत्सुरतोपभोगः=मदीयनिधुवनक्रीडोपभोगः । आवेदितः=कथितः । तत्रैव=लतामण्डपे ।

अस्मिन् सखीजने=अस्मिन् सखीवृन्दे । अद्य=सम्प्रति । दुश्चरितम्=आत्मनोऽविनयं, शीलखण्डनञ्च । निवेदयन्ती=कथयन्ती । हे पापहृदये=पापमानसे । हे पापिनि । न=नैव । ह्रीणाऽसि=लज्जिताऽसि । नैव लज्जिताऽसि किम् ? । अतीव निर्लज्जासि त्वमित्यर्थः । वसन्ततिलका वृत्तम् ॥१२॥

सप्रगल्भं=सरसम् । सहसा । बलात्कारेण वा । स्तनांशुकम्=स्तनपिधान-

---

सखी जन के सामने अपना दुश्चरित (पाप) प्रकट करती हुई क्या तूं लज्जित नहीं होती है ? ॥ १२ ॥

सखी व **चेटी**—तब क्या हुआ ? ।

भानुमती—तब उस नकुल नें बडी प्रगल्भता से (बडे तपाक व नजाकत के साथ) मेरे स्तनांशुक (स्तन ढकने के कपडे—चोली आंगी) को खींच लिया ।

---

१ 'सगर्व्वं पसारिअकरेण अवगहिअ' । 'अवहिदं' । २ क्वचिन्न । ३ 'सगर्वं' ।

ऽशुकम्'!] (सक्रोधम्) अलमिदानीमतः परमाकर्णनेन । भवतु । तावत्तस्य परवनितावस्कन्दनप्रगल्भस्य माद्रीसुतहतकस्य जीवितमपहरामि । (किंचिद्गत्वा, विचिन्त्य) अथवा इयमेव तावत्पापशीला प्रथममनुशासनीया । (इति निवर्तते) ।

उभे—तदो तदो ? ।

[ततस्ततः ?] ।

भानुमती—हला ! तदो अहं अज्जउत्तस्स पभादमङ्गलतूररवमिस्सेण वारविलासिणीजणसंगीदसद्देण पडिबोधिदह्मि ।

वस्त्रम् । कञ्चुकीति यावत् । आकर्णनेन=श्रवणेन । परवनितासु यद[illegible]—ब[illegible] तत्र प्रगल्भस्य=लम्पटस्य । माद्रीसुतहतकस्य=माद्रीपुत्राऽपसदस्य नकुलस्य । जीवितं=प्राणान् । इयमेव=भानुमत्येव । पापशीला=पापाचारा । पापचरिता । अनुशासनीया=दण्डनीया । इति=इति विचार्य । हलेति=सखीसम्बोधनम् । 'हण्डे हञ्जे हलाऽऽह्वाने नीचां चेटीं सखीं प्रति' इत्यमरः । आर्यपुत्रस्य=स्वामिनः । 'आर्यपुत्रेति संबोध्यः

राजा—(सोच कर) हैं क्या कहा 'उसने बड़ी निर्भयता तथा खूबसूरती व अदा से मेरा स्तनांशुक पकड़ कर खींच लिया ?' । अब इससे ज्यादा सुनने की जरूरत नहीं है । रहने दो । अच्छा मैं उस व्यभिचारी माद्रीपुत्र नकुल को मारता हूँ । (कुछ दूर जाकर सोच कर) अथवा पहिले इस पापिनी को ही दण्ड देना चाहिए । (ऐसा विचार कर लौटता है) ।

सखी व चेटी—तब क्या हुआ ? ।

भानुमती—हे सखि ! तब मेरी आँख—मेरे पति दुर्योधन को जगाने के लिए बजाई जाने वाली प्रभातकालिक मङ्गलमय तूरही (शहनाई बाजा) की ध्वनि से तथा

---

१ कश्चिन्न । २ 'अलमतःपरं श्रुत्वा' । ३ 'विलासिणीसङ्गीदरवेण' ।

[तत आर्यपुत्रस्य प्रभातमङ्गलतूर्यरवमिश्रेण वारविलासिनीजन-सङ्गीतशब्देन प्रतिबोधिताऽस्मि]।

राजा-(सवितर्कम्) । **किं नाम खलु 'प्रतिबोधितास्मी'ति !। किन्नु खलु स्वप्नदर्शनमनया वर्णितं ?।** [विचिन्त्य] **भवतु सखी-वचनादेव व्यक्तिर्भविष्यति ।**

[उभे—सविषादमन्योन्यं पश्यतः]।

सुवदना—**जं किम्पि अच्चाहिदं तं भाईरहीप्पमुहाणं णईणं सलिलेण अवहारिअदु । भअवदाणं ब्रह्मणाणं वि आसीसाए, आहुदिहुदेण पज्जलिदेण भअवदा हुदासणेण अ अन्तरीअदु ।**

पतिः पत्नीजनेन तु' इति भरतः । **वारविलासिनी**=वेश्या । **प्रतिबुद्धा**=उत्थिता।

सखीवचनात्=सुवदनावाक्यात् । **व्यक्तिः**=स्फुटप्रतिपत्तिः । **अत्याहितम्**= अनर्थः । अप्रशस्तम् । भीतिजनकम् । 'अत्याहितं महाभीतिः' इत्यमरः । **अन्तरीक्रियताम्**–दूरीक्रियताम् । **'अस्यताम्'** इति पाठे–निरस्यतामित्यर्थः ।

वाराङ्गना (वेश्या)ओं के सङ्गीत की ध्वनि से—खुल गई । अर्थात् मेरी नींद खुल गई और मैं जाग उठी ।

राजा—(चौंककर, तर्क करता हुआ) क्या कहा—'मैं जाग उठी' ?। क्या इसने यह स्वप्न की बात कही है ?। (सोचकर) अच्छा ! सखी के वाक्य से ही यह बात स्पष्ट हो जाएगी ।

[**सखी** व **चेटी**—दुःख व विषाद के साथ परस्पर देखती हैं]।

सुवदना—इस स्वप्न में जो कुछ अमङ्गल व भय की बात हो वह भागी-रथी (गङ्गा) प्रभृति नदियों के पवित्र जल से दूर हो जाए ! और ज्ञानी विद्वान्

---

१ कश्चिन्न । २ 'वर्णितं भवेत्' । ३ 'अथवा सखी' । ४ 'जं एत्थ' । ५ 'अन्तरी अदु' । ६ ['अन्तरीक्रियताम्' । 'अन्तर्यताम्'] । अस्सदु' [अस्यतां] ।

[यत्किमप्यहितं तद्भागीरथीप्रमुखानां नदीनां सलिलेनापह्रियताम् । भगवतां ब्राह्मणानामप्याशिषा, आहुतिहुतेन प्रज्वलितेन भगवता हुताशनेन च अपह्रियताम्] ।

राजा—अलं विकल्पेन । स्वप्नदर्शनमेवैतदनया वर्णितम् । मया पुनर्मन्दधियाऽन्यथैव सम्भावितम्[1] । (सवैलक्ष्यस्मितम्[2]) ।

दिष्ट्यार्द्धश्रुतविप्रलम्भजनितक्रोधादहं[3] नो गतो,
दिष्ट्या नो परुषं रुषाऽर्द्धकथने किंचिन्मया व्याहृतम् ।

विकल्पेन=संशयेन । एतत्=नकुलचरितम् । मन्दधिया=मन्दबुद्धिना । जड-मतिना । अन्यथा=माद्रीसुताऽविनयपरतया । सम्भावितं=तर्कितम् ।

दिष्ट्येति । दिष्ट्या=हर्षस्थानमेतत् । सौभाग्यमेतन्मम । दिष्ट्येत्यव्ययं हर्षे-आनन्दे । अर्द्धं श्रुतं यद्वाक्यं तेन यो विप्रलम्भः=विसंवादः, मिथ्याभ्रान्तिः, तेन जनितो यः क्रोधः, तस्मात् । अर्द्धश्रुतवाक्यार्थभ्रमजनितरोषात् । 'विप्रलम्भो विसंवादः' इत्यमरः । अहं=दुर्योधनः । नो गतः=नैव भानुमतीं हन्तुं प्रयातः । एतदेव हर्षस्थानमित्यर्थः । किञ्च-अर्द्धकथने=भानुमत्या अर्द्धभाषणे एव । दिष्ट्या=सौभाग्येनैव । किञ्चित्=किमपि । रुषा=क्रोधेन । परुषं=क्रूरम् । मया-नो व्याहृतं=नोक्तम् । 'दिष्ट्या मया क्रूरवचनानि

ब्राह्मणों के आशीर्वाद से तथा दी गई आहुतियों से सुप्रज्वलित भगवान् अग्नि की कृपा से दूर हो जाए।

राजा—अब सन्देह की कोई आवश्यकता नहीं, इसने स्वप्न की ही सब बातें कही थीं; पर मैंने ही मूर्खतावश उन्हें और तरह समझा था । (लज्जित हो मुस्कराता हुआ) ।

सौभाग्य से ही मैं—आधी बातें सुनकर भ्रम में आकर क्रुद्ध हो भानुमती

---

१ 'यदिहात्या' । २ क्वचिन्न । ३ 'वचनक्रोधा' ।

मां प्रत्याययितुं विमूढहृदयं दिष्ट्या कथाऽन्तं गता,
मिथ्यादूषितयाऽनया विरहितं दिष्ट्या न जातं जगत्॥१३॥

भानुमती—हला ! कहेहि किं एत्थ पसत्थं किं वा असुह-सूअअं त्ति ? । [हला! कथय किमत्र प्रशस्तं किं वाऽशुभसूचकमिति ?] ।

सखी चेटी च—(अन्योन्यमवलोक्य, अपवार्य) एत्थ णत्थि त्थोअं वि सुहसूअअम् । तदो अलीअं कधअन्ती पिअसहीए अवराहिणी भविस्सम् । सो दाणीं सिणिद्धी जणो जो पुच्छिदो

नोक्तानी'त्यर्थः । विमूढहृदयं=भ्रान्तचित्तम् । मां—प्रत्याययितुं=विश्वास-यितुम् । दिष्ट्या=सौभाग्यमेतत् । कथा=नकुलकथा । अन्तं=समाप्तिं । गता=प्राप्ता । दिष्ट्या त्वरितमेव 'स्वप्रदृष्ट'मित्युक्त्वा मत्प्रिया भानुमती कथा-मिमां समापयामासेति भावः । दिष्ट्या=सौभाग्येनैव च । मिथ्या=मिथ्यैव । दूषितया=कलङ्कितया । अधिक्षिप्तया । अनया=भानुमत्या । विरहितं= शून्यम् । जगत्=भूतलमिदम् । न जातं=नैव जातम् । मत्सौभाग्येनैवेयं शोकेन न मृतेत्याशयः । शार्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

अत्र=अस्मिन् स्वप्ने । ततः =मिथ्या प्रशंसया । अलीकं=मिथ्यैव ।

के पास नहीं गया । सौभाग्य से ही मैंने आधी सुनी हुई बातों पर क्रोधकर उसको कुछ क्रूर बातें नहीं कही । सौभाग्य से ही भ्रान्ति में पड़े हुए मेरी भ्रान्ति को दूर करने के लिए यह बात शीघ्र ही समाप्त हो गई, अर्थात् 'मैं जाग उठी' इस प्रकार भानुमती ने इस प्रसङ्ग को शीघ्र समाप्त कर दिया । हर्ष की बात है कि—मिथ्या कलङ्क लगाने से दुःखित हो इसने अपने प्राण देकर मेरे इस संसार को सूना नहीं कर दिया । यह सौभाग्य की ही बात है ॥ १३ ॥

भानुमती—सखि ! कहो इस स्वप्न में क्या शुभ और क्या अशुभ है ? ।

१ 'हला ! कहहि किं एत्थं सुहसूअअं' । २ 'उभे' ।

३ 'जइ एत्थं अलीअं कहइस्सं ता अवराहिणी भविस्सम् ।

४ 'मन्तिअन्ती' 'मन्त्रयन्ती' । ५ 'एव्व' ।

परुसं वि हिदं भणादि। (प्रकाशम्) सहि ! सव्वं एव्वं एदं असुहणिवेदणम्। ता देवदाणं पणामेण, दुव्वादिपडिग्गहेण[1] अ अन्तरीअदु। ण हु दाढिणो णउलस्स अण्णस्स[2] वा दंसणं अहिसदवहं अ सिविणए पसंसन्ति विअक्खणाओ।

[अत्र नास्ति स्तोकमपि शुभसूचकम्। ततोऽलीकं कथयन्ती प्रियसख्या अपराधिनी भविष्यामि। स इदानीं स्निग्धो जनो यः पृष्टः परुषमपि हितं भणति। सखि ! सर्वमेवैतदशुभनिवेदनम्। तद्देवतानां प्रणामेन दूर्वादिप्रतिग्रहेण[3] चान्तरीक्रियताम्[4]। न खलु दंष्ट्रिणो नकुलस्यान्यस्य[2] वा दर्शनमहिशतवधं च स्वप्ने प्रशंसन्ति विचक्षणाः]।

राजा—अवितथमाह सुवदना। नकुलेन पन्नगशतवधः,

स्निग्धः=स्नेही। सुहृत्। सर्वम्=नकुलचरितम्। अशुभनिवेदनम्=अशुभसूचकम्। तत्=अशुभम्। अन्तरीक्रियतां=शाम्यताम्। दंष्ट्रिणः=दंष्ट्रावतः। अन्यस्य=सिंहसर्पादेः। विचक्षणाः=पण्डिताः। अवितथं=सत्यम्। सुवदना=

सखी व चेटी—(आपस में देखकर और भानुमती से छिपाकर) इसमें तो कुछ भी शुभसूचक नहीं है, यदि इसमें कुछ मिथ्या (झूठ) कहूँगी तो प्रियसखी की अपराधिनी होऊँगी। वही सच्चा हितैषी व मित्र है जो पूछने पर सच्ची बात कहे चाहे वह कड़ुवी ही क्यों न हो। (प्रकट में) सखि ! यह स्वप्न तो पूर्ण अशुभसूचक है। अतः देवताओं के प्रणाम व पूजा से, दूर्वा आदि माङ्गलिक वस्तुओं के स्पर्श से, तथा ब्राह्मणों को दान देने से, तथा उनके आशीर्वाद से दूर हो। क्योंकि दंष्ट्रावाले नकुल का या किसी अन्य (सर्प आदि) का स्वप्न में दर्शन तथा १०० सार्पों का स्वप्न में मारा जाना पण्डित लोग शुभसूचक नहीं कहते हैं।

१ 'दुजादिजणपडि' । [द्विजातिप्रतिग्रहेण] । २ कश्चिन्न ।
३ 'परिग्रहेण' । ४ 'अन्तर्यताम्' ।

स्तनांशुकापहरणं च नियतमरिष्टोदर्कमस्माकं तर्कयामि ।

पर्यायेण हि दृश्यन्ते स्वप्नाः कामं शुभाशुभाः ।
शतसङ्ख्या पुनरियं सानुजं स्पृशतीव माम् ॥ १४ ॥

(वामाक्षिस्पन्दनं सूचयित्वा) आः ! कथं ममापि नाम दुर्योधनस्याऽनिमित्तानि हृदयक्षोभमावेदयन्ति । (सावष्टम्भम्)

सखी । पन्नगः=सर्पः । नियतम्=निश्चितम् । अनिष्टोदर्कम्=अग्रेऽशुभफलप्रदम् । अनिष्टेति क्वचित्पाठः । 'उदर्कस्तूत्तरं फलम्'इत्यमरः ।

तर्कयामि = चिन्तयामि ।

पर्यायेणेति । हि=यतः । शुभाऽशुभाः=शुभफलदा अशुभफलदाश्च । स्वप्नाः=स्वप्नविलासः । पर्यायेण=क्रमशः । कामं=यथेच्छम् । दृश्यन्ते=विलोक्यन्ते । लोकैरिति शेषः । पुनः=किन्तु । इयं=भानुमत्युक्ता । सानुजं=भ्रातृशतान्वितम् । स्पृशतीव=विषयीकरोतीव ॥ १४ ॥

ममाऽपि=महासत्त्वस्यापि । अनिमित्तानि=दुःशकुनानि : आवेदयन्ति । सूचयन्ति । कुर्वन्ति । सावष्टम्भम्=सदर्पम् । 'दर्पोऽवलेपोऽवष्टम्भः'

राजा—सुवदना ठीक कहती है, नकुल द्वारा सौ १०० सर्पों का मारना तथा देवी के स्तनांशुक का अपहरण अवश्य ही भविष्यत् में हमारे लिये अनिष्ट फल देनेवाला होगा—ऐसा मैं भी समझता हूँ ।

यद्यपि स्वप्न तो यों ही कभी शुभ कभी अशुभ दिखाई दिया करते हैं, परन्तु इसमें जो यह १०० सौ की संख्या है वह तो मेरे तथा मेरे भाइयो पर घटती-सी मालूम होती है ॥ १४ ॥

(बाईं आँख का फड़कना सूचित कर) ओह ! यह क्या ? मेरे दुर्योधन के चित्त को भी ये अपशकुन घबड़ा देना चाहते हैं । (बड़े गर्व से) इस प्रकार

१ 'अनिष्टोदर्कं तर्क' । २ क्वचिन्न । ३ 'आवहन्ति' ।

अथवा भीरुजनहृदयप्रकम्पनेषु का गणना। दुर्योधनस्यैवंविधेषु कश्मलेषु। गीतश्चायमर्थोऽङ्गिरसा—

"ग्रहाणां चरितं स्वप्नोऽनिमित्तौत्पातिकं तथा।
फलन्ति काकतालीयं, तेभ्यः प्राज्ञा न बिभ्यति"॥ १५॥

इत्यमरः। भीरुजनेति। कातरजनचित्तविक्षोभकारिषु। एवंविधेषु=ईदृशेषु। कश्मलेषु=मोहेषु—। अक्षिस्पन्दनादिषु। 'मूर्छा तु कश्मलं मोहः' इत्यमरः। दुर्योधनस्य मम का खलु गणना=को विचार इत्यर्थः। गीतः=उक्तः। अयमर्थः=भीरुभीतिजनकत्वरूपोऽर्थः।

ग्रहाणामिति। ग्रहाणां=सूर्यादीनाम्, चरितं=चारः। दशादिकम्। तथा=तथैव। अनिमित्तमौत्पातिकम्-अनिमित्तौत्पातिकम् = निर्हेतुकमाकस्मिकमौत्पातिकम्। ध्वजभङ्गच्छत्रपतनोल्कापातादिकम्। 'निमित्तान्युपयाचितम्' इति तु सुन्दरः पाठः। तत्र च निमित्तानि=शकुनानि अक्षिस्पन्दनादीनि। उपयाचितम्=उपश्रुतिः। रात्रौ चतुष्पथे गत्वा यश्शब्दः श्रूयते सा उपश्रुतिः। तया च शुभाशुभनिर्णयः क्रियते तज्ज्ञैः। काकागमनमिव तालपतनमिव काकतालीयम्-अतर्कितोपनतं यथा स्यात्तथा। फलन्ति=सिद्ध्यन्ति। तेभ्यः=ग्रहदशादिभ्यः। प्राज्ञाः = पण्डिताः। न बिभ्यति=नैव भयं कुर्वन्ति। न त्रस्यन्ति॥ १५॥

अपशकुनों से तो डरपोक, कायर लोगों के ही मन व्याकुल होते हैं, इस प्रकार की विपत्तियों से दुर्योधन नहीं घबड़ा सकता। यह बात अङ्गिरा ऋषि ने अपनी ज्यौतिषसंहिता में भी कही है कि—

ग्रहोंकी दशा का फल, स्वप्न, शकुन, उत्पात आदि कभी कदाचित् ही फल देते हैं, सदा नहीं। अतः पण्डित लोग इनसे नहीं डरते !॥ १५॥

---

१ कश्चित्र।

२ अनिमित्तान्युपयाचितम्'। अनिमित्तोत्पादकम्'।

तद्भानुमत्याः स्त्रीस्वभावसुलभामलीकाशङ्कामपनयामि ।

भानुमती—हला सुवअणे ! पेक्ख दाव उदअगिरिसिहरन्तर-विमुक्करहवरविअलिअसंझाराअपसण्णदरालोअमण्डलो जादो भअवं दिवहणाहो ।

[हला सुवदने ! पश्य तावदुदयगिरिशिखरान्तरविमुक्तरथवरविदलितसन्ध्यारागप्रसन्नतरालोकमण्डलो जातो भगवान्दिवसनाथः] ।

सखी—सहि ! रोसाण्णिदकण्णकन्तिसरिसेण लदाजाल-

स्त्रीस्वभावसुलभां=स्त्रीत्वसुलभाम्। अलीकाशङ्कां=मिथ्याशङ्काम्। हला=हे सखि। उदयस्य गिरेर्यत् शिखरं=शृङ्गं, तेन यत् अन्तरं=व्यवधानं, तेन विमुक्तः=उद्धृतः, निःसृतो यो रथवरः, तेन स्वचक्रैः विदलितो=विनाशितो यः सन्ध्यायाः रागो=लौहित्यं, तेन प्रसन्नतरः आलोकः=प्रकाशो मण्डलं चक्रवालं च प्रकाशमण्डलं वा यस्यासौ तथाभूतः। उदयाचलशृङ्गव्यवधानंविमुक्तरथवर-विना-शितप्रातःसन्ध्याराग-विस्पष्टतरदृश्यमान-मण्डलः। दिवसनाथः=सूर्यः।

इस लिए चलकर भानुमती की स्त्रीस्वभावसुलभ अमङ्गल की आशङ्का को दूर करना चाहिए ।

भानुमती—सखी ! देख उदयगिरि (जापान का पर्वत) के शिखर की ओट से निकलते हुए रथ से सन्ध्या काल के राग (लालिमा) के विदलित—दूर हो जाने से भगवान् सूर्य नारायण का मण्डल साफ और स्वच्छ (व दुरालोक) मालूम हो रहा है ॥

---

१ क्वचिन्न । २ सिहरन्तरित' । ३ 'रहवरो' ।

४ 'विअल·तसंझाराअपसण्णदुरालोअमण्डलो' । ५ रथवरो' ।

६ 'विगलत्सन्ध्यारागप्रसन्नदुरालोकमण्डलो' ।

७ 'रोसाण्णिदकण्णकन्तिसस्सिरीएण'। [सुश्रीकेण] ।'रोसाणिदकण्णअपत्तसरि'।

८ 'लदाजालन्तरोपविद्धकिरणजालेण' ।

न्तरापडिदकिरणनिवहेण पिञ्जरिदोज्जाणभूमिभाओ पूरिद-पदिण्णो विअ रिउदुप्पेक्खणिज्जो जादो भअवं सहस्स-किरणो । ता समओ दे कुसुमचन्दणगब्भेण अग्घेण पज्जु-वट्ठादुम् ।

[सखि ! रोषान्वितकर्णकान्तिसदृशेन लताजालान्तरापतित-किरणनिवहेन पिञ्जरितोद्यानभूमिभागः पूरितप्रतिज्ञ इव रिपुदुष्प्रेक्षणीयो जातो भगवान्सहस्रकिरणः । तत्समयस्ते कुसुमचन्दनगर्भेणाऽर्घेण पर्युपस्थातुम्]।

भानुमती—हञ्जे तरलिए ! उवणेहि मे अग्घभाअणं, जाव

रोषेण अन्वितस्य यः कर्णः, श्रवणं, रोषान्वितः कर्णो वा, तत्कान्तिसदृशे-नेत्यर्थः । 'रोसानितकनकपत्रसदृशेनेतिपाठे तु–रोसानितं=निर्मलीकृतं यत्कन-कपत्रं=सुवर्णपत्रं, तेन सदृशः, तेन=निर्मलसुवर्णपत्रसदृशेनेत्यर्थः ।

लताजालान्तरापतितकिरणनिवहेन=वल्लीजालमध्यप्रविष्टमयूखजालेन । 'लताजालान्तरोपहितकिरणजालेने'ति पाठे—लतासमूहमध्यप्रवेशितविस्तीर्ण-किरणपटलेनेत्यर्थः । पिञ्जरितेति । पिशङ्गीकृतप्रमदवनभूमिभाग इत्यर्थः । पिशङ्गीकृतेति क्वचित्पाठः । पिङ्गीकृतेत्यर्थः । स्वर्णाभेत्यर्थः ।

सखी—लताओं के समूह के अन्तर (अवकाश) से आती हुई तपाए हुए सोने के पत्तों की तरह सुनहरी जिसकी किरणों से उद्यान [बगीचे] का भाग सुनहरा हो गया है ऐसे, पूर्णप्रतिज्ञ, शत्रुओं के द्वारा देखे नहीं जा सकने वाले भगवान् सूर्य नारायण हो गए हैं । अर्थात् सूर्य बहुत ऊँचे चढ गए हैं । इसलिए पुष्प चन्दन मिश्रित अर्घ देने का अब तुमारा समय होगया। अतः शीघ्र ही सूर्य का उपस्थान करो ।

भानुमती—[चेटी से] अरी तरलिके ! मेरा अर्घपात्र [अर्घा] तो

---

१ 'पिसङ्गीकिदोज्जाणभूमिभाओ ।

२ क्वचिन्न । ३ 'भअवं सहस्सरस्सी संवुत्तो' । ४ 'स्वर्ण' ।

भअवदो सहस्सकिरणस्स सवरिअं णिव्वट्टेमि ।

[हञ्जे तरलिके ! उपनय मे अर्घभाजनं, यावद्भगवतः सहस्रकिरणस्य सपर्य्यां निर्वर्त्तयामि] ।

चेटी—**जं देवी आणवेदि ।** [इति निष्क्रम्य पुनः प्रविश्य] । **भट्टिणि ! एदं अग्घभाअणं, तां णिव्वट्टेदु भअवदो सहस्सरस्सिणो सवरिआम् ।**

[यद्देवी आज्ञापयति । भट्टिनि ! इदमर्घभाजनं, तन्निर्वर्त्तय भगवतः सहस्ररश्मेः सपर्य्याम्] ।

राजा—**अयमेव साधुतरोऽवसरः प्रियासमीपमुपगन्तुम् ।**

[इत्युपसर्पति] ।

सखी—[विलोक्यात्मगतम्] । **कहं महाराओ आअदो ? । हन्त ! जादो से णिअमभंगो ।**

प्रत्युपस्थातुं=पूजयितुम् । उपनय=आनय । अर्घभाजनम्=अर्घपात्रम् ।

ले आ, ताकि मैं भगवान् सूर्य नारायण की पूजा कर लूँ ।

चेटी—जो महारानी की आज्ञा । [बाहर जाकर फिर प्रवेश कर] । स्वामिनि [मालिकिनी] यह आपका अर्घपात्र है, लीजिए, इससे भगवान् सूर्य नारायण की पूजा करिए ।

राजा—प्रिया भानुमती के पास जाने का यही सबसे अच्छा अवसर है ।

[यह विचार कर उसके पास जाता है] ।

सखी–[देखकर, मनही मन] हैं ! महाराज कैसे आगए ?, हा हन्त ! अरे मेरी प्रियसखी भानुमती का नियमभङ्ग अब राजानें कर हीदिया समझना चाहिए ।

---

१ 'निष्क्रान्ता । राजा–अयमव साधुतरोऽवसरः समीपमुपगन्तुं देव्याः' । (प्रविश्य) चेटी–देवि !' पा० । २ क्वचिन्न । ३ सवरिअम् ।

४ 'किदो से पिअसहीए णिअमभङ्गो रण्णा' । (कृतोऽस्याः प्रियसख्या नियमभङ्गो राज्ञा) ।

[कथं महाराज आगतः ! । हन्त ! जातोऽस्या नियमभङ्गः] ।

भानुमती—[दिनकराभिमुखीभूय[1]]—भअवं ! अवरमहासरेक्क-सहस्सपत्त ! पुव्वदिसावहुमुहमण्डणकुंकुमविसेसअ ! सअल-भुवणेक्करअणप्पदीव ! जं एत्थ[2] सिविणअदंसणे किं वि अच्चा-हिदं, तं भअवदो पणामेण सभादुअस्स अज्जउत्तस्स कुसल-परिणामी होदु । [अर्घं दत्त्वा] । हंजे तरलिए[3] ! उवणेहि मे कुसुमाइं, जाव अवराणं वि देवदाणं सवरिअं णिव्वट्टेमि ।

[भगवन् ! अम्बरमहासर-एकसहस्रपत्र ! पूर्वदिशावधूमुखमण्डन कुङ्कुमविशेषक ! सकलभुवनैकरत्नप्रदीप ! यदत्र स्वप्नदर्शने किमप्यत्या-हितं, तद्भगवतः प्रणामेन सभ्रातृकस्यार्यपुत्रस्य कुशलपरिणामि भवतु ।

सपर्यां=पूजाम् । निर्वर्तयामि=करोमि । सम्पादयामि । एतत्=इदमस्ति । सहस्ररश्मेः=सूर्यस्य । नियमभङ्गः=ब्रह्मचर्यव्रतविलोपः । हन्त=खेदे । जातः=जात एव । कामोपहतचेतनेन राज्ञाऽवश्यं दूषितेयं स्यादिति भावः । साधुतरः=शोभनः । सञ्ज्ञया=नेत्रादिसङ्केतेन ।

अम्बरेति । अम्बरमेव महासरस्तस्यैकं प्रधानं सहस्रपत्रं-कमलम् । तत्सम्बुद्धौ । गगनमहासरोवरसहस्रपत्रकमलरूपेत्यर्थः । पूर्वदिशैव वधूः—स्त्री, तस्याः मुख-मण्डलस्य कुङ्कुमरचितो विशेषक इव तत्सम्बुद्धौ-हे पूर्वदिशावधूमुखमण्डल-कुङ्कुमविशेषक=प्राचीवधूवदनमण्डलकुङ्कुमरचितमण्डलाकारविशेषक । सकल-भुवनाङ्गणस्य दीपक इव–तत्सम्बुद्धौ हे सकलभुवनाङ्गणदीपक=सकललोक-चत्वरप्रदीप । 'अङ्गणं चत्वराऽजिरे' इत्यमरः । कुशलेति । मङ्गलप्रद-

---

भानुमती—[सूर्य भगवान् की ओर मुख करके] हे भगवान् ! आकाश रूपी सरोवर के सर्वश्रेष्ठ सहस्रपत्र कमल, पूर्वदिशारूपी वधू [बहू, स्त्री] के मुखमण्डल के मण्डनभूत कुङ्कुम ['कोको' 'केसर'] के गोल विशेषक

---

१ 'भूत्वा' ।

२ 'एत्थ सिविणअदंसणे जं वि' । ३ 'हला उवणेहि' । 'णिव्वट्टिदुं' ।

हञ्जे तरलिके ! । उपनय मे कुसुमानि, येन अपरासामपि देवतानां सपर्यां निर्वर्त्तयामि] ।

[इति हस्तौ प्रसारयति] ।

[राजा संज्ञया परिजनमुत्सार्य पुष्पाणि स्वयमुपनयति, स्पर्शसुखमभिनीय कुसुमानि भूमौ पातयति च] ।

भानुमती—[सरोषम्] । अहो ! प्पमादो परिअणस्स ।

मित्यर्थः । आर्यपुत्रस्य=मत्पत्युर्दुर्योधनस्य । उपनय=आहर । देहि । अपरासाम्=अन्यासाम् । विष्णुशिवादीनाम् । सपर्या=पूजाम् । समीपमाहरति । स्पर्शसुखं=भानुमतीशरीरस्पर्शानन्दम् । पातयति=दुर्योधनो निपातयति । प्रमादः=अनवधानता । कार्यकरणे प्रमादः । परिजनस्य=भृत्य-

[गोल तिलक, बिन्दी], सकल लोकों के रत्न प्रदीप !, इस स्वप्न में जो कुछ अमङ्गलजनक बात हो वह आप के प्रणाम से मेरे पति के लिए वे उनके सौ भाइयों के लिए मङ्गल जनक हो जाए । अरी तरलिके ! मुझे पुष्प दे । ताकि और देवताओं का भी पूजन कर लूँ । पुष्प लेने को हाथ पसारती है [फैलाती है, बढाती है]

[राजा दुर्योधन तरलिका आदि परिजनवर्ग को सङ्केत [इशारे] से दूर हटाकर स्वयं फूल लेजाकर देता है, और भानुमती के शरीर से स्पर्श होते ही आनन्द विह्वल हो पुष्पों को भूमि पर गिरा देता है] ।

भानुमती—[क्रोध से] नौकर चाकरों की कैसी भूल व असावधानी है, [जो पुष्पों को भी गिरा देते हैं] ।

[घूमकर राजा को देखती है और घबडाकर लज्जा प्रकट करती है] ।

१ 'निवर्त्तयितुम्' । २ क्वचिन्न ।

३ 'राज्ञः पुष्याण्युपनयतः स्पर्शाद्धस्तादर्घ्यपात्रं भूमौ पतति' । 'भानुमत्यास्तत्स्पर्शजातकम्पाया हस्ताद्भूमौ पुष्पाणि पतन्ति' ।

[अहो ! प्रमादः परिजनस्य] ।

[परिवृत्य राजानमवलोक्य ससाध्वसं लज्जां नाटयति] ।

राजा—देवि ! अनिपुणः परिजनोऽयमेवंविधसेवाऽवकाशे, तत्प्रभवत्यनुशासने देवी । अयि प्रिये !

विकिर धवलदीर्घापाङ्गसंसर्पि चक्षुः
परिजनपथवर्त्तिन्यत्र किं सम्भ्रमेण ? ।
स्मितमधुरमुदारं देवि ! मामालपोच्चैः,
प्रभवति मम पाण्योरञ्जलिः सेवितुं त्वाम् ॥ १६ ॥

वर्गस्य । अनिपुणः=अकुशलः ।

परिजनः=दुर्योधनाख्यस्ते सेवकोऽयम् । एवंविधे=ईदृशे । पुष्पादिप्रदानरूपे समुचिते । सेवावकाशे=सेवावसरे । सेवाकर्मणि । तत्=तस्मात् । प्रभवति=योग्या, समर्था च । अनुशासने=अपराधदण्डदाने ।

विकिरेति । परिजनानां पन्थाः परिजनपथः, तत्र वर्त्तते तच्छीले परिजनपथवर्त्तिनि=सेवकतां दधाने । अत्र=मयि दुर्योधने । नियमस्थिततया कज्जलाऽभावात्-धवलो दीर्घश्च योऽपाङ्गः—नेत्रप्रान्तः, तत्र-संसर्पति तच्छीलं संसर्पि-धवलदीर्घापाङ्गसंसर्पि=स्निग्धस्वच्छविस्तृतनेत्रप्रान्तप्रसरणशीलं, कोपचञ्चलम् । चक्षुः=नेत्रम् । विकिर=विक्षिप । सम्भ्रमेण=उद्वेगेन । किं=किं प्रयोजनम् । न किमपीत्यर्थः । स्मितमधुरं=मृदुहास्यमधुरम् । उदारं=मनोहरं

राजा—देवि ! यह (मैं) परिजन (नौकर) इस प्रकार की सेवा में नया ही है अभी पूर्ण कुशल नहीं हुआ है, इसलिए इसे (मुझे) अपराध के लिए आप उचित दण्ड दें । (अनुशासन=सीख व दण्ड) । अयि प्रिये !

हे देवि ! (व्रत व नियम के कारण कज्जल रहित होने से) स्वच्छ व दीर्घ—विस्तृत—अपाङ्गतक फैलनेवाले (बड़े २) नेत्रों से मेरी ओर देखिए तो सही, क्योंकि मैं तो आपका सेवक हूँ, इस तरह आप घबड़ाती क्यों हैं । स्मितपूर्वक मधुर व

---

१ ('परिवृत्य दृष्ट्वा, ससम्भ्रमं) कथं अज्जउत्तो' ? ।

२ 'भीरु' । ३ 'त्वं स्पृशाऽस्मान्' ।

भानुमती—**अज्जउत्त ! अब्भणुजादु[1] मं महाराजाओ, त्थिअ मे कस्सिं वि णिअम अहिलासो।**

[अभ्यनुजानातु मां महाराजः, अस्ति मे कस्मिन्नपि नियमेऽभिलाषः]।

राजा—**श्रुतविस्तार एवास्मि भवत्याः स्वप्नवृत्तान्तं प्रति, तदलं प्रकृतिसुकुमारमात्मानं खेदयितुम्।**

भानुमति—**अज्जउत्त ! अंदिमेत्तं मे संका बाहेइ[2], ता अणु-**

च यथास्यात्तथा। **मां**=सेवकपथवर्त्तिनं माम्। **उच्चैः**=स्पष्टम्। **आलप**—ब्रूहि। मां भर्त्सय। यतो भवती—मयि—**प्रभवति**=अधिकरोति। मम भवती स्वामिनी। अतः-अस्मान् माम्। **स्पृश**=कोपेन ताडयितुं स्पृश। अनुग्रहेण सस्नेहं वाऽस्मान् स्पृश। यतः—मम पाण्योरयमञ्जलिः। साञ्जलिबन्धं प्रार्थये। ममापराधं क्षमस्व। मामनुग्रहस्निग्धेन चक्षुषा विलोकय, मां स्पृशेति वार्थः।

पाठान्तरे—मम पाण्योरयमञ्जलिस्त्वां सेवितुं प्रभवति समर्थ इति तदर्थो बोध्यः। 'आज्ञादानाय मयि चक्षुर्निधेहि, परिजने सम्भ्रमेणाऽलं, मधुरमालप, अहं त्वां सेवितुं साञ्जलिबन्धं सन्नद्धः" इत्यर्थो वा। मालिनी वृत्तम्॥ १६॥

अभ्यनुजानातु=आज्ञापयतु। पाठान्तरे- त्वया दत्ताभ्यनुज्ञाया मे इत्यर्थः। **नियमे**=नियमपूर्वकं देवाराधने। **अभिलाषः**=मनोरथः। **श्रुतविस्तारः**=

कोमल वाणी से प्रेमपूर्वक मुझसे बातें करें, आपकी सवा करने को मेरी यह अञ्जलि तैयार है। अर्थात् मैं आपकी सेवा करने के लिए सेवक की तरह अञ्जलि बाँधकर तैयार खड़ा हूँ, मेरी ओर आँख उठाकर देखिए व आज्ञा दीजिए, कहिए क्या करूँ ? (या मुझे इस अपराध के लिए दण्ड दीजिए मैं, तैयार हूँ) ॥१६॥

भानुमती—आर्यपुत्र ! (हे नाथ !) मुझे आप आज्ञा दीजिए—मेरी किसी नियम (व्रत) करने की इच्छा है।

राजा—मैंने विस्तारपूर्वक तुम्हारे स्वप्न का वृत्तान्त सुन लिया है। अतः स्वभाव से ही कोमल इस शरीर को वृथा कष्ट देने की आवश्यकता नहीं है।

१ 'अब्भअण्णादाए दुए अत्थि' (अभ्यनुज्ञातायास्त्वयाऽस्ति)।

२ 'अज्जउत्त मं शङ्का बाहेदि'।

मण्णदु मं उज्जउत्तो।

[आर्यपुत्र ! अतिमात्रं मां शङ्का बाधते, तदनुमन्यतां मामार्यपुत्रः]।

राजा—(सगर्वम्) देवि[1] ! **अलमनया शङ्कया। पश्य-**

किं नो व्याप्तदिशां प्रकम्पितभुवामक्षौहिणीनां फलं,

किं द्रोणेन, किमङ्गराजविशिखैरेवं यदि क्लाम्यसि ! ।

आकर्णितसकलप्रपञ्चः । तत्=तस्मात् । **प्रकृतिसुकुमारं**=स्वभावकोमलम् । सहजमृदुलम् । **आत्मानं**=शरीरं, मनश्च । **खेदयितुम्**=आयासयितुम् । **अलं**= न किमपि प्रयोजनम् ।

अतिमात्रम्=अत्यर्थम् । नितराम् । **शङ्का**=अनिष्टाशङ्का । अमङ्गलशङ्का । **अनुमन्यताम्**=आज्ञापयतु भवान् नियमपूर्वकं देवाराधनाय माम् ।

किमिति । **एवम्**=इत्थम् । **यदि**=चेत् । **क्लाम्यसि**=त्वं परिश्राम्यसि । तर्हि-**नः**=अस्माकम् । व्याप्ता दिशो याभिस्तासाम्=दिगन्तविश्रान्तानाम् । **प्रकम्पितभुवां**=प्रकम्पितभूतलानाम् । **अक्षौहिणीनाम्**=सङ्ख्याविशेषविशिष्ट-सेनानाम् । किं फलम् । न किमपीत्यर्थः । **द्रोणेन**=द्रोणाचार्येण वा । 'किं फल'-मित्यनुषङ्गः । **अङ्गराजविशिखैः**=कर्णबाणैः । 'किं फल'मिति शेषः । **भीरु**=हे

भानुमती—आर्यपुत्र ! मुझे बहुत बडे अमङ्गल की आशङ्का हो रही है, अतः मुझे आप इस व्रत के लिए आज्ञा दे ही दें ।

राजा—(बड़े गर्व से) देवि ! कुछ भी शङ्का मत करो । देखो—

यदि तुम इस प्रकार अपने शरीरको कष्ट दोगी तो भला संसारमें दशों दिशाओं के कोने २ तक फैली हुई, पृथ्वी को कँपा देनेवाली हमारी इन अक्षौहिणी सेनाओं से क्या लाभ है ?, द्रोणाचार्यजी के रहने से व कर्ण के बाणों से क्या फल है ? ।

---

१ क्वचिन्न ।

भीरु ! भ्रातृशतस्य[1] मे भुजवनच्छायां[2]सुखोपास्थिता
त्वं दुर्य्योधनकेसरीन्द्रगृहिणी, शङ्काऽऽस्पदं किन्तव?॥१७॥

भानुमती—अज्जउत्त ! ण हि किं बि मे संकाकालणं तुह्मेसु सण्णिहिदेसु, किण्णु अजउत्तस्स एब्ब मणोरहसंपत्तिं अहिणंदामि ।

[आर्य्यपुत्र ! न हि किमपि मे शङ्काकारणं युष्मासु सन्निहितेषु, किन्तु आर्य्यपुत्रस्यैव मनोरथसम्पत्तिमभिनन्दामि] ।

भीरुस्वभावे । मुग्धे । मे भ्रातृशतस्य या भुजवनच्छाया=भुजकाननच्छाया, तत्र सुखमुपास्थिता=विश्रान्ता । सुखमुपविष्टा । त्वं=भवती । दुर्योधनकेसरीन्द्रगृहिणी=दुर्योधनाख्यसिंहाधिराजपत्नी । असीति शेषः । तव=भवत्याः । किं=किं नाम । शङ्कास्पदं=शङ्कास्थानम् । नैव कोऽपि शङ्कावसर इत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ १७ ॥

आर्यपुत्रस्यैव=त्वत्युस्तवैव । मनोरथसम्पत्तिं=मनोरथसमृद्धिम् । अभीष्टसिद्धिम् । अभिनन्दामि=आशासे । भगवन्तं प्रार्थये । भवत्कल्याणायैव

(यदि तुम्ही को यों कष्ट करना पड़े तो फिर ये सेना व वीर महारथी कब काम आवेंगे ?) । हे भीरु ! तुमतो मेरे सौ १०० भाइयो की भुजाओ के वन की छाया में सुख से रहनेवाली महाराज दुर्योधन रूपी सिंह की गृहिणी (पत्नी) हो, भला तुमको किस बात की शङ्का व डर है ? ॥ १७ ॥

भानुमती-आर्यपुत्र !, मुझे किसी प्रकार की शङ्का नहीं है,क्योंकि आपके रहते भला मुझे कोई शङ्का क्यों हो सकती है, किन्तु मैं तो आपकी मनोरथसिद्धि (विजय) ही चाहती हूँ । (अर्थात् आप की विजयके लिए नियम पालन करना चाहती हूँ) ।

---

१ 'भ्रातृवशस्य या भुज' । २ 'छायासुखोपाश्रिता' । 'छायां सुखो' ।

राजा—अयि सुन्दरि !, एतावन्त एव मनोरथा यदहं दयितया सङ्गतः स्वेच्छया विहरामीति । पश्य—

प्रेमाबन्धस्तिमितनयनाऽऽपीयमानाब्जशोभं
लज्जायोगादविशदकथं मन्दमन्दस्मितं वा ।
वक्त्रेन्दुं ते नियममुषितालक्तकाङ्काऽधरं वा
पातुं वाञ्छाऽपरमसुलभं किं नु दुर्योधनस्य ? ॥ १८ ॥

नियममाचरितुमिच्छामीत्यर्थः । एतावन्तः=एतत्परिमिता एव, नाऽधिकाः । दयितया=प्रियया भवत्या । सङ्गतः=सहितः । तत्सम्पत्तिश्च त्वदधीनैवेति परिष्वजस्व मां, किं विलम्बेनेति भावः ।

प्रेमेति । प्रेमाबन्धेन=स्नेहावेशेन । रत्यावेशेन । अनुरागातिशयेन । स्तिमितं=निश्चलम् , ईषन्मीलितं च यन्नयनं-नेत्रं तेन । आपीयमाना=तिरस्क्रियमाणा, अब्जस्य=कमलस्य शोभा येन—तत्तथाभूतं=रागावेश-निश्चलनयनविजितारविन्दसौन्दर्यम् । लज्जायोगात्=व्रीडासम्बन्धात् । अविशदा=अस्पष्टा, कथा=आलापः यस्मिन् तत्तथाभूतम्=अस्पष्टालापम् । मन्दमन्दस्मितं वा=ईषद्धास्ययुतं वा । नियमेन मुषितोऽलक्तकस्याऽङ्को यस्मिन्नेवंविधोऽधरो यस्मिन् तत्तथाभूतं=व्रतवर्जितअलक्तकचिह्नाधरशोभितम् । वक्त्रेन्दुं=वदनचन्द्रं । पातुम्=आस्वादयितुम् । वाञ्छा=इच्छाऽस्ति । दुर्योधनस्य=मम । अपरम्=इतः परं किमसुलभं=किं दुर्लभम् ? ।

राजा—अयि सुन्दरी ! मेरा तो यही मनोरथ है कि—मैं अपनी प्यारी के (तुम्हारे) साथ आनन्द से विहार (क्रीडा) किया करूँ । देखो—

स्नेह व आसक्ति एवं रतिके कारण निश्चल हुए नेत्रों से जिस (मुख) ने कमल की शोभा को जीत लिया है, तथा लज्जा के कारण जिससे स्पष्ट बात नहीं निकल रही है, तथा ईषत् हास्ययुक्त,एवं नियम के कारण ओष्ठ पर जहाँ अलक्त का चिह्न (रूपी कलङ्क) भी छुट गया है, ऐसे तेरे मुखरूपी चन्द्रमा के पान करने की ही मेरी इच्छा है, इसके अतिरिक्त भला दुर्योधन के पास कमी ही किस बात की

१ 'वनितया' । २ 'प्रेमाबद्ध' । ३ 'लक्तकाग्राऽधरं' ।
४ 'पर' । ५ 'किं न दुर्यो' ।

(नेपथ्ये महान्कलकलः । सर्वे आकर्णयन्ति) ।

भानुमती—(ससंभ्रमं राजानं परिष्वज्य-) **परित्ताअदु परित्ताअदु अज्जउत्तो ।**

[परित्रायतां परित्रायतामार्यपुत्रः] ।

राजा—(समन्तादवलोक्य ।) **प्रिये ! अलं सम्भ्रमेण । पश्य—**

दिक्षु व्यूढाङ्घ्रिपाङ्गस्तृणजटिलचलत्पांसुदण्डोऽन्तरिक्षे,[2]
झाङ्कारी शर्करालैः[3] पथिषु, विटपिनां[4] स्कन्धकाषैः सधूमः ।
प्रासादानां निकुञ्जेष्वभिनवजलदोद्गारगम्भीरधीर-
श्चण्डारम्भः समीरो वहति परिदिशं भीरु ! किं सम्भ्रमेण ॥

नैव किञ्चित् । सुरतसुखमेवाभिलषामि नान्यदित्यर्थः । 'नु' इवि वितर्के । अत्र 'नियममुषिताऽलक्तताम्राधर'मिति सुन्दरः पाठः । मन्दाक्रान्ता वृत्तम् ॥ १८ ॥

परिष्वज्य=आलिङ्ग्य । सम्भ्रमेण=आवेगेन । भयेन । दिक्षित्रति । हे भीरु ! दिक्षु=दिशासु तु । व्यूढानि-नीतानि अङ्घ्रिपाणां-वृक्षाणामङ्गानि येनासौ तथा । दशदिग्विक्षिप्तवृक्षशाखापत्राद्यवयवः । अन्तरिक्षे=गगने च । तृणैर्जटिलो व्याप्तश्चासौ चलंश्च [दण्डाकारः पांसुः] पांसुदण्डः-दण्डाकारो धूलिर्यस्मात्सः-तृणजटिल-चलत्पांसुदण्डः=तृणव्याप्तभ्रमद्धूलिदण्डः । पथिषु= मार्गेषु तु । झाङ्कारोऽव्यक्तशब्दः सोऽस्यास्तीति—झाङ्कारी=झाङ्कारवान् ।

है ? अतः मैं तो तुम्हारा मुखचन्द्र का पान करना ही चाहता हूँ, और उसकी सिद्धि तुम्हारी इच्छा पर है, उसके लिए नियम की आवश्यकता ही नहीं है ॥१८॥

(नेपथ्य में बड़ा कोलाहल होता है । सब ध्यान से सुनते हैं) ।

भानुमती—[डरके मारे राजा से लिपट कर] नाथ ! बचाइए ! बचाइए ! ।

राजा—[चारों ओर देखकर] प्रिये ! डरो मत ! देखो—

दशों दिशाओं में—जिसने वृक्षों के पत्ते आदि इधर उधर बखेर दिए है, **आकाश में**—तिनका आदि से जो जटिल [व्याप्त] व घूमते हुए धूलि के

१ कश्चिन्न । २ 'व्याक्षिप्तपर्णः' ।

३ 'झाङ्कारी शर्कराले पथि च' इति गौडाः पठन्ति । ४ 'विटपिषु' ।

सखी—**महाराअ ! पविसदु एदं दारुपब्बअपासादं, उब्वेअ-कारी क्खु अअं उत्थिदो परुसरअकलुसीकिदणअणो, विदलिद-तरुवर-सद्द-वित्तत्थ-मंदुरापरिब्भट्ठवल्लहतुलंगमपज्जाउलीकिद-जणपहइभीसणो समीरणासारो ।**

[महाराज ! प्रविशत्वेनं दारुपर्वतप्रासादम्, उद्वेगकारी खल्वय-

शर्कराःसन्त्यस्य शर्करालः=शर्करावान् । वृक्षाणां=तरूणां । प्रासादानां=देवभूपतिभवनानां । निकुञ्जेषु=कुञ्जेषु । स्कन्धकाषैः=स्कन्धघर्षणैः । सधूमः=धूमान्वितः । स्कन्धघर्षणेन वह्निरुद्गमात्सधूमता वायोः । अभिनवेति । अभिनवो नूतनो यो जलदः-मेघः, तस्य य उद्गारः-गर्जनं, तद्वद्गम्भीरो धीर-श्चेत्यर्थः । चण्डारम्भः=प्रचण्डोपक्रमः । भीषणपराक्रमः । भीमवेगः । समीरः=मरुत् । परिदिशं=प्रतिदिशम् । सर्वासु दिक्षु । वहति=प्रवहति । प्रचलति । अतः सम्भ्रमेण=भयेन । किं=किं प्रयोजनम् । न किमपीत्यर्थः । स्रग्धरा वृत्तम् ॥ १९ ॥

दारुपर्वतप्रासादम्=क्रीडापर्वतस्थप्रासादम् ।'दारुपर्वतनामकं प्रमदवनस्थं हर्म्यमिति वा । उद्वेगकारी=क्लेशदः । उत्थितः=प्रचलितः । 'उत्थिते'ति रजः-

दण्ड की तरह लम्बा होरहा है, **रास्तों में**—झङ्कार करता हुआ, व बालू तथा छोटी २ कङ्कडियों से भरा हुआ है, **प्रासादों के (महलों) बगीचों मे**—वृक्षों की शाखाओं के सङ्घर्ष से (उत्पन्न अग्नि) के कारण धूमसे व्याप्त हो रहा है तथा जो नवीन जलधर की तरह गर्ज रहा है, ऐसा यह भयङ्कर वायु (आन्धी) सब चीजों को तोडता-फोडता चारों ओर से बढता हुआ इधर ही आरहा है । हे भीरु ! तुम डरो मत । डरकी कोई बात नही है ॥ १९ ॥

सखी—महाराज दारुपर्वत नामक महल में पधारें ! क्योंकि—कठोर धूलि से आंखो को अन्धा करता हुआ, तथा बड़े २ वृक्षों के उखड कर गिरने से

१ 'महाराओ' (महाराजः) । २ 'आरोहीअदु' [आरोहतु] ।

३ 'उद्धूअपांसुपसरकलुसी' (उद्धूतपांसुप्रसरकलुषी) । ४ 'तुलङ्गमो' (तुरङ्गमः)।

५ केचित्तु 'प्रासादानां निकुञ्जेष्वभिनवजलदोद्गारगम्भीरधीर' इत्येवमेवाऽन्वय-मिच्छन्ति ।

मुत्थितपरुषरजःकलुषीकृतनयनः, विदलिततरुवरशब्दवित्रस्तमन्दुरापरिभ्रष्टवल्लभतुरङ्गमपर्याकुलीकृतजनपद्धतिर्भीषणः समीरणाऽऽसारः]।

राजा—(सहर्षम्) उपकारि खल्विदं वात्याचक्रं सुयोधनस्य, यस्य प्रसादादयत्नपरित्यक्तनियमया देव्या सम्पादितोऽस्मन्मनोरथः। कथमिति ?।

कणविशेषणं समस्तं क्वचित्पठ्यते। उत्थितपरुषरजःकलुषीकृतनयनः=उद्भूतस्थूलकठोररजःकणदूषितलोचनः। विदलितानाम्–उन्मूलितानां तरुवराणां यः शब्दस्तेन वित्रस्तोऽत एव मन्दुरायाः=[illegible]याः,परिभ्रष्टः–निस्सृतः, पलायितः, वल्लभः=श्रेष्ठः–तुरङ्गमो येन तेन तथाभूतेन, पर्याकुलीकृता जनानां पद्धतिर्येनाऽसौ तथाभूतः।'वल्लभो दयितेऽध्यक्षे सल्लक्षणतुरङ्गमे' इति मेदिनी। भीषणः–भयङ्करः । समीरणासारः=झञ्झावातप्रवाहः । वात्याचक्रम्। समीरण आसार इव समीरणासार इति विग्रहः। वात्याचक्रं=[illegible]समीरणासारः। यस्य=वात्याचक्रस्य। अयत्नेन–अनायासेन, स्वयमेव, परित्यक्तो नियमो यया सा तया–अयत्नपरित्यक्तनियमया=अनायासविमुक्तब्रह्मचर्यनियमया। सम्पादितः=सम्पादितप्रायः। साधितः। अस्मन्मनोरथः=आलिङ्गनपरिरम्भणादिरूपोऽभिलाषः। कथमिति=कथङ्कारमस्य वायोः प्रसादाद्देव्या मनोरथः

घुडशाल के खुलकर श्रेष्ठ घोड़े व बछेरों (घोड़ों के बच्चों) के इधर उधर दौडने से राजमार्ग [सडक] में चलना जिसने बन्द कर दिया है ऐसी यह भयङ्कर आन्धी [काली पीली आन्धी व भभूलिया) उठकर इधर ही आरही है। भागिए भागिए !।

राजा—(हर्ष के साथ) इस वात्याचक्र ('आन्धी' व 'भंभूलिया') ने मेरा बड़ा उपकार किया है। इसकी कृपा से विना प्रयत्न के ही महारानी ने मेरे मनोरथ [आनन्द विहार की इच्छा] को परिपूर्ण कर दिया है। क्योंकि—

---

१ 'उत्थितः'। २ 'तुरङ्गमः'।

३ क्वचिन्न।

न्यस्ता न भ्रुकुटिर्न बाष्पसलिलैराच्छादिते लोचने
नीतं नाननमन्यतः सशपथं नाहं स्पृशन् वारितः ।
तन्व्या मग्न[1]पयोधरं भयवशादारब्धं[2]मालिङ्गितुं
भङ्क्ताऽस्या नियमस्य भीषणमरुन्नायं वयस्यो[3] नु मे ? ॥२०॥

साधित इति प्रश्ने उत्तरमाह—**न्यस्तेति** । **भ्रुकुटिः**=भ्रूभङ्गः । **न न्यस्ता**=न रचिता । न कृता । क्रोधेन भ्रूभङ्गो न विहित इत्यर्थः । **बाष्पसलिलैः**=अश्रुजलैः । लोचनजलैः । **लोचने**=नेत्रे । **नाच्छादिते**=नावृते । न च्छन्ने । **अन्यतः**=अन्यस्यां दिशि । **आननं**=मुखम् । **न नीतं**=न कृतम् । **स्पृशन्**=संस्पृशन् । **अहं**=नायकः । **सशपथं**=शपथपूर्वकम् । **न वारितः**=न निवारितः। 'यदि मां स्पृशसि तर्हि मम प्राणानां ते शपथ' इत्यादिभिर्वाक्यैः सनिर्बन्धं नाहं निवारित इत्यर्थः । किन्तु—**भयवशात्**=भीतिवशात् । **तन्व्या**=सरलाङ्गयष्ट्या प्रियया भानुमत्या । मग्नौ पयोधरौ यस्मिन् कर्मणि तद्यथा स्यात्तथा—**मग्नपयोधरं**=निमग्नकुचम् । सम्बद्धघनस्तनम् । **आलिङ्गितुं**=समालिङ्गितुम् । **आरब्धं**=प्रारब्धम् । पाठान्तरे—**आलिङ्गितम्**=आलिङ्गनम् । **आबद्धं**=कृतम् । इत्थम्—**अस्याः**=प्रियायाः, **नियमस्य**=व्रतस्य । **भङ्क्ता**=भञ्जकः । **अयं भीषणमरुत्**=अयं समीरणासारः । नु इति वितर्के । **न मे वयस्यः**=न मे सुहृत् ? । किन्तु मित्रमेव । कृतोपकारत्वात् । शार्दूलविक्रीडितम् ॥ २० ॥

न तो इसने क्रोध से भ्रुकुटी चढ़ाई, न आसुओं से आखें ही भरी, न मुख को दूसरी ओर हटाया, न आलिङ्गन करते हुए मुझको हाथ जोडकर, गिड गिडा कर, सौगन्ध शपथ देकर वैसा करने से मना किया, किन्तु इसने डर के मारे बडे जोर से स्वयं ही अपनी छाती से मुझे गाढ आलिङ्गन कर लिया । इस प्रकार भानुमती के ब्रह्मचर्य के नियम को तोडने वाला यह भीषण वायु क्या मेरा मित्र नहीं हुआ ? । अवश्य हुआ ॥ २० ॥

१ 'लग्नपयोधरं' ।   २ 'दाबद्धमालिङ्गितम् ' ।
३ 'वयस्यो मम' ।

ततः सम्पूर्णमनोरथस्य मे कामचारः सम्प्रति विहारेषु, तदितो दारुपर्वतप्रासादमेव गच्छामः।

[सर्वे वात्याबाधां रूपयन्तो यत्नतः परिक्रामन्ति]।

राजा—कुरु घनोरु ! पदानि शनैः शनै-
रयि ! विमुञ्च गतिं परिवेपिनीम्।
सुतनु ! बाहुलतोपनिबन्धनं
मम निपीडय गाढमुरःस्थलम् ॥ २१ ॥

तत्=तस्मात्। प्रियाया नियमस्य भग्नत्वात्। सम्पूर्णमनोरथस्य=सफलाभिलाषस्य। कामचारः=स्वेच्छा। स्वेच्छाचारः। विहारेषु=सुरतक्रीडासु। रूपयन्तः=नाटयन्तः। यत्नतः=यथाकथंचित्। परिक्रामन्ति=प्रचलन्ति।

अयीति। घनोरु=हे पीवरोरु। निबिडतरजघनस्थले!। शनैः शनैः पदानि=पादविन्यासं। कुरु=विधेहि। अयि=अयि प्रिये। परिवेपिनीं=कम्पवतीम्। कम्पिताम्। गतिं=गमनम्। विमुञ्च=परित्यज। सुतनु=हे सुन्दरि। तन्वि ! मम-उरःस्थलं=वक्षःस्थलम्। बाहुलतयोपनिबन्धनं यत्र तद्बाहुलतोपनिबन्धनं=भुजलतोपनिगूढं यथा स्यात्तथा। गाढं=दृढम्। निपीडय=आलिङ्ग। परिष्वजस्व। द्रुतविलम्बितं वृत्तम् ॥ २१ ॥

अब तो मनोरथ पूर्ण होगया। और अब मेरी जैसी इच्छा हो आनन्दविहार (क्रीडा) कर सकता हूँ। अतः दारुपर्वतप्रासाद में ही चलें।

[सभी आन्धी से कष्ट पाते हुए आखों को मलते हुए किसी तरह दारुपर्वत महल की ओर जाते हैं]।

राजा—हे घनोरु (जिसकी दोनों जाघें परस्पर में मिल गई हैं) धीरे २ चलो, अयि प्रिये! डर के मारे क्यों लडखडाती हो ?। इस कम्पित गति को छोड दो। हे सुन्दरि ! अपनी भुजलताओं से जोर से मेरे उरःस्थल (छाती) को पीडन करो। अर्थात् मेरी छाती से चिपट जाओ ॥ २१ ॥

१ क्वचिन्न। २ 'लतोपरिबन्धनं'।

[प्रवेशं रूपयित्वा] । प्रिये ! अलब्धावकाशः समीरणः संवृतत्वोद्गर्भगृहस्य, विश्रब्धमुन्मीलय चक्षुरुन्मृष्टरेणुनिकरम् ।

भानुमती—[सहर्षम्] दिट्ठिआ उप्पादसमीरणासारो ण बाधेइ ।

[दिष्ट्या उत्पातसमीरणाऽऽसारो न बाधते] ।

सखी—महाराअ ! आरोहणसम्भमणिस्सहं पिअसहीए ऊरुजुअलं, ता कीस दाणीं महाराओ आसणवेदीं ण अणुभूसेदि ? ।

[महाराज ! आरोहणसम्भ्रमनिःसहं प्रियसख्या ऊरुयुगलं, तत् कस्मादिदानीं महाराज आसनवेदीं नानुभूषयति ?] ।

प्रवेशं=प्रासादप्रवेशम् । रूपयित्वा=नाटयित्वा । अलब्धावकाशः= अलब्धप्रवेशः । संवृतत्वात्=भित्तिकपाटादिना गूढतरत्वात् । 'स्तिमितत्वा'दिति पाठेऽपि स एवार्थः । विश्रब्धं=निर्भयम् । सविश्वासम् । क्रियाविशेषणमेतत् । उन्मृष्टो=दूरीकृतो रेणुनिकरो धूलिसमूहो यस्मात्तथाभूतं चक्षुः-नेत्रम् । [उन्मृष्टः-प्रोञ्छितः]. । उन्मीलय=उद्घाटय ।

दिष्ट्या=इति हर्षे । सौभाग्येन । आरोहणे-प्रासादारोहणे यः सम्भ्रमः= वेगः, आदरो वा तेन निःसहं-निश्चलम् । ऊरुयुगलं=सक्थिद्वन्द्वम् ।

[दारुपर्वत महल में प्रवेश कर]

हे प्रिये ! यहाँ यह कमरा या महल चारों ओर से बन्द है, इसमें अब आन्धी का प्रवेश असम्भव है, अतः निर्भय हो धूल को पोंछ कर आँखें खोलो ।

भानुमती—(हर्ष से) यहाँ उत्पात वायु [आन्धी) की बाधा नहीं है यह बडे हर्ष व सौभाग्य की बात है ।

सखी—महाराज ! सीढियों पर चढने से मेरी सखी (भानुमती) की

---

१ 'समीरणासारः' ।　　२ 'स्तिमितत्वात्' ।

३ 'समीरणो' ।　　४ क्वचिन्न ।

राजा—[देवीमवलोक्य] । भवति[1] ! अनल्पमेवाऽपकृतं वात्या-सम्भ्रमेण । तथा हि—

रेणुर्बाधां विधत्ते तनुरपि महतीं नेत्रयोरायतत्वा-
दुत्कम्पोऽल्पोऽपि पीनस्तनभरितमुरः क्षिप्तहारं दुनोति[2] ।
ऊर्वोर्मन्देऽपि याते पृथुजघनभराद्वेपथुर्वर्द्धतेऽस्या
वात्या खेदं मृगाक्ष्याः[3] सुचिरमवयवैर्दत्तहस्ता करोति[4] ॥२२॥

आसनवेदीं=शिलातलम् । वेत्रासनम् । शय्यां वा । अनुभूषयति=अलङ्करोति । अनल्पं=विपुलम् ।

रेणुरिति । नेत्रयोः=लोचनयोः । आयतत्वात्=विस्तृतत्वात् । दैर्घ्यात् । तनुः= स्वल्पोऽपि । रेणुः=वात्योत्थिता धूलिः । महतीं=विपुलाम् । बाधां=पीडाम् । विधत्ते=करोति । किञ्च—अल्पोऽपि=स्वल्पोऽपि । उत्कम्पः=प्रकम्पः । पीन-स्तनभरितं=सुपुष्टपीवरकुचमण्डलभृतम् । क्षिप्तहारं=निक्षिप्तहारम् । चञ्चल-हारमिति वा । क्रियाविशेषणं वा । उरः=वक्षःस्थलम् । दुनोति=पीडयति । पाठान्तरे—तनोति=विधत्ते । मन्देऽपि=अल्पेऽपि स्तोकेऽपि । याते=गमने । अस्याः=प्रियाया भानुमत्याः । पृथुनो जघनस्य यो भरस्तस्मात्—पृथुजघन-भरात्=सुवृत्तपीनजघनस्थलभारात् । उर्वोः=सक्थ्नोः । वेपथुः=कम्पः । वर्द्धते=समेधते । अतो हेतोः—मृगाक्ष्याः=हरिणलोचनायाः । अवयवैः=

दोनों जाँघ थककर अकड गई हैं, (अतः) यह अब आगे चलने में असमर्थ है । अतः महाराज इस चबूतरे पर क्यों नहीं विराज जाते हैं ? ।

राजा—(महारानी की ओर देखकर सखी से) श्रीमतीजी ! इस आन्धी ने तो आप की सखी को बडा कष्ट दिया । क्योंकि—

नेत्रों के लम्बे होने के कारण थोडी भी धूल आँखों में बहुत कष्ट पहुँचा रही है, आन्धी के कारण हुआ थोडा सा भी शरीर का कम्पन (कँपकँपी) बडे २ स्थूल स्तनोंसे भरे हुए—हार से विभूषित—इसके वक्षःस्थल को पीडा देता है, थोडा

१ 'भवतु' । २ 'तनोति' । ३ 'कृशाङ्ग्याः' । ४ 'सुचिरमवयवैरित्थमाविष्करोति' ।

[सर्वे उपविशन्ति] ।

राजा-तत्किमित्यनास्तीर्णं कठिनेशिलातलमध्यास्ते देवी ? ।

यतः—

लोलांशुकस्य पवनाकुलितांऽशुकान्तं
त्वद्दृष्टिहारि मम लोचनबान्धवस्य ।
अध्यासितुं तव चिरं जघनस्थलस्य
पर्य्याप्तमेव करभोरु ! ममोरुयुग्मम् ॥ २३ ॥

नयनादिभिः शरीरावयवैः । दत्तहस्ता=दत्तसाहाय्या । वितीर्णहस्तालम्बना । वात्या=उत्पातमरुत् । वातसङ्घातः । सुचिरं=सुदीर्घम् । नितराम् । बहुकालम् । खेदं=पीडाम् । क्लेशम् । आयासम् । करोति=विधत्ते । वात्या, स्वाङ्गानि चैनां पीडयन्तीत्यर्थः । स्रग्धरा वृत्तम् ॥ २२ ॥

तत्=तस्मात् । पीडितत्वात् । अनास्तीर्णम्=अनावृतम् ।

कठिनेति । परुषशिलाफलकमित्यर्थः ।

लोलेति । करभस्येव ऊरू यस्याः सा तत्सम्बुद्धौ करभोरु=हे सुवृत्तपीवरोरु ।

भी चलने से ऊरुओं में—स्थूल जघन के भार से कँपकँपी बढने लगती हैं, इस प्रकार इसके अपने ही अङ्गोंके द्वारा सहायता दी गयी यह आन्धी इसको अत्यन्त कष्ट दे रही है । अर्थात् इसके नेत्र आदि अङ्ग तथा उत्पात वायु—दोनों ही इसे पीडा दे रहे हैं ॥ २२ ॥

[सब शिलाखण्ड पर बैठ जाते हैं] ।

राजा-हे देवि ! आप विना बिछाये हुए कठिन शिलातल पर आप क्यों बैठी हैं ? । क्योंकि—

हे करभोरु ! हवा से जिस (जघनस्थल) का वस्त्र चञ्चल हो रहा है, तथा जो मेरे नेत्रोंको आनन्द देने वाला है ऐसे तेरे इस जघनस्थल के लिए तो मेरा यह ऊरुयुगल- जिसका वस्त्र भी हवासे हट रहा है,तथा जो तुम्हारे नेत्रोंको आनन्द देने

१ 'कठिन' ।

[प्रविश्य पटाक्षेपेण सम्भ्रान्तः–]

कञ्चुकी—देव ! भग्नं भग्नम् ।

[सर्वे साकूतं पश्यन्ति] ।

राजा—केन ? ।

'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः। लोलांशुकस्य=चञ्चलवस्त्रस्य। पवनान्दोलितवसनस्य। मम लोचनबान्धवस्य=मन्नेत्रमित्रस्य। मन्नेत्रहर्षदस्य। तव=भवत्याः। जघनस्थलस्य=कटिप्राग्भागस्य। 'पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः' इत्यमरः। चिरं=सुचिरम्। अध्यासितुं=उपवेशनाय। जघनस्थलस्याऽश्रयणायेत्यर्थः।

पवनाकुलितांशुकान्तं=वाताकुलितवसनान्तम्। त्वद्दृष्टिहारि=त्वल्लोचनप्रियम्। त्वद्वल्लभम्। ममोरुयुग्ममेव=मदीयं सक्थियुग्ममेव। पर्याप्तम्=समर्थम्। समुचितम्। तदन्यत्रोपवेशनं भवत्या नोचितम्। इतो यथेच्छविहार प्रारम्भः। वसन्ततिलकं वृत्तम्। इह 'लोले'त्यादि 'भग्नमित्यन्तेन छलसन्धिरुक्तः। 'इष्टार्थयुक्तं यद्वाक्यं भाषतेऽर्थमभीप्सितम्। वाक्यान्तरेण संयोगाच्छलोऽयमभिधीयते' इति भरतः। अत्रहि 'ममोरुयुग्म'मित्यस्य 'भग्न'मित्यनेन सहसोक्तेन सम्बन्धाच्छलः ॥ २३ ॥

साकूतं=साभिप्रायम्। किं भग्नमित्यर्थजिज्ञासयेति भावः। सातङ्कमितिपाठे सभयमित्यर्थः।

वाला है—वही समुचित बैठने का स्थान है। अर्थात् तुम मेरी गोद में ही बैठो। [करभोरू—हाथ की हथेली के नीचे का पहुँचे से लेकर छोटी अँगुली तक का लम्बा भाग 'करभ' कहलाता है। (गोल ऊरुवाली). करभोरू कहलाती है] ॥२३॥

[पर्दा हटाकर घबडाया हुआ कञ्चुकी प्रवेश करता है] ।

कञ्चुकी—महाराज ! तोड़ दिया ! तोड़ दिया ! [यहां कविने 'ऊरुयुग्मं' का देव ! भग्नं' इस प्रकार पूर्व श्लोक के साथ ही कञ्चुकी के वाक्य का सम्बन्ध करके भावी अमङ्गल की सूचना दी है] ॥

(सब लोग भयपूर्वक उसके मुखकी ओर देखते हैं) ।

राजा—किसने (तोड दिया) ? ।

१ 'सातङ्कम्' । २ 'किं नाम' ।

कञ्चुकी—देव ! भीमेन ।

राजा—कस्य ? ।

कञ्चुकी—भवतः ।

राजा—आः ! किं प्रलपसि ? ।

भानुमती—अज्ज ! किं अणत्थं मन्तेसि ? ।

[आर्य ! किमनर्थं मन्त्रयसि ?] ।

राजा—धिक्प्रलापिन् ! वृद्धापसद ! कोऽयमद्य ते व्यामोहः? ।

कञ्चुकी—देव ! न कश्चिद्व्यामोहः । सत्यमेव ब्रवीमि—

भग्नं भीमेन भवतो मरुता रथकेतनम् ।

किं नाम=किंस्वित् । नाम प्राकाश्ये । किं तत् ? शीघ्रं प्रकाशयेत्यर्थः । नामेति क्वचिन्न । भीमेन=भयङ्करेण, भीमसेनेन च । प्रलपसि=असम्बद्धं वदसि । अनिष्टम्=अमङ्गलम् । मन्त्रयसि=कथयसि । वृद्धापसद=नीचवृद्ध । व्यामोहः= चित्तविक्षेपः । देव=राजन् । 'ब्रवीमी'त्यस्य अग्रिमेण श्लोकेनाऽन्वयः ।

भग्नमिति । भीमेन=भीषणेन, भीमसेनेन च । मरुता=वायुना, वायु-पुत्रेण च । 'आत्मा वै जायते पुत्र'इत्युक्तेः । भवतो रथकेतनं=रथचिह्नम् । रथध्वजः । भग्नं=मर्दितं सत् । किङ्किणीकाणेन=क्षुद्रघण्टिकाशब्देन, बद्धः

कञ्चुकी—महाराज ! भीम नें । [**भीम**-भयङ्कर व भीमसेन] ।

राजा—अरे क्या अण्ट-सण्ट बकता है ? ।

भानुमती—आर्य ! क्या अमङ्गल वाणी बोलते हो ।

राजा—अरे बकवादी ! बुड्ढे ! नीच ! तेरे को यह क्या पागलपन सवार हो गया है ? ।

कञ्चुकी—महाराज ! मेरे को कुछ भी व्यामोह (विक्षेप, पागलपन) नहीं हुआ है । सच कहता हूँ कि—

आपके रथ के चिह्न (ध्वजा) को भयङ्कर वायु नें तोड़ दिया है, जो उसमें

१ क्वचिन्न । २ 'किं अनत्थं' ['किमनार्थं'] ।

३ राजेत्यारभ्य ब्रवीमीत्यन्तस्य स्थाने—'कञ्चुकी—(सभयं) देव कथयामि सर्वम् । भग्नं भीमेने'त्येवं पाठः क्वचित् ।

पतितं किङ्किणीक्वाण[1]बद्धाक्रन्दमिव क्षितौ ॥ २४ ॥

राजा—यदि बलवत्समीरणवेगात्कम्पिते भुवने भग्नः स्यन्दनकेतुस्तत्किमित्युद्धतं प्रलपसि-'भग्नं भग्न'मिति ?।

कञ्चुकी—देव ! न किञ्चित्, किन्तु[2] 'शमनार्थमस्याऽनिमित्तस्य विज्ञापयितव्यो देव' इति स्वामिभक्तिर्मां मुखरयति ।

भानुमती—अज्जउत्त ! पडिहरीअदु[3] एदम् अणिमित्तं प्पसण्णबह्मणवेआणुघोसेण[4], होमेण अ ।

आक्रन्दो येन तत्तथाभूतं किङ्किणीक्वाणबद्धाक्रन्दमिव=क्षुद्रघण्टिकापटलध्वनिकृतारावमिव । शब्दायमानम् । भूमौ=पृथिव्याम् । पतितं=निपतितम् ॥२४॥

कञ्चुकीवाक्येषु भीमपदस्याऽस्पष्टार्थतया भानुमत्याः शङ्का मा भूदिति कञ्चुकिनं भर्त्सयन्स्पष्टमाह—बलवदिति । प्रबलवातवेगाद्भुवने-सकले लोके-कम्पिते सति-यदि मम स्यन्दनकेतुः=रथचिह्नं-भग्नं तर्हि किममनर्थमद्भुतं च जातं, यदेवं प्रलपसीत्यर्थः ।

न किञ्चित्=न किञ्चिदपूर्वं । जातं=निष्पन्नम् । अस्य—केतुभङ्गात्मकस्य, अनिमित्तस्य=दुःशकुनस्य, शमनार्थं=शान्तये । विज्ञापयितव्यः=सूचनीयः । इति=इत्येवम् । मुखरयति=वाचालयति । अन्तर्यतां=निरस्यताम् । प्रसन्नेति ।

बन्धे हुए घुँघुरुओं शब्द के बहाने (व्याज से) भूमि पर पड़ा रो रहा है ॥२४॥

राजा—इस प्रबल वायु के झोके से जब संसार में ही हाहाकार मच गया था तो एक रथ की मामूली ध्वजा यदि टूटही गई तो इससे क्या हो गया जो इस तरह तुम जोर जोर से 'तोड़ दिया' 'तोड़ दिया' चिल्लाते हुए यहाँ आए हो ?।

कञ्चुकी—देव ! हुआ कुछ नहीं, परन्तु इस अपशकुन की शान्ति के लिए मालिक से कह देना मैंने स्वामिभक्ति के कारण उचित समझा ।

भानुमती—महाराज ! इस अमङ्गल की शान्ति प्रसन्न हुए ब्राह्मणों के आशीर्वाद से व वेद की ध्वनि से तथा हवन से करानी चाहिए ।

१ 'क्वाणा' । 'जालबद्धा' ।

२ कश्चिन्न । ३ 'अन्तरीयदु' । ४ 'वेअघोसेण' ।

[आर्य्यपुत्र ! परिहार्य्यतामेतदनिमित्तं प्रसन्नब्राह्मणवेदानुघोषण, होमेन च]।

राजा—[सावज्ञम्] **ननु! गच्छ, पुरोहितसुमित्राय निवेदय।**

कञ्चुकी—**यदाज्ञापयति देवः।** [इति निष्क्रान्तः]।

[प्रविश्य प्रतीहारी सोद्वेगमुपसृत्य]। **जअदु जअदु महाराओ। महाराअ! एसा क्खु जामादुणो सिन्धुराअस्स मादा दुस्सला अ पडिहारभूमीए चिट्ठदि।**

[जयतु जयतु महाराजः। महाराज ! एषा खलु जामातुः सिन्धुराजस्य माता, दुःशला च प्रतीहारभूमौ तिष्ठतः]।

राजा—[किञ्चिद्विचिन्त्य[1] स्वगतम्[2]]। **किं 'जयद्रथमाता दुःशला चे'ति!। कच्चिदभिमन्युवधामर्षितैः[3] पाण्डुपुत्रैर्न किञ्चि-**

दक्षिणादानप्रसन्नेत्यर्थः। स्वस्तिपुण्याहवाचनं कारयेति यावत्। **महादेवी**=राजमाता। **सिन्धुराजः**=जयद्रथः। दुर्योधनभगिनीपतिः। **दुःशला**-दुर्योधन-भगिनी। **प्रतीहारभूमौ**=द्वारदेशे। **किं**=किमित्थमुक्तम्। **अभिमन्युवधामर्षितैः**=अभिमन्युवधक्रुद्धैः। 'कच्चि'दिति कामप्रवेदने। ~~अत्याहितम्=अनर्थः~~। महाभयप्रदम्। जीवानपेक्षि कर्म च।'अत्याहितं महाभीतिः कर्म जीवानपेक्षि च'

राजा—[तिरस्कार पूर्वक] जा ! इसकी सूचना पुरोहित सुमित्र को देदे।

कञ्चुकी—जैसी महाराज की आज्ञा। (जाता है)।

प्रतीहारी—(प्रवेश कर घबडाती हुई, पासमें आकर) महाराज की जय हो जय हो। [**प्रतिहारी**-एक स्त्री जो अन्तःपुरके दर्वाजे पर पहरा देती है]। महाराज ! जमाई सिन्धुराज जयद्रथ की यह माता तथा दुःशलाजी [दुर्योधन की बहिन व जयद्रथ की स्त्री] दर्वाजे पर खडी है।

राजा—(कुछ विचार कर, मनही मन) हैं ? क्या कहा—'जयद्रथ की माता

---

१ कच्चिन्न। २ 'आत्मगतम्'। ३ 'कच्चिद'।

दत्याहितमाचेष्टितं भवेत् ? । [प्रकाशम्] गच्छ, प्रवेशय शीघ्रम् ।

प्रतिहारी—जं महाराओ आणवेदि ।

[यन्महाराज आज्ञापयति] ।

[इति निष्क्रान्ता] ।

[ततः प्रविशति सम्भ्रान्ता जयद्रथमाता दुःशला च] ।

[उभे-सास्रं दुर्य्योधनस्य पादयोः पततः] ।

माता —पडित्ताअदु पडित्ताअदु कुलुणाहो ।

[परित्रायतां परित्रायतां कुरुनाथः] ।

[दुःशला—रोदिति] ।

राजा-[ससम्भ्रममुत्थाप्य]। अम्ब ! समाश्वसिहि समाश्वसिहि। किमत्याहितम् ? । अपि कुशलं समराङ्गणेष्वप्रतिरथस्य जयद्रथस्य ? ।

'इत्यमरः । आचेष्टितं=कृतं । कर्त्तुमारब्धम् । विचारितं वा । कुरुनाथः=कुरुवंशनाथो दुर्योधनः । परित्रायतां=रक्षतु । अम्ब=मातः । समाश्वसिहि=धैर्यं

व दुःशला आई है' ? । क्या अभिमन्यु के मारे जाने से क्रुद्ध हो पाण्डवों ने कुछ अनर्थ व गड़बड़ तो नहीं की है ? । (प्रकट में) जा उन्हें शीघ्र ले आ ।

प्रतीहारी—जो महाराज की आज्ञा । (जाती है) ।

[जयद्रथ की माता व पत्नी दुःशला का प्रवेश] ।

[दोनों रोती हुई दुर्योधन के पैरों पर गिरती हैं] ।

माता—कुरुनाथ ! रक्षा करिए, रक्षा करिए ।

[दुर्योधन की बहिन दुःशला रोती है] ।

राजा—[हड़बड़ाकर उन्हें उठाकर जयद्रथ की माता से] ।

माताजी—! घबड़ावें नहीं ! क्या बात है ? कुछ गड़बड़ तो नहीं है ? युद्धमें जिसका जोड़ा दूसरा नहीं हैं ऐसा आपका पुत्र जयद्रथ तो कुशलसे हैं न ? ।

१ 'कच्चिन्न' । २ 'देवो' । ३ 'कुमालो' (कुमारः) । ४ 'उत्थाय' ।

माता—जाद ! कुदो कुसलम् ? ।

[जात ! कुतः कुशलम्] ।

राजा—कथमिव ? ।

माता—[साशङ्कम्] । अज्ज क्खु पुत्तवहामरिसुद्दीविदेण गण्डीविणा अणत्थमिदे दिवहणाह तस्स वहो पडिण्णादो ।

[अद्य खलु पुत्रवधामर्षोद्दीपितेन गाण्डीविना अनस्तमिते दिवसनाथे तस्य वधः प्रतिज्ञातः] ।

राजा—[सस्मितम्]। इदं तदस्रकारणमम्बाया दुःशलायाश्च ! । पुत्रशोकादुत्तप्तस्य किरीटिनः प्रलपितैरेवमवस्था ! । अहो ! मुग्धत्वमबलानाम् । अम्ब! कृतं विषादेन । वत्से दुःशले ! अलमश्रुपातेन । कुतश्चायमस्य धनञ्जयस्य प्रभावो दुर्य्योधन-

धारय । अपीति प्रश्ने । समराङ्गणेषु=युद्धचत्वरेषु । समरभूमिषु । 'अङ्गणं चत्वराजिरे' इत्यमरः । [illegible]=प्रतिद्वन्द्विशून्यस्य । एकवीरस्य । अद्वितीयवीरस्य । जात=पुत्र । कथमिव=कुतः। किङ्कारणम् । अमर्षोद्दीपितेन= क्रोधप्रज्वलितेन । गाण्डीविना=अर्जुनेन । अनस्तमिते=अनस्तङ्गते एव । दिवसनाथे=दिनकरे । तस्य=जयद्रथस्य ।

इदं तत्=इदमेव । अस्रकारणम्=अश्रुकारणम् । उत्तप्तस्य=नितरां सन्तप्तस्य । प्रलपितैः=निरर्थकैर्वचनैः । 'प्रलापोऽनर्थकं वचः' इत्यमरः । कृतम्=

माता—पुत्र ! कुशल कहाँ ? ।

राजा—क्यों क्या हुआ ? ।

माता—[डरती हुई] अपने पुत्र अभिमन्यु के मारे जाने से क्रुद्ध हो अर्जुन ने आज यह प्रतिज्ञा की है कि सन्ध्या होते २ जयद्रथ को अवश्य मारूंगा ।

राजा—(हँस कर) बस ! क्या यही आपके तथा दुःशला के रोनेका कारण है ? । पुत्र शोक से दुःखी व पागल हुए अर्जुन के प्रलाप वाक्यों से आप लोंगो की

१ 'कुतोऽत्र' । २ 'अम्ब ! किंजातम्' । ३ 'मरिसिदेण' । ४ 'मर्षितेन' । ५ 'तदश्रु' । ६ 'दुन्मत्तस्य' । ७ 'प्रलापैः' । ८ क्वचिन्न । ९ 'तस्य' ।

बाहुपरिघरक्षितस्य महारथजयद्रथस्य विपत्तिमुत्पादयितुम् ! ।

माता--जाद[1] जाद ! दे हि[2] पुत्तबन्धुवहामरिसुद्दीविदकोवाणला अणपेक्खिदसरीरा वीरा परिक्कामति ।

[जात ! ते हि पुत्र बन्धुवधामर्षोद्दीपितकोपानला अनपेक्षितशरीरा वीराः परिक्रामन्ति] ।

राजा--[सोपहासम्] । एवमेतत्, सर्वजनप्रसिद्धमेवा[3]ऽमर्षित्वं पाण्डवानाम् । पश्य—

अलम् । वत्से=भगिनि!। धनञ्जयस्य=अर्जुनस्य । दुर्योधनस्य बाहू एव परिघौ अर्गलौ, ताभ्यां रक्षितस्य=त्रातस्य । महारथेति । 'एको दशसहस्राणि यो योधयति धन्विनाम् । शस्त्रशास्त्रप्रवीणश्च स विज्ञेयो महारथः' इति लक्षणान्वितस्य स्वयं महावीरस्येत्यर्थः । विपत्तिं=विपदम् । उत्पादयितुं=कर्त्तुम् । विधातुम् । ते हि=पाण्डवा हि । अभिमन्युर्हि अर्जुनस्य पुत्रः, अन्येषां च बन्धुरिति विवेकः ।

परिक्रामन्ति=सञ्चरन्ति । अमर्षित्वं=क्रोधशालिता । एवमेतत्=सत्यमेतदिति सोपहासं वचः ।

यह दशा ! ! । अहो ! स्त्रियाँ सचमुच भोली होती हैं । माताजी ! आप चिन्ता व विषाद न करें । बहिन दुःशला ! रो मत । अर्जुन की इतनी शक्ति कहाँ जो दुर्योधन की भुजारूपी परिघों (ब्योडा मोटा डण्डा) से रक्षित महारथी महाराज जयद्रथ को विपत्ति में डाल सके (मार सके) ? ।

माता—पुत्र ! पुत्र शोक से जिनका कोपालन उद्दीप्त हो गया है ऐसे वे पाण्डव वीर अपनी जानपर खेल कर युद्ध में विचार रहे हैं (लड रहे हैं) ।

राजा—(हंस कर) पाण्डव जैसे क्रोधी हैं यह तो सब लोग जानते हैं । देखो--

---

१ कचिन्न । २ 'जाद यदो अ बन्धु' । [जात ! यतश्च बन्धु] ।

३ सिद्धैवाऽमर्षिता' ।

हस्ताकृष्टविलोलकेशवसना दुःशासनेनाज्ञया
पाञ्चाली मम राजचक्रसमितौ गौर्गौरिति व्याहृता ।
तस्मिन्नेव स किन्तु गाण्डिवधरो नासीत्पृथानन्दनो
यूनः क्षत्रियवंशजस्य कृतिनः क्रोधास्पदं किं न तत् ? २५

हस्तेति । मम=दुर्योधनस्य । आज्ञया=आदेशेन । दुःशासनेन=मद्भ्रात्रा–दुःशासनाख्येन । हस्ताभ्यामाकृष्टानि अतएव विलोलानि=चञ्चलानि (केशाश्च वसनं च) केशवसनानि यस्याः सा तथाभूता । पाञ्चाली=द्रौपदी । राजचक्रसमितौ–सकलराजमण्डलसभायाम् । 'सभासमितिसंसदः' इत्यमरः । गौर्गौरिति='गौरहं गौरहं संरक्ष्या भवद्भिः'इत्येवमार्त्तस्वरम् । अतिदीनवचनमेतत् । व्याहृता=उक्तवती । व्याहृतवती । कर्त्तरि क्तः । केचित्तु अन्तर्भावितण्यर्थतया मया व्याहारितेत्यर्थमाहुः । तस्मिन्नेव=तस्मिन्नेव काले । स पृथानन्दनः=कुन्ती-पुत्रो धनञ्जयः । गाण्डिवधरः=धृतगाण्डीवः । 'गाण्डीवमपि गाण्डिवम्' इति शब्दभेदकोशः । किन्तु नासीत्=किं स्विन्नासीत् ? । किन्तु आसीदेव । 'ततज्य-गाण्डिवधर'इति पाठे–तता विस्तृता ज्या मौर्वी यस्य तत् ततज्यं, ततज्यस्य गाण्डिवस्य धरः—ततज्यगाण्डिवधर इत्यर्थः । अधिज्यगाण्डीव इति यावत् । तत्=स्ववधूकेशाऽभिमर्षणम् । यूनः=तरुणस्य । क्षत्रियवंशजस्य=क्षत्रियकुलो-द्भूतस्य । कृतिनः=कुशलस्य अर्जुनस्य । क्रोधास्पदम्=अमर्षस्थानम् । किं न=किमु नासीत् ! । आसीदेव । परन्तु तेन क्रोधो न दर्शितः । शार्दूलविक्रीडितं वृत्तम् ॥ २५ ॥

✓दुःशासन नें मेरी आज्ञा से जिसके केश व वस्त्र हाथ से पकड़ कर खींच लिए हैं ऐसी द्रौपदी—राजाओं से भरी हुई सभा में ' मै तुम्हारी गौ हूँ २ ' इस प्रकार मुखमें तृण लेकर कह रही थी उस समय क्या अर्जुन के पास गाण्डीव धनुष नहीं था या युवा शूरवीर युद्धकुशल क्षत्रिय वीर के लिए वह बात अपमानजनक व क्रोधजनक नहीं थी ? । जरूर थी । परन्तु पाण्डवों में तो क्रोध है ही नहीं, न उनमें कुछ शक्तिही है ॥ २५ ॥

१ 'राजचक्रमभितो' । 'राजचक्रपुरतो' । २ 'ततज्यगाण्डिव' । 'ततज्यकार्मुक' ।

माता--असमत्तपडिण्णाभरेण आप्पवहो तेण पडिण्णादो।

[असमाप्तप्रतिज्ञाभरेणाऽऽत्मवधस्तेन प्रतिज्ञातः] ।

राजा--यद्येवमलमानन्दस्थानेऽपि ते विषादेन । ननु ! व्यक्तं वक्तव्य'मुत्सन्नः सानुजो युधिष्ठिर' इति । अन्यच्च मातः ! का शक्तिरस्ति धनञ्जयस्याऽन्यस्य वा कुरुशतपरिवारवर्द्धितमहिम्नः कृपकर्णद्रोणाश्वत्थामादिमहारथपराक्रमद्विगुणीकृतनिरावरण-विक्रमस्य नामाऽपि ग्रहीतुं ते तनयस्य ? ।

अयि सुतपराक्रमानभिज्ञे !

आनन्दस्थाने=हर्षावसरे । अर्जुनवधाद्धर्षः । व्यक्तं=स्पष्टम् । उत्सन्नः=उच्छिन्नः । विनष्टः । कुरुशतपरिवारवर्द्धितमहिम्नः=कौरवशतपरिवारप्रवृद्ध-शक्तेः । कृपकर्णाश्वत्थामादिमहारथपराक्रमद्विगुणीकृतनिरावरणविक्रमस्य=कृपादिसाहाय्यप्रवृद्धनिष्प्रतिबन्धपराक्रमस्य । निरन्तरायशक्तेः । नामापि=नामधेयमपि । गृहीतुम्=उच्चारयितुम् । का वार्त्ता शरीरस्पर्शस्येत्याशयः ।

माता—और अर्जुन ने यह भी प्रतिज्ञा की है कि 'यदि मैं आज जयद्रथ को न मार सकूंगा तो स्वयं ही जलकर मर जाऊँगा' ।

राजा—यदि ऐसी बात है तो यह बड़े हर्ष का विषय है, तब तो आप आनन्द मनाइए, विषाद क्यों करती है । क्योंकि अबतो यह कहना चाहिए कि—'युधिष्ठिर अपने भाइयों के साथ नष्टही हो गया'।और भी माताजी ! धनजय की या और किसी की भी क्या शक्ति है कि सौ १०० कौरवों से परिवृत होने के कारण जिसकी शक्ति खूब बढी हुई हैं,तथा कृपाचार्य,कर्ण,द्रोण,अश्वत्थामा आदि महारथियों की सहायता से जिसका निर्बाधपराक्रम द्विगुणित हो गया है ऐसे तुमारे जयद्रथ पुत्र की कोई नाम भी ले सकता है ? । अहो माताजी ! आप अपने पुत्र जयद्रथ की शक्ति को जानती ही नहीं है । सुनिए !

---

१ 'भरस्स आप्पणो वहो' । २ वयसिदो (व्यवसितः) ।

३ 'भरस्यात्मनो वधः' । ४ 'भरेण' । ५ कश्चिन्न । ६ 'न शक्ति' ।

धर्मात्मजं प्रति यमौ च कथैव नास्ति
मध्ये वृकोदरकिरीटभृतोर्बलेन।
एकोऽपि विस्फुरितमण्डलचापचक्रं
कः सिन्धुराजमभिषेणयितुं समर्थः ?॥ २६ ॥

भानुमती—अज्जउत्त! जइ वि एव्वं, तहवि 'गुरुकिदपडिण्णाभारो[1] धणञ्जओ' त्ति ट्ठाणं[2] क्खु सङ्काए।

[आर्यपुत्र ! यद्यप्येवं, तथाऽपि 'गुरुकृतप्रतिज्ञाभारो धनञ्जय' इति स्थानं खलु शङ्कायाः ।

माता—जादे ! साहु[3], कालोइदं तुए मंदिदं।

धर्मेति। धर्मात्मजं प्रति=युधिष्ठिरं प्रति । यमौ च=माद्रीसुतौ नकुलसहदेवौ च प्रति। तस्य युद्धस्येति शेषः। कथैव=वार्त्तैव। प्रसक्तिरेव। नास्ति=न वर्त्तते। तेषामल्पबलत्वादिति भावः। वृकोदरकिरीटभृतोर्मध्येऽपि=भीमार्जुनयोर्मध्येऽपि। एकः=एकाकी। बलेन=पराक्रमेण । विस्फुरितं मण्डलाकारं चापश्चक्रमिव चापचक्रं यस्य तं=चलन्मण्डलीकृतधनुश्चक्रं । सिन्धुराजं=जयद्रथम् । सेनयाऽभियातुम्—अभिषेणयितुम्=अभियोद्धुम्। कः समर्थः=कः शक्तः। न कोऽपीत्यर्थः। वसन्ततिलका वृत्तम् ॥ २६ ॥

गुरुः कृतः प्रतिज्ञाया भारो येनासौ गुरुकृतप्रतिज्ञाभारः=कृतदृढप्रतिज्ञाभारः। स्थानम्=आस्पदम्। अवसरः। खलु=निश्चयेन । कालोचितम्=

धर्मपुत्र युधिष्ठिर व नकुल सहदेव की तो बात ही क्या है, भीमसेन व अर्जुन इन दोनों में से भी एकाकी कोई भी तुम्हारे पुत्र के समान बली नहीं है, और युद्धमें चमकते हुए तथा तेजी से बाण चलाने के कारण गोल धनुष जिसका हो गया है ऐसे तुमारे पुत्र से उनमें से इकला कोई भी युद्ध नहीं कर सकता है ॥२६॥

भानुमती—नाथ ! ठीक है परन्तु अर्जुन ने बहुत बड़ी प्रतिज्ञा की है अतः उससे शङ्का जरूर होनी चाहिए।

१ 'भरो'। २ णिदाणं (निदानं)।
३ 'साधु कालोइदं भणिअं भाणुमईए'। [साधुकालोचितं भणितं भानुमत्या]।

[जाते ! साधु, कालोचितं त्वया मन्त्रितम्]।

राजा—आः ! ममापि नाम दुर्योधनस्य शङ्कास्थाने पाण्डवाः ! पश्य—

कोदण्डज्याकिणाङ्कैरगणितरिपुभिः कङ्कटोन्मुक्तदेहैः
श्लिष्टान्योऽन्यातपत्रैः सितकमलवनभ्रान्तिमुत्पादयद्भिः।
रेणुग्रस्तार्कभासां प्रचलदसिलतादन्तुराणां चमूना-
माक्रान्ता भ्रातृभिर्मे दिशि दिशि समरे कोटयः सम्पतन्ति ॥

अवसरोचितम्। मन्त्रितं=कथितम्। शङ्कास्थानं=शङ्कास्पदम्। शङ्काप्रदाः। कोदण्डेति। कोदण्डस्य-धनुषः ज्याया आघातेन यः किणः तेनाङ्को येषां तैः, चापमौर्व्याघातरूढव्रणाङ्कितदेहैः। न गणिता रिपवो यैस्तैः—अगणितरिपुभिः=अनाकलितशत्रुभिः। कङ्कटेन कवचेन उन्मुक्तं सहितं देहं येषान्तैः=बद्धकवचैः। सन्नद्धैः। केचित्तून्मुक्तशब्दस्य त्यक्तार्थकतां मन्यमाना-आत्मगौरवात्संनाहमप्यकुर्वाणैरित्यर्थमाहुः। 'उरश्छदः कङ्कटकोऽजगरः कवचोऽस्त्रिया'-मित्यमरः। श्लिष्टानि च तान्यन्योन्यातपत्राणि च तैः-श्लिष्टाऽन्योन्यातपत्रैः=परस्परसंश्लिष्टच्छत्रैः-करणभूतैः। सितकमलवनभ्रान्तिं=श्वेतकमलवनभ्रमम्। उत्पादयद्भिः=जनयद्भिः। मे=मम। भ्रातृभिः=अनुजैः। आक्रान्ताः=समन्विताः। रेणुभिः ग्रस्ता अर्कस्य भा याभिस्तासां-धूलिसमाच्छादितसूर्यप्रभाणाम्। प्रचलन्त्यश्च ता असिलताश्च ताभिर्दन्तुराः, तासां=प्रसर्पत्खड्गयष्टिकरालानाम्। चमूनां=सैन्यानाम्। कोटयः=सङ्ख्याप्रभेदाः। दिशिदिशि=

माता—वाह वाह ! भानुमतीने कैसी बढिया समयोचित बात कही है।

राजा—आह ! क्या मेरे लिए भी पाण्डवगण शङ्का के स्थान हो सकते हैं ?। देखो—

धनुष की डोरी की चोट के जिनके हाथों में गड्ढे ('आटण') पड़े हुए हैं, जो शत्रुओं को कुछ समझते ही नहीं, जिनके शरीर में कवच ~~पड़े हुए हैं~~, युद्धयात्रा के समय जिनके आपुस में सटे हुए सफेद छत्र श्वेत कमलों के वन की भ्रान्ति उत्पन्न करते हैं ऐसे बली मेरे

१ 'ज्याततज्यैः'। २ 'कङ्कटावद्धदेहैः'। 'कङ्कटोन्मुक्त'। ३ 'ध्वस्तार्क'। ४ 'बलानां'।

अयि[1] भानुमति ! विज्ञातपाण्डवप्रभावे[2] ! किं त्वमप्येवमाशङ्कसे[3] ? । पश्य—

दुःशासनस्य हृदयक्षतजाऽम्बुपाने
दुर्योधनस्य च यथा गदयोरुभङ्गे ।
तेजस्विनां समरमूर्द्धनि पाण्डवानां
ज्ञेया जयद्रथवधेऽपि तथा प्रतिज्ञा ॥ २८ ॥

प्रतिदिशम् । सम्पतन्ति=गच्छन्ति । 'कोटिरग्रे प्रकर्षे च सङ्ख्यापार्श्वप्रभेदयोः' इति विश्वः । स्रग्धरा वृत्तम् ॥ २७ ॥

दुःशासनस्येति । तेजस्विनां=शूराणाम् । बलिनाम् । 'अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् । प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ।' इति भरतः । 'तेजः प्रभावे दीप्तौ च स्यात्पराक्रमरेतसोः' इति मेदिनी । पाण्डवानां=भीमादीनाम् । समरमूर्धनि=युद्धप्रसङ्गे । दुशासनस्य=मद्भ्रातुः । हृदयस्य यत्क्षतजं, तदेव अम्बुजलं, तस्य यत्पानं, तस्मिन्=हृद्गतरुधिराम्बुपाने । च=किञ्च । दुर्योधनस्य=कुरुराजस्य मम । गदया=आयुधविशेषेण । ऊरुभङ्गे=सक्थिभङ्गे च । यथा=यादृशी निष्फला । वृथा । प्रतिज्ञा=संवित् । अस्ति । तथा=तथैव । जयद्रथवधेऽपि । प्रतिज्ञा=पाण्डवानां प्रतिज्ञा । ज्ञेया=विभावनीया । वसन्ततिलका वृत्तम् ॥ २८ ॥

भाइयों से समन्वित, तथा जिसकी धूलि से सूर्य की किरणें भी ढकगई हैं, तथा जो सब प्रकार के तलवार आदि शस्त्रास्त्रों से समन्वित (लैस) है, ऐसी मेरी करोड़ों सेनाएं (सैनिकगण) समराङ्गण में चारों ओर से टिड्डी दल की तरह शत्रु पर टूट पड़ती हैं ॥ २७ ॥

और भी—हे भानुमती ! पाण्डवों के पराक्रम को—जैसे वे पराक्रमी हैं—जानती हुई भी तूं ऐसी शङ्का करती है ? । देख—

युद्ध में—दुःशासन के हृदय स्थल से रुधिर के पीने की, तथा गदा से दुर्योधन के ऊरु (जांघ) को तोड़ने की जैसी उन वीर पाण्डवों की प्रतिज्ञाएं हैं वैसी ही यह जयद्रथ के मारने की प्रतिज्ञा भी है । अर्थात् जैसे वे सब प्रतिज्ञाएँ आजतक पूरी नहीं हुई वैसे ही यह प्रतिज्ञा भी कोरी बात ही बात है ॥ २८ ॥

१ 'अपि च भानु' ।　　२ 'अविज्ञात' ।　　३ 'माशंससे' ।

कः कोऽत्र भोः ! जैत्रं मे रथमुपपादय तावत्। यावदहमपि तस्य [मिथ्याप्रतिज्ञा]प्रगल्भस्य पाण्डवस्य जयद्रथपरिरक्षणेनैव मिथ्याप्रतिज्ञावैलक्ष्यसम्पादितमशस्त्रपूतं मरणमुपदिशामि।

[प्रविश्य]।

कञ्चुकी-देव !

उद्घातक्वणितविलोलहेमघण्टः प्रालम्बद्विगुणितचामरप्रहासः।
सज्जोऽयं नियमितवल्गिताकुलाश्वः शत्रूणां क्षपितमनोरथो रथस्ते।

अत्र=प्रतीहारभुवि। कः कः=कस्तिष्ठति। जैत्रं=विजयि। जयशीलम्। उपकल्पय=सज्जीकुरु। मिथ्येति। मिथ्याप्रतिज्ञोद्भूतलज्जासम्पादितम्। अशस्त्रपूतम्=अशस्त्रकृतम्। शस्त्रपूतो वधः क्षत्रियस्य श्रेष्ठः। अशस्त्रकृतस्तु नितरां निन्द्य इत्याशयः। उपदिशामि=सम्पादयामि।

उद्घातेति। उद्घातेन=आघातेन। क्वणिताः=शब्दायमानाः, विलोलाः=चञ्चलाः, हेमघण्टाः=कनकघण्टिका यत्रासौ तथाभूतः। शब्दायमानस्वर्णकिङ्किणीविभूषितः। प्रालम्बस्य=लम्बमानस्य। द्विगुणितस्य=द्विधा बद्धस्य, चामरस्य=प्रकीर्णकस्य। प्रहासः=प्रकाशो यत्रासौ तथाभूतः। उभयतोबद्ध-

अरे दर्वाजे पर कौन है ! मेरे विजयी रथ को जल्दी तैयार करो। जिससे मैं भी उस ज्यादा डींग हाकने वाले पाण्डुपुत्र अर्जुन की प्रतिज्ञा को जयद्रथ की रक्षा कर झूठी सिद्ध करदूँ ताकि वह अर्जुन अपनी प्रतिज्ञा के झूठी होजाने से लज्जित हो विना शस्त्रके ही मर जाय। [क्षत्रिय वीर के लिए बिना शस्त्रके मृत्यु घोर लज्जा की बात है]। [प्रविष्ट होकर]

कञ्चुकी—महाराज !

आपका—[यह रथ] जिसमें चलते समय के आघात से सोने के घुंघुरु तथा घण्टियाँ, शब्द कर रही हैं, जो दोनों ओर डुलाए जाते हुए चामरों

१ 'मुपकल्पय'। २ क्वचिन्न।
३ 'प्रगल्भपाण्ड'। ४ 'क्ष्यं सम्पादयन्'। ५ 'वल्गु वल्गिताश्वः'।

राजा—देवि ! प्रविश त्वभ्यन्तरमेव । [यावदहमपि तस्य प्रगल्भपाण्डवस्येत्यादि[1] पठन्[2] परिक्रामति] ।

[इति निष्क्रान्ताः सर्वे] ॥

इति श्रीभट्टनारायणकृतौ वेणीसंहारे द्वितीयोऽङ्कः ।

चामरशोभितः । नियमिताः-नियन्त्रिताः, वल्गिताः=गतिविशेषविशिष्टाः, अतएव आकुलाः=चञ्चलाः व्याकुलाः अश्वा यत्रासौ तथाभूतः । 'वल्गितं पुनः । अग्रकायसमुल्लासात्कुञ्चितस्य नतत्रिकम्' इति हैमः । शत्रूणां=रिपूणां । क्षपित-मनोरथः=विध्वंसिताभिलाषः । अयं ते=तव । रथः=स्यन्दनः । सज्जः=कल्पितः । अस्तीति शेषः । प्रहर्षिणी वृत्तम् ॥ २९ ॥

अभ्यन्तरम्=अन्तः पुरम् । परिक्रामति = प्रयाति । अङ्कान्ते पात्राणां निर्गनमस्याऽऽवश्यकत्वान्निष्क्रान्ता इत्युक्तम् ।

इति द्वितीयोऽङ्कः ।

(चँवरों) से द्विगुणित शोभायमान हो रहा है, जिसमें जुते हुए वेगवान् घोडे लगाम के खीचने से मुख को ऊपर करके व आगे के अपने आधे शरीर को सङ्कुचित करके हवा में उडने के लिए व्याकुल से हो रहे हैं, जो शत्रुओं के मनोरथों को नष्ट करने में प्रसिद्ध है ऐसा यह आपका विजयरथ तैयार है ॥ २९ ॥

राजा—देवी ! तुम महलों में जाओ । मैं भी जाकर उस प्रगल्भ पाण्डव अर्जुन की प्रतिज्ञा को झूठी करता हूँ जिससे वह अपने आप अपघात कर मर जाए । (इस प्रकार सब जाते है) ।

इति श्रीगुरुप्रसादशास्त्रिविरचितायामभिनवराजलक्ष्म्यां द्वितीयोऽङ्कः ।

---

१ 'प्रगल्भस्येत्यादि' । २ 'पठित्वा' ।

अथ तृतीयोऽङ्कः ।

[ततः प्रविशति विकृतवेषा राक्षसी]

राक्षसः—[विकृतं विहस्य-सपरितोषम्]।

हदमाणुशमंशशोणिदेहिं कुम्भशहश्शं वशाहिं शञ्चिदम् ।
अणिशं अ पिबामि शोणिअं शमले वैरिशशदं हुवीअदु ॥ १ ॥

[नृत्यन्ती सपरितोषम्—]

जइ सिन्धुराअवहदिवहे विअ दिवहे दिवहे शमलकम्म प्पडिवज्जइ अज्जुणो, तदो पज्जत्तभलिदकोट्ठागाले मंशशोणि-देहिं मे गेहे हुविअदि । [परिक्रम्य दिशोऽवलोक्य] । अध कहिं

विकृतवेषा=राक्षसोचितभीषणबीभत्सवेषा । विकृतं=भीषणं यथास्यात्तथा । सपरितोषं=ससन्तोषम् । सानन्दम् । हतेति । हतमानुषमांसभारकैः=हत-मनुष्यमांसभारैः । 'हतमानुषमांसशोणितै'रिति पाठे शोणितं=रक्तम् । कुम्भ-सहस्रं=घटानां सहस्रम् । अनिशं=निरन्तरम् । शोणितं=रुधिरम् । भवतु=जायताम् । 'भारके'इति पाठे—तादृशभारके वसाभिः सञ्चिते सतीत्यन्वयः ॥१॥

सिन्धुराजः=जयद्रथः । दिवसेदिवसे=प्रतिदिनम् । समरकर्म=युद्ध-

(तब बीभत्स व भीषण वेषवाली एक राक्षसी प्रवेश करती है)

राक्षसी—(विकृत रूपसे हंसकर, बड़े सन्तोष के साथ)

मरे हुए मनुष्यों के मांस के भारों (बोझों) से हजारों घड़े मैनें चर्बी के भर लिए हैं। और रात दिन रुधिर (लोहू) पीती हूँ । भगवान् करे यह युद्ध सौ वर्ष तक चले ॥ १ ॥

(नाचती हुई बड़ सन्तोष के साथ)

जैसे सिन्धुराज जयद्रथ के वध वाले दिन अर्जुन ने अपना अत्यन्त प्रबल पराक्रम दिखयाथा वैसेही यदि प्रतिदिन वह अपना प्रचण्ड पराक्रम दिखाए तो मेरे घरमें मांस व रुधिरसे कोष्ठागार—(कोठे) भर जाएँ । (कुछ चलकर चारों ओर

१ 'मंशभालए' [मांसभारकैः] 'भारके' । २ 'शंचिए' [संचिते] ।
३ 'वरिशशतं शमले' । अत्र क्वचित्तु सर्वत्रदन्त्यसघटितः पाठः । ४ 'इति नृत्यन्ती' ।

णु गदे मे लुहिलप्पिए हुवीअदि ?। तां जाव इमस्सिं शमले पिअ-भत्तालं लुहिलप्पिअं अण्णेशामि। [परिक्रम्य]। होदु, शद्दाबइश्शं दाव। लुहिलप्पिआ ! लुहिलप्पिआ ! इदो एहि, इदो एहि।

[हतमानुषमांसशोणितैः कुम्भसहस्रं वसाभिः सञ्चितम्।
अनिशञ्च पिबामि शोणितं समरं वर्षशतं भवतु ॥

यदि सिन्धुराजवधदिवसे इव दिवसे दिवसे समरकर्म प्रतिपद्यतेऽर्जुनः, ततः पर्य्याप्तभरितकोष्ठागारं मांसशोणितैर्मम गृहं भविष्यति। अथ क नु गतो मे रुधिरप्रियो भविष्यति ?। तद्यावदस्मिन् समरे प्रियभर्त्तारं रुधिरप्रियमन्वेषयामि। भवतु, शब्दायिष्ये तावत्। रुधिरप्रिय ! इत एहि, इत एहि]।

[ततः प्रविशति तथाविधो राक्षसः]।

राक्षसः—[भ्रमणं नाटयन्]

पच्चग्गहदाणं मंशए जइ उण्हं लुहिले अ लब्भइ।
ता एशो मह पलिश्शमे क्खणमेत्तं एव्व लहु णश्शइ ॥ २ ॥

[प्रत्यग्रहतानां मांसं यद्युष्णं रुधिरं च लभ्येत।
तदेष मम परिश्रमः क्षणमात्रमेव लघु नश्येत् ॥]

क्रियाम्। प्रतिपद्यते=विधत्ते। स्वीकरोति। 'अतिप्रवर्त्तयती'ति पाठान्तरम्। भृतकोष्ठागारमिति। मांसशोणितैः पर्य्याप्तं सम्भृतकोष्ठगृहमित्यन्वयः। अथेति प्रश्ने। शब्दायिष्ये=आकारयामि। पाठान्तरे—वादयिष्ये=आह्वयिष्ये। 'रुधिरप्रिय' इति राक्षसनामधेयम्। इत एहि=इहागच्छ। तथाविधः= विकृतवेषः। भ्रमणं नाटयन्=इतस्ततोभ्रमन्।

देखकर) हैं ! मेरा (पति) रुधिरप्रिय कहाँ गया होगा ?। इस युद्ध भूमि में अपने प्रिय पति को खोजती हूँ। अच्छा बुलाती हूँ (आवाज देती हूँ)। अरे रुधिरप्रिय ! अरे ओ रुधिरप्रिय !! यहाँ आ :

[विकृत वेषवाला राक्षस प्रवेश करता है]

राक्षस—(घूमता हुआ या श्रम व थकावट प्रकट करता हुआ) यदि किसी ताजे

---

१ क्वचिन्न। 　२ 'वादयिष्ये'। 　३ 'भ्रमं'।

[राक्षसी पुनर्व्याहरति] ।

राक्षसः—[आकर्ण्य] । अले के [1]मं शद्दावेदि ! । [विलोक्य] । अले कहं पिआं मे[2] वशागन्धा ।

[उपसृत्य] । वशागन्धे ! कीशं[3] मं शद्दावेशि ? ।

लुं[4]हिलाशवपाणमत्तिए लणहिण्डन्तखलन्तगत्तिए ।
शद्दाअशि कीश मं पिए ! पुलिशशहश्शं हदं शुणीअदि ॥३॥

[अरे का मां शब्दायते ? । अरे ! कथं प्रिया मे वसागन्धा । वसागन्धे ! कस्मान्मां शब्दायसे ! ।

रुधिरासवपानमत्ते ! रणहिण्डनस्खलद्गात्रि ! ।
शब्दायसे कस्मान्मां प्रिये ! पुरुषसहस्रं हतं श्रूयते ॥

प्रत्यग्रहतानां=सद्योहतानाम् । उष्णं=कोष्णम् । एषः=भ्रमणरूप. । लघु=क्षिप्रम् ॥ २ ॥

व्याहरति=आह्वयते । वादयते=आह्वयते । 'शब्दायते' इत्यपरे पठन्ति । कथमिति । अतर्कितोपनतेत्यर्थः । शब्दं करोषि–शब्दायसे=आह्वयसि । रुधिरमेव आसवः, तस्य पानेन मत्ते=उन्मत्ते ।

रणेति । युद्धभूमिभ्रमणश्लथगात्रि ! प्रिये ! कस्मान्मामाह्वयसि, पुरुषसहस्रं युद्धे हतं श्रूयते इत्यन्वयः ॥ ३ ॥

मरे हुए मनुष्य का गर्मागर्म रुधिर पीने को मिल जाय तो मेरा यह (घूमनेसे हुआ) परिश्रम क्षणमात्र में (झटपट) चला जाए ।

[राक्षसी फिर बुलाती है]

राक्षस—(सुनकर) अरे है ! मुझे कौन बुलाता है ! (देखकर) अरे ! यह तो (मेरी स्त्री) वसागन्धा है !

(पास जाकर) अरी वसागन्धे ! मुझे क्यों बुला रही है ? अरी रुधिर पीने से मस्त, घूमने से थकी हुई प्रिये ! क्यों बुलाती हो । आज युद्ध में हजारों मारे गए हैं, ऐसा सुना है ॥ ३ ॥

---

१ 'के एसे' । २ क्वचिन्न । ३ 'मं कीश' । ४ क्वचिन्न । ५ 'वादयसे' ।

राक्षसी--अले लुहिलप्पिआ लुहिलप्पिआ ! । एदं क्खु मए तुह कालणादो पच्चग्गहदश्श कश्शवि लाएशिणो शलीलावयवप्पहुदं प्पहूदवशाशिणेहमत्थिक्कचिक्कणं कोण्हं णवलुहिलं अग्गमंशं अ आणीदम् । ता पिबाहि णम् ।

[अरे रुधिरप्रिय रुधिरप्रिय ! इदं खलु मया तव कारणात्प्रत्यग्रहतस्य कस्यापि राजर्षेः शरीरावयवप्रभूतं प्रभूतवसास्नेहमस्तिष्कचिक्कणं कोष्णं नवरुधिरमग्रमांसं चानीतम् । तत्पिबैतत्] ।

राक्षसः—[सपरितोषम्] । शाहु वशागन्धे ! शाहु, शोहणं तुए किदम् । [जं कोशिणं कोशिणं लुहिलं आणीदम्] । बलिअह्मि पिबाशिए । ता उवणेहि ।

[साधु वसागन्धे, साधु, शोभनं त्वया कृतम् । यत्कोष्णं कोष्णं रुधिरमानीतं । बलवदस्मि पिपासितः, तदुपनय] ।

राक्षसी—अले लुहिलप्पिआ, एदिशे वि णाम हदणलगअतुलङ्गमशोणिअवशाशमुद्दुश्शंचले शमलङ्गणे पडिब्भमन्ते

तव कारणात्=त्वदर्थम् । प्रत्यग्रहतस्य=सद्योहतस्य । शरीरावयवप्रभूतं=शरीरावयवोद्भूतम् । प्रभूतं=विपुलम् । संचितम् । कोष्णम्=ईषदुष्णम् । अग्रमांसं=बुक्कामांसम् । 'बुक्काग्रमांस'मित्यमरः । श्रेष्ठमांसं वेत्यर्थः । हतेति ।

राक्षसी—रुधिरप्रिय ! यह तेरे लिए मैंने अभी मारे गए किसी राजर्षिके शरीर से प्रभूत (अधिक) चर्बी व स्नेह वाला गरमागरम रुधिर एवं बढिया २ मांस लाकर रखा है, ले इसे पी ।

राक्षस—(सन्तुष्ट हो) वाह प्यारी वसागन्धे ! वाह ! तैने बहुत अच्छा किया जो मेरे लिए गरमागरम रुधिर ले आई, क्योंकि मैं बहुत प्यासा हूँ ।

राक्षसी—अरे रुधिरप्रिय ! जिस युद्ध भूमिमें मनुष्य हाथी घोड़े आदिके

---

१ 'क्वचिन्न । २ 'शुट्ठु' । 'सुष्ठु' । ३ 'शमले' (समरे) ।

तुमं पिबाशिएशि त्ति अच्चलिअम् अच्चलिअम् ।

[अरे रुधिरप्रिय ! ईदृशेऽपि नाम हतनरगजतुरङ्गमशोणितवसा-समुद्रदुःसञ्चरे समराङ्गणे परिभ्रमंस्त्वं पिपासितोऽसीत्याश्चर्यमाश्चर्यम् ।

राक्षसः—[सक्रोधम्] अले वशागन्धे ! णं पुत्तघडुक्कअ-शोअशन्तत्तहिअअं शामिणीं हिडिम्बादेवीं पेक्खिदुं गदम्हि ।

[अरे वसागन्धे ! ननु पुत्रघटोत्कचशोकसंतप्तहृदयां स्वामिनीं हिडिम्बादेवीं प्रेक्षितुं गतोऽस्मि] ।

राक्षसी—लुहिलप्पिआ, अज्जवि शामिणीए हिडिम्बादेवीए घडुक्कअशोए ण उपशम्मइ ? ।

[रुधिरप्रिय ? अद्यापि स्वामिन्या हिडिम्बादेव्या घटोत्कचशोको नोपशाम्यति !] ।

राक्षसः—वशागन्धे ! कुदो शे उवशमे । केवलं अहिमण्णु-

हता ये नराश्च गजाश्च तुरङ्गमाश्च तेषां यत् शोणितं वसा च, तेषां समुद्रइव समुद्रः, तेन दुःसंचरे, तस्मिन् । युद्धहतनरगजाश्वादिरुधिरमांसादिसमुद्रदुःसंचरे इत्यर्थः । आश्चर्यमिति । अत्याश्चर्यमित्यर्थः । ननु=ननु कथयामि । हिडिम्बादेवी=भीमस्य राक्षसी भार्या । अस्या एव घटोत्कचः पुत्रः । यो हि कर्णेनाऽमोघशक्त्या युद्धे हतः । उपशाम्यति=शान्तिं गच्छति । दूरीभवति ।

रुधिर व चर्बी से समुद्र भर जाने से चलना भी कठिन होरहा है वहाँ तू प्यासा है—यह बड़े ही आश्चर्य की बात है !

राक्षस—[क्रोध से] अरी बसागन्धा ! मै तो अपने पुत्र घटोत्कच के मारे जाने से शोकातुर स्वामिनी हिडिम्बा देवी से मिलने गया था ।

राक्षसी—क्या अभी तक महारानी हिडिम्बा देवी का पुत्र शोक शान्त नहीं हुआ ! ।

राक्षस—अभी शोक कैसे कम हो सकता है ? । हाँ, अभिमन्यु के वध से

---

१ क्वचिन्न । २ 'अयि सुस्थिदे' । 'अयि सुस्थिते' । ३ 'किन्तु' ।

शोअशमाणदुक्खाए शुभद्दादेवीए जण्णशेणीए अ कधं कधं वि शमाश्शाशीअदि।

[वसागन्धे ! कुतोऽस्या उपशमः । केवलमभिमन्युशोकसमानदुःखया सुभद्रादेव्या याज्ञसेन्या च कथं कथमपि समाश्वास्यते]।

राक्षसी—**लुहिलप्पिआ ! गेण्ह एदं हत्थिशिलकपालशंचिअं अग्गमंशोवदंशम् । पिबाहि णव शोणिआशवम् ।**

[रुधिरप्रिय । गृहाणैतद्धस्तिशिरःकपालसंचितमग्रमांसोपदंशम् । पिब शोणितासवम्] ।

राक्षसः—(तथा कृत्वा)। **वशागन्धे ! अह किअं प्पहुदं तुए शंचिअं लुहिलं अग्गमंशं अ ?**] ।

[वसागन्धे ! अथ कियत्प्रभूतं त्वया संचितं रुधिरमग्रमांसं च ?] ।

राक्षसी—**अले लुहिलप्पिआ, पुव्वशंचिअं तुमं वि जाणाशि जेव्व । णवशंचिअं शिणु दाव । भअदत्तशोणिएहिं कुम्भं, शिन्धुलाअवशाहिं कुम्भे दुवे, दुवदमच्छाहिवभूलिश्शवशोमदत्त-**

उपशमः=शान्तिः । केवलं=किन्तु । सुभद्रादेवी=अभिमन्युमाता, अर्जुनपत्नी । याज्ञसेन्या=द्रौपद्या । कथंकथमपि=महता यत्नेन । अग्रमांसेन उपदश्येति अग्रमांसोपदंशम् । सिन्धुराजः = दुर्योधनभगिनीपतिः

शोक ग्रस्त व समान दुःखी महारानी अभिमन्यु की माता सुभद्रा व द्रौपदी द्वारा किसी तरह उनको सान्त्वना दी जारही है ।

राक्षसी—रुधिरप्रिय ! लो हाथी के शिरके खप्परमें भरा हुआ यह रुधिर, इस बढिया कलेजे के मांस के साथ चबाकर पीले ।

राक्षस—[रुधिर को हाथ में लेकर तथा रुधिर पीकर एवं मांसको चबाकर] अरी वसागन्धे ? तैने कितना रुधिर व कलेजे का मांस इकट्ठा किया है ? ।

१ क्वचिन्न ।　२ 'हस्तिशिरःकमाटं' ।　३ 'किअ' ।
४ 'तुमं जेव जाणासि' [त्वमेव जानासि] ।　५ क्वचिन्न ।
६ 'शोणिअकुंभे' । 'शोणिअ' ।　७ 'वशाकुम्भे' ।

बह्लिअप्पमुहाणं णलिन्दाणं अण्णाणं वि पाकिदपुलिशाणं लुहिलवशामंशस्स[1] घटा अविणद्धमुहा सहस्सशंखा शन्ति मे गेहे।

[अरे रुधिरप्रिय! पूर्वसञ्चितं त्वमपि जानास्येव। नवसञ्चितं शृणु तावत्। भगदत्तशोणितैः कुम्भः, सिन्धुराजवसाभिः कुम्भौ द्वौ, द्रुपद-मत्स्याधिपभूरिश्रवःसोमदत्तबाह्लीकप्रमुखाणां नरेन्द्राणामन्येषामपि प्राकृत-पुरुषाणां रुधिरमांसस्य घटा अपिनद्धमुखा सहस्रसङ्ख्याः सन्ति मे गेहे]।

राक्षसः—[सपरितोषमालिङ्ग्य] शाहु शुग्घलिणिए, शाहु! इमिणा दे शुग्घलिणीत्तणेण अज्ज उण शामिणीए हिडिम्बादेवीए शंविहाणेण[2] अ प्पणट्ठं मे जन्मदालिद्दम्।

[साधु सुगृहिणि, साधु। अनेन ते सुगृहिणीत्वेनाऽद्य स्वामिन्या हिडिम्बादेव्याः संविधानेन च प्रनष्टं मे[3] जन्मदारिद्र्यम्]।

जयद्रथः। मत्स्याधिपः=मत्स्यदेशाधिपः विराटः। [विराटदेशः—वर्त्तमान जयपुरराज्य]।

प्राकृतपुरुषाः=सामान्यक्षत्रियाः। संविधानं=कार्यं नियोगः।

राक्षसी—अरे रुधिरप्रिय! पहिले जितना इकट्ठा किया था वह तो तेरे को मालूम ही है। इधर नया जो इकट्ठा किया है उसे सुन——महराज भगदत्त के रुधिर से १ घडा, सिन्धु के राजा जयद्रथ के शरीर से चर्बी के दो घडे, मत्स्य देश [जयपुर] के राजा एवं—भूरिश्रवा, सोमदत्त, वाह्लीक प्रभृति बडे २ राजाओं के शरीरों से तथा साधारण योद्धाओं के शरीरों से रुधिर व चर्बीके ऊपर गले तक भरे हुए हजारों घड़े, जिनके मुख बान्ध दिए गये हैं मेरे भण्डार घर में रखे हुए हैं।

राक्षस——[बडे सन्तोष से आलिङ्गन करता हुआ] वाह मेरे बुद्धिमती

---

१ 'मंशेहि पुलिदाइं घडशदाइं अशंखाइं शन्ति' [मांसैः पूरितानि घटशतानि असङ्ख्यानि सन्ति]।

२ 'संविभागेन'। ३ कचिन्न।

राक्षसी—लुहिलप्पिआ ! केलिशे शामिणीए शंविहाणए किदे ? ।

[रुधिरप्रिय ! कीदृशं स्वामिन्या संविधानं कृतम् ?] ।

राक्षसः—वशागन्धे ! अज्ज अहं शामिणीए हिडिम्बादेवीए शबहुमाणं शद्दाविअ आणत्ते । जहा-लुहिलप्पिआ ! अज्जप्पहुदि तुए [2]अज्जउत्तस्स भीमशेणश्शे[3] पिट्ठदोऽणुपिट्ठं शमले [3]आहिण्डिदव्वं त्ति । ता तश्शा अणुमग्गगामिणो हअमाणुशशोणिअणइदंशणप्पणट्ठबुभुक्खापिवाशश्श इह ज्जे मे शग्गलोओ हुविअदि । तुमं वि वीशद्धा भविअ लुहिलवशाहिं कुम्भशहश्शं शंचेहि ।

[वसागन्धे ! अद्याहं स्वामिन्या हिडिम्बादव्या सबहुमानमाहूयाज्ञप्तो यथा—रुधिरप्रिय ! अद्यप्रभृति त्वया आर्यपुत्रस्य[3] भीमसेनस्य पृष्ठतो-

संविधानं—नियोगः । 'संविभाग' इति पाठेऽपि स एवार्थः ।

गृहिणी वाह ! तेरी ऐसी बुद्धिमान् व सञ्चयपरायण पत्नी के कारण तथा महारानी हिडिम्बा के बताए हुए कार्य से मेरी जन्म की दरिद्रता सदा के लिए चली गई ।

राक्षसी—रुधिरप्रिय ! स्वामिनी ने कैसा काम तुमको बताया है ? ।

राक्षस—आज महारानी हिडिम्बादेवी ने मुझे बुलाकर बड़े सत्कार से यह आज्ञा दी है कि–' हे रुधिरप्रिय ! आज से लेकर युद्धमें मेरे प्राणनाथ भीमसेन के पीछे २ तुम घूमते रहना । इस प्रकार महारानी की आज्ञा से भीमसेन के पीछे २ घूमने से—मरे हुए मनुष्यों के रुधिर से बनी हुई नदियों को देखने से मेरी भूख प्यास जाती रही, इस प्रकार मुझे तो यहां ही स्वर्ग का सुख मिल रहा है । (स्वर्ग में भूख प्यास नहीं लगती) । तूं भी यहां निर्भय हो रुधिर व चर्बी से हजारों घड़े भर ले ।

१ 'आणत्ते क्खु हग्गे शामिणीए हिडिम्बादेवीए जह' । [आज्ञप्तः खल्वहं स्वामिन्या हिडिम्बादेव्या यथा] ।

२ 'अज्जउत्तभीमशेणश्श' ।　　३ कचिन्न ।

ऽनुपृष्ठं समर आहिण्डितव्यमिति । तत्तस्यानुमार्गगामिनो हतमानुष-शोणितनदीदर्शनप्रनष्टबुभुक्षापिपासस्येहैव मे स्वर्गलोको भविष्यति । त्वमपि विस्रब्धा भूत्वा रुधिरवसाभिः कुम्भसहस्रं संचिनु] ।

राक्षसी—**लुहिलप्पिआ ! किंणिमित्त कुमालभीमशेणश्श पिट्ठदो आहिण्डीअदि ? ।**

[रुधिरप्रिय ! किंनिमित्तं कुमारभीमसेनस्य पृष्ठत आहिण्ड्यते ?] ।

राक्षसः-**वशागन्धे ! तेण हि शामिणा विओदलेण वेच्छत्थ-लादो दुश्शाशणश्श लुहिलं पादुं पडिण्णादम् । तं च अम्हेहिं लक्खशेहिं अणुप्पविशिअ पादव्वं त्ति ।**

[वसागन्धे ! तेन हि स्वामिना वृकोदरेण [1]वक्षस्थलतो दुःशासनस्य रुधिरं पातुं प्रतिज्ञातम् । तच्चाऽस्माभी राक्षसैरनुप्रविश्य पातव्यमिति] ।

राक्षसी—(सहर्षम्) **शाहु शामिणीए ! शाहु । शुशंविहाणे मे भत्ता तुए किदे ।**

[साधु स्वामिनि ! साधु ! सुसंविधानो मे भर्ता [1]त्वया कृतः] ।

(नेपथ्ये महान्कलकलः, [1]उभावाकर्णयतः) ।

आर्यपुत्रः=स्वामी । विस्रब्धा=विश्वस्ता । तच्च=दुःशासनरुधिरञ्च । सुसंविधानः

राक्षसी—रुधिरप्रिय ! कुमार भीमसेन के पीछे २ किस लिए तुम घूमते हो । (**आहिण्ड्यते** = हाँडते हो) ।

राक्षस—वसागन्धे ! स्वामी भीमसेन ने दुःशासन के हृदय से रुधिर पीने की प्रतिज्ञा की है । वह काम (खून पीना) हम लोग उनके शरीर में प्रवेश करके सम्पन्न करेंगे । इसलिए मैं उनके पीछे २ घूमता हूँ ।

राक्षसी—वाह महारानीजी ! वाह ! आपने मेरे पतिको अच्छा काम बता दिया है । [जिससे खूब पेटभर खाने को मिलेगा] ।

[नेपथ्य में बड़ा कोलाहल होता है, दोनों सुनते है]

---

१ क्वचिन्न ।

राक्षसी—(आकर्ण्य । [1]ससंभ्रमम्) **अले लुहिलप्पिआ ! किं णु क्खु एशे महन्ते कलअले शुणीअदि ? ।**

[अरे रुधिरप्रिय ! किं नु खल्वेष महान्कलकलः श्रूयते ?] ।

राक्षसः—(दृष्ट्वा) **वशागन्धे ! एशे क्खु[2] धिट्ठज्जुम्णेण दोणे केशेशु आकड्ढिअ अशिवत्तेण वावादीअदि ।**

[वसागन्धे ! एष खलु धृष्टद्युम्नेन द्रोणः केशेष्वाकृष्याऽसिपत्रेण व्यापाद्यते] ।

राक्षसी—**लुहिलप्पिआ[2] लुहिलप्पिआ एहि । अम्हे वि गच्छिअ दोणश्श लुहिलं पिम्बह ।**

[रुधिरप्रिय ! रुधिरप्रिय एहि । वयमपि गत्वा द्रोणस्य रुधिरं पिबावः] ।

राक्षसः—(सभयम्) **वशागन्धे ! बह्मणशोणिअं क्खु एदं गलअं दहन्ते[2] दहन्ते पविशदि । ता किंम एदिणा ।**

[वसागन्धे ! ब्राह्मणशोणितं खल्वेतद्गलं दहद्दहत्प्रविशति । तत्किं[3]मेतेन] ।

(नेपथ्ये पुनः कलकलः) ।

कृतः=सुन्दरे कार्ये विनियुक्तः । असिपत्रेण=करवालेन । व्यापाद्यते=हन्यते ।

राक्षसी—(सुनकर, घबड़ाती हुई) अरे रुधिरप्रिय ! यह कैसा हल्ला हो रहा है ? ।

राक्षस—(देखकर) अरी बसागन्धे ! यह धृष्टद्युम्न द्वारा बाल पकड़ कर गुरु द्रोणाचार्य का तलवार से वध किया जा रहा है ।

राक्षसी—(हर्ष के साथ) अरे रुधिरप्रिय ! चलो हम भी चलकर द्रोणाचार्य का रुधिर पीएँ ।

राक्षस—(डरता हुआ) अरी वसागन्धे ! ब्राह्मण का रुधिर गलेको जलाता हुआ ही अन्दर जाता है, अतः इसे रहने ही दो ।

१ 'सभयम्' । २ कच्चिन्न । ३ 'किमेतेन' ।

राक्षसी—**लुहिलप्पिआ ! पुणोवि एशे महन्ते कलअल शुणीअदि ?**। [रुधिरप्रिय ! पुनरप्येष महान्कलकलः श्रूयते ?]

राक्षसः—(नेपथ्याभिमुखमवलोक्य) **वशागन्धे ! एशे क्खु अश्शत्थामे आकड्ढिदाशिवत्ते इदो एव्व आअच्छदि । कदावि दुवदशुदलोशेण अम्हेवि वावादइश्शदि । ता एहि शामिणीए हिडिम्बा-देवीए आणत्तिं कलेम्हि ।**

[वसागन्धे ! एष खल्वश्वत्थामाऽऽकृष्टासिपत्र इत एवागच्छति । कदाचिद्द्रुपदसुतरोषेणावामपि व्यापादयिष्यति । तदेहि स्वामिन्या हिडिम्बादेव्या आज्ञप्तिं कुर्मः ।

राक्षसी—**एवं करेम्ह** । [एवं करवाव] ।

[इति निष्क्रान्तौ ।]

प्रवेशकः ।

(ततः प्रविशत्याकृष्टखङ्गः कलकलमाकर्णयन्नश्वत्थामा) ।

आज्ञप्तिम्=आज्ञाम् । पाठान्तरे–उत्खातखङ्गः=कोशान्निष्कासितखङ्गः ।

कलकलः=कोलाहलः । असिपत्रः–खङ्गः । प्रवेशक इति । 'क्षुद्राभ्यामेव पात्राभ्यामङ्कादौ यत्प्रवर्त्तते । प्रवेशकः स विज्ञेयः शौरसेन्यादिभाषया' इति भरतः ।

[नेपथ्य में फिर हल्ला होता है] ।

राक्षसी–अरे रुधिरप्रिय! उठ देख यह हल्ला फिर क्यों सुनाई दे रहा है ?।

राक्षस—(नेपथ्य की ओर देखकर) वसागन्धे ! यह अश्वत्थामा नंगी तलवार हाथ में लिए इधर ही आ रहे हैं । कहीं द्रुपदराज के पुत्र धृष्टद्युम्न पर क्रुद्ध होने के कारण हम लोगों को भी न मारडालें । इसलिए आओ चलें (और महारानी हिडिम्बा देवी की आज्ञा का पालन करें)। **राक्षसी**–अच्छा चलो ।

[दोनों जाते हैं]

प्रवेशक नामक नाटकाङ्क समाप्त ।

(क्षुद्र पात्रों द्वारा भूत भविष्यत् वर्तमान विषय की सूचना **प्रवेशक** कहाता है) ।

[नङ्गी तलवार हाथ में लिए कोलाहल सुनते हुए अश्वत्थामा का प्रवेश] ।

---

१ 'अरे रुधिरप्रिय ! उत्तिष्ठोत्तिष्ठ, पुनरप्येष महान्' पा० । २ ता एहि अति क्कामम्हि । [तदेहि, अतिक्रमावः] । ३ कश्चिन्न । ४ 'उत्खातखङ्ग' ।

अश्वत्थामा—

महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरवा[1]नुकारी मुहुः ।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः ॥ ४ ॥

(विचिन्त्य) ध्रुवं गाण्डीविना सात्यकिना वृकोदरेण वा

महेति । अद्य=सम्प्रति । पुरः=अग्रे । मुहुः=वारंवारम् । समरोदधेः= युद्धसमुद्रात् । पूर्वं भूतो भूतपूर्वः—न भूतपूर्वः—अभूतपूर्वः=अश्रुतपूर्वः । महाप्रलयस्य—कल्पान्तस्य यो मारुतस्तेन क्षुभितौ=विक्षुब्धौ पुष्करावर्तकनामानौ मेघौ, तयोर्यत्—प्रचण्डघनगर्जितं=भीषणगम्भीरस्तनितं, तस्य यत्प्रतिरुतं= प्रतिध्वनिः, तदनुकरोति तच्छीलः । प्रलयमारुतोद्भूतकल्पान्तमेघगुरुगम्भीर-ध्वनिप्रतिरुतसदृशः । अत एव श्रवणभैरवः=श्रवणभीषणः । स्थगितं रोदसी-कन्दरं येनासौ—स्थगितरोदसीकन्दरः=व्याप्तद्यावाभूमिकुहरः। परिपूरितपृथिवी-गगनमण्डलरूपकन्दरः । 'दरी तु कन्दरो वाऽस्त्री' इत्यमरः । 'द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी'इत्यमरः । 'रोदश्च रोदसी चैव दिवि भूमौ पृथक्पृथक्' इति कोशः । अयं=श्रूयमाणः । रवः=शब्दः । कुतः=कुतो हेतोः । उद्भवतीत्यर्थः । पृथ्वी वृत्तम् ॥ ४ ॥

गाण्डीविना=अर्जुनेन । वृकोदरेण=भीमेन । यौवनदर्पात्=तारुण्यमदात् ।

अश्वत्थामा—

महाप्रलय कालके वायु से विक्षुब्ध हुए पुष्कर और आर्वत्त नामक प्रलय के मेघों के प्रचण्ड भयङ्कर शब्द की तरह, जिसे सुनते ही रोमाञ्च होता है, जिससे पृथ्वी आकाश का अवकाश भर गया है ऐसा यह अभूत पूर्व शब्द सामनें युद्धभूमि में कैसा सुनाई दे रहा है ? ॥ ४ ॥

(सोचकर) जरूर अर्जुन या सात्यकि या भीमसेन के द्वारा यौवन के

[1] 'रुतानुकारी' ।

यौवनदर्पादतिक्रान्तमर्यादेन परिकोपितस्तातः। येतः समुल्लङ्घ्य शिष्यप्रियतामात्मप्रभावसदृशमाचेष्टते। तथाहि—

यद्दुर्योधनपक्षपातसदृशं, युक्तं यदस्त्रग्रहे,
रामाल्लब्धसमस्तहेतिगुरुणो वीर्यस्य यत्साम्प्रतम्।
लोके सर्वधनुष्मतामधिपतेर्यच्चानुरूपं रुषः,
प्रारब्धं रिपुघस्मरेण नियतं तत्कर्म तातेन मे ॥ ५॥

अतिक्रान्तमर्यादेन=अलङ्घितगुरुशासनेन। उच्छृङ्खलेन। तातः=पिता द्रोणः। शिष्यप्रियतां=शिष्यपक्षपातम्। आत्मसदृशभावम्=आत्मानुरूपम्। स्वोचितम्। आचेष्टते=पराक्रमं दर्शयति।

यदिति। यत्=यत्कर्म। दुर्योधनपक्षपातसदृशं=कौरवपक्षपाततुल्यम्। सुयोधनपक्षपातसदृशम्। यत्=यच्च। अस्त्रग्रहे=शस्त्रग्रहणे। युक्तम्=उचितम्। यत्=यच्च। रामात्=परशुरामात्। लब्धाभिः समस्तहेतिभिः=सकलशस्त्रविद्याभिः-गुरुणः=गौरवान्वितस्य। वीर्यस्य=पराक्रमस्य। साम्प्रतं=योग्यम्। 'युक्ते द्वे साम्प्रतं स्थाने'इत्यमरः। सर्वधनुष्मतां=सर्वधनुर्धराणाम्। अधिपतेः=स्वामिनः। रुषः=क्रोधस्य। लोके=जगति। यच्च=यत्कर्म च। अनुरूपं=योग्यम्। तत्कर्म=तादृशं शत्रुसैन्यमर्दनात्मकं घोरं कर्म। रिपुघस्मरेण=शत्रुविनाशकेन। मे=मम। तातेन=पित्रा। प्रारब्धं=नूनं प्रवर्त्तितं

मद से मर्यादा (शिष्टाचार व बड़ों का आदर) को छोड़ देने से उनपर क्रुद्ध हुए पिताजी (द्रोणाचार्य) शिष्यों का मुलाहिजा छोड़कर अपने सदृश पराक्रम को प्रदर्शित कर रहे होंगे ?। जैसे—

जो कार्य दुर्योधन के पक्षमें रहने के अनुरूप है, जो शस्त्र धारण करने के अनुरूप है, जो परशुरामजी से दिव्य अस्त्रों की प्राप्ति के कारण गौरव पूर्ण अपनें वीर्य पराक्रम के योग्य है, और संसारके सम्पूर्ण धनुर्धरो के सम्राट् के क्रोधके योग्य

---

१ 'दर्पातिक्रान्त'। २ क्वचिन्न। ३ 'आत्मसदृशभावमा'। ४ 'धैर्यस्य'।

(पृष्ठतो विलोक्य) तत्कोऽत्र ? । रथमुपनयतु । अथवाऽलमिदानीं मम रथप्रतीक्षयाऽनया । सशस्त्र एवास्मि, सजलजलधरप्रभाभासुरेण सुप्रग्रहविमलकलधौतत्सरुणाऽमुना खड्गेन । यावत्समरभुवमवतरामि । (परिक्रम्य वामाक्षिस्पन्दनं सूचयित्वा) । आः ! कथं ममापि नामाश्वत्थाम्नः समरमहोत्सवप्रमोदनिर्भरस्य तातविक्रमदर्शनलालसस्याऽनिमित्तानि समरगमनविघ्नमुत्पादयन्ति ! । भवतु । गच्छामि । (सावष्टम्भं परिक्रम्याग्रतो विलोक्य)

भवेत् । कथन्यथैवमभूतपूर्वः कोलाहलः सम्भवेदित्याशयः । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

सजलेति । सजलमेघकान्तिभास्वरेणेत्यर्थः । नीलकान्तेनेति यावत् । सुप्रग्रहः=सुखग्राह्यः, विमलस्य—निर्मलस्य, कलधौतस्य=सुवर्णस्य, त्सरुः=खड्गमुष्टिर्यस्यासौ तथाविधेन । सुखग्राह्यस्वर्णचित्रितमुष्टिसहितेन । 'खड्गेन सशस्त्रश्चास्मी'त्यन्वयः । 'हयादिरश्मौ रश्मौ च प्रग्रहः'इति विश्वः । 'त्सरुः खड्गादिमुष्टौ स्यात्'इत्यमरः । यावत्=सर्वथा । अतः । 'यावत्तावच्च साकल्ये'इत्यमरः । केचित्तु 'खड्गम यावत्समरभुव'मित्यन्वयमिच्छन्ति । खड्गेन सहित इति तदार्थः । नाम सम्भावनायाम् । कथ सम्भाव्यते इत्यर्थः । समरेति । युद्धमहोत्सवहर्ष-

जो है वही कार्य (पाण्डव सेना का विध्वंस) रिपुके लिए कालाग्नि रूप मेरे पिताजी ने करना प्रारम्भ किया है—ऐसा मालूम होता है ॥ ५ ॥

(पीछे देखकर) कौन है ? । मेरा रथ लाओ । अथवा—अब रथकी प्रतीक्षा करने की आवश्यकता नहीं है । क्योंकि—जलसे भरे हुए काले २ मेघों की तरह काली कान्तिवाला, अच्छी तरह पकडने लायक सुनहरी मूठ जिसकी है ऐसा यह खड्ग (तलवार) तो मेरे पास है ही । अतः युद्धि भूमिमें चलना चाहिए । [कविलोग खड्ग को काला वर्णन करते हैं] ।

(कुछ दूर चलकर, बाईं आँख का फड़कना सूचित करके) है ! क्या युद्ध महोत्सव को देखने लिए हर्ष से भरे हुए, तथा पिताजी के पराक्रम को देखने

१ कचिन्न । २ ('पृष्ठतो विलोक्य) तदलमिदानीं' । ३ 'भास्वरेण' । ४ 'तावत्' । ५ 'अये कथम्' । ६ 'अवगच्छामि' ।

कथमवधीरितसकलक्षात्त्रधर्मणामुज्झितसत्पुरुषोचितलज्जावगुण्ठनानां, विस्मृतस्वामिसत्कारलघुचेतसां, [त्यक्त]द्विरदतुरङ्गमचरणचारिणामगणितकुलयशःसदृशपराक्रमव्रतानां रणभूमेः समन्तादपक्रामतामयं महान्नादो बलानाम्। (निरूप्य) हा हा धिक्कष्टम्! कथमेते महारथाः कर्णादयोऽपि समरा-

भरितस्येत्यर्थः । तातेति । तातद्रोणपराक्रमदर्शनाभिलाषिण इत्यर्थः । **अनिमित्तानि**=दुःशकुनानि । **समरेति** । युद्धयात्राविघ्नमित्यर्थः । **गच्छामि**=गच्छाम्येव । 'अवगच्छामी'ति पाठे—कारणं ज्ञास्यामीत्यर्थः । **सावष्टम्भं**=साभिमानम् । 'दर्पोऽवलेपोऽवष्टम्भः' इत्यमरः । **अवधीरितसकलक्षात्रधर्मणां**=तिरस्कृतक्षत्रियोचिताऽपलायित्वशौर्यादिधर्मणाम् । धर्माणामितिपाठेऽनित्यत्वान्न समासान्तः । उज्झितं सत्पुरुषोचिता लज्जैव अवगुण्ठनं यैस्तेषां=परित्यक्तसज्जनोचितलज्जापिधानानाम् । विस्मृतो यः स्वामिनः सत्कारः, तेन लघु=क्षुद्रं चेतो येषां तेषाम्=अगणितस्वामिपुरस्कारक्षुद्रमानसानाम् । विस्मृतस्वामिसत्काराणां लघुचेतसामिति वाऽर्थः । **द्विरदेति** । गजचारिणामश्वसादिनां पदातीनाञ्चेत्यर्थः । त्यक्तेतिपाठे परित्यक्तगजादीनामत एव चरणचारिणामित्यर्थः । **अगणितेति** । अनाकलितकुलकीर्त्तिसमुचितवीर्यव्रतानामित्यर्थः । **समन्तात्**=सर्वतः । **अपक्रामतां**=

के लिए उत्कण्ठित, युद्ध भूमिमें जाते मुझ अश्वत्थामा को भी इस समय बुरे शकुन (बाईंका आँख फरकना आदि) विघ्न कर रहे है ! अच्छा ! देखा जायगा चलता हूँ। (बड़ी अकड़ से चलकर, सामने देखकर) हैं ?, यह क्या ?, क्षत्रियोचित सम्पूर्ण धर्मों को छोड़कर, सत्पुरुषोचित लज्जाके आवरण को भी छोड़कर, स्वामी के सत्कार व अन्न [निमक] को भी भूलकर, कातरचित्त हो, हाथी घोड़ आदि वाहनों को छोड़ २ कर, पैदल ही, अपने कुल, यश, पराक्रम को ख्याल न कर, युद्ध भूमिको छोडकर चारों ओर भागती हुई सेनाका यह महान् कोलाहल कैसे सुनाई दे रहा है ? । (दूसरी ओर देखकर) हाय ! बड़े लज्जा की बात है कि—ये

१ 'धर्माणां' । २ कचिन्न । ३ 'वयः' ।
४ 'अस्मत्सेनाभटानामयं महान्निनादः' । ५ 'अन्यतोऽवलोक्य' । ६ 'अहह' ।

त्पराङ्मुखा भवन्ति ! । [साशङ्कम्] कथं नु ताताधिष्ठितानामपि बलानामियमवस्था भवेत् ! । भवतु संस्तम्भयामि ।

भो भो कौरवसेनासमुद्रवेलापरिपालनमहामहीधरा नरपतयः ! । कृतं कृतममुना समरपरित्यागसाहसेन ।

यदि समरमपास्य नास्ति मृत्यो-
　　र्भयमिति युक्तमितोऽन्यतः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तोः
　　किमिति मुधा मलिनं यशः कुरुध्वे ॥ ६ ॥

पलायमानानाम् । बलानां–सेनानाम् । निरूप्य=दृष्ट्वा । पाठान्तरे–अन्यतोऽवलोक्य=अन्यस्यां दिशि दृष्ट्वेत्यर्थः । संस्तम्भयामि=धैर्यं वितरामि । पाठान्तरे–भवतु=अस्तु । एवं तावत्=इत्थं करोमि । पलायमानानि बलान्यवरुणध्मीत्यर्थः ।

कौरवाणां सेनैव समुद्रः, तस्य या वेला–सीमा, 'वेला तत्तीरनीरयोः' इति कोशः । तस्याः परिपालने महामहीधराः–महापर्वताः, कुलपर्वता इव नरपतयः=राजानः । कृतं कृतम्=अलमलम् । 'कृतं युगेऽलमर्थे स्याद्विहिते हिंसिते त्रिषु' इति मेदिनी । साहसेन=अविचारितकर्मणा । अनुचितकर्मणा । 'साहसन्तु,—दम्भे दुष्करकर्मणि । अविमृश्यकृतौ धाष्टर्ये' इति हेमः ।

यदिति । यदि समरं–युद्धम्, अपास्य=त्यक्त्वा । मृत्योः–मरणात् । यमा-

---

कर्ण आदि महारथी भी युद्ध से मुख मोड़ कर भाग रहे है ? (साशङ्क हो) हैं ! पिताजी के सेनापति रहते हुए सेनाकी यह दशा कैसे हो सकती है ?। अच्छा इन्हें रोकता हूँ । हे कौरवसेनारूपी समुद्र के रोकने में वेला (किनारे के) पर्वतों की तरह अचल रहने वाले महावीर राजालोगो ! ठहरो ठहरो ! युद्ध भूमिको छोड़कर इस तरह भागो मत । ऐसा अनुचित काम मत करो । क्योंकि—

यदि युद्धभूमि से भागने पर कभी मृत्यु न होती हो तो यहाँ से भागना

---

१ क्वचिन्न । 　२ भवत्वेवं तावत् । 　३ 'कुरुध्वम्' । 'क्रियेत' ।

अपि च—

अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थितेऽस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणाम्।
कर्णाऽलं संभ्रमेण, व्रज कृप ! समरं, मुञ्च हार्दिक्य ! शङ्कां,
ताते चापद्वितीये वहति रणधुरं[1] को भयस्यावकाशः ? ॥७॥

द्वा, भयं नास्ति,–इति=इत्थं चेत, इतः=युद्धभुवः, अन्यतः=अन्यत्र । प्रयातुं=पलायितुं, युक्तम्=उचितम् । अथ=पक्षान्तरे। यदि । अथ चेत्। जन्तोः=प्राणिनः । मरणं=मृत्युः, अवश्यमेव=अवश्यंभावी, तर्हि-किमिति=कुतोहेतोः, यशः=कीर्त्तिं , मुधा=वृथैव । मलिनं=कलङ्कितम् । कुरुध्वे=कुरुथ । कुरुध्वमिति वा पाठः। पुष्पिताग्रा वृत्तम् ॥ ६ ॥

अपिच=किञ्च । अस्त्रेति । अस्त्रम् अस्त्राण्येव वा ज्वाला, अस्त्रज्वाला, तया अवलीढः=आक्रान्तो यः–प्रतिबलं जलधिरिव–प्रतिबलजलधिः–रिपुसेनासागरः, तस्य=अस्त्ररूपज्वालाव्याप्तदुरन्तशत्रुसेनासागरस्य । अन्तः=मध्ये । और्वं इवाचरति–और्वायमाणे=वडवानलायमाने । सर्वधन्वीश्वराणां=सकलधनुर्धरेन्द्राणाम् । गुरौ=उपदेष्टरि । आचार्ये । श्रेष्ठे । अस्मिन्=जाज्वल्यमाने । सेनानाथे=सेनापतौ द्रोणे । स्थिते=समवस्थिते सति । हे कर्ण सम्भ्रमेण=भयेन, अलं=न प्रयोजनम् । कृप=हे कृपाचार्य । समरं=युद्धाङ्गणम् । व्रज=गच्छ । हार्दिक्य=हे कृतवर्मन् । शङ्काम्=आशङ्काम् । मुञ्च=त्यज ।

भी उचित है । पर यदि प्राणीका मरना अवश्यं भावी है, किञ्च अन्यत्र भी यदि मरना ही है तो युद्धसे भागकर वृथा अपने यशको क्यों कलङ्कित करते हो ? ॥६॥

और भी–दिव्य अस्त्रों की ज्वाला से भरे हुए शत्रुओं की सेनारूपी समुद्र के मध्य में वडवानल की तरह जलने वाले, सर्व धनुर्धरों के आचार्य, मेरे पूज्य पिता श्री द्रोणाचार्य इस समय भी सेनापतिपद पर विराज रहे हैं । अतः हे कर्ण ! सम्भ्रम व भय छोडो, हे कृपाचार्य ! युद्ध भूमि में फिर जाओ, हे हार्दिक्य कृतवर्मन् ! शङ्का

1 'रणधुराम्' ।

[नेपथ्ये]

कुतोऽद्यापि ते तातः ! ।

अश्वत्थामा—(श्रुत्वा) **किं ब्रूथ-'कुतोऽद्यापि ते तातः' इति ! । (सरोषम्) आः क्षुद्राः समरभीरवः ! कथमेवं प्रलपतां वः सहस्रधा न दीर्णमनया जिह्वया ! ।**

दग्धुं विश्वं दहनकिरणैर्नोदिता द्वादशार्का
वाता वाता दिशि दिशि न वा सप्तधा सप्त भिन्नाः ।
छन्नं मेघैर्न गगनतलं पुष्करावर्तकाद्यैः
पापं पापाः ! कथयत कथं ? शौर्यराशेः पितुर्मे ॥ ८ ॥

(यतः) चापद्वितीये=धनुःसहाये । धृतधनुषि । ताते=मत्पितरि द्रोणे । रणधुरं=युद्धधुरम् । रणभारम् । समासान्तस्याऽनित्यत्वान्नाऽकारः । वहति= दधाने सति । भयस्य=भीतेः । कः=कः खलु । अवकाशः=अवसरः । न कोऽपीत्यर्थः । स्रग्धरा वृत्तम् ॥ ७ ॥

आ इति क्रोधे निन्दायां वा । क्षुद्राः=कातराः । एवम्=इत्थम् । प्रलपतां= निरर्थकं भाषमाणानाम् । दीर्णं=विदीर्णम् । दग्धुमिति । हे पापाः=पापिनः । दहनाश्च ते किरणाश्च तैः—दहनकिरणैः=दाहकमयूखैः । वह्निकिरणैर्वा । विश्वं=जगत् । दग्धुं=भस्मीकर्त्तुम् । द्वादश=द्वादशसङ्ख्याकाः । अर्काः=सूर्याः ।

छोडो । डरो मत । जब मेरे पिताजी हाथमें धनुष ले रणकी धुरीको वहन करते हुए शत्रुओं की सेना में विचर रहे हों उस समय भला भय की बात ही क्या है ? ॥७॥

[**नेपथ्य में**—अब तुमारे पिता कहाँ बैठे हैं ?] ।

अश्वत्थामा—(सुन कर) क्या कहा—'तेरे पिता अब कहाँ है ?' । अरे नीचो ! युद्धभीरुओं ! ऐसी दुष्टवाणी बोलते हुए तुमारी यह जिह्वा हजार टुकडे क्यों न हो गई ? ।

अरे पापियो ! प्रलय काल में संसार को दग्ध करने के लिए एक साथ

१ क्वचिन्न । २ समरेति क्वचिन्न ।

(प्रविश्य संभ्रान्तः सप्रहारः[1]—)

सूतः—**परित्रायतां परित्रायतां कुमारः । (इति पादयोः पतति) ।**

न उदिताः=सहैव न समुदिताः । नोद्गताः । द्वादशादित्याश्च—'धाता-मित्रोऽर्यमा रुद्रो वरुणः सूर्य एव च । भगो विवस्वान्पूषा च सविता दशमः स्मृतः । एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते' इत्युच्यन्ते । एते द्वादशादित्याः प्रलयकाल एव जगद्भस्मीकर्त्तुं युगपदुद्यन्ति । **वा**=अथवा । **दिशि-दिशि**=सर्वतः । सर्वदिक्षु । **सप्तधा भिन्नाःसप्त**=सप्तप्रकारेण भिन्नाः सप्त । सप्तगुणिताः सप्त । ऊनपञ्चाशत्सङ्ख्याका इत्यर्थः । **वायवः**-**न वाताः**=न प्रचलिताः । एते ऊनपञ्चाशद्वायवश्च प्रलयकाले एव युगपत्प्रवहन्ति । ते च श्वसन—स्पर्शन—वायु—मातरिश्व—सदागति—महाबल—बलवर्धन—पृषदश्व—गन्धवह—गन्धवाहिका—ऽनिला—ऽऽशुग—सुमुख—कर्कर—समीक्षण—समीरणा—ऽनुत्तम—मारुत—नागयोनिज—जगत्प्राण[2]—पावक—वात—प्रभञ्जन—पवमान—नभस्व—दतिबल—तरस्वि—द्रावण—देवपक्षक—पात्रवाहिक[3]—रथवाड—ध्वदृग्—गतिरोधन—पाणिक—साधक—विश्वपूरक—जगदाश्रय—विश्वातिरेकि—प्रजागर—विश्वोदरा[4]—ऽग्रग—तीव्रका—ऽसुरह—विश्ववर्द्धन—भद्रजव—पुष्करजा—ऽब्जिनीपति—व्यक्तमूर्त्ति—विश्वग[5]-नामधेया हेमाद्रौ पठिताः । किञ्च -**पुष्करावर्त्तकाद्यैः**=पुष्करा—ऽऽवर्त्तक—संवर्त्त—द्रोणाभिधैः । **मेघैः**=प्रलयकालजलधरैः । **गगनतलं**=व्योमाङ्गणम् । **न च्छन्नं**=सहैव नाच्छादितं वर्त्ततेऽभूद्वा । अतः—**शौर्यराशेः**=पराक्रमराशेः । **मे**=मम । **पितुः**=तातस्य द्रोणस्य । **पापम्**=मरणरूपमनिष्टम् । **कथं**=केन प्रकारेणाऽभूदिति । **कथयत**=ब्रूत । प्रलयाग्न्यादिकं विनाऽस्मत्पितुरनिष्टस्याऽसम्भवादित्यर्थः । मन्दाक्रान्ता वृत्तम् ॥ ८ ॥

सप्रहार=शस्त्राघातखण्डितदेहः । **सूतः**=द्रोणसारथिः । **प्रविश्ये-**

उदित होनेवाले बारहों सूर्य तो अभी उदित हुए नहीं, प्रलय कालमें चलनेवाले ४९ वायु एक साथ मिल कर तो अभी चले नही, प्रलयकालिक पुष्कर व आवर्त्तक नाम मेघों के गणों से आकाश तो व्याप्त हुआ नहीं, फिर भला महापराक्रमी मेरे पिताजी की मृत्यु कैसे हो सकती है—कहो तो सही ? ॥ ८ ॥

---

१ क्वचिन्न ।

अश्वत्थामा—(विलोक्य) अये ! कथं[1] तातस्य[2] सारथिरश्वसेनः । आर्य ! आर्य !! ननु त्रैलोक्यत्राणक्षमस्य तातस्य सारथिरसि, किं मत्तः शिशुजनात्परित्राणमिच्छसि ? ।

सूतः—(उत्थाय सकरुणं) कुमार ! कुतोऽद्यापि ते तातः ? ।

अश्वत्थामा—(सावेगं) किं तातो[3] नामास्तमुपगतः ? ।

सूतः—अथ किम् ।

अश्वत्थामा—हा तात ! हा तात !! (इति मोहमुपगम्य पतितः[4])।

सूतः—कुमार[5] ! समाश्वसिहि समाश्वसिहि ।

त्यस्य='ब्रूते' इति शेषः । परित्रायतां=परिरक्षतु । इति=इत्यभिधाय ।

[शस्त्रों के प्रहारों से जर्जर घबड़ाया हुआ सूत प्रविष्ट होकर]

सूत—कुमार ! रक्षा कीजिए, रक्षा कीजिए ।

[ऐसा कहकर पाँव पर पड़ता है] ।

अश्वत्थामा—(देखकर) हैं ! यह तो पिताजी के सारथि अश्वसेन हैं !। आर्य ! त्रैलोक्य की रक्षा करने में समर्थ मेरे पिता द्रोणाचार्य के आप सारथि हो । मैं तो तुमारे सामने बालक हूँ । भला पिताजी के रहते तुम्हें मेरे से रक्षा की प्रार्थना करने की आवश्यकता क्यों हो रही है ? ।

सूत—(उठकर बड़े करुण स्वर में) कुँवरजी ! अब आपके पिताजी कहाँ रहे !।

अश्वत्थामा—(बड़े आवेग से) क्या ? पिताजी नहीं रहे ? ।

सूत—हाँ, (नहीं रहे) ।

अश्वत्थामा-हातात ! हातात ! (ऐसा कहकर मूर्च्छित हो गिर पड़ता है)।

सूत—कुँवरजी ! धैर्य धरिए, धैर्य धरिए ।

---

१ क्वचिन्न । २ 'तातसारथि' । ३ 'तात एव नास्ति' ।
४ 'मोहमुपगतः' । ५ 'कुमार' इति क्वचिन्न ।

अश्वत्थामा—(लब्धसंज्ञ उत्थाय[1] सास्र) हा तात ! हा सुत-वत्सल ! हा लोकत्रयैकधनुर्धर ! हा जामदग्न्यास्त्रसर्वस्वप्रति-ग्रहप्रणयिन् ! [क्वासि[1] ! । प्रयच्छ मे प्रतिवचनम्] ।

सूतः—आयुष्मन्[2] ! अलमत्यन्तशोकावेगेन । वीरपुरुषो-चितां विपत्तिमुपगते पितरि त्वमपि तदनुरूपेणैव वीर्येण शोक-सागरमुत्तीर्य सुखी भव ।

अश्वत्थामा—(अश्रूणि प्रमृज्य[3]) आर्य ! कथय कथय, कथं तादृग्भुजवीर्यसागरस्तातोऽपि नामाऽस्तमुपगतः ? ।

अस्तं=नाशम् । मोहं=मूर्च्छाम् । लब्धसञ्ज्ञः=लब्धचेतनः ।

जामदग्न्येति । हे परशुरामाऽस्त्रसर्वस्वप्रतिग्रह (ग्रहण) प्रिय!गृहीतसर्वास्त्रेत्यर्थः। प्रणयी=आग्रहवान् । प्रतिवचनम्=उत्तरम् । प्रयच्छ=देहि । वितर । विपत्तिं=निधनम् । तदनुरूपेण=पितृसदृशेन । प्रमृज्य=प्रोञ्छय । विमुच्येति पाठेऽपि स एवार्थः । आर्य=हे सूत । तादृग्भुजवीर्यसागरः=तादृशातिमानुष-बाहुपराक्रमससुद्रः । नाम इति प्रश्ने । अस्तं=पञ्चताम् ।

अश्वत्थामा—(चैतन्य हो उठकर, आंसुओं की धारा बहाते हुए) हाय पिताजी, आपका मेरे ऊपर कितना स्नेह था, हाय ! आप तीनों लोक में सर्वश्रेष्ठ धनुर्धर थे, आपने परशुरामजी से अद्भुत अस्त्रविद्या को साङ्ग उपाङ्ग सरहस्य पूरा २ अध्ययन किया था । हाय ! आप कहाँ है । बोलिए ! उत्तर तो दीजिए ।

सूत—कुमार ! इस प्रकार अत्यन्त शोक करने से भी अब क्या लाभ है । आपके पिताजी तो वीर गति को प्राप्त हुए है, आप भी उन्ही की तरह पराक्रम-शाली है, धैर्य धर शोक सागर के पार होइए। एव सुख पूर्वक जीवन व्यतीत करिए।

अश्वत्थामा—(आंसू पोंछ कर) आर्य ! (चाचाजी), कहिए—ऐसे महापराक्रम के समुद्र पिताजी भी कैसे मृत्युको प्राप्त हुए ? । कहिए ! ।

---

१ कच्चिन्न । २ 'कुमार' । ३ 'विमुच्य'।

किं शिष्याद्गुरुदक्षिणां गुरुगदां भीमप्रियः प्राप्तवान् ।

सूतः—**शान्तं पापं शान्तं पापम् ।**

अश्वत्थामा—

अन्तेवासिदयालुरुज्झितनयेनासादितो जिष्णुना ? ।

सूतः—**कथमेवं भविष्यति ।**

अश्वत्थामा—

गोविन्देन सुदर्शनस्य निशितं धारापथं प्रापितः ? ।

किमिति । **शिष्यात्**=भीमात् । **गुरुगदां**=गुर्वीं गदां, प्रियो भीमो यस्यासौ भीमप्रियः । 'वा प्रियस्ये'ति प्रियस्य परनिपातः । प्रियभीमसेनः । 'गुरुगदां गुरुदक्षिणां प्राप्तवा'नित्यन्वयः । उत्तरयति सूतः—**शान्तमिति** । ईदृशपापस्य सम्भावनाऽपि न कार्येत्यर्थः । अन्तेवासिनि—अर्जुने दयालुः—**अन्तेवासिदयालुः**=अर्जुनवत्सलः । मे तातः—उज्झितो नयो येनासौ तेन—**उज्झितनयेन**=परित्यक्तविनयेन । **'उज्झितदयेने'**ति सुन्दरः पाठः । **जिष्णुना**=अर्जुनेन । **आसादितः**=आक्रान्तः । हत इति यावत् । उत्तरयति—**कथमिति** । **एवम्**—इत्थम् । **कथं**=केन प्रकारेण । नैवेत्यर्थः । **गोविन्देन**=श्रीकृष्णेन । **सुदर्शनस्य**=स्वचक्रस्य । 'चक्रं सुदर्शनम्' इत्यमरः । **निशितं**=

क्या भीमसेन ने गुरुदक्षिणा में अपने प्यारे गुरुजी का अपनी बड़की गदा से सत्कार किया है ? [अपनी गदा से उन्हें मार दिया है ?] ।

सूत—शिव शिव राम राम । क्या ऐसी बात भी कभी हो सकती है ? ।

अश्वत्थामा—तो क्या उनके प्रियशिष्य अर्जुन ने विनय को त्याग कर अपनें गुरुजी को इस दशामें पहुँचाया है ? । [मारा है ?] ।

सूत—ऐसा कैसे हो सकता है ? ।

अश्वत्थामा—तो फिर क्या भगवान् श्रीकृष्णने अपने तीक्ष्णधारवाले सुदर्शनचक्रका उनको निशाना बनाया ? ।

---

१ 'भीमा' । २ 'गुरुगदाद्भीम' ।
३ क्वचिन्न । ४ 'उज्झितदयेनासा' । ५ 'नियतं' ।

सूतः—एतदपि नास्ति।

अश्वत्थामा—

शङ्के नापदमन्यतः खलु गुरोरेभ्यश्चतुर्थादहम् ॥ ९ ॥

सूतः—कुमार !

एतेऽपि तस्य कुपितस्य महास्त्रपाणेः
किं धूर्जटेरिव तुलामुपयान्ति संख्ये।
शोकोपरुद्धहृदयेन यदा तु शस्त्रं
त्यक्तं तदाऽस्य[1] विहितं रिपुणाऽतिघोरम् ॥ १० ॥

तीक्ष्णम्। धारापथं=धारामार्गम्। प्रापितः=नीतः। 'कि'मिति शेषः। तीक्ष्णधारेण सुदर्शनेन मत्पितुः कण्ठो निकृत्तः किमु वासुदेवेनेति प्रश्नः। खलु इति निश्चये। एभ्यश्चतुर्थात्=एभ्योऽन्यस्मात्पितुरापदं=विपदं, नाहं शङ्के इत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥ ९ ॥

'कुमारे'ति अग्रिमश्लोकेनान्वेति।

एतेऽपीति। महास्त्रपाणेः=ब्रह्मास्त्रपाणेः। कुपितस्य=क्रुद्धस्य। धूर्जटेरिव=हरस्येव। तस्य=त्वत्तातस्य द्रोणाचार्यस्य। सङ्ख्ये=युद्धे। एते=भीमार्जुनवासुदेवाः। किं=किमु। तुलां=सादृश्यम्। साम्यम्। उपयान्ति=गच्छन्ति ?। न गच्छन्तीत्यर्थः। तु=किन्तु। यदा शोकोपरुद्धहृदयेन=पुत्रशोकाक्रान्तमानसेन। शस्त्रम्–आयुद्धम्। त्यक्तं=परित्यक्तम्। तदा=तर्हि। अस्य=द्रोणाचार्यस्य। रिपुणा=शत्रुणा। धृष्टद्युम्नेन। अतिघोरं=नितरां

सूत—यह बात भी नहीं है।

अश्वत्थामा—तो इन तीनों से अतिरिक्त तो संसार में चौथा कोई है ही नहीं जिससे पिताजी के विषय में ऐसी (वधकी) शङ्काकी जासके ? ॥ ९ ॥

सूत—कुमार !

ये सब मिलकरके भी युद्ध में शिवजी के समान पराक्रमी, क्रुद्ध, महास्त्रधारी आपके पिताजी की तुलना नहीं कर सकते। किन्तु जब

१ 'तदैव विहितं'।

अश्वत्थामा—**किं पुनः कारणं शोकस्याख्रपरित्यागस्य वा !।**

सूतः—**ननु कुमार एव कारणम् ।**

अश्वत्थामा—**कथमहमेव नाम[1] ?।**

सूतः—(अश्रूणि विमुच्य) **श्रूयताम् ।**

'अश्वत्थामा हत' इति पृथासूनुना स्पष्टमुक्त्वा
स्वैरं [2]शेषे 'गज' इति किल व्याहृतं सत्यवाचा ।
तच्छ्रुत्वाऽसौ दयिततनयः प्रत्ययात्तस्य राज्ञः
शस्त्राण्याजौ नयनसलिलं [3]चापि तुल्यं मुमोच ॥ ११ ॥

दारुणं शिरश्छेदनरूपं कर्म । विनाशः । विहितं=कृतम् । वसन्ततिलका वृत्तम् ॥ १० ॥

कारणं=शोकशस्त्रत्यागकारणम् । **ननु**=इति निश्चये । 'अहमेवे'त्यस्य 'कारण'मिति शेषः ।

अश्वेति । **सत्यवाचा**=सत्यभाषणव्रतेन । **पृथासूनुना**=कुन्तीपुत्रेण युधिष्ठिरेण । 'अश्वत्थामा हत' **इति**=इत्येवं, **स्पष्टम्**=उच्चैः, **उक्त्वा**=समराङ्गणे द्रोणान्तिकेऽभिधाय, **शेषे**=वाक्यशेषे च, गज इति-**स्वैरं**=मन्दम् , किलेति निश्चये, **अभिहितम्**=उक्तम् । **तच्छ्रुत्वा**=तस्य वाक्यं श्रुत्वा । दयितः प्रियः

उन्होंने शोक में व्याकुल चित्त हो शस्त्रों का त्याग कर दिया उसी समय मौका पाकर शत्रु ने यह भीषण अत्याचार (उनका वध) किया ॥ १० ॥

अश्वत्थामा—आर्य ! पिताजी के शोक व शस्त्र त्याग का क्या कारण था ? ।

सूत—आपही (कारण थे) ।

अश्वत्थामा—मैं कैसे ? ।

सूत—[आसू पोंछ कर] सुनिये—

जब सत्यवादी युधिष्ठिर ने उनके सामने जाकर ऊँचे स्वर में 'अश्वत्थामा मारा गया' ऐसा कह कर उसके अन्त में धीरे से 'हाथी' ऐसा कहा, तब अपने

---

१ कचिन्न ।　　२ 'शेते' ।　　३ 'चेति' ।

अश्वत्थामा—हा तात ! हा सुतवत्सल ! हा वृथा मदर्थपरित्यक्तजीवित ! हा शौर्यराशे ! हा शिष्यप्रिय ! हा युधिष्ठिरपक्षपातिन् ! (इति रोदिति) ।

सूतः—कुमार ! अलमत्यन्तपरिदेवनकार्पण्येन ।

अश्वत्थामा—

श्रुत्वा वधं मम मृषा सुतवत्सलेन[2]
तात ! त्वया सह शरैरसवो विमुक्ताः ।

तनयः पुत्रो यस्यासौ दयिततनयः=पुत्रप्रियः । तस्य=सत्यवाचः । राज्ञः=युधिष्ठिरस्य । प्रत्ययात्=विश्वासात् । आजौ=युद्धे । शस्त्राणि=आयुधानि । नयनसलिलं चापि=अश्रुजलमपि । तुल्यं=सममेव । मुमोच=तत्याज । मन्दाक्रान्ता वृत्तम् ॥ ११ ॥

युधिष्ठिरपक्षपातिन्=युधिष्ठिरप्रिय । अत्यन्तं परिदेवनं-शोकस्तदेव कार्पण्यं-कातरत्वन्तेन=अत्यर्थविलापदैन्येन ।

श्रुत्वेति । हे तात-मृषा=मिथ्यैव, मम=अश्वत्थाम्नः, वधं=हननं,

प्रिय पुत्र के विषय में ऐसी अमङ्गल की बात सत्यवादी युधिष्ठिर के मुख से सुनकर उसपर विश्वास कर उन्होंने आँखों से आंसु व हाथ से शस्त्र-दोनों को एक साथ ही युद्ध भूमि में त्याग दिया ॥ ११ ॥

अश्वत्थामा—हा तात ! हा पुत्रवत्सल ! आपने वृथाही मेरे कारण प्राण दिए । हा शौर्यराशे ! हाय आप अपनें शिष्यों पर बहुत कृपा रखते थे ! । आप युधिष्ठिर के ऊपर जो कृपा किया करते थे उसका फल उसने आपको खूब दिया । हाय ! (इस तरह कहकर रोने लगता है) ।

सूत—कुमार ! आप ऐसे शूरवीर को बालकों की तरह रोना अच्छा नहीं लगता । ज्यादा शोक मत करिए !

अश्वत्थामा—हे पिताजी ! आपने मेरे मरने का झूठा वृत्तान्त सुनकर

---

१ 'देवनया' । २ 'वल्लभेन' ।

जीवाम्यहं पुनरहो ! भवता विनापि
क्रूरेऽपि तन्मयि मुधा तव पक्षपातः ॥ १२ ॥
(इति मोहमुपगतः) ।

[नेपथ्ये]—समाश्वसितु समाश्वसितु कुमारः ।
(ततः प्रविशति कृपः)

कृपः—(सोद्वेगं निःश्वस्य)
धिक्सानुजं कुरुपतिं धिगजातशत्रुं
धिग्भूपतीन्विफलशस्त्रभृतो धिगस्मान् ।

श्रुत्वा, सुतवत्सलेन=पुत्रप्रियेण, भवता शरैः=बाणैः सह, असवः=प्राणा एव, विमुक्ताः=परित्यक्ताः । अहो—इत्याश्चर्ये । अहं पुनः=अहन्तु । भवत विनापि जीवामि=प्राणिमि । तत्=तस्मात् । क्रूरेऽपि=कठोरहृदये, मयि तव मुधा=वृथैव, पक्षपातः=वात्सल्यम् । आसीदिति शेषः । वसन्ततिलका वृत्तम् ॥ १२ ॥

धिगिति । सानुजं=सदुःशासनम् । कुरुपतिं=कुरुनाथं दुर्योधनं धिक् । तस्य शोच्यते इत्यर्थः । अजातशत्रुं=युधिष्ठिरं धिक् । भूपतीन्=राज्ञश्च धिक् ।

पुत्रप्रेम के कारण आपने बाण और प्राण दोनों साथ ही छोड़ दिए । परन्तु आपका सत्यही मरणवृत्तान्त सुनकर भी मैं क्रूरहृदय अभी जी ही रहा हूँ । मुझे धिक्कार है । आप वृथाही मेरे ऐसे क्रूरहृदय स्वार्थी पर इतना प्रेम करते थे ॥ १२ ॥

[ऐसा कह मूर्च्छित हो गिर जाता है] ।
(नेपथ्य में)

कुमार—धैर्य धारण करिए, धैर्य धारण करिए ।
[तब उद्वेगपूर्ण दशा में घबड़ाए हुए कृपाचार्य का प्रवेश] ।

कृप—दुःशासन आदि भाइयों सहित दुर्योधन को तथा युधिष्ठिर को तथा वृथा शस्त्र धारण करने वाले सब राजाओं को भी धिक्कार है, तथा हम लोगों को भी

---

१ 'जीवाम्यहं पुनरथो भवता विमुक्तः' ।
२ 'इति मूर्च्छितः पतति' । ३ 'सूतः समाश्वसितु' ।
४ 'सोद्वेगः कृपः' । ५ क्वचिन्न ।

केशग्रहः खलु तदा द्रुपदात्मजाया
द्रोणस्य चाद्य लिखितैरिव वीक्षितो यैः ॥१३॥

तत्कथं नु खलु वत्सं द्रक्ष्याम्यश्वत्थामानम्। अथ वा हिमवत्सारगुरुचेतसि ज्ञातलोकस्थितौ तस्मिन्न खलु शोकावेगमहमाशङ्के। किन्त्वसदृशं पितुः पराभवमुपश्रुत्य न जाने किं व्यवस्यतीति। अथवा—

विफलं शस्त्रं बिभ्रतीति विफलशस्त्रभृतः, **तान्**=वृथाशस्त्रधारिणः। **अस्मान्**=कृपादीन्। धिक्। कुत एतदत आह—केशेति। **यैः**=अस्माभिः। **लिखितैरिव**=चित्रलिखितैरिव निर्व्यापारैः। खलु—निश्चयेन। **तदा**=पूर्वम्। द्यूतकाले। **द्रुपदात्मजायाः**=द्रौपद्याः। **केशग्रहः**—केशाम्बराकर्षणम्। **वीक्षितः**=विलोकितः। **अद्य च**=सम्प्रति च। **द्रोणस्य**=भगिनीपतेर्द्रोणाचार्यस्य। 'केशग्रहो वीक्षित' इत्यनुषज्यते। वसन्ततिलका वृत्तम् ॥ १३ ॥

कथं=कथङ्कारम्। केन प्रकारेण। **वत्सं**=भागिनेयम्। **हिमवतः**—हिमालयस्य, **यत्सारं**=दार्ढ्यं, बलं वा, तद्वद्गुरु=दृढं चेतो यस्यासौ तस्मिन्। महाशैलसारगौरवान्वितमनसीत्यर्थः। **तस्मिन्**=अश्वत्थाम्नि। **ज्ञातलोकस्थितौ**=विदितजगदवस्थे। **शोकावेगं**=शोकावेशम्। **असदृशम्**=अनुचितम्। केशाकर्षणरूपम्। **किं व्यवस्यति**=किं विधास्यति। 'इति न जाने' इत्यन्वयः।

धिक्कार है जिन्होंने उस समय चित्र लिखित की तरह चुप चाप द्रौपदी का केशग्रह [बाल पकड़ कर खींचना] देखा था, और अब द्रोणाचार्य का केशग्रह चुप चाप देखा ॥ १३ ॥

अब क्या मुख लेकर मैं वत्स अश्वत्थामा को देखूंगा। अथवा हिमालय पर्वत के सारभाग की तरह दृढ उसका चित्त है, संसार की स्थिति को भी वह खूब समझता है, अतः उसे शोक का वेग अधिक नहीं सता सकता है—यह मुझे विश्वास है। परन्तु अपने पिता के अनुचित रूप से तिरस्कार की बात सुनकर वह (अश्वत्थामा) क्या कर बैठेगा सो मैं नहीं जानता। अथवा ठीक भी है—

---

१ 'वत्समद्य'। २ 'किन्तु पितुः परिभवमसदृशमुप'।

एकस्यं[1] तावत्पाकोऽयं दारुणो भुवि वर्तते ।
केशग्रहे द्वितीयेऽस्मिन्नूनं निःशेषिताः प्रजाः ॥१४॥

(विभाव्य[2]) तदयं वत्सस्तिष्ठति । यावदुपसर्पामि ।

(उपसृत्य ससंभ्रमं) वत्स[3] ! समाश्वसिहि समाश्वसिहि[3] ।

अश्वत्थामा—(संज्ञां लब्ध्वा, सास्रम्) हा तात ! हा सकल-भुवनैकगुरो ! । (आकाशे) युधिष्ठिर ! युधिष्ठिर !

आ जन्मनो न वितथं भवता किलोक्तं
न द्वेक्षि यज्जनमतस्त्वमजातशत्रुः ।

एकस्येति । एकस्य=द्रौपदीकेशग्रहस्य । तावत्=प्रथमम् । तावच्छब्द उपक्रमे इति प्राञ्चः । अयं=महाभारतयुद्धरूपः । दारुणः=भयानकः । पाकः=विपाकः । भुवि=पृथिव्याम् । वर्त्तते=प्रवर्त्तते । द्वितीयेऽस्मिन्केशग्रहे=द्रोण-केशाकर्षणे । नूनं-निश्चयेन । प्रजाः=सकला लोकाः । निःशेषिताः=विनष्टा एव । भविष्यन्तीति शेषः ॥ १४ ॥

विभाव्य=नितरां विलोक्य । निर्वर्ण्य । सञ्ज्ञां लब्ध्वा=चेतनां प्राप्य । सास्रं=साश्रु यथा स्यात्तथाऽऽहेत्यर्थः । तात=हे पितः । सकलेति । सर्वलोकैकश्रेष्ठेत्यर्थः । आकाशे=शून्ये एव युधिष्ठिरमुद्दिश्य ब्रवीति ।

आ जन्मन इति । आजन्मः=जन्मप्रभृति । भवता वितथं=मिथ्या ।

एक (द्रौपदी के) केशग्रह का तो यह दारुण परिणाम (महाभारत युद्ध) संसार के सामने ही है । दूसरे द्रोणाचार्यजी के केशग्रह से तो मानों संसार में प्रलय ही मच जाएगा । कोई भी न बच सकेगा ॥ १४ ॥

(अच्छी तरह देखकर) यह अश्वत्थामा खड़ा है, पास में चलूं ।

[पास में जाकर बड़ी त्वरा व घबडाहट से] वत्स ! धीरज धरो धीरज धरो ।

अश्वत्थामा—[होश में आकर आंसू बहाता हुआ] हाय पिताजी ! हे संसार के सर्वश्रेष्ठ आचार्य ! आप कहाँ चले गए । [शून्य में] अहो युधिष्ठिर !

आप जन्म में कहीं झूठ नहीं बोले, आप किसी से द्वेष नहीं करते अतः

---

१ 'एकस्यैव विपाकोऽयं' । २ 'विलोक्य' । ३ क्वचिन्न ।

तातेे गुरौ द्विजवरे मम भाग्यदोषा-
त्सर्वं तदेकपद एव कथं निरस्तम् ? ॥ १५ ॥

सूतः—कुमार ! एष ते मातुलः पार्श्वे शारद्वतस्तिष्ठति ।

अश्वत्थामा—(पार्श्वे विलोक्य सबाष्पं) मातुल ! मातुल !!

गतो येनाद्य त्वं सह रणभुवं सैन्यपतिना
य एकः शूराणां गुरुसमरकण्डूनिकषणः ।

किलेति प्रसिद्धौ । नोक्तं=न भाषितम् । किञ्च त्वं–जनं=कमपि लोकम् । यत्=यतः । न द्वेक्षि=न द्वेषवन्तं करोषि । न विरुणत्सि । अतः=अस्मात्कारणात् । त्वं=भवान् । अजातः शत्रुर्यस्यासौ-अजातशत्रुः=अविद्यमानरिपुः । 'इति लोके भण्यसे' इति शेषः । ताते=मत्पितरि । गुरौ=आचार्ये । द्विजवरे=ब्राह्मणकुलावतंसे । मम भाग्यदोषात्=मद्दौर्भाग्यात् । तत्सर्वं=सत्यभाषित्वाऽजातशत्रुत्वादिकम् । एकपदे=सहसैव । अकस्मादेव । कथं निरस्तं=भवता कथं परित्यक्तम् ? । केन हेतुना मिथ्याभाषणं भवता कृतमित्यर्थः । वसन्ततिलका वृत्तम् ॥ १५ ॥

शारद्वतः=कृपाचार्यः । गत इति । हे मातुल ! येन सैन्यपतिना=सेनापतिना । सह=साकम् । अद्य=अस्मिन्नहनि । त्वं–रणभुवं=युद्धभूमिम् ।

आपका नाम अजातशत्रु है । परन्तु हमारे दुर्भाग्य से मेरे पिता–जो जगत् के गुरु थे, ब्राह्मण थे, उनके लिए तुमने अपनी सत्यप्रियता व अजातशत्रुता आदि सभी गुण सहसा कैसे छोड दिए ? ॥ १५ ॥

सूत—कुमार ! ये आपके मामा श्रीकृपाचार्य आपके पास खड़े हैं ।

अश्वत्थामा—[पार्श्व की ओर देखकर डबडबाई हुई आखों से] मामाजी ! मामाजी ! ।

जो कौरवों के सेनापति थे और जिनके साथ आज आप युद्धभूमि में गए थे, और जो शूरवीरों की बढी हुई युद्ध की खजुवाहट को दूर करने वाले थे, जिनके साथ

---

१ 'आयुष्मन् । ननु' । २ कश्चिन्न ।

परीहासाश्चित्राः सततमभवन्येन भवतः
स्वसुः श्लाघ्यो भर्ता क्व नु खलु स ते मातुल! गतः॥१६॥

कृपः—**परिगतपरिगन्तव्य एव भवान्। तदलमत्यन्तशोकावेगेन।**

अश्वत्थामा—**मातुल! परित्यक्तमेव मया परिदेवनम्। एषोऽहं सुतवत्सलं तातमेवानुगच्छामि।**

कृपः—**वत्स! अनुपपन्नमीदृशं व्यवसितं भवद्विधानाम्।**

सूतः—**कुमार! अलमतिसाहसेन।**

गतः=यातः। यः=यो वै। एकः=एकाकी। शूराणां=वीराणाम्। गुर्वी चासौ समरकण्डूश्च तस्याः निकषणः-गुरुसमरकण्डूनिकषणः=प्रबलयुद्धकण्डूघर्षणः। आसीदिति शेषः। येन च सह भवतः। चित्राः=विचित्राः, परीहासाः=नर्मालापाः। उपहासविलासाः। सततं=निरन्तरम्। अभवन्=भवन्ति स्म। सः-ते स्वसुः=भगिन्याः कृपीदेव्याः। श्लाघ्यः=प्रशंसनीयः। भर्त्ता=पतिः, क्व नु खलु गतः=कथय-क्व नु खलु गतः?। शिखरिणी वृत्तम्॥ १६॥

परिगतः=अवगतः, परिगन्तव्यः-ज्ञातव्यो विषयो येनासौ तथा=ज्ञातसकलज्ञातव्यवृत्तान्तः। अलं=न प्रयोजनम्। परिदेवनं=विलापः। सुतवत्सलं=पुत्रप्रियम्। अनुगच्छामि=म्रिये। अनुपपन्नं=नोचितम्। व्यव-

आपकी नित्य ही नाना प्रकार की हँसी-मजाक हुआ करती थी वे आपके भगिनीपति [मेरे पिता द्रोणाचार्य] कहा गए?॥ १६॥

वत्स! तुम्हें तो ज्ञातव्य सब बातें मालूम ही हो गई हैं। अतः अब ज्यादा शोक व विलाप करना वृथा है, अतः शोक मत करो।

अश्वत्थामा—अच्छा मामाजी! मैं विलाप व शोक करना छोड देता हूँ और अपना प्यारे पिता के पास ही जाता हूँ।

कृप—वत्स! यह बात तुमारे ऐसे वीरों के लिए शोभा नहीं देती है।

सूत—कुमार! ऐसा दुःसाहस मत करो।

१ तदिति क्वचिन्न। २ 'परिदेवितं'। ३ क्वचिन्न। ४ 'आयुष्मन्'।

अश्वत्थामा—आर्य [शारद्वत !] किमुच्यते ?

मद्वियोगभयात्तातः परलोकमितो गतः।
सहिष्ये विरहं तस्य वत्सलस्य कथं पितुः ? ॥ १७ ॥

कृपः—वत्स ! यावदयं संसारस्तावत्प्रसिद्धैवेयं लोकयात्रा यत्-'पुत्रैः पितरो लोकद्वयेऽप्यनुवर्तनीया' इति । पश्य—

निवापाञ्जलिदानेन केतनैः श्राद्धकर्मभिः।
तस्योपकारे शक्तस्त्वं नो जीवन्किमुतान्यथा ॥ १८ ॥

सितं=व्यवसायः । निश्चयः । भवद्विधानां=भवादृशानाम् । इतः=अस्माद्भूलोकात् । अविरहमिति पाठे—सङ्गतिमित्यर्थः ॥ १७ ॥

संसारः=जगत् । 'स्थास्यती'ति शेषः । लोकयात्रा=लोकव्यवहारः । लोकद्वयेऽपि=इहाऽमुत्र च । अनुवर्त्तनीयः=जीवन्पिताऽस्मिन् लोके आज्ञापालनादिनाऽनुवर्त्तनीयः, मृतः पिता परस्मिन् लोकेऽप्यनुवर्त्तनीयः । परलोकेऽनुवर्त्तनप्रकारमाह—निवापेति । निवापाञ्जलिदानेन=जलाञ्जलिप्रदानेन । तर्पणेन । 'पितृदानं निवापः स्यात्' इत्यमरः । केतनैः=गृहैः । तन्निर्माणैः । पितृस्मारकदेवगृहपाठशालामठादिभिरितियावत् । वितानैरिति पाठे—पितृयज्ञादिभिः। श्राद्धकर्मभिः = पार्वणादिश्राद्धाद्यनुष्ठानैः । तस्य=प्रमीतस्य पितुः । उपकारे=

अश्वत्थामा—आर्य ! आप क्या कहते हैं—

मेरे वियोग से मेरे पिता ने प्राण त्याग दिए, ऐसे पुत्रवत्सल पिता के विरह भला मैं कैसे सहन कर सकता हूँ ॥ १७ ॥

कृप—वत्स ! जब तक यह संसार है तब तक यह लोकव्यवहार भी प्रचलित रहेगा कि पुत्रों को इस लोक व परलोक दोनों में अपने पिता का अनुवर्त्तन (आज्ञापालन व हितसाधन) करना चाहिए । देखो—

तिलाञ्जलि देना, तर्पण करना, बहुत द्रव्यव्यय कर वृषोत्सर्ग आदि और्ध्वदेहिक कृत्य करना, श्राद्ध करना आदि क्रियाओं से तुम इस लोक में रहकर भी

---

१ क्वचिन्न । २ 'करोमि विरहं तस्य वत्सलस्य कथं पितुः' । 'करोम्यविरहं तस्य वत्सलस्य सदा पितुः' । ३ 'वितानैः' । ४ 'किं जीवन्' ।

सूतः—आयुष्मन् ! यथैव मातुलस्ते शारद्वतः कथयति तत्तथा।

अश्वत्थामा—आर्य ! सत्यमेवेदम् । किन्त्वतिदुर्वहत्वाच्छोकभारस्य न शक्नोमि तातविरहितः क्षणमपि प्राणान्धारयितुम्। तद्गच्छामि तमेवोद्देशं यत्र तथाविधमपि पितरं द्रक्ष्यामि। (इत्युत्तिष्ठन्खड्गमालोक्य, विचिन्त्य) कृतमद्यापि शस्त्रग्रहण-

उपकृतौ । त्वं नो शक्तः ?=किं त्वं न शक्तः ? । किन्तु शक्त एव । अन्यथा= मृतः सन् । किमुत=इतोऽधिकं किङ्करिष्यसि ? न किमपि । अतो जीवन्नेव त्वमित्थं पितरमनुवर्त्तस्व, अतो मरणव्यवसायं जहीत्याशयः । किं जीवन्निति पाठे-उतान्यथा=अजीवन्वा भवान् । पितरमनु मृतो हि भवान् । किम् ?=इतोऽधिकं किंनु विधास्यति–न किमपीत्यर्थः ॥ १८ ॥

तत्=कृपोक्तम् । तथा=सत्यमेव । 'यदाह शारद्वतः' इति पाठे-'तथैव कुर्वि'ति शेषः । आर्य=सूत । अतिदुर्वहत्वात्=कथमपि सोढुमशक्यत्वात् । तातविरहितः=पितृवियुक्तः । उद्देशं=युद्धस्थानम् । तथाविधमपि=मृतमपि । पितुः शवमपि । इति=इत्युक्त्वा । उत्तिष्ठन्=गन्तुमुत्तिष्ठन् । शस्त्रेति=शस्त्रग्रहणमेव

उनका उपकार व हितसाधन कर सकते हो, मरकर उनके पास जाकर ही क्या कर लोगे ? । या मरने से उनका इस प्रकार उपकार कैसे कर सकोगे ॥ १८ ॥

सूत—आयुष्मन् ! जो कृपाचार्य कह रहे हैं वह बहुत ठीक है, यहाँ रहकर ही आप अपने पिताजी के ऋण से अनृण हो सकते हैं । मर कर नहीं ।

अश्वत्थामा—आर्य ! यह सब ठीक है, परन्तु क्या करूँ मेरे लिए यह शोकभार बहुत असह्य है और मैं पिताजीके विना एकक्षण भी प्राण धारण करने में (जीनेमें) असमर्थ हूँ इसलिए मैं ऐसा कहताहूँ । अस्तु मैं उस युद्धभूमिमें चलना चाहता हूँ जहाँ पिताजीने देह छोड़ा है, और उसी अवस्था में मैं पिताजीको देखना चाहता

१ 'यथाह शारद्वतः' । 'यथा ते मातुलः कथयति तथैवैतत्' ।

२ 'तादृशमपि' । ३ 'उत्तिष्ठन्' । ४ 'अलमद्यापि शस्त्रग्रहणविषया' ।

विडम्बनया । [सास्रमञ्जलिं बद्ध्वा[1]] भगवन् शस्त्र !

गृहीतं येनासीः परिभवभयान्नोचितमपि[2]
प्रभावाद्यस्यासीन्न[3] खलु तव कश्चिन्न विषयः ।
परित्यक्तं तेन त्वमसि सुतशोकान्न तु भया-
द्विमोक्ष्ये शस्त्र ! त्वामहमपि यतः स्वस्ति भवते ॥१९॥

विडम्बना=आत्मवञ्चनम् । निरर्थकं कर्म वा । तयेत्यर्थः । गृहीतमिति । शस्त्र=हे आयुध । येन=द्रोणाचार्येण मत्तातेन । नोचितम्=अनुचितमपि त्वम् । नशब्दस्योचितशब्देन सुप्सुपेति समासः । ब्राह्मणस्य शस्त्रग्रहणं नोचितं, परधर्मत्वात् । परिभवभयात्=पाञ्चालराजद्रुपदकृतपरिभवखेदात् । शत्रुकृत-परिभवभीत्याऽऽपद्धर्मतया । गृहीतमासीः=स्वीकृतमभूः । यस्य=आचार्यस्य । प्रभावात्=सामर्थ्यात् । तव=भवतः । कश्चित्=महेन्द्रादिरपि । नविषयः= अविषयः । अगोचरः । न खलु आसीत्=नैव कश्चिदभूत् । सर्वत्राचार्यस्य शस्त्रमकुण्ठितमासीदित्यर्थः । तेन=गुरुणा । सुतशोकात्=पुत्रशोकात् । नतु भयात्=नैव खलु भयात् । यतः त्वं परित्यक्तमसि= यस्मात्कारणात् त्वं विसृष्टमसि । अतः=अस्मात्कारणात् । अहमपि त्वां=शस्त्रम् । विमोक्ष्ये= परित्यक्ष्यामि । भवते=तुभ्यं । स्वस्ति=कल्याणं भवतु । यथेच्छं गच्छेत्यर्थः । अत्र शस्त्राऽधिष्ठातृदेवता विवक्षणीयेति बोध्यम् । शिखरिणी वृत्तम् ॥ १९ ॥

कष्ट उठता हुआ, खड्ग को देखकर] अब इस शस्त्र (व शस्त्रविद्या) से मुझे क्या प्रयोजन है ? । [आसूँ बहाता हुआ हाथ जोडकर] हे भगवन् शस्त्र !

जिन्होंने अपमान के कारण क्रुद्ध हो तुमको अनुचित होते हुए भी धारण किया था, जिनके प्रभाव से तुम सर्वत्र (देव असुर मनुष्यों में) अकुण्ठित गति थे, उन्होंने भी पुत्रशोक से-डर से नहीं-तुमको छोड दिया है अतः मैं भी हे शस्त्र ! तुम्हें छोडता हूँ , तुम्हारा कल्याण हो ॥ १९ ॥

१ कश्चिन्न । २ 'नोचितमिति' । ३ 'स्याभून्न खलु' ।

[इति त्यक्तुमिच्छति][1]।

[नेपथ्ये—]

भो भो राजानः! 'भवन्तस्तत्रभवतः क्षत्रियगुरोर्भारद्वाजस्याऽसदृशं परिभवममुना नृशंसेन प्रयुक्तमुपेक्षन्ते'!।

अश्वत्थामा—(आकर्ण्य सक्रोधं शनैःशनैः शस्त्रं स्पृशन्)

[2]किं किं गुरोर्भारद्वाजस्य परिभवः!।

[पुनर्नेपथ्ये—]

आचार्यस्य त्रिभुवनगुरोर्न्यस्तशस्त्रस्य शोका-
द्द्रोणस्याजौ नयनसलिलक्षा[3]लितार्द्राननस्य।

भारद्वाजस्य=द्रोणाचार्यस्य। परिभवं=वधम्। केशाकर्षणं वा। अमुना=धृष्टद्युम्नेनानेन। नृशंसेन=क्रूरेण। 'नृशंसो घातुकः क्रूरः' इत्यमरः। प्रयुक्तं=कृतम्।

आचार्यस्येति। आचार्यस्य=धनुर्वेदाचार्यस्य। त्रिभुवनगुरोः=त्रैलोक्यश्रेष्ठस्य। शोकात्=पुत्रशोकात्। न्यस्तं शस्त्रं येनासौ तस्य=परित्यक्तशस्त्रस्य। किञ्च-नयनसलिलेन=नेत्राम्बुना। क्षालितं=धौतम्, अत एव आर्द्रं=स्तिमितम्, आननं=मुखं यस्य तस्य=अश्रुक्षालितक्लिन्नवदनस्य। द्रोणस्य=

[इस प्रकार शस्त्र को छोडना चाहता है]।

[नेपथ्य में—]

हे राजाओं! आप लोग परम पूज्य क्षत्रियगुरु भगवान् द्रोणाचार्य का अनुचित रूप से इस दुष्ट द्वारा किया गया अपमान कैसे सहन कर रहे हो?।

अश्वत्थामा—[सुनकर, बडे क्रोध से, तलवार को जोर से पकडता हुआ] क्या गुरु द्रोणाचार्य का अपमान!

[पुनः नेपथ्य में—]

आचार्य व त्रिभुवन के गुरु द्रोण ने जब शोक से शस्त्र का त्याग कर दिया था, और जिनके आँखों से आसुओं की धारा बहकर मुख को धो रही थी उस समय

१ इत्युत्सृजति। २ क्वचिन्न। ३ 'क्षालितार्द्राननस्य'।

मौलौ पाणिं पलितधवले न्यस्य कृत्वा नृशंसं
धृष्टद्युम्नः स्वशिबिरमयं याति सर्वे सहध्वम् ॥ २० ॥
(सक्रोधं सकम्पं च कृपसूतौ दृष्ट्वा) किं नामेदम् ?—
प्रत्यक्षमात्तधनुषां मनुजेश्वराणां
प्रायोपवेशसदृशं व्रतमास्थितस्य ।
तातस्य मे पलितमौलिनिरस्तकाशे
व्यापारितं शिरसि शस्त्रमशस्त्रपाणेः ! ॥ २१ ॥

भारद्वाजस्य । पलितेन धवले—पलितधवले=जराकृतशौक्ल्येन श्वेते । **मौलौ**=शिरसि । **पाणिं**=हस्तं । **न्यस्य**=निधाय । **नृशंसं**=क्रूरं कर्म । शिरः-कर्त्तनरूपम् । वधं वा कृत्वा । 'विनाशेऽपि नृशंसः स्या'दिति हारावली । अयं **धृष्टद्युम्न**=पाञ्चालराजतनयो धृष्टद्युम्नः । **स्वशिबिरं**=स्वसेनासन्निवेशं । **याति**=गच्छति । **सर्वे**=सर्वे क्षत्रियाः । **सहध्वं**=स्वगुरुतिरस्कारं सहध्वम् । तत्तिर-स्कारजं खेदं भजध्वमित्यर्थः । सर्वाननादृत्याऽयं स्वशिबिरं प्रयाति, पश्यतेति यावत् । मन्दाक्रान्ता वृत्तम् ॥ २० ॥

किं नामेदं=किं सत्यमेतत् ? । किमिदं जातम् ? । अस्याग्रिमश्लोकेना-न्वयो बोध्यः । **प्रत्यक्षमिति** । आत्तं धनुर्यैस्तेषाम्—**आत्तधनुषां**=गृहीत-कोदण्डानाम् । **मनुजेश्वराणां**=राज्ञाम् । **प्रत्यक्षं**=सन्मुखम् । प्रायोपवेशेन सदृशस्तं—**प्रायोपवेशसदृशं**=मरणान्ताऽनशनतुल्यम् । **व्रतं** = नियमम् । **आस्थितस्य**=संश्रितवतः । **आरूढस्य** । **अशस्त्रपाणेः**=त्यक्तशस्त्रस्य । **मे**=मम । **तातस्य**=पितुः । **पलितेन** मौलिना निरस्ताः काशा येन **तस्मिन्**=जराकृत-

उनके वृद्धावस्था से सफेद हुए केशों पर हाथ रखकर उनपर नृशंस अत्याचार कर (उनका शिर काटकर) यह धृष्टद्युम्न अपने शिबिर में जा रहा है सब लोग (छाती पर पत्थर रखकर) सहन करें ॥ २० ॥

अश्वत्थामा—[क्रोध से कांपता हुआ, कृप और सूत की ओर देखकर] क्या यह बात सच है कि—(धृष्टद्युम्न ने) सब शस्त्रधारी राजाओं के देखते हुए

१ 'शमना' । २ 'निमीलिताक्षे' ।

कृपः—वत्स ! एवं किल जनः कथयति ।

अश्वत्थामा—[सूतं प्रति] किं तातस्य दुरात्मना परिमृष्टम-भूच्छिरः ? ।

सूतः—(सभयम्) कुमार ! आसीदयं तस्य तेजोराशे-र्देवस्य नवः परिभवावतारः ।

अश्वत्थामा—हा तात ! हा पुत्रप्रिय ! मम मन्दभागधेयस्य कृते शस्त्रपरित्यागात्तथाविधेन क्षुद्रेणाऽऽत्मा परिभावितः । (विचिन्त्य) अथवा—

शौक्ल्यवत्केशाधीरितकाशशोभं । 'चूडा किरीटं केशाश्च संयता मौलयस्त्रयः' इत्यमरः । शिरसि=मस्तके । शस्त्रं=खड्गः । व्यापारितं=प्रयुक्तं किमु ? । किं सत्यमेतदिति प्रश्नः । वसन्ततिलका वृत्तम् ॥ २१ ॥

एवं=सत्यमेवैतदिति । जनः=लोकः कथयतीत्यर्थः । दुरात्मना=दुष्टेन धृष्टद्युम्नेन । परिमृष्टं-संस्पृष्टम् । तस्य = द्रोणस्य । तेजोराशः=तेजोनिधेः । देवस्य=दिव्यानुभावस्य । नवः=प्रत्यग्रः । परिभवावतारः=अनादरप्रसङ्गः । सत्यं तेन तच्छिर आक्रान्तमित्यर्थः । मन्दभागधेयस्य=मन्दप्रारब्धस्य । अपुण्यात्मनः । तथाविधेन=क्रूरेण । क्षुद्रेण=पापेन । परिभावितः= तिरस्कारितः ।

हूँ [ऐसा शस्त्ररहित, अनशन की तरह व्रत धारण किए हुए रोते हुए मेरे वृद्ध पिता के सफेद बालों को पकड कर उनका शिर काट लिया ? ॥ २१ ॥

कृप—वत्स ! लोग तो ऐसा ही कहते हैं ।

अश्वत्थामा—[सूत के प्रति] क्या पिताजी के शिर पर उस दुरात्मा ने हाथ लगाया था ? ।

सूत—[डरता हुआ] कुमार ! इस प्रकार का अपमान आपके महा-पराक्रमी पिताजी का पहिल ही पहल (इस पापी द्वारा) हुआ है ।

अश्वत्थामा—हाय पिताजी ! आपने पुत्रप्रेम के कारण मुझ मन्दभाग्य के लिए शस्त्र छोडकर ऐसे नीच से अपना अपमान कराया । अथवा—

१ लुप्तं स्यात् । २ 'मन्दभाग्यस्य' । ३ कचित्र ।

परित्यक्ते देहे रणशिरसि शोकार्त्तमनसा[1]
शिरः श्वा काको वा द्रुपदतनयो वा परिमृशेत् ।
असङ्ख्यातास्त्रौघद्रविणमदमत्तस्य च रिपो-[2]
र्ममैवायं पादः शिरसि निहितस्तस्य सहसा[3] ॥ २२ ॥

परित्यक्त इति । (हे तात !) रणशिरसि=रणमूर्ध्नि । शोकार्त्तमनसा= शोकोपहतचेतसा त्वया । शोकान्धेतिपाठे—शोकविमूढचित्तेनेत्यर्थः । देहे= शरीरे । परित्यक्ते=विमुक्ते सति । (तव) शिर =मस्तकम् । श्वा=कुक्कुरः । काको वा=करटा वा । द्रुपदतनयो वा=धृष्टद्युम्नो वा । श्वकाकतुल्य इत्यर्थोऽभिप्रेतः । परिमृशेत्=संस्पृशेत् । किंनामैतावता भवतस्तत्र परिभवः । केचित्तु—परित्यक्ते=परित्यक्तुमारब्धे सतीत्यर्थमाहुः । स्फुरन्ति–देदीप्यमानानि यानि दिव्यास्त्राणि, तेषामोघः समूहः, स एव द्रविणं–धनम् , तेन यो मदो—गर्वः, तेन मत्तस्य=उन्मत्तस्य । तस्य=पाञ्चालपुत्रस्य । रिपोः= शत्रोर्धृष्टद्युम्नस्य । शिरसि । अयं=पादः=अयं मे चरणः । सहसा=वेगेन । निहितः=मया निक्षिप्तः । भविष्यतीति शेषः । यद्वा–तस्य मदमत्तस्य रिपोः पाद एव मम शिरसि निहित इत्यन्वयः । मम पितुः शिरसि करो न तेन निहितः किन्तु मच्छिरसि पाद एव निक्षिप्त इति यावत् । स्फुरद्दिव्येत्यादि स्त्रस्य विशेषेणं वा। 'निहितस्तस्य नु कर'इति पाठेऽपि–तस्य मत्पितुः शिरसि करो न किन्तु मच्छिरसि पाद एवेत्यर्थः । शिखरिणी वृत्तम् ॥ २२ ॥

शोकातुर हो जब उन्होंने युद्धस्थल में अपना शरीर त्याग दिया तब उनके शिर को कुत्ता या कौवा या धृष्टद्युम्न कोई भी छुए उनके लिए तो बराबर है। परन्तु बडे दिव्य अस्त्रों के कारण घमण्ड में चूर्ण हुए मेरे ही शिर पर यह शत्रु के पैर का आघात लगा है, (अर्थात् मेरे पिता के सिर पर उसने हाथ क्या लगाया है मेरे ही शिर पर यह लात मारी है) ॥ २२ ॥

१ 'शोकान्धमनसा' । 'मनसः' ।
२ 'स्फुरद्दिव्यास्त्रौघद्रविणमदमत्तस्य च रिपोः । ३ 'निहितस्तस्य नु करः ।

आः दुरात्मन्पाञ्चालापसद !
तातं शस्त्रग्रहणविमुखं निश्चयेनोपलभ्य
त्यक्त्वा शङ्कां खलु विदधतः पाणिमस्योत्तमाङ्गे ।
अश्वत्थामा करधृतधनुः पाण्डुपाञ्चालसेना-
तूलोत्क्षेपप्रलयपवनः किं न यातः स्मृतिं ते ? ॥ २३ ॥

युधिष्ठिर युधिष्ठिर ! अजातशत्रो, अमिथ्यावादिन्, धर्मपुत्र ! सानुजस्य ते किमनेनापकृतम् ? ।

अथ वा किमनेनाऽलीकप्रकृतिजिह्मचेतसा ।

पाञ्चालापसद=नीच धृष्टद्युम्न । तातमिति । शस्त्रग्रहणे विमुखम्-उदासीनं, तातं मत्पितरम्, निश्चयेन । उपलभ्य=ज्ञात्वा, शङ्कां=शत्रुकृतमारणादिशङ्काम् । त्यक्त्वा=विहाय। निश्शङ्कम् । अस्य=तातस्य।खलु-निश्चयेन। उत्तमाङ्गे=शिरसि । उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः । पाणिं=हस्तं । विदधतः=निक्षिपतः । ते=तव । करधृतधनुः=हस्तधृतकोदण्डः। पाण्डूनां पाञ्चालानां च सेना एव तूलं, पिचुः तस्योत्क्षेपे-ऊर्ध्वं क्षेपे प्रलयपवन इव-पाण्डुपाञ्चालसेनातूलोत्क्षेपप्रलयपवनः=पाण्डवद्रुपदसेनातूलमहावातः । अश्वत्थामा=अहम् । स्मृतिं=स्मरणं । किं न यातः=किं नायातोऽस्मि ? । मन्दाक्रान्ता वृत्तम् ॥ २३ ॥

सानुजस्य=सभ्रातृवर्गस्य । अनेन=गुरुणा । अलीका प्रकृतिर्यस्यासौ अलीकप्रकृतिः, स चासौ जिह्मचेताश्च-अलीकप्रकृतिजिह्मचेताः, तेन ।

अरे दुष्ट नीच पाञ्चाल धृष्टद्युम्न !

निश्चय रूप से शस्त्र के त्याग का हाल जानकर मेरे पिता के शिर पर निर्भय हो हाथ लगाते समय तेरे को धनुर्धारी, पाण्डव पाञ्चाल सेनारूपी रूई के लिए प्रलयपवन के समान यह अश्वत्थामा क्या याद नहीं आया था ? ॥ २३ ॥

हे युधिष्ठिर ! हे अजातशत्रो ! हे सत्यप्रतिज्ञ ! हे धर्मपुत्र ! भला आपका या आपके भाइयों का मेरे पिताजीनें क्या बिगाडा था ? ।

(मन ही मन) अथवा—यह युधिष्ठिर तो बड़ा कपटी व भीतर का कुटिल है, इससे क्या कहना है । [अच्छा तो—]

अर्जुन ! अर्जुन ! सात्यके ! सात्यके ! बाहुशालिन्वृकोदर ! माधव ! युक्तं नाम भवतां सुरासुरमनुजलोकैकधनुर्धरस्य द्विजन्मनः परिणतवयसः सर्वाचार्यस्य विशेषतो मम पितुरमुना द्रुपदकुलकलङ्केन मनुजपशुना स्पृश्यमानमुत्तमाङ्गमुपेक्षितुम् ? । अथ वा सर्व एवैते पातकिनः, किमेतैः ।

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभि[२]र्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥ २४ ॥

मिथ्यास्वभावेन, कुटिलचित्तेन चेत्यर्थः । बाहुशालिन्=सुबाहो । महापराक्रमेत्यर्थः । सुरासुरमनुजलोकेषु एकधनुर्धरस्य=देवासुरमनुष्यलोकमुख्यधनुर्धरस्य । विशेषतो द्विजन्मनः=ब्राह्मणस्य । परिणतं वयो यस्यासौ परिणतवयसः=वृद्धस्य । सर्वाचार्यस्य=सकललोकगुरोः । विशेषात्=विशेषतः । उत्तमाङ्गं स्पृश्यमानमुपेक्षितुं भवतां किं युक्तं नामेत्यन्वयः ।

एते=कृष्णादयः ।

कृतमिति । मनुजपशुभिः=मनुष्यपशुभिः । निर्मर्यादैः=सत्पुरुषमर्यादामतिक्रान्तैः । उदायुधैः=गृहीतशस्त्रैः । यैर्भवद्भिः=अर्जुनादिभिः । इदं गुरु पातकं=महदिदं घोरं पापम् । गुरुवधो वा । कृतम् । अनुमतं । दृष्टं=

हे अर्जुन ! हे सात्यके ! हे प्रचण्ड बाहुबलशालिन् भीमसेन ! । हे कृष्ण ! आप लोगों के सामनें—सकल देव असुर मनुष्य आदि में सर्वश्रेष्ठ धनुर्धर, ब्राह्मण, वृद्ध, सबके आचार्य, विशेषतः मेरे पिता द्रोणाचार्य के शिर पर द्रुपद के कुलकलङ्क, मनुष्यपशु इस धृष्टद्युम्न नें हाथ लगाया और आप लोगों नें उसकी उपेक्षा करदी । उसे कुछ भी नहीं कहा ! ।

अथवा ये सब (अर्जुन भीम कृष्ण आदि भी) इस पाप में लिप्त हैं अतः इनसे भी क्या कहना है ।

जिन शस्त्रधारी मनुष्यपशु तुम लोगोंनें मर्यादारहित हो इस गुरुवधरूपी

---

१ क्वचिन्न । २ 'पतिभिः' ।

कृपः—**वत्स ! किं न संभाव्यते भारद्वाजतुल्ये बाहुशालिनि दिव्यास्त्रग्रामकोविदे भवति ।**

अश्वत्थामा—**भो भोः ! पाण्डवमत्स्यसोमकमागधाद्याः क्षत्रियापसदाः !**

पितुर्मूर्ध्नि स्पृष्टे ज्वलदनलभास्वत्परशुना
कृतं यद्रामेण श्रुतिमुपगतं तन्न भवताम् ?।

विलोकितम् । उपेक्षितम् । **नरकरिपुणा**=नरकासुरवैरिणा वासुदेवेन । **सार्धं**=सह । **सभीमकिरीटिनां**=सभीमसेनार्जुनानाम् । **तेषां**=सर्वेषां पापिनाम् । **असृङ्मेदोमांसैः**=रुधिरवसामांसैः। अयमहं सोऽहमश्वत्थामा। **दिशां**=काष्ठानाम्। **बलिम्**=उपहारम् । 'बलिः पूजोपहारयोः' इति शाश्वतः । **करोमि**=द्राग्रेव करिष्यामि। सर्वान्निहनिष्यामि । हरिणी वृत्तम् ॥ २४ ॥

भारद्वाजतुल्ये=द्रोणतुल्यपराक्रमे । **बाहुशालिनि**=बाहुपराक्रमशोभिते । **दिव्येति** । ब्रह्मास्त्रादिदिव्यास्त्रजालमहापण्डिते इत्यर्थः । **सोमकाः**=क्षत्रियविशेषाः । **पितुरिति** । **पितुः**=जमदग्नेः, **मूर्ध्नि** = शिरसि । **स्पृष्टे** = संस्पृष्टे सति । ज्वलंश्चासौ अनलश्च तद्वद्भास्वान् परशुर्यस्यासौ **तेन**=प्रदीप्ताग्निभास्वरपरशुना । **रामेण**=परशुरामेण । **यत्**=यत्कर्म । **एकविंशतिवारं** क्षत्रियवधात्मकं कर्म । **तद्भवतां श्रुतिं**=श्रवणपथम् । **नोपगतं**=न यातं

पातक को किया है, वा उसमें अपनी अनुमति दी है, या उसे चुप चाप खडे हो देखा भी है, कृष्ण भीम अर्जुन सहित उन सबके रुधिर मांस मेदा व हड्डियों से मैं दिशाओं की बलि करूंगा। अर्थात् उन सबको नष्ट कर दूंगा ॥ २४ ॥

कृपाचार्य—वत्स ! आप अपने पिता के समान ही पराक्रमी व शस्त्रास्त्र के प्रचण्ड ज्ञाता है, आप सब कुछ कर सकते हैं। आपके लिए यह क्या कठिन है।

अश्वत्थामा—अरे पाण्डव, मत्स्य, सोमक, मागधेयवंशी दुष्ट क्षत्रियो !

अपनें पिताके शिर का दुष्ट क्षत्रिय सहस्रबाहु द्वारा स्पर्श किये जानेपर अग्नि की तरह प्रदीप्त परशु के धारण करने वाले भगवान् परशुरामजी नें जो कुछ किया था [२१ वार पृथ्वी पर के क्षत्रियों को मारा था] वह तो तुम लोगों ने सुनाही

१ 'मागधेयाः' ।

किमद्याश्वत्थामा तदरिरुधिरासारविघसं
न कर्म क्रोधान्धः प्रभवति विधातुं रणमुखे ?॥ २५॥

(सूतमुद्दिश्य) सूत ! गच्छ त्वं सर्वोपकरणैः साङ्ग्रामिकैः सर्वायुधैरुपेतं महाहवलक्षणं नामाऽस्मत्स्यन्दनमुपनय।

सूतः—यदाज्ञापयति कुमारः। (इति निष्क्रान्तः)।

कृपः—वत्स ! अवश्यप्रतिकर्तव्येऽस्मिन्दारुणे निकाराग्नौ

किम् ?। अद्य=सम्प्रति। अरिरुधिराणामासारः-वेगवान् वर्षः। 'आसारो वेगवान् वर्षः' इति हैमः। 'धारासम्पात आसारः' इत्यमरश्च। स एव विघसो यज्ञशेषो यत्र तत्–अरिरुधिराऽऽसारविघसं=शत्रुरुधिरधारासम्पातयज्ञशेषान्वितम्। तद्रुधिरैः पितॄणां तर्पणमितियावत्। 'अमृतं विघसो यज्ञशेषभोजनशेषयोः' इति कोशः। तत्कर्म=क्षत्रियवधरूपं कर्म। रणमुखे=युद्धे। क्रोधान्धः अश्वत्थामा–द्रौणायनिरयम्। किं विधातुं=कर्त्तुम्। न प्रभवति=न शक्तोऽस्ति?। अपि तु शक्त एव। शिखरिणी वृत्तम्॥ २५॥

साङ्ग्रामिकैः=युद्धोचितैः। उपेतं=सहितम्। महाहवलक्षणं=महायुद्धोचितम्। आहितलक्षणमितिपाठे–धृतध्वजादिचिह्नमित्यर्थः। उपनय=आनय। यत्=यथा। आज्ञापयति=आदिशति। 'तथा करोमी'ति शेषः। निकाराग्नौ=परिभवाग्नौ। 'निकारः स्यात्परिभवः' इति कोशः। अवश्यप्रति-

होगा। क्रोध से अन्धा हुआ मैं अश्वत्थामा भी युद्धमें उसी प्रकार शत्रुओं के रुधिर की प्रबल धारा से क्या पितरों का तर्पण नहीं कर सकता हूँ ?॥ २५॥

हे सूत! तुम जाओ और मेरा सब उपकरणों व आयुधों के सहित युद्धोपयोगी (महाहवलक्षण) रथ तैयार करके लाओ।

सूत—जो आज्ञा आपकी आज्ञा।

[ऐसा कह कर जाता है]।

कृप—वत्स ! यह जो हम लोगों का परिभव व तिरस्कार हुआ है, इस

१ कचिन्न। २ 'उपाहर'। ३ 'परिभवाग्नौ'।

सर्वेषामस्माकं कोऽन्यस्त्वामन्तरेण शक्तः प्रतिकर्तुम् । [किन्तु]—

अश्वत्थामा—**किमतः परम् ? ।**

कृपः—**सैनापत्येऽभिषिच्य भवन्तमिच्छामि समरभुवमवतारयितुम् ।**

अश्वत्थामा—**मातुल ! परतन्त्रमिदमकिंचित्करं च ।**

कृपः—**वत्स ! न खलु परतन्त्रं नाकिंचित्करं च । पश्य—**

भवेदभीष्ममद्रोणं धार्तराष्ट्रबलं कथम् ।
यदि तत्तुल्यकक्षोऽत्र भवान्धुर्यो न युज्यते ॥ २६ ॥

कर्त्तव्ये=अवश्यप्रतिविधातव्ये अवश्यशोधनीये । **सर्वेषामस्माकम्**=सकलानामप्यस्माकं मध्ये । **त्वामन्तरेण**=त्वां विना । **प्रतिकर्त्तुं**=प्रतिविधातुम् । सेनापतेः कर्म भावो वा सैनापत्यं, तस्मिन्-**सैनापत्ये**=सेनापतिपदे । **परतन्त्रं**=पराधीनम् । दुर्योधनाधीनम् । **अकिञ्चित्करं**=तुच्छम् । निरर्थकं वा । **न खलु**=नैव । **भवेदिति** । **अभीष्मं**=भीष्मशून्यम् । **अद्रोणं**=द्रोणरहितम् । धार्त्तराष्ट्राणां धृतराष्ट्रस्येदं वा बलं-**धार्त्तराष्ट्रबलं**=दुर्योधनसैन्यम् । **कथं भवेत्**=कथं तिष्ठेत् ? । यदि **तत्तुल्यकक्षः**=भीष्मद्रोणतुल्यश्रेणिः । तत्तुल्यकर्मेति पाठे-तत्तुल्यपराक्रम इत्यर्थः । **भवान्**=त्वम् ।

अपमान रूपी अग्नि का अवश्य प्रतीकार करना है (इसका बदला लेना है) । परन्तु तुमारे विना किसकी शक्ति है कि वह इसका बदला चुका सके । परन्तु...... ।

अश्वत्थामा—तो फिर परन्तु क्या ? [आप क्या चाहते हैं ?]

कृप—अतः मैं आपको कौरव सेना का सेनापति बनाकर युद्धभूमि में उतारना (ले चलना) चाहता हूँ ।

अश्वत्थामा—मामाजी ! यह तो पराधीन बात है, और इससे विशेष कुछ लाभ हानि भी नहीं है अतः यह व्यर्थ है ।

कृप—वत्स ! यह परतन्त्र व व्यर्थ नहीं हैं । देखो—

यदि भीष्म व द्रोण की समान पराक्रम वाले आप सेना के सञ्चालन का भार

१ कश्चिन्न ।　　२ 'अभिषिक्तं भवन्तं ।

३ 'धृतराष्ट्र' ।　　४ 'तत्तुल्यकर्मोऽत्र भवान् धुरि' ।

कृतपरिकरस्य भवादृशस्य त्रैलोक्यमपि न क्षमं परिपन्थीभवितुं किं पुनर्यौधिष्ठिरं[1]बलम्। तदेवं मन्ये परिकल्पिताभिषेकोपकरणः कौरवराजो नचिरात्त्वामेवाभ्युदीक्षमाणस्तिष्ठतीति।

अश्वत्थामा--**यद्येवं त्वरते मे परिभवानलदह्यमानमिदं चेतस्तत्प्रतीकारजलावगाहनाय। तदहं गत्वा तातवधविषण्ण-**

अत्र=धार्त्तराष्ट्रबले। धुरं वहति-**धुर्यः**=धूर्वहः। **न युज्यते**=न नियुज्यते। इदानीं त्वन्नियोगं विना धार्त्तराष्ट्रबलं विशीर्णमेव स्यादित्याशयः॥ २६॥

कृतपरिकरस्य=कृतसंनाहस्य। कृतपरिवारस्य। कृतपुरस्कारस्य। सेनापतित्वमास्थितस्य। 'भवेत्परिकरो व्राते पर्यङ्कपरिवारयोः। प्रगाढगात्रिकाबन्धे विवेकारम्भयोरपि' इति विश्वः। **परिपन्थीभवितुं**=विपक्षीभवितुम्। संमुखे स्थातुम्। **यौधिष्ठिरं बलं**=पाण्डवसैन्यम्। परिकल्पितानि अभिषेकस्योपकरणानि येनासौ तथा=सज्जीकृतसैनापत्याभिषेकसामग्रीकलापः। 'त्वामेवाभ्युदीक्षमाणस्तिष्ठतीति मन्ये' इत्यन्वयः। **अभ्युदीक्षमाणः**=प्रतीक्षमाणः। **यद्येवं**=यदि सत्यमेतत्तर्हि। परिभव एव अनलो वह्निः। तेन दग्धं **चेतः**=चित्तम्। **तदिति**। परिभवानलप्रतीकाररूपे जलेऽवगाहनं मज्जनं,

---

न उठावेंगे तो दुर्योधन की सेना—जिसमें से भीष्म व द्रोण ऐसे महान् सेनापति उठ गए हैं—की क्या दशा होगी ? ॥ २६ ॥

यदि आप मनमें ठानलें और कमर कसलें तो फिर त्रैलोक्य भी आपका सामना नहीं कर सकता, युधिष्ठिर की सेना की तो बात ही क्या है ?। और मैं जहाँ तक समझता हूँ–महाराज दुर्योधन भी सेनापति के अभिषेक की सामग्री लिए हुए आपकी ही प्रतीक्षा बहुत देर से कर रहे हैं।

अश्वत्थामा—यदि ऐसी बात है तो ठीक है अपमान की भीषण ज्वाला से जला हुआ मेरा मन शीघ्रही प्रतीकार रूपी जलमें स्नान करना चाहता है (बदला लेनेको उतावला होरहा है)। अतः मैं चलकर पिताजी के वध से

---

१ 'युधिष्ठिरबलम्'।

मानसं कुरुपतिं सैनापत्यस्वयङ्ग्रहणप्रणयसमाश्वासनया मन्दसन्तापं करोमि ।

कृपः—वत्स ! एवमिदम् । अतस्तमेवोद्देशं गच्छावः ।

[इति परिक्रामतः] ।

(ततः प्रविशतः कर्णदुर्योधनौ[1]) ।

दुर्योधनः—अङ्गराज !

तेजस्वी रिपुहतबन्धुदुःखपारं
बाहुभ्यां व्रजति धृतायुधप्लवाभ्याम् ।

स्नानमिति यावत् । तस्मै—त्वरते=त्वरां करोति ।

तातस्य वधेन विषण्णं-खिन्नं मानसं-चित्तं यस्यासौ तम् । कुरुपतिं= कुरुराजं दुर्योधनम् । सैनापत्यस्य यत्स्वयं ग्रहणं=स्वयं स्वीकारः, तत्र तस्य वा यः प्रणयः–याच्ञा, तन्मयी–तत्प्रचुरा या समाश्वासना तया । मन्दसन्तापं=लघुसन्तापम् । गत्वा तं स्वयमेव सैनापत्यं याचे इति यावत् । 'प्रणयास्त्वमी । विस्रम्भयाच्ञाप्रेमाणः' इत्यमरः । एवमिदं=युक्तमेवैतत् । उद्देशं=प्रदेशम् ।

अङ्गराज=हे कर्ण । तेजस्वीति । तेजस्वी=पराक्रमी । असहनः । धृतं यदायुधं,तदेव प्लवो याभ्यां ताभ्यां–धृतायुधप्लवाभ्यां=गृहीतशस्त्रोडुपा-

---

दुःखित चित्त राजा दुर्योधन को—उनसे सेनापति पद पर अपने अभिषेक की स्वयं ही प्रार्थना करके उन्हें धीरज दे प्रसन्न करता हूँ ।

कृप—वत्स ! बहुत ठीक है । चलो जहां दुर्योधन बैठा है वही चलें ।

(दोनों जाते हैं) ।

(तब कर्ण और दुर्योधन प्रवेश करते हैं)

दुर्योधन—हे अङ्गराज (हे कर्ण) !

तेजस्वी पुरुष तो शत्रुद्वारा किए गए अपने बन्धु बान्धवों के वध के वृत्तान्त को सुनकर उस दुःखरूपी समुद्र को आयुध सहित बाहुरूपी जहाज की सहायता से पार करता है, अर्थात् अपने बन्धु के वध का बदला तेजस्वी पुरुष शस्त्र की सहा-

---

१ प्रविशति 'राजा कर्णश्च' ।

आचार्यः सुतनिधनं निशम्य सङ्ख्ये
किं शस्त्रग्रहसमये विशस्त्र आसीत् ? ॥ २७ ॥

अथवा सूक्तमिदमभियुक्तैः 'प्रकृतिर्दुस्त्यजे'ति । यतः शोकान्धमनसा तेन विमुच्य क्षत्रधर्मकार्कश्यं द्विजातिधर्मसुलभो दैन्यपरिग्रहः[1] कृतः ।

कर्णः—राजन् ! कौरवेश्वर ! न खल्विदमेवम् ।[2]

दुर्योधनः—कथं तर्हि[3] ? ।

भ्याम् । 'उडुपं तु प्लवः कोलः' इत्यमरः । बाहुभ्यां=भुजाभ्याम् । रिपुभिर्हतेन बन्धुना तस्य वा यद्दुःखं स एव सागरस्तस्य पारं=परतीरम् । व्रजति=याति । शस्त्रेणैव शत्रून् हत्वा हतस्वबन्धुशोकं त्यजतीत्यर्थः । निशम्य=श्रुत्वा । शस्त्रग्रहसमये=शस्त्रग्रहणोचितेऽपि काले । किं=किमिति । कस्माद्धेतोः । विशस्त्रः=त्यक्तायुधः । आसीत्=अभूत् । इति पृच्छामीति शेषः । प्रहर्षिणीवृत्तम् ॥ २७ ॥

सूक्तं=सुष्ठूक्तम् । अभियुक्तैः=प्रामाणिकैः । नीतिवेदिभिः । प्रकृतिः=स्वभावः । शोकान्धमनसा=शोकविमूढमानसेन । तेन=आचार्येण । क्षत्रधर्मो यत्कार्कश्यं, तत्=क्षत्रियोचितं क्रौर्यम् । विमुच्य=परित्यज्य । द्विजातिधर्मसुलभः=ब्राह्मणत्वोचितः । दैन्यपरिग्रहः=कापर्ण्यस्वीकारः । शस्त्रत्यागः ।

यता से लेता है, न कि शस्त्र का त्याग ही कर देता है। परन्तु इसके विपरीत गुरु द्रोणाचार्यने पुत्र का वध सुनकर शस्त्रग्रहण करने के समय शस्त्र क्यों त्याग दिया ?।

अथवा—नीतिविशारदों ने ठीक ही कहा है कि–प्रकृति (स्वभाव) छूटती नहीं। इसी से शोकसे व्याकुलचित्त हो आचार्य ने क्षत्रियोचित कठोरता को छोड कर ब्राह्मणोचित मृदुता को ही ग्रहण किया। (ठीक है जातिस्वभाव बड़ा प्रबल होता है)।

कर्ण—राजन् कौरवेश्वर ! नहीं, यह बात यों नहीं है ।

दुर्योधन—तो फिर यह बात कैसे है ? ।

१ 'मार्दवपरिग्रहः' । २ क्वचिन्न । ३ 'किंतर्हि' ।

कर्णः—**एवं किल[1] द्रोणस्याभिप्राय आसीत्–यथाश्वत्थामा मया पृथिवीराज्येऽभिषेक्तव्य इति । तस्या[2]ऽभावाद्वृद्धस्य मे ब्राह्मणस्य वृथा शस्त्रग्रहण[3]मिति तथाकृतवान्**

दुर्योधनः—(**सशिरःकम्पम्**) **एवमिदम्** !।

कर्णः—**एतदर्थं च कौरवपाण्डवपक्षपातप्रवृत्तमहासङ्ग्रामस्य राजकस्य परस्परक्षयम[4]पेक्षमाणेन तेन प्र[5]धानपुरुषवध उपेक्षा कृता।**

तस्याऽभावात्=अश्वत्थाम्नोऽभावात् । तथाकृतवान्=युद्धे शस्त्रं त्यक्तवान् । एवमिदं=युक्तमिदम् । एवमेवैतत्स्यादिति वा ।

एतदर्थं=स्वपुत्रं पृथ्वीराज्येऽभिषेक्तुम् । कौरवपाण्डवयोर्यौ पक्षौ तयोः पातेन प्रवृत्तः प्रवर्त्तितो महासङ्ग्रामो-महाभारतं येन तत्, तस्य । राज्ञां समूहो राजकं, तस्य राजकस्य । परस्परक्षयम्=अन्योन्यवधम् । अपेक्षमाणन=वाञ्छता । प्रधानपुरुषवधे=जयद्रथवधे । उपेक्षा=असमीक्षा । कृता=

कर्ण—द्रोण के मन में यह बात थी कि–मैं अश्वत्थामा को संपूर्ण पृथ्वी का राजा बनाऊँगा । पर जब वह अश्वत्थामा ही नहीं रहा तो फिर मुझे इस वृद्ध अवस्था में विशेषतः ब्राह्मण होते हुए शास्त्र ग्रहण कर लड़नेकी क्या अवश्यकता है ।–इसी लिए उन्होंने युद्ध क्षेत्र मे शास्त्र का त्याग कर दिया ।

दुर्योधन—[शिर हिलाता हुआ] ओह ! यह बात थी । (या–क्या ऐसी बात है !) ।

कर्ण–देखिए–इसी लिए (अपने पुत्र को राजगद्दी पर बढाने के ही लिए) कौरव व पाण्डवो के पक्ष को लेकर जब राजा लोग इस महान् युद्ध में प्रवृत्त हुए तो राजाओं के इस परस्पर के झगडे के कारण होने वाले विनाशकी इन्होंने उपेक्षा की है । और प्रधान पुरुष (जयद्रथ) के वध की भी उन्होंने उपेक्षा की । ताकि परस्पर लडकर क्षत्रिय निर्बल हो जाए तो अपने पुत्र को राजा बना सकूं ।

---

१ एवं किलाऽस्याभिप्रायो यथा' । २ 'तस्य वधात्' । ३ 'धारणं' ।
४ 'मुपेक्षमाणेन' । ५ 'प्रधाननृपवधे' ।

दुर्योधनः—**उपपन्नमिदम्।**

कर्णः—**अन्यच्च राजन्! द्रुपदेनाप्यस्य[1] बाल्यात्प्रभृत्यभिप्रायवेदिना न स्वराष्ट्रे वासो दत्तः।**

दुर्योधनः—**साधु अङ्गराज! साधु[2]। निपुणमभिहितम्।**

कर्णः—**न चायं ममैकस्याभिप्रायः। अन्येऽभियुक्ता अपि[3] नैवेदमन्यथा मन्यन्ते।**

दुर्योधनः—**एवमेतत्। कः सन्देहः।**

विहिता। **उपपन्नं**=युक्तम्। सम्भाव्यते एतदित्यर्थः। **बाल्यात्प्रभृति**=शैशवादारभ्य। सखित्वात्। **अभिप्रायवेदिना**=आशयाभिज्ञेन। **स्वराष्ट्रे**=स्वदेशे पश्चालेषु। **निपुणं**=युक्ततरम्। सुन्दरम्। **अभियुक्ताः**=तत्त्वविदो विद्वांसः। **अन्यथा न मन्यन्ते**=सत्यमेवैतदिति मन्यन्ते।

दुर्योधन—यह बात तो ठीक व युक्ति युक्त मालूम होती है। (जरूर यही बात द्रोणाचार्य के मनमें रही होगी)।

कर्ण—और भी देखिए महाराज! द्रोण को इनके बाल्यसखा राजा द्रुपद ने इनके भावों को अच्छी तरह जान करही इसे अपने राज में रहने तक नहीं दिया, और निकाल बाहर कर दिया।

दुर्योधन—वाह अङ्गराज! वाह! आपने बहुत ठीक (व रहस्य की) बात कही।

कर्ण—यह केवल मेरा ही बिचार नहीं है, किन्तु अन्यान्य बुद्धिमान् राजनीति विशारद भी ऐसाही समझते हैं। इस बात में उन्हें भी रत्ती भर सन्देह नहीं है।

दुर्योधन—ठीक है यह बात ऐसी ही है। इसमें कुछ भी सन्देह नहीं है। क्योंकि--

---

१ 'द्रुपदेन चास्या'।

२ कश्चिन्न।

दत्त्वाऽभयं सोऽतिरथो वध्यमानं किरीटिना ।
सिन्धुराजमुपेक्षेत नैवं चेत्कथमन्यथा ॥ २८ ॥

कृपः—(विलोक्य) वत्स ! एष दुर्योधनः[1] सूतपुत्रेण सहास्यां न्यग्रोधच्छायायामुपविष्टस्तिष्ठति । तदुपसर्पावः ।

(तथा कृत्वा) ।

उभौ—विजयतां विजयतां[2] कौरवेश्वरः[3] ।

दुर्योधनः—(दृष्ट्वा) अये ! कथं कृपोऽश्वत्थामा च ।

दत्त्वेति । एवम्=इत्थमेव । नो चेत्=न भवेत्तर्हि । कथमन्यथाः=कथमितरथा । यः-अतिरथः=अनन्तैः सह युद्धं कर्तुं समर्थोऽपि सन् अभयम्=अभयवाक्यम् । दत्त्वा=सिन्धुराजाय जयद्रथाय दत्त्वा । किरीटिना=अर्जुनेन । वध्यमानं=हन्यमानम् । निपात्यमानम् । सिन्धुराजं=जयद्रथम् । उपपेक्षेत=समुपेक्षेत । नैवोपेक्षेत । अतो भवदुक्तमेव युक्तमित्यर्थः । अमितान्योधयेदेकः संप्रोक्तोऽतिरथस्तु सः' इति तल्लक्षणं भारते ॥ २८ ॥

सूतपुत्रेण=सारथिपुत्रेण । कर्णेन । 'सूतः क्षत्ता च सारथिः' इत्यमरः । न्यग्रोधः=वटः । 'न्यग्रोधो बहुपाद्वटः' इत्यमरः । उपसर्पावः=निकटेगच्छावः । तथाकृत्वा=निकटे गत्वा । कथमिति । आगच्छत इति शेषः ।

सिन्धुराज—जयद्रथ को अभयदान देकर भी अर्जुन द्वारा मारे जाते हुए उस जयद्रथको इन्होंनें अतिरथ होते हुए भी बचाया नहीं । यदि इनके मनमें इस प्रकार दुर्भावना न होती तो भला ये जयद्रथ की रक्षा न करते ?। अवश्य करते। (जो एक साथ कई लाख शूरवीर मनुष्यों से युद्ध कर सकता हो वह **अतिरथ** कहलाता है) ॥ २८ ॥

कृप—(देखकर) वत्स ! यह दुर्योधन कर्ण के साथ इस वट की छाया मे बैठे हैं चलो उनके पास चले। (पास जाकर) ।

कृप—और **अश्वस्थामा**—महाराज की जय हो जय हो !

दुर्योधन—(देख कर) है, क्या कृप व अश्वत्थामा ! हैं ।

१ 'कौरवराजः' । २ 'क्वचिन्न । ३ 'राजन्' ।

(आसनादवतीर्य कृपं प्रति)[1] गुरो ! अभिवादये । (अश्वत्थामानमुद्दिश्य)[2] आचार्यपुत्र !

एह्यस्मदर्थहततात ! परिष्वजस्व
क्लान्तैः[3] शुचा मम निरन्तरमङ्गमङ्गैः ।
स्पर्शस्त्वैष[4] भुजयोः सदृशः पितुस्ते
शोकेऽपि[5] नो विकृतिमेति तनूरुहेषु ॥ २९ ॥

[आलिङ्ग्य पार्श्वे उपवेशयति] ।

(अश्वत्थामा बाष्पमुत्सृजति) ।

एहीति । अस्मदर्थं हतस्तातो यस्यासौ तत्सम्बुद्धौ हे अस्मदर्थहततात= हे हतपितृक अश्वत्थामन् । एहि=आगच्छ । शुचा=शोकेन । क्लान्तैः= खिन्नैः । म्लानैः । अङ्गैः=शरीरावयवैः । ममाङ्गं=ममोरःस्थलम् । निरन्तरं= गाढम् । परिष्वजस्व=आलिङ्ग । ते पितुः सदृशः तव भुजयोः एष स्पर्शः । शोकेऽपि=महति शोकेऽपि । नः=अस्माकम् । तनूरुहेषु= लोमसु । विकृतिं=विकारं । रोमाञ्चम् । एति=प्राप्नोति । विधत्ते । शोकेऽपि हर्षरोमाञ्चं करोतीत्यर्थः । नो=नैव विकृतिं=वैरूप्यमेतीत्यर्थो वा । वसन्त- तिलका वृत्तम् ॥ २९ ॥

(आसन से उठ के कृपके प्रति) गुरो ! अभिवादन करता हूँ । (अश्वत्थामा के प्रति–) आचार्यपुत्र !

आपके पिता हमारे कामके लिए वीर गतिको प्राप्त हुए हैं । आओ मेरे शरीर से अपने मनोहर गात्रों का स्पर्श (आलिङ्गन) करो । आपको भुजाओं का स्पर्श आपके पिताजी के स्पर्श की तरह ही आनन्दप्रद मालूम होता है । तुमारे आलि- ङ्गन से इस शोक के समय भी मेरे शरीर में हर्ष से रोमाञ्च हो रहा है ॥ २९ ॥

[आलिङ्गन कर उसे पास में बैठाता है । अश्वत्थामा आंसू बहाता है] ।

---

१ क्वचिन्न २ 'अश्वत्थामानं प्रति' । ३ 'क्लान्तैरिदं' । 'कान्तैरिदं' ।
४ 'तवैव' । ५ 'शोकेऽपि यो महति निर्वृतिमादधाति' ।

कर्णः—**द्रौणायने ! अलमत्यर्थमात्मानं शोकानले प्रक्षेप्तुम् ।**

दुर्योधनः—**आचार्यपुत्र ! को विशेष[1] आवयोरस्मिन्व्यसन[2]-महार्णवे । पश्य—**

तातस्तव प्रणयवान्स[3] पितुः सखा मे
शास्त्रे यथा तव गुरुः स तथा ममापि ।
किं तस्य देहनिधने कथयामि दुःखं
जानीहि तद्गुरुशुचा मनसा त्वमेव ॥ ३० ॥

द्रोणस्यापत्यं द्रौणायनिः, तत्सम्बुद्धौ हे **द्रौणायने**=अश्वत्थामन् । **अत्यर्थम्**=अतिमात्रम् । **प्रक्षेप्तुमलं**=तत्रात्मनः प्रक्षेपो न विधातव्यः । **विशेषः**=भेदः । **व्यसनमहार्णवे**=विपत्तिमहासागरे ।

तात इति । (यथा) सः=द्रोणाचार्यः । तव=भवतः । **प्रणयवान्**=प्रियः स्नेहवान् । **तातः**=पिताः । (तथा) मे=मम । **पितुः**=धृतराष्ट्रस्य । **सखा**=सुहृत् । अतः पितृतुल्य एव । **यथा**=यथा च । सः=द्रोणाचार्यः । **शास्त्रे**=शस्त्रशास्त्रे । धनुर्वेदे । तव गुरुः तथा ममापि गुरुरिति शेषः । **तस्य**=आचार्यस्य । **देहनिधने**=शरीरपाते । **दुःखं**=मनस्तापम् । पीडाम् । **किं कथयामि**=किंनु ब्रवीमि ? । कथनेन प्रयोजनं नास्ति । यतः-**तत्**=दुःखम् । **गुरुशुचा**=शोकभाराक्रान्तेन । **मनसा**=मानसेन । त्वमेव **जानीहि**=विद्धि । यथा-तव तथैव ममापि शोकभारेण मनः समाक्रान्तमित्यर्थः। वसन्ततिलका वृत्तम्॥ ३०॥

कर्ण—हे द्रोणपुत्र ! अपनी आत्मा को शोक सागर में ज्यादा इस तरह मत डालो । (अधिक शोक मत करो) ।

दुर्योधन—आचार्यपुत्र ! इस विपत्ति में हम और आप दोनों समान रूप से दुःखी हैं, देखो—

द्रोणाचार्य यदि आपके प्रिय पिता थे तो वे मेरे भी पिताके मित्र (पितृतुल्य) थे । तुमारे वे शस्त्रविद्या के गुरु थे तो मेरे भी गुरु थे । उनकी मृत्युसे मुझे कितना

१ कच्चिन्न । २ 'व्यसनार्णवे' ।
३ 'स यथा तथा मे' ।

कृपः—वत्स ! अथाह कुरुपतिस्तथैवैतत् ।

कर्णः[1]—किमत्र विचारेण ? ।

अश्वत्थामा—राजन् ! एवं पक्ष[2]पातिनि त्वयि युक्तमेव शोक[3]भरं लघूकर्तुम् । किन्तु

मयि जीवति य[4]त्तातः केशग्रहमवाप्तवान् ।
कथमन्ये करिष्यन्ति पुत्रेभ्यः पुत्रिणः[5] स्पृहाम् ॥ ३१ ॥

यथाहेति । भवत्पितरं पितृतुल्यमेव मन्यते कुरुनाथ इत्यर्थः । पक्षपातिनि=बन्धुभावं दधाने । दुःखे सहानुभूतिं कुर्वाणे । शोकभारं लघूकर्तुं=दूरीकर्तुम् । युक्तमेव=समुचितमेव । भवत एवमुक्त्या मम शोकभारो लघुतां यात इत्यर्थः ।

मयीति । मयि=अश्वत्थाम्नि । केशग्रहं=केशाकर्षणम् । अन्ये पुत्रिणः=पितरः । पुत्रेभ्यः=तनयेभ्यः । स्पृहाम्=अनुरागम्।इच्छाम् । कथं करिष्यन्ति=कथं विधास्यन्ति । मयि विद्यमानेऽपि पितुर्मे यदि तिरस्कारः स्यात्किं मम जीवितेनेत्यर्थः ।

दुःख हुआ है यह मैं क्या कहूँ, इसका अनुभव तो आप दुःखभार से आक्रान्त अपने मनसे ही कर सकते हैं । अर्थात् द्रोणकी मृत्यु से तुमारी ही तरह मुझे भी नितान्त शोक हो रहा है ॥ ३० ॥

कृप—वत्स ! जो कुरुराज (दुर्योधन) कहते हैं वह बात बहुत ठीक है ।

कर्ण—अब इस बात को ज्यादा क्यों बढाते हो ।

अश्वत्थामा—राजन् ! आपकी इस सहानुभूति व ममत्वप्रदर्शन से मेरा शोक का भार कम होना उचित ही है । परन्तु—

जब मेरे जीते जी ही मेरे पिता का केश पकड़ कर शत्रुने उनका अपमान किया तो अब पिता लोग पुत्रों की इच्छा क्यों करेंगे? (अर्थात् मेरे जीते जी पिताजी का अपमान हुआ यह मेरे लिए घोर लज्जा की बात हुई है) ॥ ३१ ॥

---

१ क्वचिन्न । २ 'राजन्येवंवादिनि' ।
३ 'भारं' । ४ 'मत्तातः केशग्रहणमाप्तवान्' । ५ भ्योऽपुत्रिणः' ।

कर्णः—द्रौणायने ! किमत्र क्रियते यदनेनैव[1] सर्वपरिभव-परित्राणहेतुना[2] शस्त्रमुत्सृजता तादृशीमवस्थामात्मा[3] नीतः।

अश्वत्थामा—अङ्गराज ! किमाह भवान् 'किमत्र क्रियते' इति !। श्रूयतां यत्क्रियते [तत्[4]]।

योयः शस्त्रं बिभर्ति स्वभुजगुरुमदः[5] पाण्डवीनां चमूनां
योयः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।
योयस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः[6]
क्रोधान्धस्तस्य तस्य स्वयमपि[7] जगतामन्तकस्यान्तकोऽहम्३२

अत्र=केशाकर्षणे। क्रियते=अस्माभिः कर्तुं शक्यते। यत्=यस्मात्। अनेनैव=द्रोणेनैव। सर्वेति। सर्वविधपरिभवपरिरक्षणहेतुना द्रोणेनेत्यर्थः। तादृशीमवस्थां परिभवयोग्याम्। अङ्गराज=हे कर्ण।

यो य इति। पाण्डवानामिमाः पाण्डव्यः,तासां-पाण्डवीनां=पाण्डवसम्बन्धि-नीनाम्।चमूनां=सेनानां मध्ये। स्वभुजाभ्यां गुरुर्मदो यस्यासौ तथा=स्वबाहु-बलगुरुतरप्रौढाभिमानः। यो यः=यः कश्चित्। शस्त्रं बिभर्ति=आयुधं दधाति। पाञ्चालगोत्रे=पाञ्चालराजवंशे। यो यः=यःकश्चित्। (शस्त्रं बिभर्त्ति) शिशुः= बालो वा। अधिकं वयो यस्यासौ -अधिकवयाः=प्रौढो वा, गर्भ एव शय्या, तां गतः-प्राप्तः=गर्भस्थो वा। अस्तीतिशेषः। यो यः=यश्च यश्च। तस्य गुरु-वधाख्यस्य कर्मणः, साक्षी-द्रष्टा। यश्च यश्च=यो वै।

मयि=अश्वत्थाम्नि। रणे=युद्धे। चरति=विचरति सति। प्रतीपः=

कर्ण—द्रोणपुत्र ! इसमें किसी का क्या जोर है, जब उन्होंने विपत्ति समय के सहायक शस्त्र को छोड दिया तब उनकी यह दशा हुई। (अथात् न वे युद्ध में छोडते और न उनकी यह दुर्दशा होती)।

अश्वत्थामा—अङ्गराज ! आप कहते हैं कि इसमें क्या किया जा सकता है ? जो इसमें किया जा सकता है उसे सुनो—

पाण्डवों की सेना में—जिने अपने बाहुबल का घमण्ड है, जो शस्त्र धारण

१ 'यदा तेनैव'। २ 'हेतुशस्त्रं' इति गौडा। ३ 'एतादृशी'। ४ क्वचिन्न। ५ 'गुरुबलः'। ६ 'प्रतीपं'। ७ 'स्वयमिह'।

अपि च । भो जामदग्न्यशिष्य कर्ण !

देशः सोऽयमरातिशोणितजलैर्यस्मिन्ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः ।
तान्येवाहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति मे
यद्रामेण कृतं तदेव कुरुते द्रोणायनिः क्रोधनः ॥३३॥

विरुद्धः । 'प्रतीप'मितिपाठे–मयि रणे यश्च प्रतीपं-विरुद्धं चरतीत्यर्थः । अहं क्रोधान्धः=क्रोधोपहतविवेकः । तस्य तस्य=तस्य सर्वस्यापि । स्वयं=साक्षात् । जगतामन्तकस्यापि=जगद्विनाशकस्य । कालस्यापि । अन्तकः=विनाशको यमोऽस्मि । सर्वं पाण्डवबलं विनाशयिष्यामीत्यर्थः । स्रग्धरा वृत्तम् ॥ ३२ ॥

अपि च=किञ्चादन्यपि । जामदग्न्यस्य=परशुरामस्य । शिष्य=अन्तेवासिन् । 'श्रूयता'मित्यनुषज्यते ।

देश इति । अयम्=एषः स्यमन्तपञ्चकाख्यः । सः देशः=पुराणप्रसिद्धः स देशः । यस्मिन्=यत्र देशे । अरातीनां=शत्रूणां शोणितान्येव जलानि, तैः=शत्रुरुधिरजलैः । ह्रदाः=जलाशयाः । पूरिताः=भगवता परशुरामेण भृताः । क्षत्रात्=क्षत्रियाद्धृष्टद्युम्नात् । तातस्य=पितुः । केशग्रहः=केशाकर्षणरूपः । तथाविध एव=तादृश एव । जामदग्न्यपितृकेशाकर्षणसदृश एव ।

करने वाले योद्धा हैं, तथा पाञ्चाल सेना में जो वीर व योद्धा हैं तथा जो बड़े या छोटे या गर्भस्थ—बालक है, और जिस जिसनें इस गुरुवधरूपी पातक को देखा है, एवं जो युद्धमें मेरे सामने विरोधी बनकर सामने आवेगा—उन सबके लिए मैं क्रोधान्ध अश्वत्थामा—कालका भी काल—महाकाल हूँ । (अर्थात् शत्रुओं के गर्भस्थ बालकों तक को मैं नहीं छोडूंगा । बडों की तो बातही क्या है) ॥ ३२ ॥

और भी—हे जामदग्न परशुरामजी के शिष्य कर्ण !

यह (स्यमन्तपञ्चकतीर्थ कुरुक्षेत्र) वही देश है जहाँ पर परशुरामजी नें शत्रुओं के रुधिर से ह्रद (झील) भरे थे । उसी प्रकार क्षत्रिय (धृष्टद्युम्न) द्वारा

१ 'शोणितभरैः' । २ 'हेतिघस्मर' ।

दुर्योधनः—**आचार्यपुत्र ! तस्य तथाविधस्यानन्यसाधारणस्य ते वीरभावस्य किमन्यत्सदृशम् ।**

कृपः-**राजन् ! सुमहान्खलु द्रोणपुत्रेण वोढुमध्यवसितः समरभरः । तदहमेवं मन्ये भवता कृतपरिकरोऽयमुच्छेत्तुं लोकत्रयमपि समर्थः । किं पुनर्यौधिष्ठिरेर्बलम् । अतोऽभिषिच्यतां सैनापत्ये ।**

परिभवः=अनादरः । अभूदिति शेषः । **मे**=मम । **तान्येव**=जामदग्न्यसम्प्रदायागतान्येव । अहितानां शस्त्राणां घस्मराणि, अत एव गुरूणि—**अहितशस्त्रघस्मरगुरूणि** = शत्रुहेतिभक्षणप्रचण्डानि । पटूनि । '**भक्षको घस्मरोऽद्मरः**' इत्यमरः' । आहितेतिच्छित्त्वा—आहितानि क्षिप्तानीत्यर्थमन्ये । **भास्वन्ति**=भास्वराणि । जाज्वल्यमानानि । **अस्त्राणि**=ब्रह्मास्त्रादीनि । सन्तीति शेषः । अतः—**यद्रामेण कृतं**=यत्क्षत्रियवधात्मकं कर्म परशुरामेण क्रुद्धेन कृतम् । तदेव—**द्रोणस्यापत्यं द्रौणायनिः**=द्रोणात्मजोऽयम् । **क्रोधनः**=रोषणः । **कुरुते**=विधत्ते । विधास्यतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ३३ ॥

तथाविधस्य=परशुरामतुल्यस्य । **अनन्यसाधारणस्य**=अनितरसाधारणस्य । विशिष्टस्य । **वीरभावस्य**=वीरत्वस्य । शौर्यस्य । **अन्यत्**=शत्रुवधातिरिक्तम् । **किं सदृशं**=नकिमपीत्यर्थः । **वोढुम्**=उद्धर्त्तुम् । **कृतपरिकरः**=कृत-

मेरे पिता का अपमान—केशग्रहण—हुआ है, और जो परशुरामजी के पास शत्रुओं के शस्त्रों को खा जानेवाले दिव्य अस्त्र थे वेही अस्त्र गुरु परम्परा से मुझे भी प्राप्त हुए हैं, अतः जो काम परशुरामजी नें किया था वही काम (क्षत्रियसंहार) द्रोणपुत्र मैं अश्वत्थामा भी करूंगा ॥ ३३ ॥

दुर्योधन—आचार्यपुत्र ! आप ऐसे अनन्य साधारण पराक्रमी के लिए यही बात शोभा देती है ।

कृप—राजन् ! द्रोण के पुत्र अश्वत्थामा ने बहुत बड़े भार उठाने की प्रतिज्ञा व निश्चय किया है, इसलिए मेरा तो यह विचार है कि आपके द्वारा

३ 'द्रोणात्मज' । ४ 'मारः' । ५ 'युधिष्ठिर' ।

दुर्योधन—**सुष्ठु युज्यमानमभिहितं युष्माभिः, किंतु प्राक्प्रतिपन्नोऽयमर्थोऽङ्गराजस्य।**

कृपः—**राजन् ! असदृशपरिभयशोकसागर निमज्जन्तमेनमङ्गराजस्यार्थे नवोपक्षितुं युक्तम् । अस्यापि च तदेवारिकुलमनुशासनीयम् । अतः किमस्य पीडा न भविष्यति ? ।**

सत्कारः । **सैनापत्ये**=सेनापतिपदे । **सुष्ठु**=शोभनम् । **युज्यमानं**=युक्तियुक्तम् । **युष्माभिः**=भवद्भिः । **प्राक्**=आदावेव । **प्रतिपन्नः**=प्रतिश्रुतः । प्रतिज्ञातः । **अयमर्थः**=अभिषेकरूपोऽर्थः । अतस्तत्राश्वत्थामानं नियोजयितु न शक्नोमीत्याशयः । **असदृशेति** । अनन्यसाधारणतिरस्कार शोकसमुद्र इत्यर्थः । **एनम्**=अश्वत्थामानम् । **अर्थे**=कृते । **अस्यापि**=अश्वत्थाम्नः । **तदेव**=पाण्डवसम्बन्धि । **अरिकुलं**=शत्रुवर्गः । **अनुशासनीयं**=दण्डनीयम् । **अस्य**=अश्वत्थाम्नः । **अद्यापि**=मयि स्वयं समरभ रं वोढुं कृतप्रार्थनेऽपि । **किं**=किंप्रयोजनम् । नकिमपीत्यर्थः ।

सत्कृत व पुरस्कृत (सेनापति पद पर आरूढ) होकर यह त्रैलोक्य को भी नष्ट कर सकता हैं युधिष्ठिर की सेना की तो बातही क्या है । अतः इसका सेनापति पद पर अभिषक कर देना चाहिए ।

दुर्योधन—आपने बात तो बहुत ठीक कही है पर इस पदके लिए तो मैंने पहिल ही से कर्ण को बचन दे दिया था । (अतः अब लाचारी है) ।

कृप—राजन् ! बहुत बडे अपमान के सागर में डूबते हुए इस अश्वत्थामा की कर्ण के लिए इस तरह उपेक्षा करना आपको उचित नही है । जो कार्य कर्ण करेंगें वही कार्य तो अश्वत्थामा को भी करना है । अतः इस प्रकार की इस उपेक्षा से इसे क्या कष्ट न होगा ? । अवश्य होगा ।

१ कच्चिन्न ।

अश्वत्थामा—**राजन् कौरवेश्वर ! किमद्यापि युक्ताऽयुक्तविचारणया ।**

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा-
मकेशवमपाण्डवं भुवनमद्य निःसोमकम् ।
इयं परिसमाप्यते रणकथाऽद्य दोःशालिनां-
मपैतु नृपकाननातिगुरुरद्य भारो भुवः ॥ ३४ ॥

प्रयत्नेति । अद्य=अद्यैव । स्तुतिभिः=बन्दिचारणस्तुतिभिः । प्रयत्नेन परिबोधितः—**प्रयत्नपरिबोधितः**=प्रयत्नप्रतिबोधितः । **निशां**=सकलां निशांयावत् । शेषे=स्वपिषि । सुखं स्वप्स्यसीति यावत् । **अद्य**=अद्यैव । नास्ति केशवो यत्र तत्तथा । कृष्णशून्यम् । अपाण्डवं=पाण्डवरहितम् । **निःसोमकं**= सोमकवंशपाञ्चालादिक्षत्रियवंशशून्यम् । सात्यकिधृष्टद्युम्नादिशून्यं । **भुवनं**= जगत् । 'विष्टपं भुवनं जगत्' इत्यमरः । भवतीति शेषः । **इयम्**=इयं प्रवर्त्तमाना । **दोःशालिनां**=बाहुपराक्रमशालिनाम् । रणकथा=युद्धवार्त्तैव । **अद्य**=अस्मिन्नेवाहनि । **परिसमाप्यते**=समाप्तिं गच्छति । **अद्य**=अद्यैव । नृपा एव काननानि तैः— अतिगुरुः—**नृपकाननातिगुरुः**=राजवनाऽतिगुरुः । **भुवः**=पृथिव्याः । **भारः**=भरः । अपैतु=व्यपगच्छतु । राजन् ! सैनापत्येऽभिषिञ्च मां, पश्य मे कौतुकमित्याशयः । पृथ्वी वृत्तम् ॥ ३४ ॥

अश्वत्थामा—राजन् कौरवेश्वर ! अब युक्त और अयुक्त का विचार करना व्यर्थ है, [मुझे सेनापति पद पर बैठाइए] और—

आजही रातको आप निश्चिन्त हो गहरी नींद में सोवेंगे, और प्रातः काल वन्दी चारणों की स्तुति मे प्रयत्न पूर्वक उठाए जाएंगे (ऐसी गहरी नींद आपको आवेगी) । आजही बातकी बात मैं इस जगत से कृष्ण और पाण्डव व सोमक [पाञ्चाल] क्षत्रियों का नाम निशान ही मिटा दूंगा । और देखते ही देखते मे शूरवीरों के घनघोर युद्धकी इस कथाको ही समाप्त कर देता हूँ ; और राजा

---

१ क्वचिन्न । २ 'शालिना' । ३ 'व्यपैतु' । ४ 'रिपुकानना' ।

कर्णः—(विहस्य) द्रोणात्मज ! वक्तुं सुकरमिदं दुष्करमध्यवसितुम्। बहवः कौरवबलेऽ[प्य]स्य कर्मणः शक्ताः।

अश्वत्थामा—अङ्गराज ! एवमिदम् । बहवः कौरवबलेऽत्र शक्ताः, किंतु दुःखोपहतः शोकावेगवशाद्ब्रवीमि न पुनर्वीरजनाधिक्षेपेण।

कर्णः—मूढ ! दुःखितस्याश्रुपातः, कुपितस्य चायुधद्वितीयस्य सङ्ग्रामावतरणमुचितं नैवंविधाः प्रलापाः।

इदं=पूर्वोक्तम् । अध्यवसितुं=कर्तुम् । बहवः=भूयांसः । अहमिति हृदयम् । अस्य=शत्रुवधकर्मणः । शक्ताः=समर्थाः । एवमिदं=यथा भवानाह, तथैव । सत्यमिदम् । दुःखोपहतः=पीडाऽऽर्त्तः । शोकस्य य आवेगस्तस्य वशात्=शोकावेशवशात् । वीरजनाधिक्षेपेण=वीरलोकनिन्दया । एवं ब्रवीमीत्यनुषज्यते । अश्रुपातः=रोदनम् । उचितमिति शेषः । आयुधद्वितीयस्य=शस्त्रसहायस्य । शस्त्रपाणेः । एवंविधाः=आत्मप्रशंसापराः । प्रलापाः=

रूपी जंगल से बढा हुआ पृथ्वी का यह महान् भार आजही दूर होता है । [अर्थात् आप मुझे सेनापति बनाइए, और देखिए मैं बात की बात में—आजही सबको समाप्त कर देता हूँ] ॥ ३४ ॥

कर्ण—(हंसकर) द्रोणपुत्र ! कहना बहुत सरल है, पर करना कठिन है। और फिर कौरवो की सेना मे भी इस तरह कार्य करने वालों की कमी नही है ।

अश्वत्थामा—हे अङ्गराज (भागलपुर के राजा) कर्ण ! ठीक है, कौरवों की सेना मे कार्यकुशल वीरों की कमी नही हैं, परन्तु मैने तो दुःखित चित्त से व शोक के वेग से व्याकुल हो ऐसा कहा है न कि इस प्रकार व्यर्थ की डीग हॉक कर वीरों का अपमान करने के लिए ऐसी बात कही है ।

कर्ण—अरे मूर्ख ! दुःखित को तो बैठकर रोना व आंसू बहाना चाहिए, क्रुद्ध को तलवार हाथ में ले संग्राम में कूद पडना चाहिए, न कि इस प्रकार डींग हांकना व बकवाद करना चाहिए ।

---

१ क्वचिन्न । २ 'द्रौणायने' ।

अश्वत्थामा—(सक्रोधम्) अरे रे राधागर्भभारभूत[1] ! सूता-पसद ! किमेवमाक्षिपसि ? ।

कर्णः—सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम् ।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्[3] ॥ ३५ ॥

अश्वत्थामा—किमाह[3] भवान्[3] ! ममापि नामाऽश्वत्थाम्नो दुःखि-तस्याश्रुभिः प्रतिक्रियामुपदिशसि न शस्त्रेण ! । पश्य—

निर्वीर्यं गुरुशापभाषितवशात्किं मे तवेवायुधं
संप्रत्येव भयाद्विहाय समरं प्राप्तोऽस्मि किं त्वं यथा ।

अनर्थकवचनानि । 'उचिता' इति शेषः । राधागर्भभारभूत=राधागर्भज । दैवायत्तं=भाग्याधीनम् । पौरुषं=पराक्रमः ॥ ३५ ॥

निर्वीर्यमिति । किं=किमु । मे=मम । आयुधं=शस्त्रम् । गुरुशापभा-षितवशात्=गुरुपरशुरामशापवचनवशात् । तवेव=त्वदीयशस्त्रवत् । निर्वीर्यं= निर्बलम् । अस्तीति शेषः । किञ्च त्वं यथा=त्वमिव । सम्प्रत्येव=इदानीमेव । भयात्=भीतेः । समरं=युद्धं । विहाय=त्यक्त्वा । अहमत्र-प्राप्तोऽस्मि

अश्वत्थामा—(बड़े क्रोध से) अरे राधा के गर्भ के भारभूत ! सूत कुलकलङ्क ! तूँ ऐसे २ निन्दा के वाक्य बोलता है ? । [**राधा**—कर्ण की माता का नाम है] ।

कर्ण—चाहे मैं सूत हूँ या सूत का पुत्र हूँ या कोई भी हूं, कुल में जन्म तो अदृष्टाधीन है, मेरे अधीन तो पराक्रम है शक्ति हो तो आवो ॥ ३५ ॥

अश्वत्थामा—क्या कहते हो, क्या मुझ दुःखित अश्वत्थामा को भी अश्रुओं से प्रतीकार करने का उपदेश देते हो, शस्त्र द्वारा नहीं ! । देखो—

क्या गुरु (परशुरामजी) के शाप के कारण तुमारी तरह हमारे भी शस्त्र निर्वीर्य है ?, क्या तेरे तरह मैं भी युद्धभूमि से अभी भाग कर आया हूं,

---

१ 'राधायाः सुत'। २ कचित्तु-सूतापसद ! ममापि नामेत्यादिः पाठः । ३ क्वचिन्न ।

जातोऽहं स्तुतिवंशकीर्तनविदां किं सारथीनां कुले
क्षुद्रारातिकृताप्रियं[1] प्रतिकरोम्यस्रेण नास्त्रेण यत्[2] ?॥३६॥

कर्णः—(सक्रोधम्) अरे रे वाचाट ! वृथाशस्त्रग्रहणदुर्विदग्ध ! बटो !

निर्वीर्यं वा सवीर्यं वा मया नोत्सृष्टमायुधम् ।
यथा पाञ्चालभीतेन पित्रा ते बाहुशालिना ॥ ३७ ॥

किम् ? । नैवेत्यर्थः । स्तुतिवंशकीर्त्तनविदां=प्रशंसा–वंशावलीवर्णने-पराणाम् । सारथीनां=सूतानां । कुले=वंशे । अहं जातोऽस्मि किं ? । त्वमिव तत्र नैव जातोऽहमित्यर्थः । यत्=यतः । क्षुद्रैः–अरातिभिः-शत्रुभिः, कृतमप्रियं–क्षुद्रारातिकृताऽप्रियं=तुच्छरिपुकृतापकारम् । अस्रेण=अश्रुणा । रोदनेन । प्रतिकरोमि=अपनयामि । नास्त्रेण=शस्त्रास्त्रादिना न । 'प्रतिकरोमी'ति शेषः । शार्दूलविक्रीडितं वृत्तम् ॥ ३६ ॥

वाचाट=बहुगर्ह्यभाषिन् । 'वाचाटो बहुगर्ह्यवाक्', इत्यमरः । वृथेति । वृथाशस्त्रग्रहणमात्रसारेत्यर्थः । बटो=ब्राह्मणपुत्र ।

निर्वीर्यमिति । ममायुधं निर्वीर्यं–निर्बलं भवतु, सवीर्यं वा भवतु, परन्तु तदायुधं मया युद्धे=समरे, नोत्सृष्टं–न त्यक्तम् । पाञ्चालभीतेन=धृष्टद्युम्नभीतेन । बाहुशालिना = भुजबलगर्वितेन । ते पित्रा–द्रोणेन । यथा=यथाऽऽयुधं त्यक्तं । तथा मया न त्यक्तमित्यर्थः ॥ ३७ ॥

क्या तेरे ही तरह लोगों की स्तुति व वंशावलि का गान कर पेट भरने वाले सूत (कोचवानों के) कुल में मेरा भी जन्म हुआ है ? जो मैं क्षुद्र शत्रु से कृत अपमान का बदला आंसुओं से लूं, शस्त्र से न लूँ ? ॥ ३६ ॥

कर्ण—(क्रोध से) अरे बकवादी ! झूठे शस्त्र बान्धने वाले बामन के लडके !

मेरे शस्त्र निर्बल हों या सबल, पर मैंने युद्ध में उन्हें तुमारे शूरवीर पिता की तरह—कभी छोडा तो नहीं है ॥ ३७ ॥

१ 'कृताऽप्रियः' । २ 'किम्' ।

अश्वत्थामा—(सक्रोधम्) अरे रे रथकारकुलकलङ्क! अरे राधागर्भभारभूत! आयुधानभिज्ञ,तातमप्यधिक्षिपसि! । अथवा-

स भीरुः शूरो वा प्रथितभुजसारस्त्रिभुवने
कृतं यत्तेनाजौ प्रतिदिन[1]मियं वेत्ति वसुधा ।
'परित्यक्तं शस्त्रं कथ'मिति स सत्यव्रतधरः
पृथासूनुः साक्षी त्वमसि रणभीरो! क नु तदा?॥३८॥

कर्णः—(विहस्य) एवं[2], भीरुरहं, त्वं पुनर्विक्रमैकरसः[3] । तव पितरमनुस्मृत्य महान्मे संशयो जातः! अपि च रे मूढ!

अधिक्षिपसि=निन्दसि । स इति । सः=मत्तातः । भीरुः=कातरः । शूरो वा=वीरो वा । त्रिभुवने=त्रैलोक्ये । प्रथितो भुजयोः सारो यस्यासौ तथा=प्रसिद्धभुजवीर्यः । आजौ=युद्धे । प्रतिदिनं=प्रत्यहम् । यत्=यत्कर्म । तेन कृतं=तेन विहितम् । तत्-इयं वसुधा=इयं रणभूमिः । वेत्ति=जानाति । तेन च-'शस्त्रं कथं त्यक्तम्' इति=इत्यत्र तु । सः=प्रसिद्धः । सत्यव्रतधरः= सत्यव्रतधारी । पृथासूनुः=पार्थो युधिष्ठिर एव । साक्षी=साक्षाद्द्रष्टा । स एव वेत्ति । हे रणभीरो=कातर । तदा=तस्मिन्समये । क नु असि=त्वं कुत्रासीः ? । शिखरिणी वृत्तम् ॥ ३८ ॥

अहं भीरुः=कातरः । त्वं पुनः=त्वं तु । विक्रमे एको रसो यस्यासौ विक्रमैकरसः=पराक्रमपरायणः । एवं=एवमस्तु । संशयः=वक्ष्यमाणप्रकारः सन्देहः ।

मेरे पिताजी शूरवीर थे या डरपोक थे—त्रैलोक्य में उनकी भुजाओं का बल प्रसिद्ध ही था, और उन्होंने प्रति दिन जो भी कार्य युद्ध में किये हैं उनकी साक्षी तो यह पृथ्वी ही है । अर्थात् रणभूमि में पड़े हुए लाखों रुण्ड मुण्ड ही इसके प्रमाण हैं । और उन्होंने युद्ध में शस्त्र क्यों छोड़ दिया था इसका साक्षी वह सत्यव्रतधारी युधिष्ठिर विद्यमान ही है । परन्तु अरे भीरु (कायर कर्ण) ! तू उस समय कहाँ था ? [तू तो डर के मारे इधर उधर भागता फिरता था] ॥३८॥

कर्ण—(हंसकर) अच्छा, मैं तो डरपोक ही सही, शूरवीर तो तूंही एक

१ 'प्रतिदिशम्' । २ क्वचिन्न ।
३ 'विक्रमैकरसं स्वपितरमनुस्मृत्य न जाने किं करिष्यसीति महान्मे' ।

यदि शस्त्रमुज्झितमशस्त्रपाणयो
न निवारयन्ति किमरीनुदायुधान् ? ।
यदनेन मौलिदलनेऽप्युदासितं
सुचिरं स्त्रियेव नृपचक्रसंनिधौ ! ॥ ३९ ॥

अश्वत्थामा—[सक्रोधं सकम्पं च] । **दुरात्मन् ! राजवल्लभ-प्रगल्भ ! सूतापसद ! असंबद्धप्रलापिन् !**

स्वसन्देहमेव दर्शयति—**यदीति** । यदि तव पित्रा शोकेन **शस्त्र-मुज्झितं**=त्यक्तमिति सत्यं भवेत्तथापि—**अशस्त्रपाणयः**=अशस्त्रा अपि, **उदा-युधान्**=उद्धृतशस्त्रान् । **अरीन्**=शत्रून् । किं न निवारयन्ति ? । किन्तु निवारयन्त्येव । यत्—**अनेन**=द्रोणेन। **मौलिदलने**=शत्रुणा स्वकेशबन्धग्रहणेऽपि । शिरःकर्त्तनेऽपि च । **सुचिरं**=सुचिरकालं यावत् । **नृपचक्रसन्निधौ**=राजमण्डल-समक्षम् । **स्त्रिया इव**=योषितेव । **उदासितम्**=औदासीन्यमवलम्बितम् । सत्कृत इत्यमेव मे सन्देह इत्यर्थः । अतिनिर्बलः स आसीदित्याशयः । मञ्जु-भाषिणी वृत्तम् ॥ ३८ ॥

राजवल्लभ=राजप्रिय ! । अतएव-**प्रगल्भ**=वाचाट । 'राजवल्लभप्रगल्भे'-त्येकं पदम् । **असम्बद्धप्रलापिन्**=निरर्थकभाषिन् ।

है । अस्तु । अरे मूर्ख ? तेरे पिता के विषय में मुझे एक और भी सन्देह है । वह यह है कि—

यदि उन्होंने (तेरे पिता ने) शस्त्र का त्याग भी कर दिया था तो भी क्या लोग शस्त्र के विना भी शत्रुके आक्रमण को नहीं रोकते हैं, जो उन्होंने (तुमारे पिता) स्त्रियों की तरह सब राजाओं के सन्मुख इस प्रकार अपना अपमान कराया, [शत्रु द्वारा शिर पर आघात सहन किया] । बाल पकड कर खीचे जाने पर भी कुछ नहीं किया ? ॥ ३९ ॥

अश्वत्थामा—(बड़े क्रोध से कांपते हुए) अरे दुष्ट ! नीच सूत, बकवादी, तूं राजा (दुर्योधन) को मुंह लग्गू होने के कारण बढ़ २ बोल रहा है । अरे दुष्ट !

कथमपि न निषिद्धो दुःखिना भीरुणा वा
द्रुपदतनयपाणिस्तेन पित्रा ममाऽद्य ।
तव भुजबलदर्पाध्मायमानस्य वामः
शिरसि चरण एष न्यस्यते वारयैनम् ॥ ४० ॥

[इति तथा कर्तुमुत्तिष्ठति] ।

कृप—दुर्योधनौ—वत्स ! मर्षय मर्षय । [इति निवारयतः] ।

[अश्वत्थामा चरणप्रहारं नाटयति] ।

कर्णः—[सक्रोधमुत्थाय, खड्गमाकृष्य] अरे दुरात्मन् ! वाचाट ! ब्रह्मबन्धो, आत्मश्लाघिन् !

कथमपीति । तेन पित्रा—द्रुपदतनयपाणिः=धृष्टद्युम्नहस्तः । दुःखिना=दुःखितेन । भीरुणा वा=भयाकुलेन वा । न निषिद्धः=न निवारितः । किं तस्य चर्चया । परम्- अद्य=सम्प्रति । भुजयोर्बलस्य दर्पेण=गर्वेण, आध्मायमानस्य=विस्मितस्य । गर्वितस्य । उत्फुल्लस्य । तव-शिरसि=मूर्ध्नि । वाम एष चरणः=मदीयः पादो मया । न्यस्यते=दीयते । एनं वारय=चरणं निवारय । 'यदि शक्तिरस्ति चे'दिति शेषः । मालिनी वृत्तम् ॥ ४० ॥

तथाकर्तुं=वामं पदं तच्छिरसि निधातुम् । मर्षय=क्षमस्व । नाटयति=नाट्येन सभ्यान् दर्शयति । वाचाट=बहुभाषक । ब्रह्मबन्धो=ब्राह्मणाऽधम । 'ब्रह्मबन्धुरधिक्षेपेऽनिर्देश्ये' इत्यमरः ।

चाहे उन्होंने दुखित होकर या डरकर द्रुपद पुत्र धृष्टद्युम्न का हाथ (उन्होंने) नहीं रोका, परन्तु अपनी भुजाओं के गर्व से फूले हुए तेरे शिर पर मेरा यह बांया पैर-रखता हूँ उसे सम्हाल । [शक्ति हो तो रोक] ॥ ४० ॥

(ऐसा कह कर कर्ण के शिर पर लात मारने के लिए उठता है) ।

कृप व दुर्योधन--गुरुपुत्र ! जाने दो, जाने दो, क्षमा करो ।

[इस प्रकार उन्हें रोकते हैं] ।

(**अश्वत्थामा**--लात मारता है) ।

कर्ण—[बड़े क्रोध से उठकर तलवार खींचकर] अरे दुष्ट ! नीच ब्राह्मण ! अपनी झूठी प्रशंसा करने वाले !

१ 'गुरुपुत्र' । २ क्वचिन्न । ३ 'आत्मश्लाघ' ।

जात्या काममवध्योऽसि चरणं त्विदमुद्धतम्[1][2] ।
अनेन लूनं खड्गेन पतितं द्रक्ष्यसि[3] क्षितौ ॥ ४१ ॥

अश्वत्थामा—**अरे मूढ ! किं नाम[4] 'जात्या काममवध्योऽहम्'[5]। इयं सा जातिः परित्यक्ता।**[इति यज्ञोपवीतं छिनत्ति[6]। पुनश्च सक्रोधम्]।

अद्य मिथ्याप्रतिज्ञोऽसौ किरीटी क्रियते मया ।
शस्त्रं गृहाण वा, त्यक्त्वा मौलौ वा रचयाञ्जलिम् ॥ ४२ ॥

जात्येति। ब्राह्मणत्वेन । कामं=यथेच्छम् । अवध्यः=अविहिंस्यः । लूनं=छिन्नम् । क्षितौ=भूमौ ॥ ४१ ॥

जातिः=ब्राह्मणत्वम् । तच्चिह्नभूतं-यज्ञोपवीतं छिनत्ति=त्रोटयति ।

अद्येति । अर्जुनेन कर्णवधः प्रतिज्ञातः, सम्प्रति कर्णवधेन मयाऽर्जुनो मिथ्या-प्रतिज्ञः क्रियते । तत्-शस्त्रं गृहाण, अथवा भीतश्चेत् शस्त्रं परित्यज्य मौलौ=शिरसि, अञ्जलिं विरचय । दयाभिक्षां याचस्वेत्यर्थः । 'तौ युतावञ्जलिः पुमान्' इत्यमरः ॥ ४२ ॥

क्या करू ब्राह्मणजाति होने के कारण तू अवध्य है, अच्छा कोई बात नहीं, पर तेरे इस उठे हुए पैर को इस खड्ग से अभी काट कर फक देता हूँ देख तो सही ॥ ४१ ॥

अश्वत्थामा—अरे मूढ ! यदि मै ब्राह्मण जाति होने से अवध्य हूँ तो ले इस ब्राह्मण जाति के चिन्ह को ही मै छोड़ देता हूँ ।

[ऐसा कह जनेऊ तोड़ देता है]।

[फिर बड़े क्रोध से]—

आज मै कर्ण को अपने हाथ से मारने की अर्जुन की प्रतिज्ञा को मिथ्या करता हू [तुझे मारता हूँ]। यातो शस्त्र उठा, या शस्त्र को छोड़कर शिर पर अञ्जलि बान्ध प्राणों की भीख मांग । (तभी तुम्हें छोड सकता हूँ अन्यथा नही) ॥४२॥

---

१ 'जात्या तावद्' । २ 'त्वेतदुद्धतं' ।
३ 'वेत्स्यसि' । ४ कच्चिन्न ।
५ 'चेदवध्यो' । ६ 'भूमौ निक्षिपति' ।

(उभावपि खड्गमाकृष्याऽन्योन्यं प्रहर्तुमुद्यतौ । कृपदुर्योधनौ निवारयतः) ।

दुर्योधन —सखे ! आचार्यपुत्र ! शस्त्रग्रहणेनाऽलम् ।

कृपः—वत्स सूतपुत्र ! शस्त्रग्रहणनाऽलम् ।

अश्वत्थामा—मातुल, मातुल ! किं निवारयसि । अयमपि तातनिन्दाप्रगल्भः सूतापसदो धृष्टद्युम्नपक्षपात्येव ।

कर्णः—राजन् ! न खल्वहं निवारयितव्यः ।

उपेक्षितानां मन्दानां धीरसत्त्वैरवज्ञया ।
अत्रासितानां क्रोधान्धैर्भवत्येषा विकत्थना ॥ ४३ ॥

उभावपि=अश्वत्थामकर्णौ । अलं=न प्रयोजनम् । मातुल=हे कृप । तातेति । पितृनिन्दापटुरित्यर्थः । उपेक्षितानामिति । धीरसत्त्वैः=धीरसत्त्व-शालिभिः । गुरुपराक्रमैः । अवज्ञया=तिरस्कारेण । उपेक्षितानाम्=अनवेक्षितानाम् । अकृतप्रतीकाराणाम् । क्रोधान्धैः=क्रोधाविष्टैः । अत्रासितानां=अतर्जितानाम् । मन्दानां=नीचानाम् । एषा=इयम् । ईदृश्येव । विकत्थना=स्वभुजवीर्यश्लाघा । भवति=जायते । अकृतप्रतीकारा हि नीचा एवमेव प्रगल्भन्ते ऽतः प्रतीकारोऽस्य कर्त्तुमुपचित इत्याशयः ॥ ४३ ॥

[दोनों खड्ग निकालकर आपुस में लड़ने को तैयार होते हैं । कृप और दुर्योधन उन्हें रोकते हैं] ।

दुर्योधन—आचार्यपुत्र ! शस्त्र मत उठाइए, रहने दीजिए ।

कृप—बेटा कर्ण ! जाने दो, तलवार रख दो, लड़ो मत ।

अश्वत्थामा—मामाजी ! मामाजी !! क्यों रोकते हैं, यह भी नीच सूतपुत्र पिताजी की निन्दा करता है अतः धृष्टद्युम्न का पक्षपाती होने के कारण धृष्टद्युम्न की तरह यह भी मेरा वध्य ही है ।

कर्ण—राजन् ! मुझे क्यो रोकते हैं, मत रोकिए ।

धीर व बली पुरुषों द्वारा तिरस्कार की दृष्टि से व उपेक्षा[1] किए गए नीच लोग यदि वे क्रोध पूर्वक दण्डित न किए जायं तो इसी प्रकार बढ़ २ कर बोला करते है, अतः इसकी उपेक्षा उचित नही है, इसे दण्ड देना ही युक्त है ॥ ४३ ॥

१ क्वचिन्न ।

अश्वत्थामा—राजन् ! मुञ्च मुञ्चैनम्। आसादयतु मद्भुजान्तर-निष्पेषसुलभमसूनामवसादनम्। अन्यच्च राजन् ! स्नेहेन वा[1] कार्येण वा यत्त्वमेनं ताताधिक्षेपकारिणं दुरात्मानं मत्तः परि-रक्षितुमिच्छसि तदुभयमपि वृथैव ते। पश्य—

पापः प्रियस्तव कथं गुणिनः सखाऽयं
सूतान्वयः शशधरान्वयसंभवस्य।
हन्ता किरीटिनमयं नृप ! मुञ्च कुर्यां
क्रोधादकर्णमपृथात्मजमद्य लोकम् ॥ ४४ ॥

(इति प्रहर्तुमिच्छति)।

एनं=कर्णम्। मद्भुजेति। मद्बाहुयुगलान्तरनिष्पेषसुलभमित्यर्थः। असूनां=प्राणानाम्। अवसादनं=विनाशम्। कार्येण वा=स्वकार्यसिद्ध्यर्थं वा।

पाप इति। शशधरान्वयसम्भवस्य=चन्द्रवंशोद्भवस्य। गुणिनः=गुणान्वितस्य। तव=भवतः। सूतान्वयः=सूतकुलोत्पन्नः। पापः=दुष्टः। खल। कथं=कथं नु खलु ?। प्रियःसखा=प्रियसुहृत्। भवितुमर्हतीति शेषः। एवञ्च स्नेहेनास्य रक्षणं न सम्भवति। कार्यार्थमपि नास्य रक्षणमुचितमित्याह—हन्तेति। अयं=कर्ण। किरीटिनम्=अर्जुनम्। हन्ता=हनिष्यति। 'इति तव विचारश्चे'दिति शेषः। नृप ! =हे राजन्। मुञ्च=एनं कर्णं त्यज। अद्य=अद्यैव। क्रोधात्=रोषात्। अकर्णं=कर्णरहितम्। अपृथात्मजम्=अर्जुनशून्यञ्च। लोकं=जगत्। कुर्याम्=अहं करिष्ये। एवञ्च वृथैवाऽस्य रक्षणमित्याशयः। वसन्ततिलका वृत्तम् ॥ ४४ ॥

अश्वत्थामा—राजन् ! इसे छोड़िए, छोडिए ! मै इसे भुजाओं के बीच मे दबाकर पीसकर बात की बात में मार डालता हू। और भी हे राजन् ! स्नेह से या अपने कार्य (मतलब) की सिद्धि के लिए मेरे पिता के इस निन्दक दुष्ट को आप बचाना चाहते हैं। दोनों ही प्रकार से इसका बचाना वृथा है। देखिए—

आप पवित्र चन्द्रवंश में उत्पन्न है, गुणी हैं, आपके साथ इस सूतकुलकलङ्क

१ कच्चिन्न। २ 'पापप्रियः'। ३ सहायः।
४ 'सूतात्मजः' ५ 'मसौ'। 'महं'।

कर्णः—(खड्गमुद्यम्य) **अरे वाचाट ! ब्राह्मणाधम ! अयं न भवसि । राजन् ! मुञ्च मुञ्च । न खल्वहं वारयितव्यः ।**

(हन्तुमिच्छति) ।

(दुर्योधनकृपौ निवारयः) ।

दुर्योधनः—**कर्ण ! गुरुपुत्र ! कोऽयमद्य युवयोर्व्यामोहः ? ।**

कृपः—**वत्स ! अन्यदेव प्रस्तुतमन्यत्रावेग इति कोऽयं व्यामोहः ?। स्वबलव्यसनं चेदमस्मिन्काले राजकुलस्यास्य युष्मत्त एव भवतीति वामैः पन्थाः ।**

वाचाट=हे बहुगर्ह्यवाक् । **न भवसि**=मत्प्रहारान्मृत एवासि । हन्तुं=अश्वत्थामानं हन्तुम् । **व्यामोहः**=मूढत्वम् । अनुचिताचरणम् । **अन्यदेव**=धृष्टद्युम्नवधादिकम् । **प्रस्तुतं**=प्रसक्तम् । **अन्यत्र**=परस्परकलहे । **आवेग**=आग्रहः । आसक्तिः। संरम्भः। **स्वबलव्यसनं**=स्वसेनाप्रधानपुरुषकलहविपत्तिः। 'व्यसनं विपदि भ्रंशे दोषे कामजकोपजे' इत्यमरः । **अस्मिन् काले**=युद्धा-

पापी की मित्रता व स्नेह व सहायकता कैसी ? 'और यह अर्जुन को मारेगा' यह भी कारण ठीक नहीं है,अतः हे राजन् ! इसे आप छोड़ दीजिए। मैं आज क्रोध से इस लोक (पृथ्वी) को कर्ण व अर्जुन—इन दोनों से रहित कर देता हूँ ॥४४॥

[ऐसा कह तलवार का हाथ चलाना चाहता है] ।

कर्ण—[खड्ग उठाकर] अरे बकवादी, ब्राह्मणाधम ! तेरी मौत तेरे शिर पर नाच रही है। ले यह मरा । (दुर्योधन से) राजन् ! छोड़िए छोड़िए ! मुझे मत रोकिए । [अश्वत्थामा को मारना चाहता है] ।

दुर्योधन—कर्ण ! गुरुपुत्र ! यह तुम दोनों की क्या मूर्खता व नासमझी है ? ।

कृप—वत्स ! बात कुछ दूसरी ही प्रस्तुत थी, और तुम दूसरी ही बातों में उलझ रहे हो, कैसी नासमझी है ? असमय में यह आपस का घर में ही झगड़ा खड़ा करना तुम लोगों द्वारा क्या उचित है ? । यह बात तो बहुत ही अनुचित है ।

१ 'एवं' । २ 'नायं पन्थाः' ।

अश्वत्थामा—**मातुल ! न लभ्यतेऽस्य कटुप्रलापिनो रथकारकुलकलङ्कस्य दर्पः शातयितुम्[1] ।**

कृपः—**वत्स ! अकालः खलु स्वबलप्रधानविरोधस्य ।**

अश्वत्थामा—**मातुल ! यद्येवम्**

अयं पापो यावन्न निधनमुपेयादरिशरैः
परित्यक्तं तावत्प्रियमपि मयाऽस्त्रं रणमुखे ।
बलानां नाथेऽस्मिन्परिकुपितभीमार्जुनभये
समुत्पन्ने राजा प्रियसखबलं[2] वेत्तु समरे ॥ ४५ ॥

(इति खड्गमुत्सृजति) ।

वसरे । वामः=विरुद्धः । अनुचितः । कटुप्रलापिनः=कटुभाषिणः । रथकारः=सूतः । शातयितुं=नाशयितुम् । अकालः=अनवसरः । एवं=नावसरश्चेत् ।

अयमिति । अयं पापः=खलः कर्णः । निधनं=मृत्युम् । रणमुखे=युद्धप्रसङ्गे । अस्त्रं=शस्त्रम् । अस्मिन्=कर्णे । बलानां=सेनानाम् । नाथे=अधिपतौ सति । समरे=युद्धे । परिकुपितौ यौ भीमार्जुनौ, ताभ्यां भयम् , तस्मिन्=क्रुद्धभीमार्जुनाक्रमणभये । समुत्पन्ने=समुपस्थिते सति । राजा=दुर्योधनः । प्रियश्चासौ सखा च प्रियसखः, तस्य बलं=कर्णबलं । वेत्तु=जानातु । भीमार्जुनभये समुत्पन्ने कर्णस्य बलं ज्ञास्यति दुर्योधन इत्याशयः। शिखरिणी वृत्तम् ॥४५॥

अश्वत्थामा—मामाजी ! तो क्या इस सूत (कोचवानों) कुलकलङ्क का घमण्ड चूर करने का अवसर मुझे नहीं मिलेगा ? ।

कृप—वत्स ! अपनी सेना के प्रधान पुरुष से लड़ने का यह समय नहीं है ।

अश्वत्थामा—अच्छा मामाजी ! यदि ऐसी बात है तो फिर—

जब तक यह पापी कर्ण शत्रुओं के बाणों से मारा नहीं जाता है तब तक के लिए मै अपने प्यारे अस्त्र शस्त्रों का भी युद्ध में परित्याग करता हूँ । जब यह कौरव सेना का सेनापति हो युद्ध में जायगा और उस समय क्रुद्ध हुए भीम व अर्जुन

१ 'शादयितुम्' । २ 'प्रियसखममु' ।

कर्णः—(विहस्य) **कुलक्रमागतमेवैतद्भवादृशां यदस्त्रपरित्यागो नाम।**

अश्वत्थामा—**ननु रे ! अपरित्यक्तमपि भवादृशैरायुधं चिरपरित्यक्तमेव, निष्फलत्वात्।**

कर्णः—**अरे मूढ !**

धृतायुधो यावदहं तावदन्यैः किमायुधैः ।
यद्वा न सिद्धमस्त्रेण मम, तत्केन सेत्स्यति ? ॥ ४६ ॥

धृतेति । यावदहं **धृतायुधः**=गृहीतशस्त्रः । अस्मीति शेषः । **तावत्**=तावत्पर्यन्तम् । **अन्यैः**=अन्यैर्भवादृशैः कर्तृभिः । **आयुधैः**=शस्त्रैः करणभूतैः । **किं**=किं विधेयम् । न किमपीत्यर्थः । सर्वस्याऽर्थस्य मयैव साधितत्वादित्याशयः। केचित्तु-अन्यैः-अन्यधृतैः, आयुधैः-शस्त्रैः किमित्यर्थमाहुः, तन्नातिमनोरमम् । **वा**=अथवा । **यत्**=यच्च कार्यं । **ममास्त्रेण**=मदस्त्रैः। न सिद्धं,**तत्केन**=केन पुंसा कैरायुधैर्वा **सेत्स्यति**=सिद्धिं गमिष्यति ? । नैव कथमपि सेत्स्यतीत्यर्थः ॥४६॥

के द्वारा सेना की दुर्दशा होगी—तभी राजा को अपने प्रिय मित्र (कर्ण) की वीरता का असली परिचय मिलेगा । [अर्थात् इसके सेनापतित्व में कौरव सेना नष्ट भ्रष्ट हो जाएगी, तभी राजा दुर्योधन को होश आवेगा ऐसे नहीं] ॥ ४५ ॥

[ऐसा कह खड्ग का त्याग कर देता है] ।

कर्ण—[हँसकर] शस्त्र छोडना तो तुम्हारा वंश परम्परागत व्यवहार है ।

अश्वत्थामा—तुम्हारे ऐसे कायरों का शस्त्र धारण करना या छोड़ देना दोनों ही समान है, क्योंकि शस्त्र धारण करके ही तुमने क्या कर लिया है ।

कर्ण—अरे मूर्ख !

जबतक मैंने शस्त्र धारण कर रखा है तब तक दूसरों के शस्त्रों से क्या प्रयोजन है ? । और जो कार्य मेरे शस्त्रों से सिद्ध नहीं हो सकता उसे दूसरा कौन सिद्ध कर सकता है ? (कोई नहीं) ॥ ४६ ॥

१ **कर्णः**-(विहस्य) अपरित्यक्तमपि भवादृशैरायुधं ननु चिरपरित्यक्तमेव, निष्फलत्वात् । **धृतायुधो यावदहं'** । इत्यादिरीत्या क्वचित्पाठः ।

[नेपथ्ये]

आ दुरात्मन् ! द्रौपदीकेशाम्बराकर्षण[1]महापातकिन् ! धार्तराष्ट्रापसद! चिरस्य खलु कालस्य मत्संमुखीनमागतोऽसि[2]। अरे क्षुद्रपशो ! क्वेदानीं गम्यते ? ।

अपि च--भो भो राधेयदुर्योधनसौबलप्रभृतयः पाण्डवविद्वेषिणश्चापपाणयो मानधनाः ! शृण्वन्तु भवन्तः--

कृष्टा[3] येन शिरोरुहे[4] नृपशुना[5] पाञ्चालराजात्मजा
येनास्याः परिधानमप्यपहृतं राज्ञां गुरूणां पुरः ।

द्रौपद्याः केशानामम्बरस्य च आकर्षणमेव महत्पातकं, तदस्यास्तीति। तत्सम्बुद्धौ रूपम् । हे द्रौपदीकेशवसनाकर्षणमहापापिन् ! । **चिरस्य**=बहोः । **राधेयः**=कर्णः । **सौबलः**=शकुनिः । दुर्योधनमातुलः । **चापपाणयः**= धनुर्धराः ।

स्पृष्टेति । येन [ना पशुरिव नृपशुः, तेन] **नृपशुना**=मनुष्यपशुना, **पाञ्चालराजात्मजा**=द्रौपदी । **शिरोरुहे**=केशे । **स्पृष्टा** = धृता । आकृष्टा । येन च-**गुरूणां**=मान्यानाम् । **राज्ञां**=नृपाणाम् । **पुरः**=अग्रे । **अस्याः**= द्रौपद्याः । **परिधानमपि**=धौतवस्त्रमपि । **अपहृतम्**=आकृष्टम् । अपसारि-

---

[नेपथ्य में]

अरे दुरात्मन् ! द्रौपदी के केश पकड़ कर खींचने वाले ! पापी ! नीच ! धृतराष्ट्रपुत्र ! बहुत दिन के बाद मेरे सामने आज तू आया है। अरे नीच ! मनुष्य-पशु ! अब कहाँ जाता है । ठहर !

और भी—अरे ! कर्ण, दुर्योधन, शकुनि प्रभृति मानी, शस्त्रधारी, पाण्डव-वैरियो ! तुम सब लोग सुनो !—

जिस नीच नरपशु ने द्रौपदी के बाल पकड़कर खींचे थे, जिसने राजाओं व गुरुजनों के सामने उसकी साड़ी पकड़कर खींची थी, जिसकी छाती के खून रूपी

---

१ 'म्बरकर्षण' । २ 'मत्संमुखमाग ।
३ कश्चिन्न । ४ स्पृष्टा । ५ 'रुहेषु पशुना' ।

यस्योरःस्थलशोणितासवमहं पातुं प्रतिज्ञातवा-
न्सोऽयं मद्भुजपञ्जरे निपतितः संरक्ष्यतां कौरवाः[1]॥४७॥

[सर्वे आकर्णयन्ति]।

अश्वत्थामा—[सोत्प्रासम्] **अङ्गराज ! सेनापते ! जामदग्न्या-**

तम् । **यस्य**=यस्य च । **उरःस्थलशोणितासवं**=वक्षःस्थलरुधिरमद्यम् । **पातुम्**=आस्वादयितुम् । **अहं**=भीमः । **प्रतिज्ञातवान्**=प्रतिज्ञां कृतवानस्मि । **सोऽयं**=स एष दुःशासनः । मद्भुजौ पञ्जरमिव तस्मिन् **मद्भुजपञ्जरे**=मद्बाहुमध्ये । **निपतितः**=अकस्मात्प्राप्तः । तत्-**कौरवाः**=हे दुर्योधनप्रभृतयः । **संरक्ष्यतां**=भवद्भिरयं परिरक्षणीयो यदि भवतां शक्तिरस्ति चेदित्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ४७ ॥

सोत्प्रासं=सेषद्धासम् । 'सोत्प्रासस्तु मनाक्स्मितम्' । इत्यमरः । जाम-

---

मदिरा के पीने की मैंने प्रतिज्ञा की थी वही दुष्ट (दुःशासन) आज मेरे भुजाओं के पञ्जर (पिंजरे) में आ पड़ा है, हे कौरवो ! सामर्थ्य हो तो इसे बचाओ ! ॥४७॥

[सब सुनते हैं]।

अश्वत्थामा-(ताने के साथ) हे अङ्गराज ! सेनापते ! जामदग्न्य (परशुराम) शिष्य !, द्रोण की हँसी करनेवाले ! अपनी भुजाओ से त्रैलोक्य को बचाने

---

१ 'कौरवः'

२ '**अश्वत्थामा**—(सोपहासम्) अङ्गराज !। **कर्णः**-किमाह भवान् ?। **अश्वत्थामा**—सेनापते !। **कर्णः**—तत्र कः सदेहः ?। **अश्वत्थामा**—जामदग्न्यशिष्य ?। **कर्णः**—बाढम् । **अश्वत्थामा**—द्रोणोपहासिन् !। **कर्णः**-एवमेतत् । **अश्वत्थामा**—त्वयोक्तम् । **कर्णः**—किं मयोक्तम् ?। **अश्वत्थामा**—**धृतायुधो यावदहं** (४६) इति पठति । **कर्णः**—बाढमुक्तम् । **अश्वत्थामा**—इदं महत्कदनं संवृत्तम् । **कर्णः**—किं जातम् ?। **अश्वत्थामा**—भीमः कथयति । **कर्णः**—किम् ?। **अश्वत्थामा**—श्रूयताम् । **कर्णः**—किं ?। कथ्यताम् । **अश्वत्थामा**—[**कृष्टा येन**—इत्यादि पठति] 'तद्भीमाद्दुःशासनः संरक्ष्यतां युवराजः ।' पाठा० । ३ 'जामदग्न्यशिष्य'।

स्त्रशिष्य, द्रोणोपहासिन् ! भुजबलपरिरक्षितसकललोक ! [धृतायुधः (३।४६) इति पठित्वा) इदं तदासन्नतरमेव संवृत्तम् । रक्षैनं साम्प्रतं भीमादुःशासनम् ।

कर्णः—आः का शक्तिर्वृकोदरस्य मयि जीवति युवराजस्य[1] च्छायामप्याक्रमितुम्[2]। युवराज ! न भेतव्यं न भेतव्यम् । अयमहमागतोऽस्मि (इति निष्क्रान्तः) ।

अश्वत्थामा—राजन् कौरवनाथ ! अभीष्मद्रोणं संप्रति कौरवबलमालोडयन्तौ भीमार्जुनौ राधेयेनैवंविधेनान्येन वा न शक्येते निवारयितुम् । अतः स्वयमेव भ्रातुः प्रतीकारपरो भव ।

दग्न्यस्य अस्त्रे–अस्त्रविद्यायां विषये शिष्य । भुजबलेन परिरक्षितः सकलो लोको येनासौ तत्सम्बुद्धौ रूपम् । आसन्नतरं=समीपतरवर्त्ति । संवृत्तं=जातम् । अवसरः समुपस्थित इत्यर्थः । वृकोदरस्य=भीमस्य । मयि=कर्णे । युवराजस्य=दु.शासनस्य । आक्रमितुं=स्प्रष्टुम् । न भेतव्यं=न भीः कार्या । अभीष्मद्रोणं=भीष्मद्रोणरहितम् । कौरवबलं=कौरवसैन्यम् । आलोडयन्तौ=मथनन्तौ । एवंविधेन=राधेय (कर्ण) तुल्येन । प्रतीकारपरः=रक्षापरः ।

की शक्ति रखनेवाले ! तुम तो बड़े घमण्ड से कहते थे कि—"मेरे रहते दूसरे के शस्त्र धारण की आवश्यकता ही क्या है ? कौन कार्य है जो मैं नहीं कर सकता हूँ ।" अब तो अवसर आ गया । अब इस दुःशासन को भीमसेन से बचाओ तो जानें ।

कर्ण—आह ! मेरे रहते युवराज दुःशासन की छाया को भी छूने की किसी की हिम्मत हो सकती है ? युवराज ! डरो मत ! यह मै आ पहुँचा !

[ऐसा कहता हुआ जाता है] ।

अश्वत्थामा—राजन् ! कौरवेश्वर ! इस समय भीष्म व द्रोण से रहित आपकी सेना को भीम व अर्जुन विध्वंस कर रहे हैं । इस समय कर्ण या कोई दूसरा इन्हें रोक नहीं सकता है । इसलिए आप स्वयं अपने भाई को बचाने की चिन्ता व उपाय करिए । जाइए ।

१ 'दुःशासनस्य' । २ 'लङ्घयितुं' ।

दुर्योधनः—आः, का शक्तिर्दुरात्मनः पवनतनयस्याऽन्यस्य वा मयि जीवति शस्त्रपाणौ वत्सस्य छायामप्याक्रमितुम् । वत्स ! न भेतव्यं न भेतव्यम् । कः कोऽत्र भोः ! । रथमुपनय ।

(इति निष्क्रान्तः) ।

(नेपथ्ये कलकलः) ।

अश्वत्थामा—(अग्रतो विलोक्य ससंभ्रमम्) मातुल ! हा धिक् कष्टं कष्टम् । एष भ्रातुः प्रतिज्ञाभङ्गभीरुः किरीटी समं दुर्योधनराधेयौ शरवर्षैर्दुर्वारैरभिद्रवति । हा कष्टं कष्टं, सर्वथा पीतं दुःशासनशोणितं भीमेन । न खलु विषहे दुर्योधनानुजस्यैनां विपत्तिमवलोकयितुम् । अनृतमनुमतं नाम । मातुल ! शस्त्रं शस्त्रम् ।

पवनतनयस्य=वायुपुत्रस्य भीमस्य । अन्यस्य=अर्जुनादेर्वा । उपनय= आनय । कलकलः=कोलाहलः । भ्रातुः=भीमस्य । किरीटी=अर्जुनः । पीतं= पीतप्रायम् । विषहे=सोढुं शक्नोमि । अनृतं=मिथ्या । मिथ्याप्रतिज्ञत्वम् । अनुमतं=स्वीकरोमि । शस्त्रं शस्त्रं=द्राक् शस्त्रं देहि । सत्याद्दिति ।

दुर्योधन—आह ! मेरे जीते जी वायुपुत्र भीम की या किसी और की भी क्या शक्ति है जो वत्स दुःशासन की छाया को भी छू सके । वत्स ! मत घबड़ाओ, मत घबडाओ । कौन है, जल्दी मेरा रथ लाओ ।

[(रथपर चढकर) जाता है]

[नेपथ्य मे बड़ा कोलाहल होता है] ।

अश्वत्थामा—मामाजी ! हाय ! हाय ! बडे कष्ट की बात है, देखो यह अर्जुन अपने भाई भीमसेन की प्रतिज्ञा के भङ्ग होने के डर से कर्ण व दुर्योधन इन दोनों को एक साथ दुर्निवार घोर बाण बर्षा से रोक रहा है । हाय ! बडा दुःख है, भीमसेनने दुःशासन का रुधिर पी लिया ही समझिए । दुर्योधन के भाई की इस विपत्ति को मै खड़ा २ नही देख सकता हूं । मेरी (शस्त्र त्याग की) प्रतिज्ञा झूठी ही हो जाने दीजिए, परन्तु मामाजी ! मुझे शस्त्र दीजिए शस्त्र ! ।

१ क्वचिन्न । २ 'शक्तिरस्ति दुरात्मनः' । ३ 'दुःशासनस्य' । ४ 'लङ्घयितुं' ।

सत्यादप्यनृतं श्रेयो धिक्स्वर्गं नरकोऽस्तु मे।
भीमाद्दुःशासनं त्रातुं त्यक्तमत्यक्तमायुधम् ॥ ४८ ॥

(इति खड्गं ग्रहीतुमिच्छति)।

[नेपथ्ये]।

"महात्मन्! भारद्वाजसूनो ! न खलु सत्यवचनमनुल्लङ्घित-पूर्वमुल्लङ्घयितुमर्हसि"[1]।

कृपः—वत्स! अशरीरिणी भारती[2] भवन्तमनृतादभिरक्षति।

सत्यात्=सत्यप्रतिज्ञत्वात्। अनृतं=मिथ्याप्रतिज्ञत्वम्। श्रेयः=वरम्। स्वर्गं=सत्यप्रतिज्ञलभ्यं स्वर्गम्। धिक्=धिगस्तु। मे=मम। नरकोऽस्तु=नरकपातोऽस्तु। किन्तु-भीमाद्दुश्शासनं त्रातुं=रक्षितुम्। त्यक्तं=मया पूर्वं परित्यक्तमपि। आयुधं=शस्त्रम्। अत्यक्तम्=अपरित्यक्तं। मया स्वीकृतम् ॥ ४८ ॥

इति=इत्युक्त्वा। भारद्वाजसूनो=द्रोणसुत। न खलु=नैव। सत्यवचनं=सत्यं वाक्यम्। अनुल्लङ्घितपूर्वं=कदाप्यनुलङ्घितम्। अशरीरिणी=

इस समय सत्य से तो झूठ ही मुझे प्रिय मालूम होती है, चाहे फिर नरक में ही क्यों न पड़ना पड़े। पर भीमसेन से दुःशासन को बचाने के लिए मैं फिर शस्त्र धारण करता हूँ अर्थात् मित्र के लिए अपनी प्रतिज्ञा को भी छोड़ता हूँ ॥४८॥

[ऐसा कहकर खड्ग लेना चाहता है]

[नेपथ्य में]

महात्मन्! भारद्वाजद्रोण के पुत्र! आजतक तुमने कभी सत्य का उलङ्घन नहीं किया है, अतः अब ऐसा करना (अपनी प्रतिज्ञा का तोडना) आपके लिए कथमपि योग्य नहीं है।

कृप–वत्स! देखो आकाश वाणी तुमको मिथ्या प्रतिज्ञता से बचा रही है।

१ क्वचिन्न। २ 'वाणी'।



'दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।'
भीमसेन कृतो दुःशासनवधः ।

अश्वत्थामा—**कथमियममानुषी वाङ्नानुमनुते सङ्ग्रामावतरणं मम[1]। भोः कष्टम् । आः सर्वथा[2] पाण्डवपक्षपातिनो देवाः[3]। [सर्वथा[2] पीतं दुःशासनशोणितं भीमेन] । भोः, कष्टं कष्टम् ।**

दुःशासनस्य रुधिरे पीयमानेऽप्युदासितम् ।
दुर्योधनस्य कर्ताऽस्मि किमन्यत्प्रियमाहवे ? ॥ ४९ ॥

मातुल ! राधेयक्रोधवशादनार्यमस्माभिराचरितम् । अत-

आकाशवाणी । **अमानुषी**=दैवी । **अनृतात्**=मिथ्याभाषणरूपात्पापात् । **अभिरक्षति**=वारयति ।

दुःशासनस्येति । दुःशासनस्य । **रुधिरे**=रक्ते । **पीयमानेऽपि**=भीमेन पीयमानेऽपि । **उदासितं**=मया औदासीन्यमवलम्बितम् । **आहवे**=युद्धे । दुर्योधनस्य, **अन्यत्**=इतोऽन्यत्, **किम्**=किंनु, **प्रियं**=प्रीतिकरं कर्म, **कर्त्तास्मि**=करिष्यामि । न किमपीत्यर्थः ॥ ४९ ॥

अनार्यम्=अनुचितम् । अशोभनम् । **अस्माभिः**=मया । **त्वमपि**=

अश्वत्थामा--हैं ! यह आकाश वाणी मेरा युद्ध में जाना क्यों रोक रही है । हाय ! देवता भी पाण्डवों के ही पक्षपाती मालूम होते हैं । सर्वथा अब भीमसेन नें दुःशासन का रुधिर पी लिया ।

भीमसेन द्वारा भला दुःशासन के रुधिर के पी जाने पर भी मैं चुपचाप खडा देख रहा हूँ । इससे [दुःशासन के बचाने से] अधिक दुर्योधन का क्या प्रिय कार्य मैं कर सकता । (यदि मैं दुशासन को बचा लेता तो यह दुर्योधन का सब से प्रिय काम होता, पर लाचारी है मैं उसे न बचा सका) ॥ ४९ ॥

मातुल कर्ण के ऊपर क्रोध करके मैंने बडी भूल की, जो ऐसी प्रतिज्ञा

---

१ 'मे' ।　　२ क्वचिन्न ।　　३ 'पक्षपातिनो देवा अपि पाण्डवानाम्' ।

स्त्वमपि तावदस्य राज्ञः पार्श्ववर्ती भव ।

कृपः—गच्छाम्यहमत्र प्रतिविधातुम् । भवानपि शिबिर-संनिवेशमेव प्रतिष्ठताम् ।

[उभौ परिक्रम्य निष्क्रान्तौ] ।

इति वेणीसंहारे तृतीयोऽङ्कः ।

त्वमेव केवलम् । अहन्तु बद्धोऽस्मि प्रतिज्ञयेत्याशयः । प्रतिविधातुं=प्रतीकारं कर्त्तुम् । शिबिरसंनिवेशं=स्वसेनाशिबिरमण्डपम् । प्रतिष्ठतां=गच्छतु ।

करली । अस्तु ! कम से कम आप तो राजा दुर्योधन के पास जाकर उस की सहायता करिए ।

कृप—अच्छा मैं दुर्योधन की सहायता के लिए जाता हूँ । आपभी अपने पडाव (तम्बू) में ही चलिये ! (कहीं इधर उधर मत जाइए) ।

(दोनों घूमकर जाते हैं) ॥

॥ इति तृतीयोऽङ्कः ॥

अथ चतुर्थोऽङ्कः ।

(ततः प्रविशति प्रहारमूर्च्छितं रथस्थं दुर्योधनमपहरन्सूतः) ।

(सूतः ससंभ्रमं परिक्रामति) ।

(नेपथ्ये—)

भो भो ! बाहुबलावलेप[1]प्रवर्तितमहासमरदोहदाः कौरवकुल[2]पक्षपातपणीकृतप्राणद्रविणसंचया नरपतयः ! । संस्तभ्यन्तां संस्त[2]भ्यन्तां नि[3]हतदुःशासनपीतावशेषशोणितस्नपितबीभत्स-

अपहरन्=युद्धभुवोऽन्यत्रापनयन् । **ससम्भ्रमं**=सत्वरम् । ससाध्वसम् । सोद्वेगम् । 'सम्भ्रमस्त्वरा' इति, समौ संवेगसम्भ्रमौ' इति चाऽमरः । **परिक्रामति**=रथं वाहयति । बाह्वोर्यद्बलं तेन **योऽवलेपः**=गर्वः । 'दर्पोऽवलेपोऽवष्टम्भः' इत्यमरः । तेन प्रवर्त्तितो महासमर एव दोहदः–अभिलाषो महोत्सवश्च यैस्ते **तथाभूताः**=बाहुबलावलेपप्रवर्त्तितयुद्धमनोरथाः । 'अस्त्रियां समराऽनीकरणाः कलहविग्रहौ' इत्यमरः । कौरवपक्षे यः पातः स्नेहः तेन पणीकृतः–प्राणा एव द्रविणं तस्य सञ्चयो यैस्ते तथाभूताः । कौरवपक्षपातेन प्राणपणेन युद्धे प्रवृत्ताः । **संस्तभ्यन्ताम्**=अवरुध्यन्ताम् । स्थिरीक्रियन्ताम् । निहतो यो दुःशासनः, तस्य पीतावशेषं यत् शोणितं, तेन स्नपितोऽत एव **बीभत्स-**

अथ चतुर्थोऽङ्कः ।

[प्रहारों से मूर्च्छित रथस्थित दुर्योधन को ले जाते हुए सूत का प्रवेश]

[रथस्थित सूत घबड़ाकर भाग रहा है]

[नेपथ्य में]

अहो भुजबल के घमण्ड से जिन्होंने महायुद्ध रूपी–इस दोहद ('महोत्सव' 'तोहफा')को प्रारम्भ किया है,कौरवों के पक्षपात के कारण जिन्होंने अपने प्राण व धन की बाजी लगा दी है ऐसे राजालोगों ! दुश्शासन को मारकर उसके रुधिर को

१ 'बलाऽहङ्कारप्रवर्त्तित' । २ क्वचिन्न । ३ 'हत' ।

वेषवृकोदरदर्शनविषादपरिस्खलत्प्रहरणानि रणात्प्रद्रवन्ति बलानि ।

सूतः—(विलोक्य) कथमेष धवलचपलचारुचामरचुम्बितकनककमण्डलुना शिखरावबद्धवैजयन्तीसूचितेन हतगजवाजिनरकलेवरसहस्रसंमर्दविषमोद्घातकृतकलकलकिङ्किणीजाल-

वेषः=विकृतभयानकवेषो यो वृकोदरो—भीमः, तस्य दर्शनेन यो विषादः—खेदः, तेन परिस्खलन्ति=प्रपतन्ति प्रहरणानि आयुधानि येषां तानि तथा भूतानि । रणात्=युद्धात्, प्रद्रवन्ति=पलायमानानि । बलानि=कौरवसैन्यानि । संस्तभ्यन्तां संस्तभ्यन्तामित्यन्वयः ।

धवलेति । धवलं चपलं च यच्चारु=सुन्दरं चामरं=प्रकीर्णकं, तेन चुम्बितः संबद्धः कनकस्य=स्वर्णस्य कमण्डलुः=रथोपरिगोलाकारो भागो यस्यासौ तथाभूतः । शिखरं=शृङ्गम्, रथोर्ध्वभागः, तत्रावबद्धया वैजयन्त्या=पताकया सूचितेन=अवबोधितेन । हतानां गजानां वाजिनां नराणां च यानि कलेवराणि शरीराणि, तेषां यानि सहस्राणि तैर्यः संमर्दः=सङ्घट्टः, समूहो वा, तेन यो विषमः=वैषम्यं, विषमप्रदेशो वा, तेन य उद्घातः=आघातः (ठोकर इति प्रसिद्धः) तेन कृतः कलकलो येन तादृशेन किङ्किणीजालेन=क्षुद्रघण्टिकासमूहेन ~~मण्डले शोभते~~ तच्छीलेन । तादृशजालेन माली=मालावानिति वाऽर्थः ।

पी कर बचे हुए रुधिर को शरीर में लीप लेने भीषण आकृति वाले भीमसेन को देखकर घबड़ाकर शस्त्रों को फेंक कर युद्ध भूमि से भागती हुई अपनी अपनी सेनाओं को किसी तरह रोकिए, जल्दी रोकिए ।

सूत—(युद्ध भूमि की ओर देखकर) अहा ! यह देखो सफेद चञ्चल सुन्दर चवरोंसे जिस (रथ)के सुनहरे गुम्बद शोभित हो रहे हैं, जिसके शिखर पर लम्बी २ ध्वजा फहरा रही है, मरे हुए हाथी घोड़े व मनुष्यों के लाखों शरीरो (लाशों) के समूह के कारण ऊँची–नीची भूमि पर ठोकर लगने से जिसकी सुनहरी घण्टियाँ

१ 'दर्शनभयपरि' । २ 'स्खलित' । ३ 'विद्रवन्ति' ।

मालिना रथेन शरवर्षस्तम्भितपरचक्रपराक्रमप्रसरः प्रद्रुतमात्मबलमाश्वासयन्कृपः किरीटिनाऽभियुक्तमङ्गराजमनुसरति । हन्त ! जातमस्मद्बलानामवलम्बनम् ।

(नेपथ्ये कलकलानन्तरम्) ।

भो भो, अस्मद्दर्शनभयस्खलितकार्मुककृपाणतोमरशक्तयः कौरवचमूभटाः पाण्डवपक्षपातिनश्च योधाः ! न भेतव्यं न भेतव्यम्। अयमहं निहतदुःशासनपीवरोरःस्थलक्षतजासवपान-

शराणां=बाणानां, वर्षेण-वृष्ट्या, स्तम्भितः=अवरुद्धः, परचक्राणां=शत्रुसेनानाम् , प्रसरः=प्रसर्पणं वेगो व्याप्तिश्च येनासौ तथाभूतः । प्रद्रुतं=पलायितम् । आत्मबलं=कौरवसैन्यम् । किरीटिना=अर्जुनेन । अभियुक्तं=बलवदाक्रान्तम् । अङ्गराजं=कर्णम् । अनुसरति=समनुगच्छति । हन्त=हर्षे । अवलम्बनम्=आधारः ।

अस्मदिति । अस्माकं भीमसेनस्य दर्शनेन यद्भयं तेन स्खलिताः-पतिताः [कार्मुकं च कृपाणश्च तोमरश्च शक्तयश्च ताः-]कार्मुककृपाणतोमरशक्तयः येषां ते तथोक्ताः । तोमरः=अस्त्रभेदः । कौरवचमूभटाः=हे कौरवसेनायोधाः ! । निहतो यो दुःशासनः, तस्य पीवरं=मांसलं यदुरःस्थलं, वक्षःस्थलं, तस्य

कलकल कर रही हैं, ऐसे रथ पर चढ़े हुए, और बाणों की वर्षा से शत्रु की सेना के प्रबल प्रवाह को रोकते हुए, अपने सेना को धैर्य देते हुए भगवान् कृपाचार्य अर्जुन के द्वारा घेरे गए कर्ण की सहायता करने को आगे बढ रहे हैं। (सन्तोष पूर्वक) अहा ! हमारी सेना को अब कुछ सहारा हो गया ।

(नेपथ्य में कोलाहल के अनन्तर)

अहो ! हमें देखकर भय के मारे जिनके हाथों से धनुष तलवार गडांसा सेल साग आदि शस्त्र छूट गए हैं ऐसे हे कौरवों की सेना के वीरो ! एवं हे पाण्डव-सेना के योद्धाओं ! डरो मत,डरो मत । मै दुश्शासन के पुष्ट उरःस्थल (छाती) से

मदोद्धतो रभसगामी स्तोकावशिष्टप्रतिज्ञामहोत्सवः कौरवराजस्य द्यूतनिर्जितो दासः पार्थमध्यमो भीमसेनः सर्वान्भवतः साक्षीकरोमि । श्रूयताम्—

राज्ञो मानधनस्य कार्मुकभृतो दुर्योधनस्याग्रतः
प्रत्यक्षं कुरुबान्धवस्य मिषतः कर्णस्य शल्यस्य च ।
पीतं तस्य मयाऽद्य पाण्डववधूकेशाम्बराकर्षिणः
कोष्णं जीवत एव तीक्ष्णकरजक्षुण्णादसृग्वक्षसः ॥१॥

यत्क्षतजं=रुधिरं, तदेव य आसवः, मद्यं तस्य यत्पानं तेन मदोद्धतः=गर्वोद्धुरः । रभसं गन्तुं शीलमस्य रभसगामी=त्वरितगमनः । स्तोकेति। स्वल्पावशिष्टप्रतिज्ञापूर्त्तिमहोत्सव इत्यर्थः । पार्थानां मध्यमः=मध्यमपाण्डवः ।

राज्ञ इति । मान एव धनं यस्याऽसौ तस्य मानधनस्य=अभिमानवतः । कार्मुकभृतः=धनुर्धरस्य । राज्ञः दुर्योधनस्य–अग्रतः=पुरत एव, किञ्च कुरुबान्धवस्य=कुरुकुलसुहृदः, कर्णस्य, शल्यस्य–मद्रराजस्य च मिषतः=पश्यतः । मृषत इति पाठे सहमानस्य, प्रत्यक्षं=संमुखमेव तस्य पाण्डववधूकेशाम्बराकर्षिणः = द्रौपदीकेशवस्त्राऽऽकर्षिणः दुःशासनस्य, जीवतः–स्फुरत एव । तीक्ष्णकरजक्षुण्णात्=निशितनखविदीर्णात् , वक्षसः= हृदयात्। कोष्णं=मन्दोष्णम् । असृक्=रुधिरं, पीतम् । 'कोष्णं कवोष्णं मन्दोष्णम्' इत्यमरः । इत्यत्र भवतः साक्षीकरोमीति पूर्वेण सहान्वयः । शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥

निकलते हुए रुधिररूपी मदिरा को पीकर मस्त हुआ, झपट कर चलता हुआ, जिसकी (दुर्योधन बध की) प्रतिज्ञा के पूर्ण होने में अब थोड़ी सी ही देर है, ऐसा मै दुर्योधन का जूए में जीता हुआ दास,पाण्डुका मझला पुत्र भीमसेन आप सबको साक्षी बना कर कहता हूँ, सुनिए—

अभिमानी धनुर्द्धर राजा दुर्योधन के तथा कुरुओं के पक्षपाती कर्ण एवं शल्य आदि के देखते देखते मैंने पाण्डवों की वधू द्रौपदी के केश एवं वस्त्रों को खीचनें

१ 'मध्यमपाण्डवः' 'पाण्डवमध्यमः' ।

२ 'मृषतः' । 'बान्धवस्य च तथा कर्णस्य' । ३ क्वचिन्न ।

सूतः—(श्रुत्वा सभयम्) अये ! कथमासन्न एवाऽसौ दुरात्मा कौरवराजपुत्रमहावनोत्पातमारुतो मारुतिः । अनुपलब्धसंज्ञश्च [तावदत्र] महाराजः । भवतु । सुदूरमपहरामि स्यन्दनम् । कदाचिद्दुःशासन इवाऽस्मिन्नप्ययमनार्योऽनार्यमाचरिष्यति ।

(त्वरिततरं परिक्रम्यावलोक्य च) अये ! अयमसौ सरसी-सरोजविलोलनसुरभिशीतलमातरिश्वसंवाहितसान्द्रकिसलयो

आसन्नः=सन्निहितः । कौरवराजस्य धृतराष्ट्रस्य ये पुत्रास्त एव महावनं तत्रोत्पातमारुत इव=उन्मूलनझञ्झामारुत इव । मारुतिः=वायुपुत्रो भीमः । अनुपलब्धसञ्ज्ञः-असञ्जातचेतनः । महाराजः=दुर्योधनः । स्यन्दनः=रथः । अनार्यः=दुःशीलः । अनार्यम्=नृशंसं । वधरुधिरपानादिकं । सरसी=सरः, तत्र यानि सरोजानि-कमलानि तेषां विलोलनं=कम्पनम् , विलोडनं, तेन सुरभिः=घ्राणतर्पणः शीतलश्च यो मातरिश्वा-वायुः,तेन संवाहितानि चालितानि मिलितानि वा किसलयानि=पल्लवाः यस्याऽसौ तथा ।

वाले उस [दुश्शासन] के पेट को तीखे नखो से फाड़ कर जीते ही का गर्मागर्म रुधिर पी लिया है । [अर्थात् दुःशासन की छाती से रुधिर पीने की प्रतिज्ञा मेरी पूरी हो गई इस बात के लोग आप सब साक्षी हैं]।

सूत—(सुनकर डरता हुआ) अरे ! यह दुरात्मा [भीमसेन] जो कुरुराज के पुत्र रूपी वन के उखाड़ने में उत्पातवायु की तरह है पास ही मालूम होता है, और महाराज दुर्योधन अभी तक चैतन्य नहीं हुए हैं : अच्छा, रथ को और दूर ले जाता हू । कहीं दुःशासन की तरह महाराज पर भी यह पापी अत्याचार न कर बैठे । (जल्दी से दूर जाकर और देखकर) अहो ! सरोवर [झील] के कमलो को विलोडन करने(उनमेंसे बहने के)कारण सुगन्धित व शीतलवायु से हिलते हुए सुस्निग्ध कोमल पल्लवों वाला सामने यह वटका वृक्ष है । यह स्थान युद्धके व्यापार से थके हुए

१ कच्चिन्न । २ 'एषः'। एव' । ३ 'दूरमपनयामि' । ४ 'त्वरितं' ।

न्यग्रोधपादपः। उचिता विश्र[1]मभूरियं समरव्यापारखिन्नस्य वीर-जनस्य। अत्रस्थश्चा[2]यमयत्नोपवीजिततालवृन्तेन हरिचन्दनच्छ-टाशीतलेनाऽप्रयत्नसुरभिणा दशापरिणामयोग्येन सरसीसमी-रणेना[3]मुना च गतक्लमो भविष्यति महाराज[3]ः। [ऊर्ध्वमवलो[3]क्य] लूनकेतुश्चायं रथोऽनिवारित एव प्रवेक्ष्यति च्छायाम्। (इति प्रवेशं रूपयित्वा) कः कोऽत्र भोः [छ[3]त्रं व्यजनं चामरं च शीघ्र-मुपनयतु]। (समन्तादव[4]लोक्य) कथं न कश्चिदत्र[3] परिजनः !।

'पल्लवोऽस्त्री किसलयम्' इत्यमरः। उचिता=योग्या। शीतलत्वात्सुरभित्वा-च्चौचित्यमत्र। समरव्यापार-खिन्नस्य=युद्धकर्मश्रान्तस्य। मूर्च्छितस्य। अत्रस्थः=न्यग्रोधतलस्थश्च। अयत्नोपवीजितेन=अप्रयत्नचालितेन। स्वयं वायुना वीज्यमानेन। तालवृन्तेन=तालपत्रव्यजनेन। 'अयाचिततालवृन्तेने'-ति पाठे-स्वयमुपनतेन तालवृन्तेनेत्यर्थः। हरिचन्दनच्छटाशीतलेन= सुगन्धिमहार्हचन्दनभङ्गिशीतलेन। हरिचन्दनसम्पर्कशीतलेन, तच्चन्दन-वच्छीतलेनेति वा। अप्रयत्न-सुरभिणा=अनायासघ्राणतर्पणेन। दशापरि-णामयोग्येन=दैवदुर्विपाककालोचितेन। विपत्ति-समयोचितेन। मूर्च्छाव-स्थोचितेनेत्यर्थ इति तु सरलाः। लूनकेतुः-छिन्नचिह्नध्वजः। अनिवारितः= अनवरुद्धः। छायाम्=अनातपम्। वटाधःप्रदेशम्। रूपयित्वा=नाटयित्वा। सम-

वीरके विश्राम करने योग्य है। यहाँ पर रहने से-स्वभावतः जिस[वायु]नें तालके वृन्तों [पंखों] को हिलाया है, हरिचन्दन के वृक्षों की पङ्क्ति के संपर्क से शीतल, स्वभावतः सुगन्धित एवं दशा के परिणाम [दैवदुर्विपाक] के कारण योग्य[5], इस सरोवर की वायु से महाराज दुर्योधन शीघ्र ही चैतन्य लाभ कर सकेंगे। और

१ 'विश्राम'। २ अत्र स्थितश्चाऽयाचिततालʼ।

३ क्वचिन्न। ४ 'दिशोऽवलोक्य'।

५ जिस चक्रवर्ती राजा दुर्योधन के लिए बहुमूल्य इत्र आदि से सुगन्धित पंखों से हवा की जाती थी उसके ही लिए भाग्य के विपर्ययसे इस समय यही हवा उचित है।

नूनं तथाविधस्य वृकोदरस्य दर्शनादेवंविधस्य च स्वामिन-स्त्रासेन शिबिरसन्निवेशमेव प्रविष्टः। कष्टं भोः! कष्टम्।

दत्त्वा द्रोणेन पार्थादभयमपि न संरक्षितः सिन्धुराजः
क्रूरं दुःशासनेऽस्मिन्हरिण इव कृतं भीमसेनेन कर्म।
दुःसाध्यामप्यरीणां लघुमिव समरे पूरयित्वा प्रतिज्ञां
नाहं मन्ये सकामं कुरुकुलविमुखं दैवमेतावतापि ॥ २ ॥

न्तात्=सर्वतः। परिजनः=अनुजीविलोकः। नूनम्=अवश्यम्। तर्कयामि। तथाविधस्य=बीभत्सवेषस्य। एवंविधस्य=मूर्च्छितस्य। स्वामिनः=राज्ञो दुर्योधनस्य। त्रासेन=भयेन। उद्वेगेन।

शिविरसंनिवेशं=विश्रामपटमण्डपम्। प्रविष्टः=तत्र भयान्निलीय स्थितः।

दत्त्वेति। पार्थात्=अर्जुनात्। अभयं='न तव किञ्चिदपि भयं मयि जीवत्यर्जुनात्' इत्यभयवचनम्। दत्त्वाऽपि द्रोणेन सिन्धुराजः-जयद्रथो-न रक्षित इत्यन्वयः। अस्मिन् दुःशासने-हरिणे इव=अनायासबध्यत्वान्मृगे-इव-अरीणां=सर्वेषां कर्णदुर्योधनादीनां शत्रूणां। पुरत इति शेषः। दुःसाध्यां

हमारे रथ की ध्वजा भी युद्ध मे कट गई है इसलिए अनायास ही विना रोक टोक के हमारा यह रथ इस वट की छाया मे चला जायगा। [वट की छाया में रथ को खडा करके] कौन है ? महाराज का छत्र व चामर व व्यजन (पंखा) लाओ। (चारो ओर देखकर) है, क्या कारण है कि कोई भी नौकर यहाँ नही है !। मालूम होता है भीमसन की भीषण आकृति को देखकर, तथा स्वामी (दुर्योधन) की इस दयनीय दशा को देखकर भयभीत हो सब सेवकगण भागकर शिबिर (पडाव) पर चले गए है। हाय ! बडे दुःख की बात है !

द्रोणने पार्थ अर्जुन से बचाने के अभयदान देकर भी सिन्धुराज जयद्रथ को नहीं बचाया, दुश्शासन को हरिण की तरह मारकर भीमसेन ने क्रूरकर्म किया।

१ भोः कष्टं कष्टं'। २ 'तृणमिव'। ३ 'कुरुकुलनिधने'।

(राजानमवलोक्य) कथमद्या[1]ऽपि न चेतनां लभते महाराजः[2]?। भोः कष्टम् । (निःश्वस्य)

मदकलितकरेणुभज्यमाने
विपिन इव प्रकटैकशालशेषे ।
हतसकलकुमारके कुलेऽस्मिं-
स्त्वम[3]सि विधेरवलोकितः कटाक्षैः ॥ ३ ॥

प्रतिज्ञां, लघुमिव=लघ्वीमिव-अनायासेन-पूरयित्वा=सफलां कृत्वा भीमसेनेन=वृकोदरेण समरे=युद्धे क्रूरकर्म=रुधिरासवपानलक्षणं भयानकं कर्म कृतं=विहितमित्यन्वयः। यद्वा-अस्मिन्दुःशासने हरिणे पशाविव इव भीमसेनेन क्रूरं कर्म कृतमिति, दुःसाध्यामरीणां=पाण्डवानां प्रतिज्ञां पूरयित्वाऽपि दैवं सकामं=शान्तं विरतं न मन्ये इत्यर्थः। एतावताऽपि=एवं दुःशासनादिविनाशेन कार्यजातं विनाश्य, अनर्थं च कृत्वाऽपि। कुरुकुलविमुखं=कुरुवंशविरुद्धं, कौरवकुलोपरि क्रुद्धं। दैवं=विधिम्। सकामं=कृतकृत्यं। शान्तम्। प्रसन्नम्। अहं न मन्ये=नहि तर्कयामि। इतोऽप्यधिकं किमप्यनिष्टं विधास्यतीति शङ्के। एतेन भावी दुर्योधनवधः सूचितः। 'कुरुकुलनिधने' इति पाठे-कुरुकुलनाशेऽपि सकामं=पूर्णमनोरथं दैवं नाहं मन्ये इत्यर्थः। स्रग्धरावृत्तम् ॥ २ ॥

चेतनां = चैतन्यम्। मूर्च्छाव्यपगममिति यावत्।

मदेति। मदेन कलितः = मूर्च्छितः उन्मत्तो यः करेणु=हस्ती, प्रकृते

इस प्रकार शत्रुओं की दुःसाध्य प्रतिज्ञाओं अनायास पूर्ण कराके भी कुरुकुलविमुख दैव अभी तक कृतकृत्य नहीं हुआ है-ऐसा मैं समझता हूँ। अर्थात् अभी इससे भी अधिक कुछ अनर्थ दुर्दैव दिखाएगा-ऐसा मालूम होता है ॥ २ ॥

(राजाकी ओर देखकर) क्या बात है अभीतक महाराज चैतन्य नहीं हुए ?। हाय बडे कष्ट की बात है। (लम्बी सांस लेकर)—

---

१ 'मद्यापि चेतनतां न'। २ 'स्वामी'। ३ 'त्वमपि'।

(आकाशे लक्ष्यं बद्ध्वा[2]) ननु भो हतविधे ! भरतकुलविमुख !

अक्षतस्य गदापाणेरनारूढस्य संशयम् ।
एषापि भीमसेनस्य प्रतिज्ञा पूर्यते त्वया ! ॥ ४ ॥

तस्माद्दश्यात्करेणुः-भीमः, तेन भज्यमाने=विनाश्यमाने । 'करेणुरिभ्यां स्त्री, नेभे' इत्यमरः ।

विपिने इव=वने इव, दुष्प्रवेशेऽपि, सम्प्रति-प्रकटैकशालशेषे-प्रकटः=स्फुटः,-एकः=एकाकी, शालः=वृक्षो दुर्योधनरूपः शेषो यत्र तस्मिन् । 'अनोकहः कुटः शालः' इत्यमरः । हताः सकलाः कुमारा यत्र तस्मिन्=विनष्टान्यराजपुत्रके । अस्मिन् कुले=कुरुकुले । हे राजन् ! त्वं=त्वमपि, विधेः=कुटिलस्य दुरदृष्टस्य । कटाक्षैः=काक्षैः । दुर्निरीक्षितैः । अवलोकितः=निरीक्षितः किम् । त्वामपि जीवन्तं द्रष्टुं किं हतविधिर्न सहते, यतो मूर्च्छितोऽप्यद्य यावन्न प्रबुध्यसे इत्यर्थः । त्वमसीति वा पाठः । पुष्पिताग्रा वृत्तम् ॥ ३ ॥

आकाशे=शून्ये ।

भरतकुलविमुख=कुरुकुलविरुद्ध । अक्षतस्येति । अक्षतस्य=अनाकलितव्रणस्य । संशयं=जीवितसंशयम् । अनारूढस्य=अप्राप्तस्य । गदापाणेः=गदाभृतः । भीमसेनस्य-एषाऽपि=दुर्योधनवधरूपाऽपि । प्रतिज्ञा=संवित् । त्वया=हतविधिना । पूर्यते=मन्ये अनायासेनैव पूर्यते । भीमेन दुर्योधनवधः

जैसे मदमत्त हस्ती से उखाड़े गए वन मे एक आधा ही वृक्ष शेष रह जाता है उसी तरह इस कुरुकुल के सब कुमारों को तो भीमसेन ने मारही डाला है, केवल एक (दुर्योधन) आप ही बचे थे, परन्तु मालूम होता है आपपर भी क्रूर विधाता का कुटिल कटाक्ष पड़ गया है । अर्थात् आप भी दुर्दैव के कुटिल दृष्टिपात में आ गए है (मुझे तो आपके बचने की आशा नही है) ॥ ३ ॥

(आकाश मे लक्ष्य बांधकर) हे भरतकुलविमुख क्रूर विधे !

---

१ कश्चिन्न ।

२ **"पात्रस्याल्पतया यत्र पात्रं नैव प्रवेश्यते ।**
आकाशे कर्णं दत्त्वाकाशे लक्ष्यं बद्ध्वेति बोच्यते" इति भरतः ।

दुर्योधनः—(शनैरुपलब्धसंज्ञः) आः ! का शक्तिरस्ति पवनतनयस्य दुरात्मनो वृकोदरहतकस्य मयि जीवति दुर्योधने प्रतिज्ञां पूरयितुम् ! । वत्स दुःशासन ! न भेतव्यं न भेतव्यम् । अयमहमागतोऽस्मि ! । ननु सूत ! प्रापय रथं तमेवोद्देशं यत्र वत्सो मे दुःशासनः ।

सूतः—आयुष्मन् ! अक्षमाः संप्रति वाहास्ते रथमेनमुद्वोढुम् । (अपवार्य) मनोरथं च ।

प्रतिज्ञातः । दुर्योधनो भीमश्चोभौ तुल्यबलौ, तद्दुर्योधनेन भीमस्य युद्धे प्रवृत्ते कदाचिद्भीमो जीवितसंशयं प्राप्नुयादपि, परं तु त्वया हे क्रूरविधे ! विनैव युद्धं दुर्योधनवधाद्भीमस्य प्रतिज्ञाऽनायासेनैव पूर्यते इत्याशयः । दुर्योधनं मूर्च्छितं दृष्ट्वा सूतस्य परिदेवनमिदम् ॥ ४ ॥

स्वैरं=मन्दं मन्दम् । प्रतिज्ञां=दुःशासनहृदयशोणितपानप्रतिज्ञाम् । ननु—इत्यामन्त्रणे । नन्विति पूर्वान्वयि वा । उद्देशं=स्थानम् । 'आयुष्म'न्निति सूतेन स्वामीवाच्य'इति नाटकसमयः । अक्षमाः=अशक्ताः । वाहाः=अश्वाः । अपवार्य=केवलं रङ्गं श्रावयित्वा । मनोरथश्च=मनोरथश्चोद्वोढुं=त्वदीयामिच्छां पूरयितुम्

क्या गदापाणि भीमसेन की इस (दुर्योधन के मारने की) प्रतिज्ञा को भी बिना किसी प्रकार के संशय के अनायास ही तुम पूरी कर रहे हो ? ॥ ४ ॥

दुर्योधन—(धीरे २ चैतन्य होकर) आह ? मेरे जीते रहते पापी भीमसेन की क्या शक्ति है कि वह (दुःशासन के रुधिरपीने की) अपनी प्रतिज्ञा को पूरी कर सके । वत्स दुःशासन ! मतडरो मतडरो । मैं आ पहुँचा हूँ । सूत ! मेरे रथ को उसी जगह ले चलो जहाँ मेरा वत्स दुःशासन है ।

सूत—आयुष्मन् ! (महाराज !) आपके घोड़े इस समय रथ को वहन करने

---

१ 'सधीरमुपलब्ध' । 'स्वैरमुपलब्धसंज्ञः' । २ कश्चिन्न ।
३ 'वृकोदरस्य' । ४ 'तमुद्देशं' । ५ 'वयञ्च' ।

दुर्योधनः—(रथादवतीर्य. सगर्वं साकूतं च) कृतं स्यन्दनगमन-कालातिपातेन ।

सूतः—(सवैलक्ष्यं सकरुणं च) मर्षयतु मर्षयत्वायुष्मान्[2] ।

दुर्योधनः—धिक्सूत ! किं रथेन ? । केवलमरातिविमर्द-संघट्टसंचारी दुर्योधनः खल्वहम् । तद्गदामात्रसहायः समर-भुवमवतरामि ।

सूतः—आयुष्मन्[3] ! एवमेतत् (कः सन्देहः) ।

वाहा न क्षमा इत्यर्थः । दुःशासनस्य मृतत्वात् । वयमिति–पाठेऽपि–वयञ्च त्वदाज्ञां पालयितुमशक्ता इत्यर्थः । साकूतं=साऽभिप्रायम् । कृतम्=अलम् । स्यन्दनः=रथः । तेन गमनेन यः कालातिपातः=समयात्ययः । मर्षयतु= क्षाम्यतु । अरातीनां=शत्रूणां यो विमर्दः=संश्लेषः । [भीड], तेन यः संघट्टः= सङ्घर्षः, आक्रमणं वा, परस्परास्फालनं वा, तत्र सञ्चरितुं शीलमस्य तथाविधः । शत्रुसङ्घमध्यसञ्चरणप्रवण इत्यर्थः । खल्विति निश्चये । तत्=तस्मात् ।

मे असमर्थ है । (राजा से छिपाकर दर्शको को सुनाते हुए) और हम लोग भी आपके इस मनोरथ को पूर्ण करने मे सर्वथा असमर्थ है ।

दुर्योधन—(रथ से उतर कर बड़े घमण्ड से, ताने के रूप से) रहने दो, मुझे रथ पर चढ़ने के लिए विलम्ब करने की आवश्यकता ही नही है ।

सूत—(लज्जित सा होकर, बडे ही करुण स्वर में) आयुष्मन् ! क्षमा करिए, क्षमा करिए ।

दुर्योधन—सूत ! तुम्हें धिक्कार है, रहने दो अपना रथ । शत्रुओं के जबरदस्त हमले व भीड़ में इकला ही घुस कर विचरण करनेवाला मै दुर्योधन हूँ । (मुझे तुमारे रथ की पर्वाह ही नहीं है) । केवल गदा को लेकर ही मै युद्ध भूमि में उतरता हूँ ।

सूत—आयुष्मन् ! आप ऐसे ही पराक्रम वाले है इसमें कुछ सन्देह नहीं है ।

१ 'किं स्यन्दन' । २ 'देवः' । ३ 'देव' । ४ कश्चिन्न ।

दुर्योधनः—यद्येवं किमेवं भाषसे ?। पश्य—

बालस्य मे प्रकृतिदुर्ललितस्य पापः
पापं[1] व्यवस्यति समक्षमुदायुधोऽसौ ।
अस्मिन्निवारयसि किं व्यवसायिनं मां ?
क्रोधो न, नापि[2] करुणा, न च तेऽस्ति लज्जा ! ॥ ५ ॥

सूतः—(सकरुणं पादयोर्निपत्य) एतद्विज्ञापयामि—आयुष्मन्! सम्पूर्णप्रतिज्ञेन निवृत्तेन भवितव्यमिदानीं दुरात्मना वृकोदरहतकेन । अत एवं ब्रवीमि ।

एवमेतत् = सत्यमेवैतत् । नाऽत्र कश्चन सन्देह इत्यर्थः ।

बालस्येति । प्रकृत्या=स्वभावेन, दुर्ललितस्य=नितरां लालितस्य । उद्वृत्तस्य, ['शिर चढा' 'मुँह लगा'] । बालस्य=वत्सस्य, कनिष्ठभ्रातुः । मे=मम । समक्षं=संमुखमेव । उदायुधः=उद्धृताऽऽयुधः । असौ पापः= दुष्टो भीमसेनः । पापं=रुधिरपानरूपं क्रूरं कर्म । व्यवस्यति=विधातुं यतते । अस्मिन्=पापिनि । व्यवसायिनं=प्रतीकारपरं । मां किं=कस्मात्, निवारयसि=निरुणत्सि ?। स्वस्वामिभ्रातृवधात्क्रोधस्ते उचितः, बालवधात्करुणोचिता, स्वाऽविनयाच्च लज्जोचिता, परं त्रयमप्येतत्त्वयि नास्तीति नितरां निर्लज्जः क्रूरश्चासीति भावः । वसन्ततिलका वृत्तम् ॥ ५ ॥

दुर्योधन—जब तुम मेरे पराक्रम को जानते हो तो फिर ऐसा क्यों कहते हो कि "घोड़े थके है रथ युद्ध भूमि में नहीं जा सकेगा" ? । देख—

मेरे देखते देखते स्वभाव से ही दुष्ट पापी यह (भीमसेन) मेरे बच्चे (दुःशासन) पर अनुचित रूपसे शस्त्र उठा क्रूरकर्म (उसकी हत्या) कर रहा है । जब मैं इसे रोकने के लिए जाना चाहता हूँ तो तुम मुझे रोकते हो । तुमको (शत्रु पर) क्रोध या [बालक पर] दया, व [अपने कर्म पर] लज्जा - कुछ भी नहीं है, अतः तुम बड़े कायर, निर्दयी व निर्लज्ज हो ॥ ५ ॥

---

१ 'पास्यत्यसृग् जनसमक्षमुदायुधोऽसौ' । २ 'नाम' ।

दुर्योधनः—(सहसा भूमौ पतन्) हा वत्स दुःशासन ! हा मदाज्ञाविरोधितपाण्डव ! हा विक्रमैकरस ! हा मदङ्कदुर्ललित ! हा अरातिकुलगजघटामृगेन्द्र ! हा युवराज ! क्वासि ?। प्रयच्छ मे प्रतिवचनम् । (इति निःश्वस्य मोहमुपगतः) ।

[सूतः[1]—राजन् ! समाश्वसिहि समाश्वसिहि] ।

दुर्योधनः—(संज्ञां लब्ध्वा । निःश्वस्य—)

युक्तो यथेष्टमुपभोगसुखेषु नैव
　　त्वं लालितोऽपि हि मया न वृथाऽग्रजेन ।
अस्यास्तु वत्स ! तव हेतुरहं विपत्ते-
　　र्यत्कारितोऽस्यविनयं, न च रक्षितोऽसि ॥६॥

एवं='नेमे वाहाः शक्ता' इत्यवम्। मदाज्ञया विरोधिताः—कृतवैराः कृताः पाण्डवा येनासौ तत्सम्बुद्धौ रूपम् । विक्रमे—पराक्रमे एव एको रसो यस्यासौ तथाभूत ! । मदङ्केति । मदुत्सङ्गक्रीडनपरायण । अरातीति । शत्रुकुलहस्तिसमूहसिंहेत्यर्थः । युवराज=राजप्रतिनिधीभूत दुःशासन । मोहं=मूर्च्छाम् । संज्ञां= चैतन्यम् ।

युक्त इति । उपभोगसुखेषु=विलाससम्भोगसुखेषु । मया वृथाऽग्रजेन=मिथ्याज्येष्ठभ्रात्रा । निरर्थकज्येष्ठेन मया । त्वं न नियुक्तः=त्वं न नियोजितः । किञ्च लालितोऽपि न=यथेच्छमुपलालितोऽपि नैव । नैव कामं विलासित इत्यर्थः। हे वत्स ! अस्यास्तु पाण्डवपक्षादागतायास्तु। तव विपत्तेः= तव मृत्युरूपविपदः । हेतुः=कारणम् । अहम्। अस्मीति शेषः।यत्=यस्मात् ।

सूत—(करुणापूर्वक पैरों पर गिरकर) मेरी विनती यह है कि आयुष्मन् ! वह पापी भीमसेन अपनी प्रतिज्ञा अब तक पूरी कर चुका (होगा) । इस लिए मैंने ऐसा कहा था ।

दुर्योधन—(सहसा भूमिपर गिर कर) हाय वत्स दुश्शासन ! तूने मेरी आज्ञा से ही पाण्डवों से वैर बान्धा था, तू बडा पराक्रमी था, मैंने तुझे गोद में खिलाया था, शत्रु रूपी हाथियों के समूह में तूं सिंह की तरह विचरने

१ क्वचिन्न ।

(इति पुनः[1] पतति) ।

सूतः—**आयुष्मन् ! समाश्वसिहि समाश्वसिहि ।**

दुर्योधनः—**धिक्सूत ! किमनुष्ठितं भवता ?।**

रक्षणीयेन[2] सततं बालेनाज्ञानुवर्तिना ।
दुःशासनेन भ्रात्राऽहमुपहारेण रक्षितः ॥ ७ ॥

अविनयम्=अनुचितं कर्म द्रौपदीकेशाम्बराकर्षणरूपम् । कारितोऽसि । **न च**=नैव च । **रक्षितोऽसि**=न मया परित्रातोऽसि । मदर्थं हि तव पाण्डवैः शत्रुत्वम् । वसन्ततिलका वृत्तम् ॥ ६ ॥

अनुष्ठितं=कृतम् । **किमनुष्ठितम्**-अनुचितं कृतमित्यर्थो वा । **रक्षणीयेनेति** । **सततं**=सन्ततम् । **रक्षणीयेन**=रक्षणोचितेन । आज्ञामनुवर्त्तते तच्छीलेन-**आज्ञानुवर्त्तिना**=आज्ञापरिपालकेन । **बालेन** =मुग्धेन भ्रात्रा दुःशासनेन । **उपहारेण**=उपहारभूतेन । तं बलिं दत्त्वेति यावत् । **अहं-रक्षितः**=परित्रातः । इति यत्तत्त्वयाऽनुचितं कृतमित्यर्थः ॥ ७ ॥

वाला था, हाय युवराज ! तुम कहाँ हो, मुझे उत्तर दो । (इस प्रकार ऊँची सांस लेता २ मूर्च्छित हो जाता हैं) ।

सूत—राजन् ! धैर्य धरिए, धैर्य धरिए ।

दुर्योधन—[होश में आकर, ऊंची सांस लेता हुआ] हे वत्स ! तुझे अच्छे अच्छे सुख भोगों में मैंने नहीं लगाया, न तेरा मैंने अच्छी तरह से लाड-प्यार ही किया । तेरी इस विपत्ति का कारण भी मैं ही हूँ, क्योंकि मैंने तेरे हाथ से ये अनुचित कर्म (द्रौपदी का केश कर्षण आदि) तो करा दिए पर तेरी मैं रक्षा नहीं कर सका । हाय ! ॥ ६ ॥

(ऐसा कह कर फिर मूर्च्छित हो गिर पड़ता है) ।

सूत—आयुष्मन् ! धैर्य धरिए, धैर्य धरिए ।

दुर्योधन—धिक् सूत ! तुमने ऐसा अनुचित कर्म क्यों किया जो सर्वथा रक्षणीय, बालक, मेरे आज्ञा पालक भाई दुःशासन को विपत्ति में डाल कर मुझे युद्धभूमि से यहाँ लाकर तैने बचाया । (यह बहुत अनुचित किया) ॥७॥

---

१ कचिन्न । २ 'लालनीयेन' इति सुन्दरः पाठः ।

सूतः—**महाराज ! मर्मभेदिभिरिषुतोमरशक्तिप्रासवर्षैर्महारथानामपहृतचेतनत्वान्निश्चेतनः कृतो महाराज इत्यपहृतो मया रथः ।**

दुर्योधनः—**सूत ! विरूपं कृतवानसि—**

तस्यैव पाण्डवपशोरनुजद्विषो मे
[2]क्षोदैर्गदाऽशनिकृतैर्न विबोधितोऽस्मि ।
तामे[3]व नाधिशयितो रुधिरार्द्रशय्यां
दौःशासनीं यदहमाशु वृकोदरो वा ॥ ८ ॥

मर्मभेदिभिः=मर्मस्थलपीडकैः । मर्मच्छेदिभिः । **इषवः**=बाणाः । तोमरादयश्च शस्त्रभेदाः । महारथानामिषुतोमरशक्तिप्रासवर्षैरिति योजना । अपहृत**चेतनत्वात्**=विलुप्तचेतनत्वात् । निश्चेतनः=मूर्च्छितः । **महाराजः**=भवान्दुर्योधनः । **इति**=इति हेतोः । **अपहृतः**=अपसारितः । **विरूपं**=विरुद्धम् । अनुचितम् । विकृतम् ।

तस्यैवेति । **मे**=मम । **अनुजद्विषः**=भ्रातृद्विषः । **तस्यैव**=प्रसिद्धस्य । **पाण्डवपशोः**=नीचस्य मध्यमपाण्डवस्य भीमस्य । गदा अशनिरिव गदाऽशनिः, गदारूपं वज्रं वा, तत्कृतैः—**क्षोदैः=आघातैः**। निष्पेषैः । व्रणैः। क्षोभैरिति पाठे—विक्षोभैः । **न विबोधितोऽस्मि**=नाऽवबुद्धोऽस्मि । नष्टसञ्ज्ञोजातोऽस्मि । **यत्**=येन । दुश्शासनस्येयं दौश्शासनी, **तां=दौश्शासनीं**=दुश्शासनसम्बन्धिनीम् । **तां रुधिरार्द्रशय्यां**=शोणितक्लिन्नमृत्युशय्याभुवम् ।

सूत—महाराज ! बड़े बड़े महारथियों द्वारा चलाए गए मर्मभेदी बाणों की, तथा बल्लम, सांग, गण्डासा आदि शस्त्रों की भीषण वर्षा से आप मूर्च्छित हो गए थे, अतः मैंने वहाँ से रथ को हटाना ही उचित समझा ।

दुर्योधन—धिक् सूत ! तुमने बड़ाही अनुचित काम किया है । [जो मेरे रथ को युद्ध से हटा लाए] ।

उस पाण्डव पशु, मेरे भाई के वैरी [भीम] की वज्र तुल्य गदा के आघातों से मैं बेहोश हो गया था, मुझे कुछ भी ज्ञान

---

१ 'देव' ।   २ 'क्षोभै' ।   ३ 'यद्येव' ।

(निःश्वस्य नभो विलोक्य-)

ननु भो हतविधे ! कृपाविरहित ! भरतकुलविमुख !

अपि नाम भवेन्मृत्युर्न च हन्ता वृकोदरः।

सूतः—**शान्तं पापं, शान्तं पापम्। महाराज! किमिदम्?।**

दुर्योधनः—

घातिताऽशेषबन्धोर्मे किं राज्येन जयेन वा? ॥ ९ ॥

अहम्—आशु=शीघ्रम्। नाधिशयितः=न सुप्तः। नाहं तत्रैव मृतोऽस्मि। वृकोदरो वा=भीमो वा तामेव रुधिरार्द्रशय्यां नाधिशयितः। अहं शस्त्रप्रहारैर्मूर्च्छितोऽभूवं नोचेत्तं भीमं तत्रैव रुधिरशय्यायां निपातयेयम्, अहं वा तत्र शयितः स्यामित्यर्थः। वसन्ततिलका वृत्तम्॥ ८ ॥

नभः=गगनम्। कृपेति। निष्कृपेत्यर्थः। अपीति। नामेति सम्भावनायाम्। मम मृत्युरिदानीमेव भवेदपि=भवतु। प्रार्थनायां लोट्। परं वृकोदरो मे हन्ता न भवेदिति प्रार्थये इत्यर्थः। किमिदं=किमित्यमङ्गलं भाषते भवान्।

घातितेति। पाण्डवविनाशितसकलानुजस्य मे राज्येन वा जयेन वा किं=न किमपि प्रयोजनमित्यर्थः॥ ९ ॥

नहीं रहा। नहीं तो जहाँ दुःशासन का रुधिर पड़ा था, व उसकी लाश पड़ी थी वहाँ ही मैं ही मर कर गिर पड़ता या उस पापी भीमसेन को ही मारकर उसी जगह गिरा देता। पर क्या करूँ मैं बेहोश ही हो गया था ॥ ८ ॥

[लम्बी सांस लेकर] हे निर्दयी ! कुरुकुलविमुख ! विधातः !

मेरी मृत्यु ही तुझे अभीष्ट हो तो भी वृकोदर के हाथ से तो मेरी मृत्यु मत कराना।

सूत—राम राम ! शिव शिव !! महाराज ! ऐसी अमङ्गलमय वचन न बोलें। ऐसी बातें आप क्यों कर रहे हैं ?।

दुर्योधन—मेरे सभी बन्धु बान्धव युद्ध में मार डाले गए। अब मुझे राज्य से या विजय से क्या प्रयोजन है ? मेरा तो अब मरना ही अच्छा है ॥९॥

---

१ क्वचिन्न। २ 'पातिता'।

(ततः प्रविशति शरप्रहार[2]व्रणबद्धपट्टिकालङ्कृतकायः सुन्दरकः) ।

सुन्दरकः[3]—**अज्जा ! अवि णाम इमस्सिं उद्देसे सारहिदुइओ दिट्ठो तुम्मेहिं महाराज[4]दुज्जोहणो ण वे त्ति ?** । (निरूप्य) **कहं ण कोवि मन्तेदि !** । **होदु** । **एदाणं बद्धपरिअराणं योह[3]पुरिसाणं समूहो दीसइ । एत्थ गदुअ पुच्छिस्सम्** । (परिक्रम्य विलोक्य च) **कहं एदे क्खु स्ससामिणो गाढप्पहाराहदस्स घणसण्णाहजाल-**

[आर्याः । अपि नामास्मिन्नुद्देशे सारथिद्वितीयो दृष्टो युष्माभि-र्महाराजदुर्योधनो न वेति ? । कथं न कोऽपि मन्त्रयते ! । भवतु । एतेषां बद्धपरिकाराणां योधपुरुषाणां समूहो दृश्यते । अत्र गत्वा प्रक्ष्यामि ।

व्रणेति । व्रणेषु क्षतेषु बद्धा या **पट्टिका=**वस्त्रखण्डः, तयाऽलङ्कृतः कायः=शरीरं यस्यासौ तथा । **सुन्दरकः**=तन्नामा ।

आर्याः=मान्याः । **अपि**—इति प्रश्ने । **नामेति** सम्भावनायाम् । उद्देशे=प्रदेशे । **मन्त्रयते**=भाषते । उत्तरं ददाति । **बद्धपरिकराणां=**कृतसन्नाहानाम् । गाढप्रहारैः **आहतस्य**=व्यथितस्य । जातप्रहारस्य । **घन**= निबिडो यः **संनाहः**=कवचः, तस्य स एव वा जालं, तस्मात् **दुर्भेद्यं**=दुःख-

---

[बाण खड्ग आदि के प्रहारों से हुए घावों पर पट्टियाँ बान्धे हुए सुन्दरक का प्रवेश]

सुन्दरक—आर्यो [सज्जनों] ! क्या आप लोगो ने कहीं सारथि सहित महाराज दुर्योधन को भी देखा है ? । [देख कर] क्या बात है ? कोई बोलता ही नहीं है । अच्छा ! यह सामनें बद्ध परिकर (कमर कसे हुए) योद्धाओं का समूह दिखाई पड़ रहा है । वहाँ जाकर पूछता हूँ । [चलकर और देखकर] ये सब ही अपनें स्वामी जिसे युद्ध में बहुत चोट आ गई है—के

---

१ कश्चित्र । २ 'ततः प्रविशति सप्रहारः पुरुषः' । ३ 'पुरुषः' ।

४ 'महाराओ' (महाराजो) ।

५ 'कहं वा पेक्खिअ अहिअदरं रुअन्ति' [कथं वा प्रेक्ष्याधिकतरं रुदन्ति] ।

दुब्भेज्जमुहेहिं कङ्कवदनेहिं[1] हिअआदो सल्लाइं उद्धरन्ति । ता[2] ण क्खु एदे जाणन्ति । होदु । अण्णदो विचिणइस्सम् । (अग्रतोऽवलोक्य, किंचित्परिक्रम्य) इमे क्खु अवरे प्पहूददरा सङ्गदा[4] वीरमणुस्सा दीसन्ति[3] । ता एत्थ गदुअ पुच्छिस्सम् । (उपगम्य) हंहो ! जाणह तुम्हे कस्सिं उद्देसे कुरुणाहो वट्टइ त्ति ?। कहं एदे वि मं पेक्खिअ अहिअदरं रोअन्ति । ता[5] ण क्खु

कथमेते खलु स्व[3]स्वामिनो गाढप्रहाराऽऽहतस्य घनसन्नाहजालदुर्भेद्यमुखैः कङ्कवदनैर्हृदयाच्छल्यान्युद्धरन्ति । तन्न खल्वेते जानन्ति । भवतु । अन्यतो विचेष्यामि । इमे खल्वपरे प्रभूततराः सङ्गता वीरमनुष्या दृश्यन्ते । तदत्र गत्वा प्रक्ष्यामि । हंहो ! जानीथ यूयं कस्मिन्नुद्देशे कुरुनाथो वर्तते इति ?। कथमेतेऽपि मां प्रेक्ष्याधिकतरं रुदन्ति । तन्न

प्रवेश्यं मुखं वदनं येषां तैः । कथं चित्कवचान्तर्विनिवेशितमुखैरित्यर्थः । कङ्कवदनानि—शल्योद्धरणयन्त्राणि । कङ्कपत्राणीति पाठेऽपि स एवाऽर्थः । **विचेष्यामि**=अन्विष्यामि ।

सङ्गताः=मिलिताः । **हंहो** इति सम्बोधने । सत्वरमामन्त्रणे वा । **वीर-**

हृदय से गाढ बन्धे हुए कवच के बीच से बडी कठिनता से कङ्कवदन (सण्डासी) द्वारा शल्य [टूटे हुए बाण आदि का अग्र भाग] निकाल रहे हैं । इसलिए ये भी नहीं जानते हैं कि महाराज कहाँ हैं । अच्छा ! दूसरी जगह खोजता हूँ । (आगे देखकर थोड़ा चल कर) ये बहुत से वीर पुरुष इकट्ठे हो रहे हैं । इनके पास चलकर पूछता हूँ । (पास में जाकर) क्यों आपलोग जानते हैं कि महाराज कुरुराज (दुर्योधन) कहाँ हैं ? । हैं ! ये तो मुझे देखकर और अधिक रोने लगते हैं । अतः ये भी नहीं जानते हैं ।

---

१ 'कङ्कवत्तेहिं' [कङ्कपत्रैः] ।

२ 'ता क्खु एदे ण' [तत्खल्वेते न] । ३ कचिन्न ।

४ 'संकलिदा वीरमाणुसा' । [सङ्कलिता वीरमनुष्याः] ।

५ (वृद्धा) 'ता ण क्खु' । 'ताणहु' ।

एदे विजाणन्ति । (दृष्ट्वा) हा ! अदि[1]करुणं क्खु एत्थ वट्टइ । एसा वीलमादा समलविणिहदं पुत्तअं सुणिअ रत्तंसु[2]अणिवसणाए समग्गभूसणाए बहूए सह अणुमरदि । (सश्लाघम्) । साहु वीरमादे ! साहु । अण्णस्सिं वि जम्मन्तरे अणिहदपुत्तआ हुविस्ससि [पुत्तोवि दे अखण्डिदयसो वीरो हुविस्सदि] । होदु । अण्णदो पुच्छिस्सम् । (अन्यतो विलोक्य) अअं अवरो बहुप्पहारणिहदकाओ अकिदव्वणबन्धो एव्व जोहसमूहो इमं

खल्वेतेऽपि जानन्ति । हा ! अतिकरुणं खल्वत्र वर्तते ।

एषा वीरमाता समरविनिहतं पुत्रकं श्रुत्वा रक्तांशुकनिवसनया[2] समग्र[3]भूषणया वध्वा सहाऽनुम्रियते । साधु वीरमातः ! साधु । [आर्ये वीरमातः !] अन्यस्मिन्नपि जन्मान्तरेऽनिहतपुत्रका भविष्यसि [पुत्रोऽपिते ऽखण्डितयशा वीरो भविष्यति] । भवतु । अन्यतः प्रक्ष्यामि । अयमपरो बहुप्रहारनिहतकायोऽकृतव्रणबन्ध एव योधसमूह इमं शून्यासनं तुरङ्गममुपालभ्य

माता=वीरजननी । बहुप्रहारैः निहतः=आहतः कायः—शरीरं यस्यासौ तथा । विपुलप्रहारजर्जरदेह इत्यर्थः । शून्यासनं=हताऽऽरोहितया रिक्तपृष्ठम् । अवस्थानुरूपं=दशानुरूपम् । व्यसनं=विपत्तिम् । भागधेयस्य—भाग्यस्य ।

(देखकर) हा यहाँ तो दुष्कर (भीषण) कर्म हो रहा है—

यहाँ यह वीरमाता युद्ध में अपनें मारे गए पुत्र की खबर सुनकर सौभाग्य सूचक लाल वस्त्र पहिनी हुई सब शृङ्गार की हुई अपनी पुत्रवधू [बहू] के साथ चिता में जलकर मर रही है । [प्रशंसापूर्वक] वाह वीरमाता वाह ! तूं दूसरे जन्म में दीर्घायुपुत्रवाली होगी । तेरा पुत्र भी बड़ा शूर वीर व यशस्वी होगा । अच्छा दूसरी ओर खोजता हूँ । [दूसरी ओर देख कर] यह प्रहारों से जर्जर शरीरों वाले इन शूर वीरों का समूह जिसनें व्रणों पर पट्टी तक

१ 'हा हा दुक्करं क्खु' । [हा हा ! दुष्करं खलु] । २ 'रक्तांशुकयुगनेपथ्यया' । ३ 'सर्वाङ्गभूषणया' । ४ कचिन्न । ५ 'विचिणइस्सम् । [विचेष्यामि] । ६ 'अकिद व्रणप्पडिआरो' [अकृतव्रणप्रतीकारः] ।

सुण्णासणं तुलङ्गमं उवालहिअ रोइदि। णूणं एदाणं एत्थ एव्व सामी वावादिदो। ता ण क्खु एदे वि जाणन्दि। होदु। अण्णदो गदुअ पुच्छिस्सम्। (सर्वतो विलोक्य) कहं सव्वो एव्व अवत्थाणुरूवं व्वसणं अणुभवन्तो भाअधेअविसमसीलदाए[1] पज्जाउलो जणो। ता कं दाणीं[2] एत्थ पुच्छिस्सम्?। कं वा उवालहिस्सम्।होदु।सअं एव्व एत्थ विच्चिणइस्सम्। (परिक्रम्य)होदु। देव्वं दाणीं उवालहिस्सम्। हंहो देव्व! एआदसाणं अक्खोहिणीणं णाहो, जेट्ठो भादुसदस्स, भत्ता गाङ्गेअजयद्दथद्दोणङ्गराअ-

रोदिति। नूनमेतेषामत्रैव स्वामी व्यापादितः। तन्न खल्वेतेऽपि जानन्ति। भवतु। अन्यतो गत्वा प्रक्ष्यामि। कथं सर्व एवात्रस्थानुरूपं व्यसनमनुभवन्भागधेयविषमशीलतया[1] पर्याकुलो जनः। तत्किमिदानीमत्र[2] प्रक्ष्यामि। कं वोपालप्स्ये?। भवतु। स्वयमेवात्र विचेष्यामि। भवतु। दैवमिदानीमुपालप्स्ये। हंहो दैव! एकादशानामक्षौहिणीनां नाथो, ज्येष्ठो भ्रातृशतस्य, भर्ता गाङ्गयजयद्रथद्रोणाऽङ्गराजशल्यकृपकृतवर्माश्वत्थामप्रमु-

विषमशीलतया=विरुद्धतया। **पर्याकुलः**=व्याकुलः। व्याक्षिप्तचेताः।

अक्षौहिणीनामिति। २१८७० रथाः, २१८७० हस्तिनः, १०९३५० पदातयः, ६५६१० अश्वाः-मिलिता एकाऽक्षौहिणी सेना। ईदृशानामेकादशाक्षौहिणीनामधिपतिरित्यर्थः। **भर्त्ता**=पालकः। **गाङ्गेयः**=भीष्मः। राज-

नहीं बान्धी है, तथा जिनके घावों से रुधिर निकल रहा है,—सवार से शून्य इस घोड़े को आलिङ्गन कर रो रहा है। जरूर इनका राजा यहाँ मारा गया है [यह उसी का घोड़ा है]। अच्छा तो ये भी नहीं जानते हैं। अच्छा दूसरी जगह जाकर पूछता हूँ। [चारों ओर देखकर] यहाँ तो सभी लोग अपनी अपनी अवस्था के अनुरूप विपत्ति में पड़े हुए हैं और दैव के विमुख होने के कारण सभी दुःख भोग रहे हैं और व्याकुल हो रहे हैं। यहाँ किससे पूछूं?। इसमें दोष भी किसको दूं?। अच्छा मैं स्वयं ही महाराज को खोजता हूं। अच्छा! इसमें दैव

१ 'विमुहदाए' [विमुखतया]। २ कच्चिन्न।

सल्लकिदकिदवम्मअस्सत्थामप्पमुहस्स राअचक्कस्स सअलप्पुहवीमण्डलेक्कणाहो महाराअदुज्जोहणो वि अण्णेसीअदि !। अण्णेसीअन्तो वि[1] ण जाणीअदि कस्सिं उद्देसे वट्टइ त्ति!। (विचिन्त्य[2] निःश्वस्य च) अहवा किं एत्थ देव्वं उवालहामि। जदो तस्स क्खु एदं णिब्भच्छिअविउरवअणबीअस्स, अवधीरिद[3]पिदामहहिदोवदेसङ्कुरस्स, सउणिहदअप्पोच्छाहणादिविरूढमूलस्स जदु-

खस्य राजचक्रस्य, सकलपृथ्वीमण्डलैकनाथो महाराजदुर्योधनोऽप्यन्विष्यते!। अन्विष्यमाणोऽपि न ज्ञायते कस्मिन्नुद्देशे वर्तत इति!!। अथवा किमत्र दैवमुपालभे। यतस्तस्य खल्विदं निर्भर्त्सितविदुरवचनबीजस्याऽवधीरित[3]पितामहहितोपदेशाङ्कुरस्य, शकुनिहतकप्रोत्साहनादिविरूढमूलस्य

चक्रस्य=राजसङ्घस्य। सकलपृथ्वीमण्डलस्य=सकलभूवलयस्य। एकनाथः=एकस्वामी, चक्रवर्ती। निर्भर्त्सितं-तिरस्कृतं विदुरवचनमेव बीजं=कारणं यस्य तस्य। अवधीरितः पितामहोपदेश एव अङ्कुरः-अभिनवोद्भेदो यस्य तस्येत्यर्थः। पापिना शकुनिना कृतं यत्प्रोत्साहनादि तदेव विरूढं मूलं यस्य तस्य। जतुगृहं द्यूतं विषं-विषदानं चेति शाखीव-जतुगृहद्यूतविषशाखी=लाक्षागृहादि-

[विधाता] को ही उलहना देता हूँ। अरे दुर्दैव ! ११ अक्षौहिणी सेना के स्वामी, १०० भाइयों में ज्येष्ठ, भीष्म जयद्रथ द्रोण कर्ण शल्य कृप कृतवर्मा अश्वत्थामा प्रभृति राजा महाराजाओं के पति, संपूर्ण पृथिवी के एक चक्रवर्ती महाराज दुर्योधन को भी खोजना पड़ता है कि—वह कहाँ किस कोने में है ?। अथवा दैव का भी इसमें दोष देना वृथा है। यह तो-विदुर जी के वचनों का तिरस्कार ही जिसका बीज है, भीष्मपितामह के उपदेशों का न मानना ही जिसका अङ्कुर है, शकुनि आदि दुष्टों के प्रोत्साहन ही जिसकी मजबूत जड़ है, पुराना बद्धमूल बैर ही जिसका आलवाल [जड में जल देने का थल' 'मिट्टी का घेरा'] है, द्रौपदी

१ कश्चिन्न। २ 'विमृश्य'। ३ परिहुद ('परिभूत')।

गेहजूदविससाहिणो सम्भूदचिरआलसम्बद्धवेरालवालस्स पञ्चालीकेसग्गहणकुसुमस्स फलं परिणमदि। (अन्यतो विलोक्य)

अम्मो! जहा एत्थं एसो विविहरअणप्पहासंवलिदसूरकिरणप्पसूदसक्कचावसहस्ससंपूरिददसदिसामुहो लूणकेदुवंसो रहो दीसइ, ता अहं तक्केमि अवस्सं एदिणा महाराअदुज्जोहणस्सविस्सामुद्देसेण होदव्वम्। याव[1] निरूपेमि[1]। (उपगम्य[4] दृष्ट्वा

जतुगृहद्यूतविषशाखिनः संभूतचिरकालसम्बद्धवैरालवालस्य पाञ्चालीकेशग्रहणकुसुमस्य फलं परिणमति। अम्मो[1]! यथात्रैष[2] विविधरत्नप्रभासंवलितसूर्यकिरणप्रसूतशक्रचापसहस्रसंपूरितदशदिङ्मुखो[3] लूनकेतुवंशो रथो दृश्यते, तदहं तर्कयाम्यवश्यमेतेन महाराजदुर्योधनस्य विश्रामोद्देशेन

क्रूरकर्मवृक्षस्य। संभूतं जातं चिरकालं सम्बद्धं=संसक्तं, स्थितं यत् वैरमेवाऽऽलवालम्=आवापो यस्य तस्य। पाञ्चालीकेशग्रहणमेव कुसुमं यस्य तस्य। शाखिनः-फलं=परिपाकः, परिणमति=उपनमति। उपागच्छति।

'अम्मो' इत्याश्चर्ये हर्षे वा देशी। अत्र=अस्मिन् प्रदेशे। विविधानि यानि रत्नानि, तेषां प्रभा=कान्तिः, तया संवलिताः ये सूर्यकिरणाः, तैः प्रसूता ये शक्रचापास्तेषां सहस्रैः संपूरितं दशदिशानां मुखं प्रान्तभागो येनासौ तथाभूतः। लूनः केतोर्वंशो यस्यासौ तथाभूतः। निकृत्तध्वजदण्डः। उत्तमजातिरत्नतेजोभिरिन्द्रधनुरारभ्यते इति रत्नविदः। विश्रामोद्देशेन=विश्रामस्थानेन। निरूपयामि=पश्यामि। नायकः=नेता। प्रभुः। 'अधिभूर्नायको नेता' इत्यमरः।

के केश पकड़कर खींचना ही जिसका पुष्प है, ऐसे लाक्षागृहदाह व द्यूत (जूवा) तथा विषदानरूपी विषवृक्ष का फल है।

[एक ओर देखकर]।

अरी मैया! यहाँ नाना प्रकार के रत्नों की कान्ति से मिलित जो सूर्य किरणें, उनसे निर्मित जो हजारों इन्द्र धनुष, उनसे दशों दिशाओं के मुख (कोना कोना) को जिसनें परिपूर्ण कर दिया है, जिसकी ध्वजा का बाँस कट गया है ऐसा यह रथ दिखाई दे

---

१ क्वचिन्न। २ 'चैष'। ३ 'दिशामुखो'। ४ 'उपसृत्य दृष्ट्वा च'।

निःश्वस्य च) कधं एआदहाणं अक्खोहिणीणं णाअको भविअ महाराओ दुज्जोहणो पाइदपुरिसो विअ असलाहणीए भूमीए उवविट्ठो चिट्ठदि। अध वा तस्स क्खु एदं पञ्चालीकेसग्गह-कुसुमस्स फलं परिणमदि । [उपसृत्य दृष्ट्वा च] जअदु जअदु महाराओ ।

भवितव्यम् । यावन्निरूपयामि । कथमेकादशानामक्षौहिणीनां नायको भूत्वा महाराजो दुर्योधनः प्राकृतपुरुष इवाऽश्लाघनीयायां भूमावुपविष्ट-स्तिष्ठति । अथ वा तस्य खल्विदं पाञ्चालीकेशग्रहकुसुमस्य फलं परिणमति [जयतु जयतु महाराजः] ।

सूतः—[विलोक्य] आयुष्मन् ! समरात्सुन्दरकः प्राप्तः ।

प्राकृतपुरुषः=साधारणो लोकः । अश्लाघनीयायाम्=अपरिष्कृतायाम् । अनुचितायाम् । पाञ्चाली=द्रौपदी । तस्याः केशग्रह एव कुसुमं यस्य वृक्षस्य तस्य। फलं=परिपाकः। उपसृत्य=समीपं गत्वा। पाठान्तरे-सञ्ज्ञया=सङ्केतेन ।

रहा है । इससे मैं यह विचार करता हूँ कि-यहीं पर महाराज दुर्योधन विश्राम कर रहे होगें । अच्छा चलकर देखता हूँ । [पासमें जाकर, देखकर, लम्बी सांस लेकर] हाय ! ग्यारह ११ अक्षौहिणी सेना का मालिक होकर भी महाराज दुर्योधन सामान्य मनुष्य की तरह इस असुन्दर (जंगली ऊंची नीची एवं अपरिष्कृत) भूमि पर बैठे हैं । अथवा द्रौपदी के केश पकड़ कर खींचना ही जिसका पुष्प है ऐसे उस द्यूतवृक्षका यह फल परिणत हुआ (पका) है।

(पास मेंजाकर, देखकर) महाराज की जय हो, जय हो ।

सूत—(देखकर) आयुष्मन् ! युद्धभूमि से सुन्दरक आया है ।

१ अस्य पाठस्य स्थाने क्वचित्-"[उपसृत्य सूतं सञ्ज्ञया पृच्छति] । **सूतः**-(दृष्ट्वा) अये ! कथं सङ्ग्रामात्सुन्दरकः सम्प्राप्तः । **सुन्दरकः**-(उपगम्य) जअदु जअदु महाराओ ! । **दुर्योधनः**-(विलोक्य)" इत्येवं पाठः ।

दुर्योधनः—[विलोक्य] **अये सुन्दरक ! कच्चित्कुशल-मङ्गराजस्य ?।**

सुन्दरकः—**देव ! कुसलं सरीरमेत्तेण।**

[देव ! कुशलं शरीरमात्रेण[1]]।

दुर्योधनः—[ससम्भ्रमं] **सुन्दरक ! किं[2] किरीटिनास्य निहता धौरयकाः[3], हतः सारथिर्भग्नो वा रथः ?।**

सुन्दरकः—**देव ! ण भग्गो रहो ! से मणोरहो बि।**

[देव[4] ! न भग्नो रथः। अस्य मनोरथोऽपि]।

दुर्योधनः [सरोषं] **अरे ! किमेवमस्पष्टकथितैराकुलमपि[5]**

अङ्गराजस्य=कर्णस्य। धुरं वहन्ति धौरेयाः। 'धुरो यड्ढकौ'। त एव **धौरेयकाः**= अश्वाः।'**मनोरथोऽपी**'त्यस्य 'भग्न' इति शेषः। तत्पुत्रस्य मृतत्वान्मनोरथभङ्ग इत्युक्तम्। महदनिष्टं जातमित्याशयः। **अविस्पष्टकथितैः**=गूढोक्तिभिः। सन्दिग्धभाषितैः।

दुर्योधन— (देखकर) अहो सुन्दरक ! कहो अङ्गराज कर्ण कुशल पूर्वक तो है ?।

सुन्दरक—महराज ! शरीरमात्र से तो कुशलपूर्वक है।

[अर्थात् अभी जी रहे है पर बडी विपत्ति में है]।

दुर्योधन—(बड़ी घवड़ाहट से) सुन्दरक ! क्या अर्जुन ने इनके घोडों को मार दिया है या सारथि को मार दिया है या रथ को ही तोड़ दिया है ? (क्या बात है जो तुम ऐसा कहते हो ?)।

सुन्दरक—महाराज ! केवल रथ को ही नही नष्ट कर दिया है किन्तु इनका मनोरथ (प्रिय पुत्र) ही नष्ट कर दिया है।

---

१ 'मेत्तकेण'। ['मात्रकेण']।

२ कच्चिन्न। ३ 'धौरेयाः'। ४ 'देव ! ण भग्गो रहो किं तु अम्हाणं सअलराअचक्कस्स मणोरहो वि'। 'ण रहो भग्गो'।

५ 'किमविस्पष्टकथितैराकुलमपि पर्याकुलयसि मे हृदयं'।

मे मनः पर्याकुलयसि ! । तदलं सम्भ्रमेण[1] । अशेषतो विस्पष्टं कथ्यताम् ।

सुन्दरकः—जं देवो आणवेदि । अए[1] दिट्ठिआ[1] देवस्स मउड-मणिप्पहावेण अवणीदा मे रणप्पहारवेअणा[2] (इति साटोपं परिक्रम्य) सुणादु देवो। अज्ज दाव कुमालदुस्सासणवहा-(इत्य-र्धोक्ते मुखमावृणोति[4]) ।

[यद्देव आज्ञापयति । अये[3] ! दिष्ट्या[3] देवस्य मुकुटमणिप्रभावेणापनीता मे रणप्रहारवेदना[2] । शृणोतु देवः । अस्तीदानीं[3] कुमारदुःशासनवधा--]

पर्याकुलयसि=नितरां व्याकुलीभावं नयसि । मनः=हृदयम् । अशेषतः= सकलम् । आदितः । विस्पष्टमिति क्रियाविशेषणम् । आज्ञापयति=आदि-शति । देवस्य=राज्ञः । मुकुटमणिप्रभावेण=मुकुटमणिमाहात्म्येन । मुखा-वलोकनमात्रेण । कटाक्षमात्रेण । अपनीता=दूरीभूता । साटोपं=ससंर-म्भम् । (पैतरा बदलकर) । परिक्रम्य=किञ्चित्पदान्तरमुपसृत्य । आवृ-

दुर्योधन—[क्रोध से] अरे ! इस प्रकार अस्पष्ट बातों से मेरे व्याकुल मन को अधिक व्याकुल कर रहा है ? । अतः घबड़ाओ मत । प्रारम्भ से सब वृतान्त साफ साफ कहो ।

सुन्दरक—जैसी महाराज की आज्ञा । बड़े हर्ष एवं सौभाग्य की बात है, महाराज के मुकुटमणि के प्रभाव से मेरे बाणों के प्रहारों की पीड़ा भी जाती रही है । [ऐसा कहकर बड़े तपाक से पास में आकर] महाराज ! सुनिए ! आज कुमार दुःशासन के वध—[ऐसा कहता २ बीच में ही भय से मुख छिपा लेता है]

१ कश्चिन्न ।

२ 'बाण' । ३ अत्थि दाणीं ['अस्तीदानीं'] ।

४ 'माच्छाद्य शङ्कां नाटयति' ।

सूतः—**सुन्दरक ! कथय । कथितमेव दैवेन ।**

दुर्योधनः—**कथ्यताम् । श्रुतमस्माभिः ।**

सुन्दरकः—(स्वगतम्) **कधं[1] दुस्सासणवहो सुदो देवेण । (प्रकाशम्) सुणादु देवो । अत्थि[2] दाणीं कुमालदुस्सासणवहामरिसिदेण सामिणा अङ्गराएण [किद] कुडिलभिउडीभङ्गभीसणललाडवट्टेण अविण्णादसंधाणमोक्खेण[3] सिलीमुहसंघादवरिसिणा अभिजुत्तो सो दुराआरो दुस्सासणबेरिओ मज्झमपण्डवो भीमसेणहदओ ।**

[कथं दुःशासनवधः श्रुतो देवेन । शृणोतु देवः । अद्य तावत्कुमारदुःशासनवधामर्षितेन स्वामिनाङ्गराजेन [कृतं] कुटिलभ्रुकुटीभङ्गभीषणललाटपट्टेनाऽविज्ञातसंधानमोक्षेण शिलीमुखसङ्घातवर्षिणाऽभियुक्तः स दुराचारो दुःशासनवैरी मध्यमपाण्डवो भीमसेनहतकः ।

णोति=आच्छादयति । मुखाच्छादनं च राजभीत्या । दैवेन=दुरदृष्टेन । श्रुतं=दुश्शासनवधाद्यनिष्टजातमाकर्णितम् । अर्द्धोक्तमेव पूरयति–वधामर्षितेनेति ।

अमर्षितेन=क्रुद्धेन । अङ्गराजेन=कर्णेन । कुटिलाया भ्रुकुट्या यो भङ्गः–मोटनं, तेन भीषणं ललाटपट्टं यस्यासौ तथाभूतेन । शिलीमुखाः—बाणाः । अभियुक्तः=आक्रान्तः । दुराचारः=दुष्टकर्मा । दुःशीलः । मध्यमपाण्डवः=

सूत—कहो कहो ! यह दुःसंवाद तो दुर्दैवने ही कह दिया है । [अर्थात् महाराज को यह खबर मालूम ही हो चुकी है] ।

दुर्योधन—हाँ, कहो कहो, मैं सब सुन चुका हूँ ।

सुन्दर—(मनहीमन) महाराजनें दुःशासनवध का हाल कैसे सुन लिया ? । (प्रकट) महाराज सुने । आज कुमार दुःशासन के बध से क्रुद्ध हुए क्रोध से टेढीं हुई भ्रुकुटी से जिनका ललाट पट्ट भयङ्कर हो गया है, जिन का बाण निकालना वँ छोडना तेजी के कारण मालूम नहीं होता था, जो बाणों की

---

१ क्वचिन्न । २ 'अज्ज दाव' [अद्य तावत्] ।

३ 'संधाणतिक्खमोक्खणिक्खित्तसाधारावरिसिणा' । [सन्धानतीक्ष्णमोक्षनिक्षिप्तशरधारावर्षिणा] ।

उभौ—**ततस्ततः ?।**

सुन्दरकः—**तदो देव ! उहअबलमिलन्तदीप्पन्तकरितुरअपदादिसमुद्धूदधूलिणिअरेण[1] पल्लत्थगअघढासंघादेण[2] अ वित्थरन्तेण अन्धआरेण अन्धीकिदं उहअबलम् । ण[3] हु गगणतलं लक्खीअदि ।**

[ततो देव ! उभयबलमिलद्दीप्यमानकरितुरगपदातिसमुद्धूतधूलिनिकरेण पर्यस्तगजघटासंघातेन च विस्तीर्यमाणेनान्धकारेणान्धीकृतमुभयबलम् । न खलु[3] गगनतलं लक्ष्यते] ।

उभौ—**ततस्ततः ?।**

भीमसेनः । उभयबलानां=कुरुपाण्डवबलानाम् । **मिलत्**=संश्लिष्यत् यत् **करितुरगपदाति**=हस्त्यश्वपादातं, तेन **समुद्धूतः**=उत्थितो यो **धूलिनिकरः**=रेणुसमूहः । **पर्यस्ता**=विस्तृता विपर्यस्ता च या **गजानां** = हस्तिनां, **घटा**= घटना, तस्याः सङ्घातः समूहस्तेन च । **विस्तीर्यमाणेन**=प्रवर्द्धमानेन । **अन्धीकृतं**=दृष्टिशक्तिविकलीकृतम् । **बलं**=सेना । **न खलु**=नैव ।

भीषण वर्षा कर रहे थे ऐसे स्वामी अङ्गराज नें उस दुःशासन वैरी भीमसेन पर प्रचण्ड आक्रमण किया ।

दुर्योधन व सूत—तब क्या हुआ ?

सुन्दरक—तब महाराज ! दोनों सेनाओं के परस्पर आक्रमण करने से इधर उधर दौड़ते हुए हाथी घोड़े सिपाहियों के पैरों से उठी हुई धूल से तथा इधर उधर फैले हुए हाथियों के झुण्ड से वहाँ अन्धकार फैल गया । किसी को हाथ से हाथ नहीं दिखाई देता था । आकाश या भूतल का पता नहीं था । ऐसा युद्ध प्रारम्भ हुआ ।

दुर्योधन—व **सूत**—तब क्या हुआ ?।

---

१ 'णिवहेण' । २ 'पल्लत्थतत्तदअघडा–' । [पर्यस्ततत्तद्गजघटा] ।
३ 'ण भुवणतलं' [न भुवतलं] ।

सुन्दरकः—**तदो देव ! दूराकड्ढिअधणुग्गुणाच्छोडणटङ्कार[1]-गम्भीरभीसणेण अंधआरेण जाणीअदि—गज्जिदं पलअजल-हरेण त्ति ।**

[ततो देव ! दूराकृष्टधनुर्गुणाच्छोटन[2]टङ्कार[1]गम्भीरभीषणेनान्धकारेण ज्ञायते 'गर्जितं प्रलयजलधरेणे'ति] ।

दुर्योधन—**ततस्ततः ?** ।

सुन्दरकः—**तदो देव ! दोह्णिं वि ताणं अण्णोण्णसिंहणाद-गज्जिदपिसुणं विविहपरिमुक्कप्पहरणाहदकवअसंगलिद[3]जलण-विज्जुल्लअं[4] बहलरुहिरबिंदुवज्जोअभासुरं गम्भीरत्थणिअचाप-**

ततस्ततः=ततोऽग्रे किं जातन्तत्त्वरितं कथय । दूरमाकृष्टो यो धनुषो गुणस्तस्य यदा**च्छोटनम्=आस्फालनं**, विमोको वा, तेन तस्य वा यट्टङ्कारो-ध्वनिविशेषः, तेन । प्रलयजलधरेण **गर्जितं=**गर्जनं कृतमिति ज्ञायते । अन्धकारस्य मेघरूपत्वाद्धनुष्टङ्कारस्य च तद्गर्जितोपमत्वादित्याशयः । **द्वयोः=**कर्णभीमयोः । **सिंहनादः=**सिंहवन्नादो ध्वनिः स एव गर्जितस्य मेघध्वनेः **पिशुनः=सूचको** यत्रेत्यर्थः । विविधानि **परिमुक्तानि=**प्रयुक्तानि यानि प्रहर-

---

सुन्दरक—तब महाराज ! (कर्ण व भीष्म आदि से) दूर तक खींचकर छोड़ी गई धनुष की डोरी की टङ्कार से उस अन्धकार में प्रलयकाल के मेघ की सी ध्वनि होती थी । [मेघ में भी गडगडाहट होती ही है । यहाँ अन्धकार मेघ है, उसमें धनुष की ध्वनि ही गडगडाहट है] ।

दुर्योधन—तब क्या हुआ ? ।

सुन्दरक—तब महाराज ! उन दोनों का परस्पर सिंहनाद ही जिसमें गर्जन है, नाना प्रकार के छोड़े गए शस्त्र अस्त्रों से ताडित लौह कवचों से निकलने वाली अग्नि ही जिसमें चमकती हुई बिजली है, घन रुधिर के बिन्दु

---

१ 'टङ्कारेण' 'टङ्कारान्धकारेण' । २ 'स्फोटन' । ३ क्वचिन्न । ४ 'संज्वलित' । 'सञ्जनित' । ५ 'विद्युत्कं' । 'विद्युच्छटाभासुरं' । 'विद्युच्चक्रं' ।

जलहरप्पसरन्तसरधारासहस्सवरिसदुद्दंसणं जादं समरदुद्दिणं।

[ततो देव ! द्वयोरपि तयोरन्योन्यसिंहनादगर्जितपिशुनं विविधपरिमुक्तप्रहरणाहतकवचसङ्कलितज्वलनविद्युल्लतं, बहलरुधिरबिन्दु खद्योतभासुरं, गम्भीरस्तनितचापजलधरप्रसरच्छरधारासहस्रवर्षदुर्दर्शं जातं समरदुर्दिनम्]

दुर्योधनः—**ततस्ततः ?।**

सुन्दरकः—**तदो देव ! एदस्सिं अन्तरे जेट्ठस्स भादुणो परिभवसङ्किणा धणंजएण वज्जणिग्घादणिग्घोसविसमरहेरसिद-**

णान्यायुधानि, तैराहतानि=परिघट्टितानि यानि कवचानि, तैः सङ्कलितो निस्सृतो यो ज्वलनः=वह्निः स एव विद्युल्लता यत्र तत्। बहलं=घनीभूतं यद्रुधिरं, तस्य ये बिन्दवः, त एव खद्योताः=ज्योतिरिङ्गणाः, तैर्भासुरं=देदीप्यमानम्। 'खद्योतो ज्योतिरिङ्गणः' इत्यमरः। गम्भीरं स्तनितं गर्जितं यस्य तादृशश्च य एव जलधरो मेघः, तस्मात् प्रसरत्=निःसरत् यत् शराः=

रूप खद्योतों [पटबीजना] से जो देदीप्यमान हो रहा है, धनुष ही जिसमें गर्जते हुए मेघ हैं, छूटती हुई बाणों की हजारों धाराओं से जो देखने में भयानक है ऐसा युद्धरूपी दुर्दिन उपस्थित हो गया। [अर्थात् भीम व कर्ण का भयानक युद्ध होने लगा और उससे अन्धेरा छा गया]।

दुर्योधन—तब क्या हुआ ?।

सुन्दरक—तब देव ! इसी बीच में अपनें बडे भाई भीमसेन के परास्त होने के भय से अर्जुननें—वज्र के गिरने की कड़कड़ाहट की तरह जिस [के घोडों] की तीखी ध्वनि है, जिसके शिखर [चोटी] पर हनूमान् जी विराजमान

१ 'सहस्सवरिस' ['सहस्रवर्षि']।   २ 'संभूद' [संभूत]।
३ 'सज्वलित'।   ४ 'विद्युच्छटाभासुरं, गम्भीर'।
५ 'जलधर'।   ६ 'तदो अ' [ततश्च]।   ७ 'पराभव'।

८ 'वज्जणिग्घादणिग्घोसो बिसमरसिदहरसिदहओ सिहरट्ठिदवाणरो। [वज्रनिघातनिर्घोषो विषमरसितहर्षितहयः शिखरस्थितवानरः]। वज्रणिग्घादणिग्घोसविसमरसिदधअअग्गट्ठिदमहावाणरो'। [वज्रनिर्घातनिर्घोषविषमरसितध्वजाग्रस्थितमहावानरः]।

हयो, सिहरअग्गट्ठिदमहावाणरो, तुरङ्गसंबाहणवावािदवासुदेवसङ्खचक्कासिगदालंछिदचडुलचउब्बाहुदुद्दंसणो, आपूरिअपञ्चजण्णदेअअत्ततारसिदप्पडिरवभरिददसदिसामुहकुहरो-धाविदो तं उद्देसं रहवरो।

[ततो देव ! एतस्मिन्नन्तरे ज्येष्ठस्य भ्रातुः परिभवशङ्किना धनञ्जयेन वज्रनिर्घातनिर्घोषविसृमरहेषितहयः, शिखराग्रस्थितमहावानरस्तुरङ्गम

बाणा एव (तेषां वा) धारासहस्रं, तन्मयं यद्वर्षं=वृष्टिः, तेन दुर्दर्शनं=दुष्प्रेक्ष्यम्। समर एव दुर्दिनम्। 'धारासंपात आसारः' इत्यमरः। 'मेघच्छन्नेऽह्नि-दुर्दिनम्' इत्यमरः। ज्येष्ठस्य=भीमस्य। वज्रस्य=कुलिशस्य, निर्घातवत्=पतनशब्दवत्, यो निर्घोषः=रथचक्रशब्दः, तेन विसृमराः—चञ्चलाः, हेषिताः=शब्दायमाना हया यस्यासौ तथा। यद्वा विसृमरहेषिताः=व्याप्तिध्वनयो हया यस्येत्यर्थः। वस्तुतस्त्वयं पाठो न समीचीनः। "वज्रनिर्घातनिर्घोषविषमरसितध्वजाग्रस्थितमहावानरः" इत्येव तु क्वाचित्कः पाठोऽत्र युक्तः। वज्राघातशब्दवद्विषमगर्जित-ध्वजाग्रस्थित-हनूमद्विराजित इति च तदर्थः।

शिखरेति। ध्वजशिखराग्रस्थितमारुतिरित्यर्थः। तुरङ्गमाणां घोटकानां संवाहने=सेवायां व्यापृतः=प्रसक्तो यो वासुदेवः=कृष्णः, तस्य शङ्खादिलाञ्छितैः=शङ्खादिचिह्नितैः, चटुलैः=मनोहरैः चञ्चलैर्वा। चतुर्भिर्बाहुभिर्दुर्दर्शनः=दुर्निरीक्ष्यः। भक्तप्रियो भगवान् चतुर्भुजो भूत्वाऽर्जुनरथं वाहयामासेति पुराणविदः। विष्णववतारतया वाऽत्र कृष्णस्य चतुर्भुजत्वोक्तिरिति-ध्येयम्। आपूरितौ=वादितौ यौ पाञ्चजन्यदेवदत्तौ=कृष्णार्जुनशङ्खौ, तयो-

हैं, जिसके घोड़े की सेवा शुश्रूषा व लगाम पकड़ना आदि में भगवान् श्रीकृष्ण शङ्ख चक्रादियुक्त चारों भुजाओं से लगे हुए हैं, और बजाए गए पाञ्चजन्य [श्रीकृष्ण का शङ्ख] व देवदत्त [अर्जुन का शङ्ख] के तीखे शब्द की प्रतिध्वनि से जिसनें दशों दिशाओं के मुख को भर दिया है ऐसे—अपनें श्रेष्ठ रथ को उस ओर दौड़ाया।

१ क्वचिन्न। २ 'विसमरसिदधअअग्गट्ठिदवाणरो'। ['विषमरसितध्वजाग्रस्थितवानरः] । ३ 'तुरङ्गमधारणवावारिद'। ['तुरङ्गमधारणव्यापारित']। ४ लच्छिदचउब्बाहुदण्डो। [लक्षितचतुर्बाहुदण्डः]। ५ 'ततश्च'।

संवाहनव्यापृतवासुदेवशङ्खचक्रासिगदालाञ्छितचटुलचतुर्बाहुदण्ड, आपूरितपाञ्चजन्यदेवदत्ततारसितप्रतिरवभरितदशदिशामुखकुहरो धावितस्तमुद्देशं रथवरः]।

दुर्योधनः—ततस्ततः ?।

सुन्दरकः—**तदो भीमसेणधणंजएहिं अभिजुत्तं पिदरं पेक्खिअ ससम्भमं विअलिअं अवधूणिअ रअणसीसअं आकण्णाकड्ढिदकठिणकोदण्डजीओ[1] दाहिणहत्तक्खित्तसरपुंखविघट्टणतुवराइदसारहीओ[2] तं देसं उवगदो कुमालविससेणो।**

[ततो भीमसेनधनञ्जयाभ्यामभियुक्तं पितरं प्रेक्ष्य ससंभ्रमं विगलितमवधूय रत्नशीर्षकमाकर्णाकृष्टकठिनकोदण्डजीवो दक्षिणहस्तोत्क्षिप्तशरपुङ्खविघट्टनत्वरायितसारथिकस्तं देशमुपगतः कुमारवृषसेनः]।

यत्तारं=दीर्घतरं, रसितं=ध्वनिः, तस्य यः प्रतिरवः=प्रतिध्वनिः, तेन भरितानि=पूरितानि दशदिशानां मुखानां कुहराणि=छिद्राणि येनासौ तथाभूतः। धावितः=वेगेन प्रचालितः। उद्देशं=प्रदेशम्। भीमाङ्गराजयुद्धभुवम्।

अभियुक्तम्=आक्रान्तम्। पितरं=कर्णम्। विगलितं=स्वरानिपतितम्[3]। एतेन भाव्यमङ्गलं सूचितम्। अवधूय=परित्यज्य। रत्नशीर्षकं=रत्नघटितं शिरस्त्राणम्। 'शीर्षकं शीर्षण्यं च शिरस्त्रे' इत्यमरः। आकर्णम्=कर्णान्तम् आकृष्टा कठिनस्य कोदण्डस्य = धनुषः, जीवा=मौर्वी येनासौ तथाभूतः। 'कोदण्डज्य' इत्यपि केचित्पठन्ति। दक्षिणहस्तेन उत्क्षिप्तः=तूणीरान्निष्कासितो यः शरः=बाणः, तस्य यः पुङ्खः=बाणमूलभागस्तेन यद्विघट्टनं=स्पर्शः,

दुर्योधन—तब क्या हुआ ?।

सुन्दरक—तब भीमसेन व अर्जुन द्वारा अपने पिता कर्ण को घिरा देख कर बड़ी हडबडाहट से, जल्दी के मारे गिरे हुए अपने रत्न जटित शिर के टोप को भी न उठाकर, कानतक धनुष की कठिन डोरी को खींचकर, दक्षिण

१ 'ज्यः'। 'कोदण्डमण्डलो'।

२ 'दाहिणहत्थविक्खित्तसरपुङ्खबन्धणो विघट्टणतुवराइदसारहीओ'। [दक्षिणहस्तविक्षिप्तशरपुङ्खबन्धनस्त्वरायितसारथिकः]। 'शरपुङ्खो' [शरपुङ्खः]।

३ कवि ने इससे भावी अमङ्गल को सूचित किया है।

दुर्योधनः—(सावष्टम्भम्) ततस्ततः ? ।

सुन्दरकः—तदो अ देव ! तेण आअच्छन्तेण एव्व कुमालविससेणेण विदलिदासिलदासामलसिणिद्धपुङ्खेहिं कठिणकङ्कवत्तेहिं किसणवण्णेहिं साणसिलणिसिदसामलसल्लबन्धेहिं कुसुमिदो विअ तरू मुहुत्तएण सिलीमुहेहिं पच्छादिदो धणंजअस्स रहवरो ।

[ततश्च देव ! तेनागच्छतैव कुमारवृषसेनेन विदलिताऽसिलताश्यामलस्निग्धपुङ्खैः कठिनकङ्कपत्रैः कृष्णवर्णैः शाणशिलानिशितश्यामलशल्यबन्धैः कुसुमित इव तरुर्मुहूर्तेन शिलीमुखैः प्रच्छादितो धनञ्जयस्य रथवरः]।

उभौ—(सहर्षम्) ततस्ततः ? ।

तेन त्वरायितः=प्रेरितः सारथिर्येनासौ तथाभूतः । बाणपृष्ठभागताडितसारथिक इति यावत । वृषसेनः=कर्णपुत्रः । सावष्टम्भं=सधैर्यम् । विदलिता=निशिता खण्डिता वा या असिलता=खड्गः, तद्वत् श्यामलाः=कृष्णाः,स्निग्धाः=मसृणाश्च पुङ्खा बाणमूलानि येषान्तैः । 'विदलिदसिहासामल' [विदलितशिखाश्यामल] इति पाठे—विदलितं=पिष्टं यत् शिखि=तुत्थाञ्जनं (तूतिया) तद्वन्नीलेत्यर्थः । कठिनानि सुदृढानि कङ्कपत्राणि=पुङ्खा येषान्तैः । अत एव कृष्णवर्णैः=नीलैः । अत एव भ्रमरसाम्यम् । शाणशिलया=भ्रमणयन्त्रेण निशिताः=तीक्ष्णाः श्यामलाः=कृष्णाः, शल्यबन्धाः=बाणाग्रफलकानि येषान्तैः । शिलीमुखाः=बाणा, भ्रमराश्च । 'शिलीमुखौ बाणभृङ्गौ' इत्यमरः । कुसुमितः=पुष्पितः । मुहूर्त्तेन=क्षणमात्रेण । तीक्ष्णं विक्षिप्ताः=दृढं विसृष्टाः,

---

हाथ से निकाले गए बाण के मूल भाग से खोदकर सारथि को जल्दी जल्दी रथ को चलाने को कहते हुए कुमार वृषसेन [कर्ण के पुत्र] वहाँ आए ।

दुर्योधन—(बड़े गर्व से) तब क्या हुआ ? ।

सुन्दरक—तबतो देव ! आतेही कुमार वृषसेन ने शाणपर चढ़े हुए खड्ग की तरह नीले एवं स्निग्ध [चमकीले] पुङ्ख वाले, कठिन कङ्कपत्र [गृध्र की पाँख] वाले, काले २, शाण पर चढ़ने से तीखे व नीले फल वाले बाणों से अर्जुन के श्रेष्ठ रथ को ऐसे ढक दिया जैसे पुष्पित वृक्ष को भौंरे ढक लेते हैं ।

दुर्योधन सूत—तब क्या हुआ ? ।

सुन्दरकः—**तदो देव ! तीक्खविक्खित्तणिसिदभल्लवाणवरिसिणा धणंजएण ईसि विहसिअ भणिदम्—'अरे रे विससेण ! पिदुणो वि दाव दे ण जुत्तं मह कुविदस्स अभिमुहं ठादुं किं उण भवदो बालस्स ! । ता गच्छ । अवरेहिं कुमारेहिं सह गदुअ आओधेहि ।' एव्वं वाअं णिसमिअ गुरुअणाहिक्खेवेण उद्दीविअकोवोपरत्तमुहमण्डलविअम्भिअभिउडिभङ्गभीसणेण चावधारिणा कुमालविससेणेण मम्मभेदएहिं परुसविसमेहिं सुदिवहकिदप्पणएहिं[1] णिब्भच्छिदो गण्डीवी वाणेहिं ण उण दुट्ठवअणेहिं ।**

[ततो देव ! तीक्ष्णविक्षिप्तनिशितभल्लबाणवर्षिणा धनञ्जयेनेषद्विहस्य भणितम्—'अरे रे वृषसेन ! पितुरपि तावत्ते न युक्तं मम कुपितस्याभिमुखं स्थातुं, किं पुनर्भवतो बालस्य ! । तद्गच्छ । अपरैः कुमारैः सह गत्वा युध्यस्व । एवं वाचं निशम्य गुरुजनाधिक्षेपेणोद्दीपितकोपोपरक्त-

ये निशितभल्लबाणाः=तीक्ष्णभल्लबाणाः, तान् वर्षति तच्छीलेन । **भणितम्**=उक्तम् । स्थातु युक्तं=स्थातुं शक्यम् । **अभिमुखं**=संमुखम् । **गुरुजनस्य**=पितुः, **अधिक्षेपेण**=निन्दया । **उद्दीपितः**=प्रवृद्धो यः **कोपः**=क्रोधः, तेन उपरक्तं यन्मुखमण्डलं, तत्र **विजृम्भिताः**=साटोपं बद्धा या भ्रूकुटी, तस्या भङ्गेन=आमोटनेन **भीषणः**=भयङ्करस्तेन । क्रोधान्धेनेत्यर्थः । **परुषविषमैः**=क्रूरकुटिलैः, **श्रुतिपथकृतप्रणयैः**=कर्णान्तातिपातिभिः । सुतवधकृतप्रणयै'रिति पाठे—स्वपुत्राभिमन्युवधोपयुक्तैरित्यर्थः । **निर्भर्त्सितः**=तर्जितः । **गाण्डीवी**=अर्जुनः । अर्जुनं प्रति कुमारेण बाणाः प्रहिता

सुन्दरक—तब महाराज ! तीखे व चमकीले भल्ल [भाला या बाण विशेष] एव बाणों की वर्षा करते हुए अर्जुन ने हंसकर कहा—अरे ओ वृषसेन ! क्रुद्ध हुए मेरे सामने जब तेरा बाप भी नहीं टिक सकता है तो तेरी बालक की तो बातही क्या है ? । अतः जा अपने बराबरी के दूसरे राजकुमारो के साथ लड । इस प्रकार वाणी सुनकर अपने पिताकी निन्दा के सुनने से क्रुद्ध होने से जिसका

---

१ 'सुदवहकिदप्पणएहि' [सुतवधकृतप्रणयैः] ।

मुखमण्डलविजृम्भितभ्रूकुटीभङ्गभीषणेन चापधारिणा कुमारवृषसेनेन मर्मभेदकैः परुषविषमैः श्रुतिपथकृतप्रणयैर्निभर्त्सितो गाण्डीवी बाणैर्न पुनर्दुष्टवचनैः]।

दुर्योधनः—साधु वृषसेन ! साधु । सुन्दरक ! ततस्ततः ।

सुन्दकः—तदो अ देव ! णिसिदसराभिघादवेअणोपजादमण्णुणा किरीटिणा चण्डगण्डीवजीआसद्दणिज्जिदवज्जणिग्घाद-घोसेण बाणणिपडणपडिसिद्धदंसणप्पसरेण पत्थुदं सिक्खा-बलाणुरूवं किं वि अच्चरिअम् ।

[ततश्च देव ! निशितशराभिघातवेदनोपजातमन्युना किरीटिना चण्डगाण्डीवजीवा[2]शब्दनिर्जितवज्रनिर्घातघोषेण बाणनिपतनप्रतिषिद्ध-दर्शनप्रसरेण प्रस्तुतं शिक्षाबलानुरूपं किमप्याश्चर्यम्]।

इत्यर्थः । निशितेति । तीक्ष्णबाणाघातपीडोपजातक्रोधेनेत्यर्थः । किरीटिना= अर्जुनेन ।

चण्डेति । चण्डं यत् गाण्डीवं—तस्य या जीवा—मौर्वी, तस्या यः शब्दस्तेन निर्जितो वज्रनिर्घातस्य=वज्रपातस्य घोषो येनासौ तेनेत्यर्थः ।

बाणेति । शरनिपातावरुद्धनेत्रगतिना । स्थगितलोचनेनेत्यर्थः । प्रस्तुतं= प्रारब्धम् । शिक्षाबलयोः=विद्यापराक्रमयोः । अनुरूपं=तुल्यम् । किमपि=

मुख मण्डल लाल हो गया है और भृकुटी के चढ जाने से जिसका मुख भयङ्कर हो गया है ऐसे उस कुमार वृषसेन नें धनुष हाथ में लेकर मर्म को भेदन वाले तीखे व कठोर तथा कान तक खीचे हुए बाणों से अर्जुन को जबाव दिया न कि मर्मभेदी तीखे कर्णकटु दुष्ट वचनों से (उत्तर दिया)।

राजा—वाह वृषसेन ! वाह ! सुन्दरक ! तब क्या हुआ ! ।

सुन्दरक—तब तो महाराज ! तीखे २ बाणों की चोट लगने से पीडित व क्रुद्ध अर्जुन नें प्रचण्ड गाण्डीव की डोरी के शब्द से वज्रपात के भयङ्कर शब्द को भी जीत लिया, एवं बाण की वर्षा के कारण वहाँ नेत्रों से कुछ दिखाई ही नहीं

---

१ क्वचिन्न । २ 'ज्या' ।

दुर्योधनः—(साकूतम्) ततस्ततः ? ।

सुन्दरकः—तदो अ देव ! तं तारिसं पेक्खिअ सत्तुणो समरव्वावारचउरत्तणं अविभाविअतूणीरमुहधणुग्गुणगमणागमणसरसंधाणमोक्खचडुलकरअलेण कुमालविससेणेण वि सविसेसं पत्थुदं समलकम्म ।

[ततश्च देव ! तत्तादृशं प्रेक्ष्य शत्रोः समरव्यापारचतुरत्वमविभावित-तूणीरमुखधनुर्गुणगमनाऽऽगमनशरसन्धानमोक्षचटुलकरतलेन कुमार-वृषसेनेनापि सविशेषं प्रस्तुतं समरकर्म] ।

दुर्योधनः—ततस्ततः ? ।

सुन्दरकः—तदो अ देव ! एत्थन्तरे विमुक्कसमरव्वावारो

अनिवर्चनीयं चमत्कारकारि । साकूतं=साभिप्रायम् । किं कृतमिति विज्ञातुं पृच्छतीति यावत् । तादृशं=चमत्कारकारि । शत्रोः=अर्जुनस्य ।

समरव्यापारचतुरत्वं=युद्धकर्मपटुत्वम् । अविभावितेति । अविभावितं=अलक्षितं-तूणीरमुखे धनुर्मुखे च यद्गमनाऽऽगमनं=यातायातं, शरस्य सन्धानं च मोक्षश्च, तत्र चटुलं=चञ्चलं, करतलं=हस्ततलं यस्य तेनेत्यर्थः । सविशेषं=विशिष्टम् । 'अविभावित'ेति याताऽऽयातादीनां विशेषणमिति केचित् । विमुक्तेति । परित्यक्तयुद्धव्यापार इत्यर्थः । मुहूर्त्तं यावद्विश्रामितः=

देता था, किन्तु बाण ही बाण दिखाई देते थे । इस प्रकार अर्जुन ने अपनी विद्या शिक्षा व पराक्रम के अनुरूप ही आश्चर्यजनक पराक्रम दिखाना प्रारम्भ किया ।

दुर्योधन—(बड़े आग्रह पूर्वक) तब क्या हुआ ? ।

सुन्दरक—तब तो महाराज ! शत्रु (अर्जुन) की इस प्रकार युद्ध कुशलता देखकर कुमार वृषसेन ने भी—भाथी के मुख तक हाथ का जाना, धनुष की प्रत्यञ्चा पर बाण का चढ़ाना, बाण का खींचना व छोड़ना-बिलकुल नहीं मालूम हो—ऐसी कुशलता (हस्तलाघव) से अद्भुत युद्ध व्यापार प्रारम्भ किया ।

दुर्योधन—तब क्या हुआ ? ।

सुन्दरक—तब तो देव ! कौरव पाण्डव सेनाओं के वीर लोग अपना २

१ क्वचिन्न । २ 'परिसेसिदरणवावारो' । [परिशेषितरणव्यापारो'] ।

[1]मुहुत्तविस्सामिदवेराणुबन्धो दोणं वि कुरुराअपण्डवबलाणं 'साहु कुमालविससेण ! साहु' त्ति किदकलअलो वीरलोओ अवलोइदुं पउत्तो ।

[ततश्च देव ! अत्रान्तरे विमुक्तसमरव्यापारो मुहूर्तविश्रा[2]मितवैरानुबन्धो द्वयोरपि कुरुराजपाण्डवबलयोः 'साधु कुमारवृषसेन ! साधु' इति कृतकलकलो वीरलोकोऽवलोकयितुं प्रवृत्तः] ।

दुर्योधनः—(सविस्मयं) **ततस्ततः ?** ।

सुन्दरकः—**तदो अ देव ! अवहीरिदस[3]अलधाणुक्कचक्कपराक्कमसालिणो सुदस्स तहाविहेण समलकम्मालम्भेण हरिसरोसकरुणासङ्कासङ्कडे व[4]ट्टमाणस्स सामिणो अङ्गराअस्स णिवडिआ सरपद्धइ भीमसेणे, बाप्पपज्जाउला दिट्ठी कुमालविससेणे ।**

[ततश्च देव ! अवधीरितसकलधा[3]नुष्कचक्रपराक्रमशालिनः सुतस्य तथाविधेन समरकर्मारम्भेण हर्षरोषकरुणाशङ्कासङ्कटे वर्तमानस्य स्वामिनोऽङ्गराजस्य निपतिता शरपद्धतिर्भीमसेने, बाष्पपर्याकुला दृष्टिः कुमारवृषसेने] ।

परित्यक्तः, **वैरानुबन्धः=वैरसंपर्को** येनेत्यर्थः । 'वीरलोक' इत्यनेनान्वेति । **इति=इत्थं । कृतकलकलः=कृतकोलाहलः । वीरलोकः=योधजनः । अवधी-** रितं=तिरस्कृतं सकलधानुष्काणां चक्रं येन तादृश पराक्रमशालिन इत्यर्थः । **तथाविधेन=**अतिमानुषेण । **समरेति** । युद्धकर्मारम्भेणेत्यर्थः ।

युद्धव्यापार छोड़कर घड़ी भर वैर को भुलाकर उस रोमहर्षण युद्ध को देखने लगे। और रह रह कर 'वाह ! कुमारवृषसेन ! वाह' इस प्रकार लोगों के मुख से प्रशंसा की ध्वनि निकलने लगी ।

दुर्योधन—तब क्या हुआ ? ।

सुन्दरक—सम्पूर्ण धनुर्धरों के समूह को तिरस्कृत करनेवाले अपने पुत्र का अद्भुत पराक्रम देखकर हर्ष रोष करुणा व शङ्का के बीच में पड़े हुए स्वामी अङ्गराज (कर्ण) ने भीमसेन पर तो बाण पंक्ति फेंकी, और अपने पुत्र पर बाष्पपर्याकुल स्नेहदृष्टि (एक साथ ही) डाली ।

---

१ कचिन्न । २ विमुक्कच्चिरणिव्वट्टिदवेराणुबन्धो' [विमुक्तचिरनिवर्त्तितवैरानुबन्धः] ।
३ 'सकलराअधानुक्क' [सकलराजधानुष्क] । ४ 'अणुवट्टमाणस्स' [अनुवर्त्तमानस्य] ।

दुर्योधनः—(सभयं) ततस्ततः ? ।

सुन्दरकः—तदो अ देव ! उभअबलप्पउत्तसाहुकारामरिसिदेण सरवंरिसज्जलिदेण गण्डीविणा तुरगेसु सारहिं बि रहवरे धणुं वि जीआइं वि णलिन्दलञ्छणे सिदादवत्ते अ व्वावारिदो समं सिलीमुहासारो ।

[ततश्च देव ! उभयबलप्रवृत्तसाधुकारामर्षितेन शरवर्षप्रज्वलितेन गाण्डीविना तुरगेषु सारथावपि रथवरे धनुष्यपि जीवायामपि नरेन्द्रलाञ्छने सितातपत्रे च व्यापारितः समं शिलीमुखासारैः] ।

दुर्योधनः—(सभयं) ततस्ततः ? ।

सुन्दरकः—तदो अ देव ! विरहो लूणगुणकोदण्डो परिब्भमणवावारमेत्तपडिसिद्धसरसम्पादो मण्डलग्गेण विअरिदुं पउत्तो कुमालविससेणो ।

हर्षेति । पुत्रपराक्रमदर्शनाद्धर्षः, भीमसेनकर्मस्मरणाच्छत्रुदर्शनाद्वा क्रोधः, बालत्वात्कुमारस्य करुणा, अर्जुनस्य महाबलित्वाच्छङ्का चेति विवेकः ।

पद्धतिः=बाणपङ्क्तिः । बाष्पपर्याकुला=हर्षकरुणाशङ्काबाष्पस्तिमिता । दृष्टिः=लोचनम् । पतितेति शेषः । उभयेति । कुरुपाण्डवसेनासमुद्भूतसाधुवादकुपितेन । गाण्डीविना=अर्जुनेन । नरेन्द्रलाञ्छने-राजचिह्ने । सितातपत्रे=श्वेतच्छत्रे ।

दुर्योधन—(भयपूर्वक) तब क्या हुआ ? ।

सुन्दरक—लोगों की वाहवाही सुनकर क्रुद्ध होकर तथा तीखे २ बाणों की वर्षा से पीड़ित होकर अर्जुन ने एक साथ ही वृषसेन के घोड़ों पर, सारथी पर, रथ पर, धनुष पर, प्रत्यञ्चा पर, राज चिह्न भूत सफेद छत्र पर तीखे २ बाणों की झडी लगा दी ।

दुर्योधन—(भयपूर्वक) तब क्या हुआ ? ।

---

१ क्वचिन्न । २ 'सिलीमुहा' [शिलीमुखाः] ।

[ततश्च देव ! विरथो लूनगुणकोदण्डः परिभ्रमणव्यापारमात्र-प्रतिषिद्धशरसंपातो मण्डलाग्रेण विचरितुं प्रवृत्तः कुमारवृषसेनः] ।

दुर्योधनः—(साशङ्कं) ततस्ततः ? ।

सुन्दरकः—तदो अ देव ! सुदरहविद्धंसणामरिसिदेण सामिणा अङ्गराएण अगणिअभीमसेणाभिजोएण पडिमुक्को धणञ्जअस्स उवरि सिलीमुहासारो । कुमालविससेणो वि परिजणोवणीदं अण्णं रहं आरुहिअ पुणो वि पउत्तो धणञ्जएण सह आओधेदुम् ।

[ततश्च देव ! सुतरथविध्वंसनामर्षितेन स्वामिनाऽङ्गराजेनाऽगणित-भीमसेनाभियोगेन परिमुक्तो धनञ्जयस्योपरि शिलीमुखासारः । कुमार-

---

व्यापारितः=विमुक्तः । आसारः=वेगवान् वर्षः । ['झडी' 'मूसलधार वर्षा'] । विरथः=विध्वस्तरथः । लूनेति । छिन्नधन्वेत्यर्थः । परिभ्रमणमात्रेण-प्रतिषिद्धो बाणप्रहारो येन तथाभूतः । मण्डलाग्रः=कृपाणः । मण्डलानीति पाठे-मण्डलाकारगतिविशेषानित्यर्थः । (पैंतरा बदलना) । अगणितो

सुन्दरक—तब तो महाराज ! जब कुंवर वृषसेन का रथ टूट गया, धनुष की डोरी कट गई, धनुष टूट गया तब हाथ में तलवार लेकर पैंतरों से ही बाणों की वर्षा को रोकते हुए कुमार युद्ध भूमि में विचरने लगे ।

दुर्योधन—[आशङ्कापूवक] तब क्या हुआ ? ।

सुन्दरक—तब तो महाराज ! अपने पुत्र के रथ के विध्वंस से कुपित हो स्वामी अङ्गराज ने भीमसेन के द्वारा चलाए गए अस्त्र शस्त्रों की भीषण वर्षा की

---

१ क्वचिन्न । २ 'परिब्भमणमेत्तवावारो मण्डलाइं विरइदं पउत्तो कुमालो' । [परिभ्रमणमात्रव्यापारो मण्डलानि विरचयितुं प्रवृत्तः कुमारः] ।

३ 'अहो ! बालस्य पराक्रमो मूढता च' । ४ 'पल्लत्थो' [पर्यस्तो] ।

५ 'धणञ्जआभिजोए' [धनञ्जयाभियोगे] ।

वृषसेनोऽपि परिजनोपनीतमन्यं रथमारुह्य पुनरपि प्रवृत्तो धनञ्जयेन सहायोधितुम् ।

[उभौ —साधु वृषसेन ! साधु । ततस्ततः ? ।

सुन्दरकः—तदो देव !] भणिदं च कुमालेण—'रे रे तादाहिक्खेवमुहल मज्झमपण्डव ! मह सरा तुह सरीरं उज्झिअ अण्णस्सिं ण णिवडन्ति' त्ति भणिअ सरसहस्सेहिं पण्डवसरीरं पच्छादिअ सिंहणादेण गज्जिदुं पउत्तो ।

[ततो देव ! भणितं च कुमारेण—'रे रे ताताधिक्षेपमुखर मध्यमपाण्डव ! मम शरास्तव शरीरमुज्झित्वाऽन्यस्मिन्न निपतन्ति' इति भणित्वा शरसहस्रैः पाण्डवशरीरं प्रच्छाद्य सिंहनादेन गर्जितुं प्रवृत्तः] ।

दुर्योधनः—(सविस्मयं) अहो ! बालस्य पराक्रमो मुग्धस्वभावस्याऽपि । ततस्ततः ? ।

भीमसेनस्य अभियोगः=आक्रमणं येनासौ तथाभूतेन । परिजनोपनीतं=सेवकाद्युपनीतम् । आयोधितुं=युद्धं कर्तुम् । उभौ=दुर्योधनसारथी । ताताधिक्षेपमुखर=मत्पितृनिन्दादुर्मुख । निन्दापरायणेति यावत् । उज्झित्वा=

कुछ भी परवाह न करके अर्जुन के ऊपर भी बाणों की भीषण वर्षा की । कुमार वृषसेन भी परिजन (नौकर चाकरों) द्वारा लाए गए दूसरे रथ पर चढकर फिर अर्जुन से युद्ध करने लगे ।

दुर्योधन—व सूत—वाह वृषसेन ! वाह !! । हाँ फिर क्या हुआ ? ।

सुन्दरक—तब महाराज ! कुमार ने कहा—अरे रे ! मेरे पिता की निन्दा करने में चपल पाण्डुपुत्र अर्जुन ! मेरे बाण तुम्हारे शरीर को छोड़कर अन्यत्र कहीं नहीं गिरेंगे (लक्ष्य च्युत नहीं होंगे) । ऐसा कहकर हजारों बाणों से अर्जुन के शरीर को ढँक दिया और सिंहनाद कर गर्जने लगा ।

दुर्योधन—(आश्चर्यपूर्वक) अहो ! भोलेस्वभाववाले इस बालक का अद्भुत पराक्रम है ! । (या इस बालक अवस्था में भी इसका ऐसा पराक्रम है !) । हाँ, फिर क्या हुआ ? ।

---

१ 'कुमालो वि' [कुमारोऽपि] । २ क्वचिन्न । ३ 'स्वभावेऽपि' ।

सुन्दरकः—तदो अ देव ! तं सरसम्पादं समवधूणिअ णिसिदसराभिघादजादमण्णुणा किरीटिणा गहिदा रहुच्छङ्गादो क्कणन्तकणअकिङ्किणीजालझङ्कारविराइणी मेहोवरोहविमुक्कणहत्थलणिम्मला णिसिदसामलसिणिद्धमुही विविहरअणप्पहाभासुरभीसणरणिज्जदंसणा सत्ती विमुक्का कुमालाहिमुही।

[ततश्च देव ! तं शरसम्पातं समवधूय निशितशराभिघातजातमन्युना किरीटिना गृहीता रथोत्सङ्गात्क्वणत्कनककिङ्किणीजालझङ्कारविराविणी मेघोपरोधविमुक्तनभस्तलनिर्मला निशितश्यामलस्निग्धमुखी विविधरत्नप्रभाभासुरभीषणरमणीयदर्शना शक्तिर्विमुक्ता कुमाराभिमुखी]।

दुर्योधनः—(सविषादम्) अहह ! ततस्ततः ?।

विहाय । प्रच्छाद्य=पिधाय । समवधूय=निरस्य । निशितेति । तीक्ष्णबाणाभिघातकोपेनेत्यर्थः । रथोत्सङ्गात्=रथमध्यात् । क्वणदिति । शब्दायमानसुवर्णक्षुद्रघटिकापटलकलकलमुखरेत्यर्थः । मेघोपरोधेन=मेघावरणेन विमुक्तं=रहितं यन्नभस्तलं=गगनतलं तद्वन्निर्मला=स्वच्छा । नीलप्रभेति यावत् । निशितेति । तीक्ष्णश्यामचिक्कणमुखीत्यर्थः । विविधेति । विविधानां रत्नानां प्रभया कान्त्या भासुरा=दीप्यमाना, अतएव भीषणरमणीयदर्शना=भयानककान्तदर्शना । शक्तिः=शस्त्रभेदः ।

सुन्दरक—तब तो महाराज ! उस बाण वर्षा को तिरस्कृत कर तीखे २ बाणों के आघात से क्रुद्ध हो अर्जुन ने रथ के भीतर से—शब्दायमान, स्वर्ण की छोटी २ घुँघुरूओं से झनकार करती हुई, मेघरहित आकाश की तरह नीलप्रभा वाली, तीखे चमकीले नीले फलवाली, अनेक रत्नों से जड़ी हुई भीषण शक्ति कुमार पर फेंकी।

दुर्योधन—(विषादपूर्वक) अहह ! तब क्या हुआ ?।

---

१ 'अवधूणिअ'। २ कश्चिन्न।

३ 'रहोत्सङ्गनो'। ['रथोत्सङ्गतो']।

सुन्दरकः—**तदो देव ! पज्जलन्तीं सत्तिं पक्खिअ विअलिअं अङ्गराअस्स हत्थादो ससरं धणु, हिअआदो वीरसुलहो उच्छाहो, णअणादो बाप्पसलिलं पि। रसिदं अ सिंहणादं विओदलेण । दुक्कलं दुक्कलं दुक्कलं त्ति आक्कन्दिदं कुरुबलेण।**

[ततो देव ! प्रज्वलन्तीं शक्तिं प्रेक्ष्य विगलितमङ्गराजस्य हस्तात्सशरं धनुर्हृदयाद्वीरसुलभ उत्साहो, नयनाद्बाष्पसलिलमपि । रसितं च सिंहनादं वृकोदरेण । 'दुष्करं दुष्करं दुष्कर'मित्याक्रन्दितं कुरुबलेन]।

दुर्योधनः—(सविषादं) **ततस्ततः ।**

सुन्दरकः—**तदो देव ! कुमालविससेणेण आकण्णपूरिदेहिं णिसिदक्खुरप्पबाणेहिं सुचिरं णिज्झइअ अद्धपहे एव्व भाई रही विअ आअच्छन्ती जधा भअददा विसमलीअणेण तधा तिधा किदा सत्ती।**

[ततो देव! कुमारवृषसेनेनाकर्णपूरितैर्निशितक्षुरप्रैबाणैश्चिरं निर्धार्यो-

विमुक्ता=विसृष्टा । रसितं=निर्घोषः कृतः । दुष्करम्=इदमप्रतिविधेयमिति । अनुचितमिदमिति वा । आक्रन्दितं=परिदेवितम् । साश्रु भाषितमिति वा । क्षुरप्रो बाणभेदः । (खुरपा बाण) । निर्धार्य=निश्चित्य । विषमविलोचने=त्रिलोचनेन शम्भुना । भागीरथ्याः शिवेन दिवि भुवि पाताले च

सुन्दरक—तब देव ! प्रज्वलित व भयानक उस शक्ति को देखकर अङ्गराज के-हाथ से धनुष बाण, हृदय से वीर सुलभ उत्साह, आखों से आंसू ये सब साथ छूट गए । [उन्हें कुमार के वचन की आशा नहीं रही] । तब वृकोदर [भीमसेन] नें सिंह की तरह दहाड मारी । कुरुओं की सेना नें 'अनर्थ होगया, 'अनर्थ होगया' ऐसी करुण ध्वनि की ।

दुर्योधन—[दुःखपूर्वक] तब क्या हुआ ? ।

सुन्दरक—तब तो महाराज ! कुमार वृषसेन ने भी कान तकखींच कर

१ कचिन्न । २ 'वअणादो हसिदम् । हसिदं अ धणंजएण, सिंहणादं विणादिदं विओदलेन अ' । [वचनतो हसितं । हसितं च धनञ्जयेन, सिंहनादं विनादितं च वृकोदरेण] । ३ 'खुरप्पेण' (क्षुरप्रेण) । ४ 'निर्धाय' ।

र्धपथ एव भागीरथीवागच्छन्ती यथा भगवता विषमलोचनेन तथा त्रिधा कृता शक्तिः] ।

दुर्योधनः—**साधु वृषसेन ! साधु । ततस्ततः ।**

सुन्दरकः—**तदो अ देव ! एदस्सि अन्तले किद[1]कलकलमुहरेण वीरलोअसाहुवादेण अन्तरिदो समरतूरग्गिघो[2]सो । सिद्धचालणगणविमुक्ककुसुमप्पअरेण पच्छादिदं समलाङ्गणम् ।**

[ततश्च देव ! एतस्मिन्नन्तरे कृतकलकलमुखरेण वीरलोकसाधुवादेनाऽन्तरितः समरतूर्[2]यनिर्घोषः । सिद्धचारणगणविमुक्तकुसुमप्रकरेण प्रच्छादितं समराङ्गणम्] ।

[दुर्यो[1]धनः—**अहो ! बालस्य पराक्रमः । ततस्ततः ?** ।

सु[1]न्दरकः—**तदो अ देव !**] **भणि[3]अं सामिणा अङ्गराएण-'भो वीर[1] बिकोदल! असमत्तो तुह मह वि समल व्वावारो। ता अणु-**

विहिता त्रिधा गतिरिति पुराणप्रसिद्धिः । 'त्रिधा भूत्वा गङ्गे ! दिवि भुवि च पातालभुवने सुरान्नृन्नागादीन्निजजलगतान् पावयसि या'नित्युक्तेः ।

छोड गए तीखे खुरप की समान अग्र भागवाले बाणों से बडी सावधानी से ताक कर आधे रास्ते में ही उस शक्ति को इस प्रकार तीन टुकडा कर दिया जिस प्रकार शिवजी ने भागीरथी गङ्गा को [स्वर्ग भूतल पाताल में जाने के लिए] त्रिपथगा [तीन गतिवालीं] कर दिया था ।

दुर्योधन—वाह वृषसेन ! वाह !! हाँ, तब क्या हुआ ? ।

सुन्दरक—तब तो महाराज ! वीरों के साधुवाद के कोलाहल से युद्ध की तूर्य (तुरही) ध्वनि भी छिप गई। आकाश से सिद्ध चारण गणों से वर्षाए गए फूलों से युद्ध का अङ्गण ढँक गया ।

दुर्योधन—वाह ! वाह !! बालक का भी ऐसा पराक्रम ! । तब क्या हुआ ।

सुन्दरक—तब तो महाराज ! स्वामी अङ्गराज ने भीमसेन से कहा कि—हे वीर भीमसेन ! तुम्हारा हमारा युद्ध तो अभी समाप्त नहीं हुआ है । परन्तु थोड़ी देर की हमें विश्रान्ति दो । ताकि हम और तुम दोनों

१ क्वचिन्न । २ तूररवो' ['तूर्यरवः'] । ३ 'भणिअं' अ । [भणितं च] ।

मण्ण मं मुहुत्तअम् । पेक्खामहे दाव खणमेत्तं[1] मह वस्सस्स तुह भादुणो अ धणुव्वेदसिक्खाचउरत्तणम्[2] । तुह वि एदं पेक्खणिज्जं'त्ति ।

[ततश्च देव ! भणितं च स्वामिनाऽङ्गराजेन—'भो वीर वृकोदर ! असमाप्तस्तत्र ममापि समरव्यापारः । तदनुमन्यस्व मां मुहूर्तम् ! । प्रेक्षावहे तावत्क्षणमात्रं मम वत्सस्य तव भ्रातुश्च धनुर्वेदशिक्षाचतुरत्वम् । तवाप्येतत्प्रेक्षणीयम्' इति] ।

दुर्योधनः—**ततस्ततः ?** ।

सुन्दरकः—**तदो देव ! विस्समिदाओधणव्वावारा[3] मुहुत्तविस्समिदणिअवेराणुबन्धा दुवे वि पेक्खआ जादा भीमसेणाङ्गराआ !**

[ततो देव ! विश्रमितायोधनव्यापारौ मुहूर्तविश्रमितनिजवैरानुबन्धौ द्वावपि प्रेक्षकौ जातौ भीमसेनाऽङ्गराजौ] ।

दुर्योधनः—(साभिप्रायं) **ततस्ततः ?** ।

आयोधनं=युद्धम् ।

ही थोड़ी देर तक मेरे पुत्र वृषसेन के तुम्हारे भाई अर्जुन के साथ होनेवाले युद्ध में दोनों की धनुर्वेद की शिक्षा चातुरी को देख सकें । तुमको भी इसे देखने की इच्छा होगी ही ।

दुर्योधन—तब क्या हुआ ? ।

सुन्दरक—तब महाराज ! अपना २ युद्ध रोककर घड़ी भर परस्पर वैर को भूलकर कर्ण और भीमसेन ये दोनों भी प्रेक्षक हो उनका युद्ध देखने लगे ।

---

१ क्वचिन्न ।

२ 'निउणत्तणम्' [निपुणत्वम्] । ३ तदोविरदाओ रणव्वावारणिब्बन्धादो मुहूत्तअं प्पसमिदवेरा जादा दुवे वि अ पेक्खआ भीमसेणाङ्गराआ । [ततो विरतौ रणव्यापारनिर्बन्धान्मुहूर्त्तं प्रशमितवैरौ जातौ द्वावपि च प्रेक्षकौ भीमसेनाङ्गराजौ] ।

सुन्दरकः--तदो अ देव ! एदस्सिं अन्तरे सत्तिखण्डणामरिसिदेण गण्डीविणा एवं भणिअम्—'अरे रे दुज्जोहणप्पमुहा......' (इत्यर्धोक्तौ लज्जां नाटयति)।

[ततश्च देव ! एतस्मिन्नन्तरे शक्तिखण्डनामर्षितेन गाण्डीविना एवं भणितम्–'अरे रे दुर्योधनप्रमुखाः !......'

दुर्योधनः---सुन्दरक ! कथ्यताम् । परवचनमेतत् ।

सुन्दरकः--सुणादु देवो । 'अरे दुज्जोहणप्पमुहा कुरुबलसेणापहुणो ! अविणअणोकण्णधार कण्ण ! तुह्मेहिं मह परोक्खं बहुहिं महारहेहिं पडिवारिअ एआई मम पुत्तओ अहिमण्णू व्वावादिदो । अहं उण तुह्माणं पेक्खन्ताणं एव्व कुमालविससेणं सुमरिदव्वसेसं करोमि' त्ति भणिअ सगव्वं आप्फालिदं णेण वज्जणिग्घादघोसभीसणजीआरवं गण्डीवम् । सामिणा वि सज्जीकिदं कालपुट्ठम् ।

कृता=विहिता। कृत्तेति वा पाठः। विश्रामितेति । विश्रामितो -निरुद्धः उपशान्तो वा समरव्यापारः=प्रहारादिरूपो याभ्यां ययोर्वा तावित्यर्थः । प्रेक्षकौ=द्रष्टारौ । अन्तरे=अवसरे । मध्ये इति वा। कुरुबलसेनाप्रभवः=हे कुरुसेना–सेनापतयः । अविनय एव नौः=नौका, तस्याः कर्णधार इव ।

दुर्योधन—(उत्सुकता पूर्वक) तब क्या हुआ ? ।

सुन्दरक—तब तो महाराज ! अपनी शक्ति (सांग) के काट देने से क्रुद्ध हो अर्जुन ने कहा—अरे रे ! दुर्योधनप्रभृति.........(ऐसा कहता हुआ बीच में ही लज्जित व भयभीत हो रुक जाता है)।

दुर्योधन—सुन्दरक ! कहते चलो, यह तो तुम दूसरे के कहे का अनुवाद कर रहे हो।

सुन्दरक—अच्छा तो देव ! सुनिए–अरे दुर्योधनप्रभृति कुरुसेना के सेनापतियो ! अरे अविनयरूपी नौका के कर्णधार (पतवार पकड़ने वाले) कर्ण ! तुमलोगों ने बहुत से महारथियों ने मिलकर मेरे परोक्ष में मेरे छोटे बच्चे अभिमन्यु को घेरकर मारा था । परन्तु मैं तुमलोगों के देखते ही देखते इस कुमार वृषसेन को नामशेष

१ क्वचिन्न । २ 'अर्द्धोक्तै' । ३ 'भयं' । ४ 'णई' (नदी) ।

[शृणोतु देवः । 'अरे दुर्योधनप्रमुखाः कुरुबलसेनाप्रभवः ! अविनय-नौकर्णधार कर्ण ! युष्माभिर्मम परोक्षं बहुभिर्महारथैः परिवृत्यैकाकी मम पुत्रकोऽभिमन्युर्व्यापादितः । अहं पुनर्युष्माकं प्रेक्षमाणानामेवैत कुमारवृषसेनं स्मर्तव्यशेषं करोमि' । –इति भणित्वा सगर्वमास्फालित-मनेन वज्रनिर्घातघोषभीषणजीवारवं गाण्डीवम् । स्वामिनाऽपि सज्जी-कृतं कालपृष्ठम्] ।

दुर्योधनः—(सावहित्थं) ततस्ततः ? ।

सुन्दरकः—**तदो अ देव ! पडिसिद्धभीमसेणसमलकम्मा-लम्भेण गण्डीविणा विरइदा अङ्गराअविससेणरहकूलंकसाओ दुवे बाणणदीओ । तेहिं वि दुवेहिं अण्णोण्णदंसिदसिक्खा-विसेसेहिं अभिजुत्तो सो दुराआरो मज्झमपण्डवो ।**

[ततश्च देव ! प्रतिषिद्धभीमसेनसमरकर्मारम्भेण गाण्डीविना विर-

परिवृत्य=मिलित्वा। एकीभूय। व्यापादितः=हतः। स्मर्त्तव्यशेषं=प्रमातिथिम्। करोमि=विदधे। व्यापादयामीति यावत् । आस्फालितम्=उत्थापितम् । टङ्कारितं वा । वज्रेति । वज्रपातध्वनिभीषणज्यारवमित्यर्थः । स्वामिना=कर्णेन । कालपृष्ठं नाम कर्णस्य धनुः । सावहित्थं=स्वाकारगोपनपूर्वकम् । 'अवहित्था-ऽऽकारगुप्तिः' इत्यमरः । प्रतिषिद्धः=निवारितो भीमसेनस्य समरकर्मारम्भो

करता हूँ (इसका वध करता हूँ) । ऐसा कह कर बडे गर्व से अर्जुन ने वज्र के गिरने के समय होने वाली कडकडाहट की तरह भीषण जिसकी प्रत्यञ्चा की ध्वनि है ऐसे अपने गाण्डीवधनुष को ताना (उठाया, खींचा) । तब अङ्गराज ने भी कालपृष्ठ नामक अपने धनुष को ताना ।

दुर्योधन—(अपनी घबडाहट को छिपाते हुए) तब क्या हुआ ? ।

सुन्दरकः—तब महाराज ! अर्जुन ने भीमसेन को तो युद्ध से अलग कर दिया और स्वयं उसने एक तो वृषसेन के रथ की ओर, दूसरी कर्ण के रथ की

१ क्वचिन्न ।

चिते अङ्गराजवृषसेनरथकूलंकषे द्वे बाणनद्यौ । ताभ्यामपि द्वाभ्यामन्योन्यप्रदर्शितशिक्षाविशेषाभ्यामभियुक्तः स दुराचारो मध्यमपाण्डवः] ।

दुर्योधनः—**ततस्ततः ?** ।

सुन्दरकः—**तदो अ देव ! गण्डीविणा ताररसिदजीआणिग्घोसमेत्तविण्णादबाणवरिसेण तह आअरिदं पत्तिहिं जह ण णहत्तलं ण सामी ण रहो ण धरणी ण कुमालो ण केदुवंसो ण बलाइं ण सारही ण तुलङ्गमा ण दिसाओ ण वीरलोओ अ लक्खी अदि ।**

[ततश्च देव ! गाण्डीविना ताररसितज्यानिर्घोषमात्रविज्ञातबाणवर्षेण तथाऽऽचरितं पत्रिभिर्यथा न नभस्तलं न स्वामी न रथो न धरणी न कुमारो न केतुवंशो न बलानि न सारथिर्न तुरङ्गमा न दिशो न वीरलोकश्च लक्ष्यते] ।

येनासौ तेन । रथयोः कूलमिव कूलं प्रान्तभागं कषतः-हिंसत इति रथकूलङ्कषे । बाणानां नद्यौ-बाणनद्यौ । ताभ्यां=कर्णवृषसेनाभ्याम् । अन्योन्येति । परस्परप्रदर्शितशिक्षाकौशलाभ्याम् । **अभियुक्तः**=आक्रान्तः । **तारं**-दीर्घं **रसितं**=ध्वनिर्यस्यासौ तथाविधो यो **ज्यानिर्घोषः**=मौर्वीनिर्घोषः, तेनैव **विज्ञातं**=बाणानां वर्षं—वृष्टिर्यस्याऽसौ तथाभूतेन । शीघ्रकारितया सन्धानं मोक्षश्च प्रत्यक्षं बाणानां न ज्ञायते, किन्तु ज्यारवेणानुमीयते इति भावः । **पत्रिभिः**=बाणैः । 'पत्री रोप इषुर्द्वयोः' इत्यमरः ।

ओर बाणों की वर्षा से दो बाणों नदियाँ ही उत्पन्न कर दी । उन दोनों (कर्ण वृषसेन) ने भी परस्पर शिक्षा की कुशलता को दिखाते हुए अर्जुन पर आक्रमण किया।

दुर्योधन—तब क्या हुआ ? ।

सुन्दरक—तब तो महाराज ! अर्जुन ने बाणों की झडी लगा दी, और प्रचण्डध्वनिवाली प्रत्यञ्चा के निर्घोष से ही बाण की वर्षा मालूम होती थी यों शीघ्रता से कारण बाण का चढाना छोडना मालुम नहीं होता था । और अर्जुन ने बाणों की वर्षा में ऐसी कुशलता दिखाई कि न आकाश, न कर्ण, न उनका

दुर्योधनः—(सविस्मयं) ततस्ततः ? ।

सुन्दरकः-तदो अ देव ! खणमेत्तं एव अदिक्कन्ते सरसंपादे[1] सहरिससिंहणादे पण्डवबले[2], सविसादविमुक्काक्कन्दे[3] कोरवबले[2] उत्थिदो महन्तो कलअलो 'हा हदो कुमालविससेणो हा हदो' त्ति ।

[ततश्च देव ! क्षणमात्रमतिक्रान्ते शरवर्षे सहर्षसिंहनादे पाण्डवै[3]-बले, सविषादविमुक्ताक्रन्दे कौरव[2]बले, उत्थितो महान्कलकलो 'हा हतः कुमारवृषसेनो, हा हत' इति] ।

दुर्योधनः—(सबाष्पपरोधं[4]) ततस्ततः ? ।

सुन्दरकः—तदो अ[2] देव ! कुमालं हदसारहितुलङ्गं[5] लूणाद-वत्तचाव[2]चामर[2]केदुवंसं सग्गप्पब्भट्टं विअ सुलकुमालं एक्केण ज्जेव मम्मभेदिणा सि[2]ीमुहेण भिण्णदेहं रहमज्झे परिट्ठिदं[6] महन्तीए वेलाए पेक्खिअ[2] अहं आअदो ।

[ततश्च[2] देव ! कुमारं हतसारथितुरङ्गं लूनातपत्रचाप[2]चामर-

हतः सारथिस्तुरङ्गाः-अश्वाश्च यस्य तम् । लूनं=छिन्नम् । आतपत्रं=

रथ, न पृथिवी, न कुमार वृषसेन, न ध्वजा का वांस, न सेना, न सारथि, न घोडे, न दिशाएं, न सेना के वीर लोग ही दिखाई पडते थे । सब छिप गए !

दुर्योधन—(आश्चर्य से) तब क्या हुआ ? ।

सुन्दरक—तब तो देव ! जब बाणों की वर्षा शान्त हुई तब क्षणमात्र मे ही पाण्डव सेना की ओर हर्ष ध्वनि उठी, कारवों की सेना में रोना पीटना मच गया, और 'हाय कुमार वृषसेन मारा गया' यह कोलाहल सुनाई पडा ।

दुर्योधन—(आँसुओं को किसी तरह रोककर) तब क्या हुआ ? ।

सुन्दरक—तब तो देव ! मैने वहाँ जाकर देखा कि कुमार के सारथि और

१ 'सरवरिसे' [शरवर्षे] । २ क्वचिन्न । ३ 'सैन्ये' । ४ ('सबाष्परोधम्') । ५ 'हतसारथितुरङ्ग' । ६ 'पल्लत्थं' (पर्यस्तं) ।

केतुवंशं स्वर्गप्रभ्रष्टमिव सुरकुमारमेकेनैव मर्मभेदिना[1] शिलीमुखेन भिन्न-देहं रथमध्ये परिस्थितं महत्या वेलया प्रेक्ष्याऽहमागतः]।

राजा—सुन्दरक[2] ! अलमिदानीं कथितेन। (सास्रम्)। हा वत्स वृषसेन ! क्वासि ?। देहि मे प्रतिवचनम्।

(इति मोहमुपागतः[3])

सूतः—समाश्वसिहि समाश्वसिहि।

राजा[4]—(उत्थाय सकरुणं) हा वत्स वृषसेन ! हा मदङ्क-दुर्ललित ! हा मदाज्ञाकारक ! हा गदायुद्धप्रिय ! हा शौर्यसागर ! हा राधेयकुलप्ररोह ! हा प्रियदर्शन ! हा दुःशासननिर्विशेष ! हा सर्वगुरुवत्सल ! प्रयच्छ मे प्रतिवचनम्।

छत्रम्। केतुवंशः=ध्वजदण्डः। परिस्थितं=निपतितम्। प्रेक्ष्याहमागत इत्य-न्वयः। 'रथोत्सङ्गाद्धरातलं लुठित'मिति क्वाचित्कः पाठः। मदङ्कदुर्ललित= मदुत्सङ्गप्रणयिन्। राधेयकुलप्ररोह=कर्णवंशाङ्कुरभूत। दुश्शासननिर्विशेष=

घोड़े मारे गये हैं, छत्र बाण चामर एवं रथकी ध्वजा का दण्ड भी कट गया है, और कुमार भी स्वर्ग से गिरे हुए देवकुमार की तरह मालुम पड़ते थे। और मर्मभेदी एक बाण उनकी छाती में चुभा हुआ था और वे रथ के बीच में पड़े हुए थे। बहुत देर तक इस प्रकार देखकर मैं यहाँ चला आया हूँ।

दुर्योधन—सुन्दरक ! अब आगे कहने की आवश्यकता नहीं है। (आँखों में आंसू भरकर) हाय ! कुँवर वृषसेन ! कहाँ हो, बोलो तो सही।

(ऐसा कह कर मूर्च्छित हो जाता है)।

सूत—महाराज ! धीरज धरिए, धीरज धरिए।

राजा—(उठकर बड़ी करुणा से) हाय वत्स वृषसेन ! हाय मेरे गोद

१ क्वचिन्न। २ 'दुर्योधनः-(सास्रम्) अहह कुमारवृषसेन !। अलमतः परं श्रुत्वा। हा वत्स वृषसेन!'। पा०। ३ 'उपगतः'। ४ 'दुर्योधनः-हा'।

पर्याप्तनेत्रमचिरोदितचन्द्रकान्त-
मुद्भिद्यमाननवयौवनरम्यशोभम् ।
प्राणापहारपरिवर्तितदृष्टि दृष्टं
कर्णेन तत्कथमिवाननपङ्कजं ते ! ॥ १० ॥

सूतः—**आयुष्मन् ! अलमत्यन्तदुःखावेगेन ।**

दुर्योधनः—**सूत ! पुण्यवन्तो हि दुःखभाजो भवन्ति । अस्माकं पुनः—**

दुश्शासनतुल्य । **पर्याप्तेति** । **पर्याप्तनेत्रं**=कर्णान्तविस्तृतलोचनम् । अचिरोदितो यश्चन्द्रः, तद्वत् कान्तं-प्रियम् । **उद्भिद्यमानम्**=उद्गच्छत्, **यद्यौवनं**=तारुण्यं, तेन रम्या शोभा यस्य तत् । **ते**=तव । तत् । **आननपङ्कजं**=वदनारविन्दं । प्राणापहारेण परिवर्त्तिते दृष्टी यत्र तत्तथाभूतं । मृत्युविपर्यस्तलोचनं । कर्णेन कथमिव दृष्टं ? । हा कथं दृष्टं स्यादित्यर्थः । वसन्ततिलका वृत्तम्॥१०॥

में बड़े चाव से खेलने वाले ! हाय मेरे आज्ञाकारी ! हा पराक्रमसागर, हा राधेय (कर्ण) के वंश के अङ्कुर, हाय प्रियदर्शन, हाय दुःशासनतुल्य, हाय सब गुरुजनों के प्रीतिपात्र ! अब तुम कहाँ हो, उत्तर दो ।

विशाल नेत्र वाले, अभिनव उदित चन्द्रमा की तरह लालिमा लिए हुए शोभायमान, नई जवानी के उठाव से रमणीय शोभावाले तुम्हारे उस मुखकमल को मृत्यु समय की यन्त्रणा से नेत्र की शोभा के विकृत हो जाने पर कर्ण ने कैसे देखा होगा ? : [हाय ! मृत्यु से विकृत तुम्हारा प्रियमुखकमल कर्ण से कैसे देखा गया होगा ?] ॥ १० ॥

सूत—आयुष्मन् ! [सर्कार !] दुःख का ज्यादा आवेग न करें ।

दुर्योधन—सूत ! दुःख तो पुण्यात्मा लोग ही उठाते हैं । हमारा तो—

१ 'प्राणापचारपरिवर्तितदृष्टिः' ।

प्रत्यक्षं हतबन्धूनामेतत्परिभवाग्निना ।
हृदयं दह्यतेऽत्यर्थं कुतो दुःखं कुतो व्यथा ? ॥ ११ ॥

(इति मोहमुपागतः) ।

सूतः—**समाश्वसितु समाश्वसितु महाराजः ।**

(इति पटान्तेन बीजयति) ।

दुर्योधनः—(लब्धसंज्ञः) **भद्र सुन्दरक ! [1]ततो वयस्येन किं प्रतिपन्नमङ्गराजेन ? ।**

सुन्दरकः—**तदो अ देव ! तधाविधस्स पुत्तस्स दंसणेण**

प्रत्यक्षमिति । एतद्धृदयं प्रत्यक्षं हतबन्धूनां शत्रुहतानां स्वजनानां परिभवाग्निना=तिरस्कारानलेन । अत्यर्थं=नितरां । दह्यते=भस्मीक्रियते । दुःखव्यथयोर्वार्तैव तत्र काऽस्ति हृदयमेव दह्यते इत्यर्थः । हृदयरूपाधारस्य दाहाद्दुःखव्यथयोः क्वावस्थानमिति तत्त्वम् ॥ ११ ॥

मोहं=मूर्च्छाम् । **पटान्तेन**=वस्त्राञ्चलेन । **लब्धसंज्ञः**=लब्धचैतन्यः । **वयस्येन**=मित्रेण । **प्रतिपन्नम्**=अङ्गीकृतम् । व्यवसितम् ।

अपनी आँखों के सामनें अपने बान्धवों के मारे जाने से उत्पन्न परिभवाग्नि से हृदय (कलेजा) ही भयानक रूप से जल रहा है, भला दुःख और व्यथा का अवसर ही कहाँ है ? । [अर्थात् अपमान के कारण जब हमारा मनही जल रहा है, तो दुःख व व्यथा जिनका मन से सम्बन्ध है, कैसे हो सकती है?] ॥११॥

[ऐसे कहकर मूर्छित हो जाता है] ।

सूत—महाराज ! धैर्य धारण करिए, धैर्य धारण करिए ।

(इस प्रकार कहता हुआ कपडे की छोर से हवा करता है) ।

दुर्योधन—(चैतन्य होकर) भद्र सुन्दरक ! तब मित्र कर्ण ने क्या किया ? । (क्या करने का विचार व निश्चय किया ?) ।

सुन्दरक—तब महाराज ! अपने पुत्र को मरा हुआ एवं भूमिपर पड़ा

---

१ 'तत' इत्यस्य स्थाने 'सम्प्रति' इति पाठः क्वचित् ।

संगलिदं अस्सुजादं[1] उज्झिअ अणवेक्खिदपरप्पहरणाभिओएण सामिणा अभिजुत्तो धणंजओ। तं अ सुदवहामरिसुद्दीविदपरक्कमं विमुक्कजीवितासं[2] तह परिक्कमन्तं पेक्खिअ णउलसहदेवपञ्चालप्पमुहेहिं अन्तरिदो धणंजअस्स रहवरो।

[ततश्च देव ! तथाविधस्य पुत्रस्य दर्शनेन सङ्कलितमश्रुजातमुज्झित्वाऽनवेक्षितपरप्रहरणाभियोगेन स्वामिनाऽभियुक्तो धनञ्जयः । तं च सुतवधाऽमर्षोद्दीपितपराक्रमं विमुक्तजीविताशं तथा परिक्रामन्तं प्रेक्ष्य नकुलसहदेवपाञ्चालप्रमुखैरन्तरितो धनञ्जयस्य रथवरः] ।

दुर्योधनः—ततस्ततः ? ।

मुन्दरकः—तदो [देव ! अज्जुणचावमहाप्पलअपओहरणिस्सरिदसरधारासहस्सेहिं पूरिदेसु दिसामुहेसु] सल्लेणं[3] भणिदो

सङ्कलितं=निष्पलितम् । अश्रुजातं=बाष्पपटलम् । उज्झित्वा=विहाय । अनपेक्षितेति । अप्रतीक्षितपाण्डवप्रहाराक्रमेणेनेत्यर्थः । परैरनाक्रान्तोऽपि स्वयमेवेति यावत् । अनपेक्षितपरप्रहरणेनेति युक्तः पाठः । सुतेति । पुत्रवधप्रकोपप्रदीपितपराक्रममित्यर्थः । तथा=अतिमानुषमगणितशरीरञ्च । परिक्रामन्तं=पराक्रमं दर्शयन्तम् । युध्यमानम् । पाञ्चालः=धृतराष्ट्रः। अन्तरितः=परिवारितः। आवृतः। अर्जुनेति।अर्जुनस्य चाप

देखकर बहते हुए आसुओ की धारा को पोछकर शत्रु के धावे की प्रतीक्षा किए विना ही स्वामी अङ्गराज ने धनञ्जय पर आक्रमण कर दिया। इस प्रकार पुत्रवध जन्य शोक व क्रोध से जिसका पराक्रम खूब बढ गया है, जिसने जीने की आशा छोड़ दी है, भीषण वेग से जो शत्रुपर प्रहार कर रहा है ऐसे स्वामी अङ्गराज को देखकर नकुल सहदेव धृतराष्ट्र आदि नें आकर अर्जुन का रथ छिपा (घेर) लिया।

दुर्योधन—तब आगे क्या हुआ ? ।

सुन्दरक—महाराज जब अर्जुन के धनुषरूपी महाप्रलय के मेघ से निकली

१ 'अस्सुजलं' ['अश्रुजलं'] । २ क्वचिन्न ।

३ 'तदो देव ! मल्लेण भणिदं—अङ्गराअ ! हदतुलङ्गमो' ।

सामी अङ्गराओ, जहा-अङ्गराअ ! हदतुलङ्गमो मथिदचक्कणेमि-कूवरो दे रहो, ता ण जुत्तं भीमाज्जुणेहिं अहिजुज्झिदुम्'। त्ति भणिअ पडिवट्टिदो रहो, ओदारिदो सामी सन्दणादो, बहुप्पआरं अ समस्सासिदो।

[ततो देव ! अर्जुनचापमहाप्रलयपयोधरनिःसृतशरधारासहस्रपूरितेषु दिङ्मुखेषु शल्येन भणितः स्वाम्यङ्गराजो यथा-'अङ्गराज ! हततुरङ्गमो माथितचक्रनेमिकूबरस्ते रथः, तन्न युक्तं भीमार्जुनाभ्यामभियोक्तुम्'। इति भणित्वा परिवर्तितो रथोऽवतारितः स्वामी स्यन्दनाद्बहुप्रकारं च समाश्वासितः]।

दुर्योधनः—**ततस्ततः ?**।

सुन्दरकः—**तदो[2] अ सामिणा सुइरं विलपिअ परिअणो-**

एव महाप्रलयकालिकः पयोधरः, तस्मान्निस्सृतानि यानि शरधारासहस्राणि, तैः **दिङ्मुखेषु**=दिगन्तरालेषु, पूरितेषु। मथितौ चक्रनेमिश्च कूबरश्च तौ यस्यासौ तथाभूतः। 'कूबरोऽस्त्री युगन्धरः'इत्यमरः। **पट्टिकां**=शिरोवस्त्रम्। [पगडी]।

हुई बाणों की हजारों धाराओ से दशों दिशाएं व्याप्त हो गई तव शल्य (कर्ण के सारथि, अर्जुन के मातुल) ने कहा कि—'अङ्गराज ! तुमारे रथके घोडे मार गए है, पहियों की नेमि (काष्ठधारण गोल छिद्र) टूट गई है, **कूबर** (जुए का दण्ड) भी टूट गया है। अतः भीम और अर्जुन से युद्ध करना इस समय ठीक नहीं है। ऐसा कहकर रथको वापिस कर लिया, स्वामी को उस रथ पर से उतार दिया और बहुत प्रकार उन्हें धीरज भी दिया ।

दुर्योधन—तब क्या हुआ ?।

१ 'भग्गकूबरो' [भग्नकूबरः]।

२ **दुर्योधनः**-ततस्ततः ?। **सुन्दरकः**-'तदो अ सामिणा सुइरं विलम्बिअ परिअणो अभिहिदो-'अण्णं रहं मे उवणेहि' त्ति । परिअणोवणीदं अण्णं रह पेक्खिअ मइ दिण्णा दिठ्ठी। 'सुन्दरअ, एहि'त्ति भणिअं अ। अहं उवगदो समीवम्'।

वणीदं अण्णं रहं पेक्खिअ दीहं निस्ससिअ मइ दिट्ठी विणिक्खिविदा। 'सुन्दरअ ! एहि' त्ति भणिदं अ। तदो अहं उवगदो सामिसमीवम्। तदो अवणिअ सीसट्ठाणादो पट्टिअं सरीरसंगलिदेहिं सोणिअबिंदुहिंदिद्धवअणं बाणं कदुअ अहिलिहिअ पेसिदो देवस्स सन्देसो।

[ततश्च स्वामिना सुचिरं विलप्य परिजनोपनीतमन्यं रथं प्रेक्ष्य दीर्घं निःश्वस्य मयि दृष्टिर्विनिक्षिप्ता,—'सुन्दरक ! एही'ति भणितं च। ततोऽहमुपगतः स्वामिसमीपम्। ततोऽपनीय शीर्षस्थानात्पट्टिकां शरीरसंगलितैः शोणितबिन्दुभिर्दिग्धवदनं बाणं कृत्वाऽभिलिख्य प्रेषितो देवस्य संदेशः]।

[इति पट्टिकामर्पयति। दुर्योधनो गृहीत्वा वाचयति यथा-]

'स्वस्ति, महाराजदुर्योधनं समराङ्गणात्कर्ण एतद्वृत्तं कण्ठे

व्रणबन्धनं पट्टिकां वा। दिग्धवदनं=लिप्तमुखम्। पट्टिकां=सन्देशपट्टिकां। पत्रिकामिति क्वचित्पाठः। एतद्वृत्तमिति पाठः स्यात्। एतदन्तमिति पाठे—एतदन्तम्=अन्तिमसन्देशम्। मरणकृतनिश्चयसूचनार्थैवमुक्तिः।

सुन्दरक—तब स्वामी अङ्गराज ने बहुत देर तक विलाप करके सेवकों द्वारा लाए गए दूसरे रथ को देखकर (उसपर चढ कर) लम्बा सांसले मेरी ओर देखा। और कहा कि—'सुन्दरक यहाँ आ'। तब उन्होंने अपने शिर परसे पट्टी (शिरपेच, पगडी) खोलकर शरीर से निकली हुई रुधिर की बिन्दुओं से बाण को रंगकर संदेश (चिट्ठी) लिख कर आपके पास भेजा है। (ऐसा कह कर पट्टी या चिट्ठी) दुर्योधन को देता है। दुर्योधन खोलकर बाँचता है कि—]।

---

१ 'लित्तमुहं' [लिप्तमुखं]।

२ अन्यं रथमारुह्य क्षणेन दीर्घं निःश्वस्य मयि'।

३ ('इति पत्रिकामर्पयति')।

४ 'महाराज दुर्योधन'। ५ 'एतदन्तं'।

गाढमालिङ्ग्य विज्ञापयति—

"अस्त्रग्रामविधौ कृती न समरेष्वस्यास्ति तुल्यः पुमान्-
भ्रातृभ्योऽपि ममाधिकोऽयममुना जेयाः पृथासूनवः" ।
त्वत्संभावित[1] इत्यहं, न च हतो दुःशासनारिर्मया,
त्वं[2] दुःखप्रतिकारमेहि भुजयोर्वीर्येण बाष्पेण वा ॥ १२ ॥'

अस्त्रेति । "समरेषु=युद्धेषु । अस्त्रग्रामविधौ=अस्त्रसमूहविधौ । कृती=कुशलः, अस्य=कर्णस्य तुल्यः=सदृशः पुमान् नास्ति, अयं मम भ्रातृभ्योऽपि=दुःशासनादिभ्योऽपि, अधिक=समधिकः, अमुना=कर्णेन, पृथासूनवः=अर्जुनादयः । जेयाः=जेतव्याः" । इति=इत्थम् । अहं—त्वत्सम्भावितः=त्वया कृतसम्भावनोऽस्मि । न च=नैव । दुःशासनारिः=भीमः, मया हतः=मया विनाशितः । अतो मां धिक्, अलं मम जीवितेन । सोऽहं प्राणानिदानीं त्यक्ष्यामीति गूढ आशयः । त्वं=त्वं पुनः । स्वयमेव भुजयोर्वीर्येण=बाहुबलेन । युद्धेति यावत् । बाष्पेण=केवलं स्त्रीवद्रुदित्वा वा । दुःखप्रतीकारं=शत्रुकृतापकारनिर्यातनम् । एहि=प्राप्नुहि । कुरु इति वा । शार्दूलविक्रीडितम् ॥१२॥

''स्वस्ति । महाराज दुर्योधन को युद्धभूमि स्थित कर्ण (स्नेहसे) कण्ठ से दृढ आलिङ्गन कर इस वृत्तान्त को (या इस अन्तिम सूचना को) निवेदन करता है—

'युद्ध में कोई भी इस (कर्ण) के समान शस्त्र अस्त्रों के प्रयोग में कुशल नहीं है, 'यह मेरे भाइयों से भी अधिक प्रिय है' 'यह पाण्डवों को जीतेगा' इस प्रकार तुमनें मेरा सम्मान कर मुझसे बहुत आशा की थी, परन्तु मैं दुःशासन को अपने सामने मारे जाते देख कर भी भीमसेन को भी मार नहीं सका। अतः तुम स्वयं ही अपने भुजाओ के बल से शत्रु को दबाकर या स्त्रियों की तरह आँसु बहाकर ही दुःख का प्रतीकार करो । (अर्थात् शक्ति हो तो शत्रु को मारो, हिम्मत न हो तो बैठ कर रोवो, मैं तो अब मृतक तुल्य ही होरहा हूँ) ॥१२॥

१ 'यत्संभावितः' । २ 'तं दुःखप्रतिकार' ।

दुर्योधनः—**वयस्य कर्ण! कर्ण[1]! किमिदं [2]भ्रातृशतवध-दुःखितं मामपरेण वाक्शल्येन घट्टयसि ?। भद्र सुन्दरक! अथेदानीं किमारम्भोऽङ्गराजः ?।**

सुन्दरकः—**देव! अज्ज वि आरम्भो पुच्छीअदि !। [3]अवणीद-सरीरावरणो अप्पवहकिदणि[4]च्चिओ पुणो वि प[5]त्थेणं सह समलं मग्गदि।** [देव! अद्याप्यारम्भः पृच्छ्यते !। अपनीतशरीरावरण आत्मवधकृतनिश्चयः पुनरपि पार्थेन सह समरं मागयते]।

दुर्योधनः—([6]आवेगादासनादुत्तिष्ठन्) [**सूतं! रथमुपनय**]। **सुन्द-**

किमिति=कुतः। भ्रातृशतवधेन दुःखितः, तं। दुःशासनादिभ्रातृशतविनाश-व्यथितम्। **वाक्शल्येन**=अरुन्तुदेन 'वीर्येण बाष्पेण वे'त्यादिवाक्सायकेन। अनुचितमिदं भवत इत्याशयः। **किमारम्भः**=कस्मिन्कार्ये प्रसक्तः।।कि कर्त्तुमनाः। **अपनीतशरीरावरणः**=परित्यक्तशरीराध्यासः। व्यपनीतशरीरचेष्टः।

दुर्योधन—(पत्र पढ कर) मित्र कर्ण! सौ भाइयों के मारे जाने से मैं तो यों ही दुःखी हूँ फिर मुझ इस प्रकार तीखे वाक्य बाणों से क्यों पीडित कर रहे हो ?। भद्र सुन्दरक! अब अङ्गराज क्या करना चाहते हैं ?।

सुन्दरक—महाराज! अभी आप आरम्भ ही पूछते हैं!। वे अपने शरीर का अध्यास छोडकर आत्मवध (मरने) का निश्चय कर फिर अर्जुन के साथ युद्ध करने का अवसर देख रहे है (या युद्ध कर रहे हैं)।

दुर्योधन—(सुनकर जल्दी से उठकर) सूत! रथ लाओ!

---

१ क्वचिन्न। २ 'हतभ्रातृशत'।

३ 'शरीराभरणः' इति पाठः स्यात।

४ 'निच्चनिच्चयो' [नित्यनिश्चयः]। ५ 'सअं एव पत्थेण' [स्वयमेव पार्थेन]।

६ (श्रुत्वा सत्वरमुत्तिष्ठन्।) सुन्दरक! त्वमपि मद्वचनात्त्वरिततरं गत्वा वयस्यमङ्गराजं प्रबोधय। न खलु जयाकाङ्क्षी भवानिदानीम्। अभिन्न एवायमावयोः सङ्कल्पः। [सुन्दरक! अङ्गराज से कहो कि—जैसे तुम्हें जयकी इच्छा नही रही वैसीही मेरी भी दशा है]।

रक ! त्वमपि मद्वचनात्त्वरिततरं गत्वा वयस्यमङ्गराजं प्रतिबोधय। अलमतिसाहसेन। अभिन्न एवायमावयोः सङ्कल्पो, न खलु भवानेको जीवितपरित्यागाकाङ्क्षी। किंतु—

हत्वा पार्थान्सलिलमशिवं बन्धुवर्गाय दत्त्वा
मुक्त्वा बाष्पं सह कतिपयैर्मन्त्रिभिश्चारिभिश्च।
कृत्वाऽन्योन्यं सुचिरमपुनर्भावि गाढोपगूढं
संत्यक्ष्यावो हततनुमिमां दुःखितौ निर्वृतौ वा॥१३॥

पार्थेन=अर्जुनेन। अभिन्नः=तुल्यः। हत्वेति। पार्थान्=युधिष्ठिरभीमार्जुनादीन्। हत्वा=निपात्य। बन्धुवर्गाय=युद्धमृतबन्धुबान्धवेभ्यः। अशिवम्=अमङ्गलरूपम्। प्रेतोद्देश्यकत्वात्। दत्वा=वितीर्य। कतिपयैररिभिः=हतशिष्टैर्द्वित्रैः शत्रुभिः। मन्त्रिभिश्च=कतिपयैर्मन्त्रिभिश्च सह। बाष्पं=शोकाश्रु। मुक्त्वा=परित्यज्य। रुदित्वेति यावत्। अन्योन्यं=परस्परम्, अपुनर्भावि=अन्तिमम्। गाढोपगूढं=गाढालिङ्गनम्। सुचिरं=बहुकालं कृत्वा। दुःखितावावां हततनुमिमां=शरीरमिदं। निर्वृतौ=शान्तौ। कृतकृत्यौ भूत्वा। सन्त्यक्ष्यावः=परित्यक्ष्यावः। शार्दूलविक्रीडितं वृत्तम्॥ १३॥

और सुन्दरक ! तू जाकर मित्र कर्ण को (धीरज देकर) मेरा यह सन्देश कहना कि—हे कर्ण! ज्यादा साहस मत करो। तुमारा हमारा सङ्कल्प(विचार)समान ही है। क्यों कि केवल तुम्ही मरने को तैयार हो यह बात नही है किन्तु मै भी मरने के लिए तैयार ही हूँ। परन्तु पाण्डवों को मारकर युद्ध मे मरे हुए बन्धु बान्धवों को तिलाञ्जलि देकर बचे खुचे दो चार मन्त्री एवं शत्रुओं के साथ आंसू बहाकर, तुमारे से खूब देर तक अन्तिम गाढ प्रेमालिङ्गन करके हम दोनों साथ ही साथ इस शरीर को—दुःखित होकर या सुखी होकर—छोडेगें॥ १३॥

१ 'निर्वृतौ च'।

अथवा [1]शोकं प्रति मया न किंचित्संदेष्टव्यम् ।

वृषसेनो न ते पुत्रो, न मे दुःशासनोऽनुजः ।
[2]त्वां बोधयामि [3]यदहं, त्वं मां संस्थापयिष्यसि ? ॥ १४ ॥

सुन्दरकः—जं देवो आणवेदि । (इति निष्क्रान्तः) ।
[यद्देव आज्ञापयति] ।

दुर्योधनः--अये ! नेमिध्वनिरिव ! ।

सूतः--आयुष्मन् ! एष सद्य एव संवर्धितो नेमिध्वनिः ।

शोकमिति । ते=तव पुत्रः वृषसेनो न । इदानीं नास्ति । किञ्च मे दुःशासनोऽनुजश्च न,=नास्ति । अत उभावप्यावां समानदुःखशोकौ । बोधयामि=सान्त्वयामि । संस्थापयिष्यसि=सान्त्वयिष्यसि । यद्वा वृषसेनो न ते=तवैव पुत्रः, किंत्वस्माकमपि पुत्रवदेव प्रियः । दुःशासनो ममैवानुज इति न, किन्तु तवापि सोऽनुजतुल्य इति यथा वृषसेनस्य वधात्तव शोकस्तथैव ममापि । एवं दुःशासनवधान्ममेव तवापि शोक इति तुल्यशोकावावां कथमन्योन्यं सान्त्वयाम इत्याशयः ॥ १४ ॥ इति=इत्युक्त्वा ।

अथवा—तुमारे शोक के प्रति मुझे कुछ भी नहीं कहना है । क्योंकि—

तुमारा तो पुत्र वृषसेन चला गया, मेरा भी भाई दुःशासन इस लोक में नहीं है । अतः क्या कहकर मै तुम्हे धीरज दूं और क्या तुम मुझे धीरज दो । हम तुम तो दोनो ही समान ही दु.खी है ॥ १४ ॥

सुन्दरक—जो आज्ञा महाराज की । [जाता है] ।

दुर्योधन—हैं ! यह रथ की सी ध्वनि कहॉ से आरही है ? ।

सूत—[सुनकर] आयुष्मन् ! [सर्कार ! हुजूर] रथ का यह शब्द (घडघटाहट) तो क्रमशः बढ रहा है और निकट ही आ रहा है !

१ 'सशोकं कर्णं प्रति' ।

२ 'त्वां बोधयिष्ये यदहं मां त्वं वा बोधयिष्यसि' ।　३ 'किमहं' ।

दुर्योधनः—नूनं परिजनोपनीतो रथः। गच्छ त्वं सज्जीकुरु।

सूतः—यदाज्ञापयति देवः। (इति निष्क्रम्य पुनः प्रविशति)।

दुर्योधनः—(विलोक्य) किमिति नारूढोऽसि ?।

सूतः—एष खलु तातोऽम्बा च संजयाधिष्ठितं रथमारुह्य देवस्य समीपमुपगतौ।

दुर्योधनः—किं नाम तातोऽम्बा च सम्प्राप्तौ ?। कष्टम्! अतिबीभत्समाचरितं दैवेन। सूत! गच्छ त्वं स्यन्दनं तूर्णमुपहर। अहमपि तातदर्शनं परिहरन्नेकान्ते तिष्ठामि।

सूतः—देव! त्वदेकशेषबान्धवावेतौ . कथमिव

ह्रेषासंवलितः=अश्वध्वनिसंमिश्रितः। नेमिध्वनिः=रथचक्रप्रान्तशब्दः। स्यन्दनः=रथः। तूर्णं=त्वरितम्। उपहर=आनय। तातदर्शनं=जनक-

---

दुर्योधन—जरूर मेरे लिये यह रथ नौकरलोग ला रहे होंगे। जाओ तुम उसे ठीक से तैयार करो।

सूत—जो आज्ञा। (बाहर जाकर पुनः आता है)।

दुर्योधन—(देख कर) क्यों ? रथ पर क्यों नही सवार हुए ?।

सूत—आयुष्मन्! (सर्कार) ये आपके पिता व माता [धृतराष्ट्र व गान्धारी] सञ्जय के साथ रथ पर चढकर आपके निकट आए हैं।

दुर्योधन—क्या पिताजी व माता जी आई है ?। हाय! दुर्दैव ने बड़ा अनर्थ किया! अब क्या करू ?। सूत! तू जल्दी जा, मेरा रथ ठीक कर ले आ, और मैं पिताजी व माताजी से छिपकर कहीं एकान्त में बैठता हूँ।

---

१ दुर्योधनः—तूर्णमेव रथमुपस्थापय।

सूतः—(कर्णं दत्वा) देव! ह्रेषासंवलितो नेमिध्वनिः श्रूयते। तथा तर्कयामि नूनं परिजनोपनीतो रथः।

दुर्योधनः—सूत! गच्छ त्वं सज्जीकुरु।

२ 'संजयेनाधिरूढौ देवदर्शनमनुप्राप्तौ'।

न समाश्वासयसि ? ।

दुर्योधनः—सूत ! कथमिव समाश्वासयामि विमुखभागधेयः ? । पश्य—

अद्यैवावां रणमुपगतौ तातमम्बां च दृष्ट्वा,
घ्रातस्ताभ्यां शिरसि विनतोऽहं च दुःशासनश्च ।
तस्मिन्बाले प्रसभमरिणा प्रापिते तामवस्थां
पार्श्वे[1] पित्रोरपगतघृणः किंनु वक्ष्यामि गत्वा ? ॥१५॥

[सूतः[2]–] तथाप्यवश्यं वन्दनीयौ गुरू । (इति निष्क्रान्तौ) ।

इति वेणीसंहारे चतुर्थोऽङ्कः ।

दर्शनम् । त्वमेव एकः शेषो बान्धवो ययोस्तौ तथाभूतौ । हतसकलपुत्रौ । विमुखभागधेयः=हतभाग्यः ।

अद्येवेति।अद्य=अस्मिन्नवाऽहनि।विनतः=पादप्रणतः। तस्मिन्=दुःशासने। प्रसभं=बलात् । अरिणा=शत्रुणा। तां=मरणरूपाम् । पार्श्वं=समीपम् । अपगतघृणः=निष्करुणः । 'कारुण्यं करुणा घृणा' इत्यमरः । मन्दाक्रान्ता वृत्तम् ॥ १५॥

इति श्रीगुरुप्रसादशास्त्रिविरचितायामभिनवराजलक्ष्यां चतुर्थोऽङ्कः ।

सूत—महाराज ! अब आप एक ही तो उनके पुत्र व बन्धु अवशिष्ट रहे है, आपको तो उन्हे धैर्य देना चाहिए । अतः आप उन्हे धैर्य क्यो नही देते हैं ?

दुर्योधन—सूत कैसे धैर्य दूं ? मै तो बडा अभागा हूं । देखो—

आज हम और दुःशासन दोनों साथ ही पिताजी व माता जी का दर्शन कर युद्धभूमि को गए थे । प्रणाम करते हुए हम दोनो को ही उन्होंने सप्रेम शिरसे पुचकारा व प्रेमसे सूँघा था । अब जब उस बालक दुःशासन को शत्रुओं ने उस दशा को [मृत्युको] पहुंचा दिया तो मैं इकला निर्लज्ज हो उनके पास कैसे जा सकता हूं और जाकर भी क्या कहूंगा ? ॥ १५ ॥

[सूत–] तौ भी गुरुजनों को अवश्य ही प्रणाम करना चाहिए ।

(दोनों जाते हैं) ।

इति चतुर्थोऽङ्कः ।

---

१ 'पार्श्वे पित्रोरहमुपगतः किं नु वक्ष्यामि ताभ्याम्' । २ लुप्तं स्यात् ।

अथ पञ्चमोऽङ्कः ।

(ततः प्रविशति रथयानेन गान्धारी संजयो धृतराष्ट्रश्च) ।

धृतराष्ट्रः—वत्स संजय ! कथय[1] कस्मिन्नुद्देशे कुरुकुलकाननैकशेषप्रवालो वत्सो मे दुर्योधनस्तिष्ठति ? । कच्चिज्जीवति वा न वा ? ।

गान्धारी—जाद ! जइ सच्चं जीवति मे[1] वच्छो ता कहेहि कस्सिं देसे वट्टदि ? ।

[जात ! यदि सत्यं जीवति मे वत्सस्तत्कथय कस्मिन्देशे वर्तते ?] ।

संजयः—नन्वेष महाराज एकाकि[2]येव न्यग्रोधच्छायायामुपविष्टस्तिष्ठति ।

गान्धारी—(सकरुणं) जाद ! एआइ त्ति भणासि ! किं णु[3] क्खु सम्पदं भादुसदं से पास्से भविस्सदि ।

[जात ! एकाकीति भणसि ! । किं नु खलु साम्प्रतं भ्रातृशतमस्य पार्श्वे भविष्यति] ।

रथयानेन=रथेन । उद्देशः=प्रदेशः । स्थानम् । कुरुकुलेति । कुरुकुलरूपस्य वनस्य एकशेषः । प्रवालः=पल्लव इत्यर्थः । भविष्यतीति काकुः । न भविष्यतीत्यर्थः ।

अथ पञ्चम अङ्क ।

[रथ पर चढे हुए गन्धारी सञ्जय व धृतराष्ट्र का प्रवेश]

धृतराष्ट्र—बेटा सञ्जय ! बताओ बताओ कुरुकुलरूपी कानन का एक मात्र बचा हुआ प्रवाल (अङ्कुर पल्लव) मेरा पुत्र दुर्योधन कहां है ? जीता है या नहीं ? ।

गान्धारी—पुत्र ! यदि मेरा बच्चा सचमुच जीता है तो कहो बताओ किस जगह है ? ।

सञ्जय—देखिए माताजी ! यह महाराज दुर्योधन इस वट की छाया में एकाकी बैठे हैं ।

गान्धारी—(बडी करुणापूर्वक) एकाकी की तुमने क्या कही, अब इसके १०० सौ भाई इसके पास कहा से होंगे ! (या अब सौ भाई कहा से आवेंगे) ? ।

१ कच्चिन्न । २ 'एक एव' । ३ 'किं णु क्खु सम्पदं तस्स भादुसदं पास्से णत्थि' ।

सञ्जयः—तात ! अम्ब ! अवतरतं स्वैरं रथात् ।

(उभाववतरणं नाटयतः) ।

(ततः प्रविशति सव्रीडमुपविष्टो दुर्योधनः) ।[2]

संजयः—(उपसृत्य) विजयतां महाराजः ! नन्वेष[1] तातोऽम्बया सह प्राप्तः, किं न पश्यति महाराजः[3] ।

(दुर्योधनो वैलक्ष्यं नाटयति) ।

धृतराष्ट्रः—

शल्यानि व्यपनीय कङ्कवदनैरुन्मोचिते कङ्कटे
　　बद्धेषु व्रणपट्टकेषु शनकैः कर्णे कृतापाश्रयः ।

स्वैरं=मन्दम् । शनैः । उभौ=गान्धारीधृतराष्ट्रौ । सव्रीडम्=सलज्जं यथा स्यात्तथा । उपसृत्य=समीपं गत्वा । वैलक्ष्यं = लज्जाम् । औदासीन्यं वा ।

शल्यानीति । कङ्कवदनैः = गृध्रतुण्डशस्त्रविशेषैः । शल्यानि=बाणफलकादीनि । व्यपनीय=दूरीकृत्य । कङ्कटे=कवचे । 'उरश्छदः कङ्कटकोऽजगरः कवचोऽस्त्रियाम्' इत्यमरः । उन्मोचिते=अवतारिते सति । निस्सारिते

सञ्जय—तात ! माताजी ! रथ से धीरे धीरे उतरिए ।

[दोनों उतरते हैं] ।

[लज्जित भाव से बैठे हुए दुर्योधन का प्रवेश]

सञ्जय—(पास में जाकर) महाराज की जय हो, देखिए यह आप के पिता धृतराष्ट्र आपकी माता गान्धारी के साथ आए है, महाराज चलकर उनका दर्शन क्यों नहीं करते है ? । (दुर्योधन लज्जित होता है) ।

धृतराष्ट्र—(दुर्योधन से)

कङ्कवदन (सण्डासी) से शल्यों को निकाल कर, कवच खोलकर, घावों पर पट्टी बाँधकर, धीरे से कर्ण का सहारा लेकर शत्रुओं को विजय कर आये हुए बड़े

१ कचिन्न ।　　२ 'सव्रीडोपविष्टो' ।　　३ 'पश्यसि महाराज' ।

दूरान्निर्जितशात्रवान्नरपतीनालोकयँल्लीलया
'सह्या पुत्रक वेदने'ति न मया पापेन पृष्टो भवान्॥१॥
(धृतराष्ट्रो गान्धारी च स्पर्शेनोपेत्याऽऽलिङ्गतः)।

गान्धारी—वच्छ ! अदिगाढप्पहारवेअणापज्जाउलस्स अम्हेसु सण्णिहिदेसु वि ण प्पसरदि दे वाणी।

सति। किञ्च व्रणपट्टकेषु=व्रणावरोपणौषधलिप्तपट्टेषु। बद्धेषु=अवबद्धेषु सत्सु। शनकैः=मन्दं। कर्णे=अङ्गराजे कृतः आश्रयो येनासौ तथाभूतः=कर्णस्कन्धकृताश्रयः। कर्णस्कन्धावस्थापितहस्तः, कर्णगृहीतहस्तो वा। शत्रूणां समूहः-शात्रवं, निर्जितं शात्रवं यैस्तान्। कृतशत्रुविजयान्। नृपतीन्=राज्ञः। दूरात्=दूरेणैव। लीलया=हेलया। विलासेन। कटाक्षभ्रूविक्षेपमात्रेणैव। अनादरादिति वा। आलोकयन्=पश्यन्। स्वदर्शनदानेनाऽनुगृह्णन्निति वा। भवान्=दुर्योधनः-'पुत्रक=हे वत्स!, वेदना=बाणादिपीडा। सह्या=सोढुं योग्या। किं नातिव्यथाकरी?। इति=इत्येवं,कुशलादिकम्। पापेन मया=पापिना मया धृतराष्ट्रेण। न पृष्टः=न भवान् संपृष्टः। युद्धादागतस्य कृतोपचारस्य कर्णादिस्वजनधृतहस्तस्य भवतः कुशलवृत्तान्तो मया पापेनाऽद्य न पृष्ट इति भावः। युद्धान्निवृत्तः सन् अन्यदिनवदद्यत्वं कस्मान्न मत्सविधे समायात इत्युद्विग्नोऽस्तीति तत्त्वम्। अत्रान्ये टीकाकृतो भ्रान्ता एवेति गौडा मन्यन्ते। तत्त्वं तु सहृदया एव निर्णयन्तु। शार्दूलविक्रीडितम्॥ १॥

बड़े राजाओं को दूर से ही बड़ी लीला (नजाकत) से देखते तुमको मुझ अभागे ने "हे पुत्र! घावों में ज्यादा पीड़ा तो नहीं है न?" इस प्रकार कह कर आज नहीं देखा। [युद्ध से लौटकर आज तुम मेरे से क्यों नहीं मिले?]॥ १॥

[धृतराष्ट्र और गान्धारी टटोलते टटोलते आकर दुर्योधन को आलिङ्गन

---

१ निर्जितसान्त्वितान्' इति पाठे तु उत्खातप्रतिरोपितानित्यर्थः।

२ 'अम्हेसु वि ण दे प्पसरदि वाणी'। 'किं अम्हेसु वि ण प्पसरदि दे वाणी'

[वत्स ! अतिगाढप्रहारवेदनापर्याकुलस्याऽस्मासु संनिहितेष्वपि न प्रसरति ते वाणी] ।

धृतराष्ट्रः—वत्स दुर्योधन !, किमकृतपूर्वः संप्रति मय्यप्यय-मव्याहारः ? ।

गान्धारी—[सकरुणं] वच्छ ! जइ तुमं वि अम्हे णालवसि ता किं दाणीं वच्छो दुस्सासणो दुम्मरिसणो अण्णो वा आलविस्सदि ? । (इति रोदिति) ।

[वत्स ! यदि त्वमप्यस्मान्नालपसि तत्किमिदानीं वत्सो दुःशासनो दुर्मर्षणोऽन्यो वा आलपिष्यति ?] ।

स्पर्शेन=अन्धवद्गात्रस्पर्शेन। उपेत्य=परिचीय। तत्समीपमेत्येति वा। आलिङ्गतः=दुर्योधनमाश्लिष्यतः। अतिगाढैः प्रहारैर्या वेदना=पीडा तया पर्याकुलस्य=व्याकुलस्य। प्रसरति=प्रकटीभवति। अकृतपूर्वः=पूर्व कदाप्यकृतः।अव्याहारः=अनालापः। मौनम्। दुर्मर्षणः=दुर्योधनभ्राता। अन्यः=त्वदीयोऽन्यो वा भ्राता।

करते हैं] ।

गान्धारी—बेटा ! हमारे आने पर भी कदाचित् ज्यादा चोट लगने के ही कारण तुम्हारे मुख से बोली नहीं निकल रही है ।

धृतराष्ट्र—वत्स दुर्योधन ! आज यह नई बात देख रहा हूँ कि तुम मेरे से भी नहीं बोल रहे हो । (या मेरे से रूठ गए हो) ।

गान्धारी—(करुणापूर्ण स्वर में) वत्स ! यदि तुम भी हमसे नहीं बोलोगे तो क्या अब मेरा बेटा दुःशासन या दुर्मर्षण (यह दुर्योधन के एक भाई का नाम है) या और दूसरे तुम्हारे भाई आकर हमसे बोलेंगे ?

(ऐसा कहकर रोती है) ।

---

१ [किमस्मास्वपि न ते प्रसरति वाणी] ।

२ कश्चिन्न । ३ संपदं [साम्प्रतं] । ४ "दुस्सासणो आलवदि अध दुम्मरिषणो वा अण्णो वा । इति रोदिति" ।

दुर्योधनः—अम्ब !

पापोऽहमप्रतिकृतानुजनाशदर्शी
तातस्य बाष्पपयसां तव चाम्ब ! हेतुः ।
दुर्जातमत्र विमले भरतान्वये वः
किं मां सुतक्षयकरं सुत इत्यवैषि ? ॥ २ ॥

गान्धारी—जाद ! अलमलं परिदेविदेण, तुमं वि दाव एक्को इमस्स अन्धजुअलस्स मग्गोवदेसओ । ता चिरं जीव । किं मे रज्जेण जएण वा ? ।

पाप इति । अम्ब=मातः । अप्रतिकृतो योऽनुजानां नाशः, तं पश्यति तच्छीलः अप्रतिकृताऽनुजनाशदर्शी=अप्रतिविहितभ्रातृवधदर्शी । अहं पापः=पापबुद्धिरहम् । तातस्य=पितुः । तव च=भवत्याश्च । बाष्पपयसाम्=अश्रुजलानाम्, हेतुः=कारणम्।अस्मीति शेषः । विमले=शुद्धेऽपि अत्र=अस्मिन्। भरतान्वये=भरतवंशे । कुरुकुले । दुर्जातं=दुष्टमुत्पन्नम् । वः सुतक्षयकरं=भवत्पुत्रनाशकारकम् । मां=दुर्योधनं । सुत इति=पुत्र इति । किमवैषि=किमर्थं जानासि ? । नाऽहं भवत्पुत्रत्वयोग्यः, किन्तु भ्रातृवधकारणतया नीचोऽहमित्यात्मजुगुप्सेयमिति भावः । वसन्ततिलकं वृत्तम् ॥ २ ॥

दुर्योधन—माताजी !

मैं बड़ा पापी हूँ, क्योंकि अपने भाई का विनाश अपने आँखों देखता हुआ भी मैं उसका प्रतिकार नहीं कर सका, पिताजी के तथा तुम्हारे आँसुओं (रोने) का कारण भी मैं ही हूँ, आप के इस पवित्र भरतकुल में मैं दुष्ट जन्मा हूँ । मैं तो आपके पुत्रों का विनाश करनेवाला हूँ मुझे आप अपना पुत्र क्यों समझती हैं ? । (हाय ! मैं तुम्हारे पुत्रों का विनाश करानेवाला हूँ न कि तुम्हारा पुत्र) ॥ २ ॥

गान्धारी—बेटा ! रहने दो रहने दो ! ज्यादा शोक व विलाप मत करो । अब तुम्हीं एक हम दोनों अन्धों को रास्ता दिखानेवाले (अन्धों का सहारा)

१ कश्चिन्न । २ 'जातोऽहमप्रति' ।
३ 'न्वयेऽपि' । 'न्वयेऽस्मिन्' । ४ 'वैरेण वा' ।

[जात ! अलं परिदेवितेन । त्वमपि तावदेकोऽस्यान्धयुगलस्य मार्गोपदेशकः । तच्चिरं जीव । किं मे राज्येन जयेन वा) ।

दुर्योधनः—

मातः ! किमप्यसदृशं कृपणं वचस्ते
सुक्षत्रिया क्व भवती ? क्व च दीनतैषा ? ।
निर्वत्सले ! सुतशतस्य विपत्तिमेतां
त्वं नानुचिन्तयसि, रक्षसि मामयोग्यम् ? ॥ ३ ॥

अन्धयुगलस्य=अन्धयुग्मस्य । आवयोः । **मार्गोपदेशकः**=यष्टिग्राही । सहायः ।

मातरिति । हे मातः । ते=तव, **असदृशम्**=अतुल्यं, **किमपि**=अनिर्वचनीयं । **कृपणं**=दीनम् , **वचः**=वाक्यम् । अस्तीति शेषः । **सुक्षत्रिया**=श्रेष्ठक्षत्रियकुलप्रसूता । श्रेष्ठक्षत्रियराजमहिषी च । हे **निर्वत्सले**=स्नेहशून्यहृदये । स्नेहभरितहृदये इति वा । सुतशतस्य एतां विपत्तिं त्वं न **अनुचिन्तयसि**=न विभावयसि, तत्प्रतीकारं शत्रुवधं नानुमन्यसे, किन्तु **अयोग्यं**=नीचम् । **मां रक्षसि**=मां रक्षितुमीहसे । इत्यनौचित्यं भवत्या इति भावः । वसन्ततिलका वृत्तम् ॥ ३ ॥

रह गये हो । भगवान् करे तुम जुग जुग जीवो, हमें राज्य से वा विजय से क्या लेना है ? । तुम जीते रहो यही बहुत है ।

दुर्योधन—माताजी ! यह दीन वचन आपके लायक नहीं है, क्योंकि कहाँ तो आप जैसी वीरपुत्री व वीरपत्नी और कहाँ ऐसा दीन वचन ! । हे स्नेहातुरे ! अपने १०० पुत्रों की विपत्ति (मृत्यु) का शोच नहीं करके (उनका बदला लेन की इच्छा नहीं करके) मुझ अयोग्य को बचाने के लिए ही इतनी आतुर हो रही हो। (यह तुम्हारे जैसी वीर क्षत्राणी के योग्य बात नहीं है, क्षत्राणी तो प्रत्येक अवस्था में शत्रुके मारने की—बदला लेने की-बात को ही सोचती है) ॥ ३ ॥

---

१ कच्चित्र । २ 'किमित्यसदृशम्' इति गौडाः ।
३ 'विकृतं' । ४ 'मेनाम्' ।

नूनं विचेष्टितमिदं सुतशोकस्य।

संजयः—महाराज ! किं वाऽयं लोकवादो वितथो 'न घटस्य कूपपतने रज्जुस्तत्रैव प्रक्षेप्तव्य' इति ?।

दुर्योधनः—अपुष्कलमिदम्। ननूपक्रियमाणाऽभावे किमुपकरणेन ?।

(इति रोदिति।)।

धृतराष्ट्रः—(दुर्योधनं परिष्वज्य) वत्स ! समाश्वसिहि। समाश्वासय चाऽस्मानिमामतिदीनां मातरं च।

नूनमिति। सुतशोकोपहतबुद्धितयैवं त्वं भावयसीत्यर्थः।

लोकवादः=लोकप्रसिद्धिः। वितथः=असत्यः। लोकवादमेवाह–नेति। यथा घटे कूपे पतितेऽपि रज्जुर्न कूपे निक्षिप्यते, एवं पुत्रशतमरणेऽपि भवान् रक्षितव्य एवेत्याशयः।

अपुष्कलम्=इदं वचो न श्रेष्ठम्। 'श्रेयान् श्रेष्ठश्च पुष्कलः' इतिकोशः। अपर्याप्तमिति वा। उपक्रियमाणाऽभावे=कुलविनाशे। रक्षणीयविनाशे। इमामतिदीनां मातरञ्च। समाश्वासयेति शेषः। समाश्वासः=धैर्यम्।

अवश्य ही पुत्रशोक से तुम्हारे हतबुद्धि होने का ही यह विचेष्टित (प्रभाव) है।

सञ्जय—महाराज ! तो क्या यह लोकोक्ति झूठी है कि 'घड़ा कुएँ में पड़ जाय तो रस्सी भी कुएँ में नहीं फेंक देनी चाहिए।' (अर्थात् १०० पुत्रों के मर जाने से भी बचे हुए एक पुत्र—तुमको–मृत्युमुख में भेज देना कथमपि उचित नहीं है)।

दुर्योधन—तुम्हारी युक्ति यहाँ पर्याप्त नहीं है। क्योंकि उपक्रियमाण (भोगनेवाला) के नहीं रहने पर उपकरण (उपभोगसामग्री) की क्या जरूरत है।? (अर्थात् १०० भाइयों के मर जाने पर अब मेरे एक के जीने से क्या लाभ ?) [ऐसा कहकर रोता है]।

धृतराष्ट्र—(दुर्योधन को आलिङ्गन कर) वत्स ! तुम भी थोडा धैर्य धरो ! और हमें तथा अपनी इस नितान्त दीन माता को भी धीरज दो।

---

१ क्वचिन्न।

दुर्योधनः—तात! दुर्लभः[1]समाश्वास इदानीं युष्माकम्। किंतु-

कुन्त्या सह युवामद्य मया निहतपुत्रया।
विराजमानौ शोकेऽपि तनयाननुशोचतम् ॥ ४ ॥

गान्धारी—जाद ! एदं एव्व संपदं प्पभूतं जं[1] तुमं वि दाव एक्को जीवसि। कं अण्णं अणुसोचिस्सम्। ता जाद! अकालो दे समरस्स। प्पसीद। एसो दे अञ्जली। 'णिवट्टेहि समरव्वावारादो। अपच्छिमं करेहि पि[2]दुणो वअणम्।

कुन्त्येति। मया निहतपुत्रया=हतयुधिष्ठिरादिपुत्रया कुन्त्या-युधिष्ठिरादिजनन्या सह अद्य शोकेऽपि—विराजमानौ=तुल्यदुःखतया प्रकाशमानौ, परिवारवत्तया-शोभमानौ वा। युवां=भवन्तौ, तनयान्=दुरशासनादीन्। अनुशोचतं=तेषां शोकं कुरुतम्। अहं पाण्डुपुत्रान्हनिष्यामीत्यर्थः ॥ ४ ॥

साम्प्रतम्=इदानीम्। प्रभूतं=युक्तम्। वपुलम्। पाठान्तरे—नानुशोचितव्यः=स्वस्थस्तिष्ठसि। 'नानुशोचिष्ये' इति युक्तः पाठः। पाठान्तर-शीर्षाञ्जलिः=प्रणामः। शीर्षेऽञ्जलिरित्यपि क्वचित्पाठः। शीर्षेऽञ्जलिः=प्रणामः। अपश्चिमम्=अनतिलङ्घनीयम्। मान्यम्।

दुर्योधन—पिताजी ! अब आपका धैर्य धारण करना तो कठिन है। परन्तु हाँ, मेरे द्वारा जिसके पुत्र मारे गए हैं ऐसी हतपुत्रा कुन्ती के साथ शोक में भी बड़े गौरवपूर्ण भाव से विराजमान होकर आप अपने पुत्रों का शोक करिएगा। (अर्थात् मैं शीघ्र ही कुन्ती के पुत्रों (पाण्डवों) को मारकर तुम्हारे पुत्रों के वध का बदला लेता हूँ, तब तुम अपने शत्रुओं के साथ ही साथ-गर्व से-अपने पुत्रों का शोक करना) ॥ ४ ॥

गान्धारी—पुत्र ! इस समय यही बहुत है कि तुम एक भी जीवित

---

१ 'जं तुमं वि दाव एक्को णाणुसोचइदव्वो। ता जाद ! प्पसीद। एसो दे सीसञ्जली। निवट्टीअदु समरव्वावारादो। अपच्छिमं करेहि पिदुणो वअणम्'।

[यत्त्वमपि तावदेको नानुशोचितव्यः। तज्जात ! प्रसीद। एष ते शीर्षाञ्जलिः। निवर्त्यतां समरव्यापारात्। अपश्चिमं कुरु पितुर्वचनम्]।

२ क्वचिन्न।

[जात ! एतदेव सांप्रतं प्रभूतं यत्त्वमपि तावदेको जीवसि । कथमन्यमनुशोचिष्यामि । तज्जात ! अकालस्ते समरस्य प्रसीद । एष तेऽञ्जलिः । निवर्त्तस्व समरव्यापारात् । अपश्चिमं कुरु पितुर्वचनम्] ।

धृतराष्ट्रः—**वत्स ! शृणु वचनं तवाऽम्बाया मम च निहताऽशेषबन्धुवर्गस्य । पश्य—**

दायादा न ययोर्बलेन गणितास्तौ द्रोणभीष्मौ हतौ,
कर्णस्यात्मजमग्रतः शमयतो भीतं जगत्फाल्गुनात् ।

दायादा इति । दायादाः=शत्रवः पाण्डुपुत्राः । ययोः=द्रोणभीष्मयोः । बलेन=बलमास्थाय । गणिताः=आकलिताः । कर्णस्य आत्मजं पुत्रं=वृषसेनम्, अग्रतः=कर्णस्य पश्यत एव । शमयतः=नाशयतः, फाल्गुनात्=अर्जुनात् । जगत्=लोकः । भीतं=सम्प्रति त्रस्तं वर्त्तते । कर्णादप्यतिबली-

---

हो । अन्यों (मृतों) के लिए शोक करके भी मैं क्या कर लूँगी ? । इसलिए हे पुत्र ! हमारा कहना मानो, इस समय तुम्हारा युद्ध करने का समय नहीं है, हम हाथ जोड़ते हैं, हमारा यह कहना मानो । युद्ध बन्द कर दो । पिता की आज्ञा का तिरस्कार मत करो ।

धृतराष्ट्र—बेटा ! तुम अपनी माता का तथा मेरा—जिसके सब बन्धु बान्धव मारे गए हैं उसका—वचन सुनो । देखो—

जिनके बल पर हम लोग दायादों (पट्टीदार पाण्डवों) को कुछ भी नहीं गिनते थे वे द्रोण और भीष्म भी मारे गए । कर्ण के सामने ही देखते २ उसके पुत्र का वध करनेवाले अर्जुन से जगत् भयभीत हो रहा है, मेरे सब पुत्रों के मारे जाने के कारण अब शत्रु (भीम) केवल तुम्हारे विषय में ही अवशिष्टप्रतिज्ञ है ।

वत्सानां निधनेन[1] मे त्वयि रिपुः शेषप्रतिज्ञोऽधुना
मानं[2] वैरिषु[3] मुञ्च तात[4] ! पितरावन्धाविमौ पालय ॥ ५ ॥

दुर्योधनः—[तात[5] अम्ब !] समरात्प्रतिनिवृत्त्य किं मया कर्तव्यम् ? ।

गान्धारी—जाद ! जं पिदा दे विउरो वा भणिस्सदि[6] तं अनुचिट्ठ ।

[जात ! यत्पिता ते विदुरो वा भणिष्यति तदनुतिष्ठ ।

सञ्जयः—राजन्[7] ! एवमिदम् ।

यान् पाण्डवोऽर्जुन इत्याशयः । मे वत्सानां=पुत्राणाम् । निधनेन=वधेन । अधुना त्वयि=त्वद्विषये । रिपुः=शत्रुर्भीमः । शेषा प्रतिज्ञा यस्यासौ तथाभूतः=अवशिष्टस्वप्रतिज्ञः । भीमेन हि दुर्योधनस्य तद्भ्रातॄणाञ्च वधः प्रतिज्ञातः । मानं=गर्वम् । वैरिषु=पाण्डवेषु । मुञ्च=त्यज । तात=हे पुत्र । इमौ अन्धौ=त्वदेकाधीनौ लोचनशून्यौ । पितरौ=पितरं जननीञ्च स्वाम् । पालय=रक्ष । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

(अर्थात् अब तो शत्रु की तुम्हें मारने की प्रतिज्ञा केवल बाकी रही है, उनकी और सब प्रतिज्ञाएँ पूर्ण हो चुकी हैं) । अतः हे तात ! अब शत्रुओं से मान (घमण्ड) छोड़ दो । तुम्हारे पिता माता हम दोनों अन्धों की रक्षा करो ॥ ५ ॥

दुर्योधन—पिताजी ! माताजी ! कहिए युद्ध से निवृत्त होकर मुझे क्या करना चाहिए ? ।

गान्धारी—जो तुम्हारे पिता व महामन्त्री विदुर कहें वही करो ।

सञ्जय—राजन् ! यह बात माताजी ने बहुत ठीक कही है ।

---

१ 'निधनाच्च मारुतिरसौ शेषप्रतिज्ञस्त्वयि' ।   २ 'क्रोधं' ।

३ 'वैरिणि' ।   ४ 'वत्स' ।

५ क्वचिन्न ।   ६ 'भणदि' 'भणति' ।   ७ 'देव' ।

दुर्योधनः—**सञ्जय ! अद्याप्युपदेष्टव्यमस्ति ?।**

सञ्जयः—**राजन्[1] ! यावत्प्राणिति[2] तावदुपदेष्टव्यभूमिर्विजिगीषुः प्रज्ञावताम्[3]।**

दुर्योधनः—(सक्रोधं[4]) **शृणुमस्तावद्भवत एव प्रज्ञावतोऽस्मान्प्रति प्रतिरूपमुपदेशम्[5]।**

धृतराष्ट्रः—**वत्स ! युक्तवादिनि संजये किमत्र क्रोधेन ?। यदि प्रकृतिमापद्यसे तदहमेवं[6] भवन्तं ब्रवीमि । श्रूयताम्—**

दुर्योधनः—**कथयतु तातः ।**

उपदेष्टव्यम्=उपदेशविषयः । प्रश्नोऽयम् । किमिति शेषः । **भूमिः**=तदर्हः । **विजिगीषुः**=विजयाभिलाषी । राजा । 'संपन्नश्च प्रकृतिभिर्महोत्साहः कृतश्रमः । जेतुमेषणशीलश्च विजिगीषुरिति स्मृतः' । इति तल्लक्षणम् । **प्रतिरूपम्**=अनुरूपम् । क्वचित्तथैव पाठः । सदृशम् । **प्रकृतिं**=शान्तिम् । **सन्धत्तां**=

दुर्योधन—(ताने के साथ) क्या अब भी तुम्हारा उपदेश बाकी ही पड़ा है ?।

सञ्जय—राजन् ! राजा जबतक जीवित है तबतक विद्वानों के उपदेश का पात्र है ।

दुर्योधन—(क्रोध से) अच्छा कहो तो सही तुम्हारे ऐसे महापण्डित का हमारे प्रति क्या योग्य उपदेश है, जरा हम भी तो सुनें ।

धृतराष्ट्र—वत्स ! (बेटा) सञ्जय तो युक्तिसङ्गत ही कह रहा है, उसपर क्रोध क्यों करते हो ?। यदि तुम मेरा कहा मानो और राग द्वेष छोड़कर शान्त हो तो मैं ही तुम्हें उपदेश देता हूँ, सुनो ।

दुर्योधन—अच्छा तो पिताजी कहिए ।

---

१ क्वचिन्न । २ 'प्राणितव्यं । 'प्राणाः' । 'प्राणाऽनाशः' 'प्राणनाशः' ३ 'भूमयो विजिगीषवः' ४ (सासूयम्) । ५ 'शृणुमस्तावद्भवतः प्रज्ञावतः संप्रत्यनुरूपमुपदेशम्' । ६ तदहमेव कथयामि' ।

धृतराष्ट्रः—**वत्स ! किं विस्तरेण, संधत्तां भवानिदानीमपि युधिष्ठिरमीप्सितपणबन्धेन ।**

दुर्योधनः-**तात ! तनयस्नेहवैक्लव्यादम्बा, बालिशत्वेन सञ्जयश्च काममेवं ब्रवीतु । युष्माकमप्येवं व्यामोहः ! । अथ वा प्रभवति पुत्रनाशजन्मा हृदयज्वरः । अन्यच्च तात ! अस्खलित-भ्रातृशतः [अहं यदा] तदावधीरितवासुदेवसामोपन्यासः, सम्प्रति [हि] दृष्टपितामहाचार्यानुजराजचक्रविपत्तिः स्वे-**

सन्धि करोतु । **तनयस्नेहवैक्लव्यात्** = पुत्रस्नेहातुरत्वात् । विह्वलत्वात् । पुत्रस्नेहमूढत्वात् । **बालिशत्वात्**=मूढत्वात् । **कामं**=यथेच्छम् । **युष्माकं**= तत्त्वविदां भवताम् । **व्यामोहः**=मोहः । चित्तवैक्लव्यम् । भ्रमः । व्यामोहस्य युक्तत्वं समर्थयते स्वयमेव—अथवेति । **हृदयज्वरः** = तातस्य मानसः सन्तापः । **प्रभवति**=विजृम्भते । **अन्यच्च**=किञ्च । 'हे तात ! दुर्योधनः कथं सन्धिं करिष्यती'त्यन्वयः । **अस्खलितम्**=अविनष्टं विद्यमानं भ्रातृणां शतं यस्यासौ तथाविधः । **अवधीरितः** = तिरस्कृतः । **वासुदेवस्य**=कृष्णस्य, **सामोपन्यासः** = सान्त्वप्रसङ्गः, शान्तिप्रार्थना, सन्धिप्रस्तावो येनासौ तथा-विधः । अभूवमिति शेषः । **सम्प्रति**=इदानीम् । दृष्टा **पितामहस्य**=भीष्मस्य, **आचार्यस्य**=द्रोणस्य, **अनुजस्य**=दुःशासनस्य भ्रातुः, **राजचक्रस्य**=क्षत्रिय-समूहस्य च **विपत्तिः**=विनाशो येनासौ तथाविधः । हतसकलस्वजनबन्धु-

धृतराष्ट्र—वत्स ! ज्यादा विस्तार से कहने की आवश्यकता नहीं है, संक्षेप से ही कहता हूँ कि—तुम अब भी युधिष्ठिर से उसकी कही पाँच ग्राम देने की शर्त पर सन्धि कर लो । (पण=शर्त) ।

दुर्योधन—पिताजी ! पुत्रस्नेह से व्याकुल चित्त होने से माताजी, तथा मूर्खतावश सञ्जय भी यदि इस (सन्धि की) बात को कहते हैं तो कहने दीजिए । परन्तु आपको भी यह व्यामोह (भ्रम) कैसे हो गया ! । अथवा सौ पुत्रों की

१ 'इदानीं युधिष्ठिरस्य समीप्सितेन पणेन' ।

२ 'बालिशत्वात्सञ्जयश्च' । ३ 'शमोपन्यासः' । ४ क्वचिन्न ।

शरीरमात्रस्नेहादुदात्तपुरुषव्रीडावहमसुखावसानं च कथमिव करिष्यति दुर्योधनः सह पाण्डवैः सन्धिम् !।

अन्यच्च नयवेदिन्संजय !

हीयमानान् किल रिपून्नृपाः संदधते कथम् ?।
दुःशासनेन हीनोऽहं सानुजः पाण्डवोऽधुना ?॥ ६ ॥

वर्ग इत्यर्थः। उदात्तपुरुषव्रीडाकरं=महापुरुषलज्जावहम्। 'उदात्तो दातृ-महतोर्हृद्ये च स्वरभिद्यपि' इति हैमः। 'मन्दाक्षं ह्रीस्त्रपा व्रीडा' इत्यमरः। असुखावसानम्=दुःखान्तम्। परिणामेऽसुखप्रदम्।

कथमिव=कथं नु ?। केन प्रकारेण ?। कथमपि न करिष्यतीत्यर्थः। नयवेदिन्=नीतितत्त्वाभिज्ञ !। हीयमानानिति। हीनबलान्। किलेत्यागमे। रिपून्=शत्रून्। नृपाः=राजानः, कथं सन्दधते=कथं नु तैः सन्धिं कुर्वन्ति?। नैव कुर्वन्तीत्यर्थः। अहं हि दुःशासनेन भ्रात्रा हीनः, पाण्डव=युधिष्ठिरस्तु अधुना सानुज इत्यर्थः। पाठान्तरे—अहीनाः=अक्षीणबलाः, कथं=कथं सन्दधते इत्यर्थः॥ ६ ॥

मृत्यु से आपके हृदय मे जो सन्ताप हो रहा है 'उसीसे ऐसी भ्रान्तिपूर्ण बात आपने कही है। क्योंकि–हे पिताजी ! जब मेरे सभी भाई व बन्धुबान्धव कुशल-पूर्वक थे उस समय भी मैंने श्रीकृष्ण के कहने को–शान्तिसन्देशको नही माना, तो इस समय जब भीष्मपितामह, भाई, बन्धु, सामन्तराजगण आदि सब मारे गए उस समय केवल अपने शरीर के लिए (उसकी रक्षा के लिए) मनस्वी लोगों के लिए जो लज्जाजनक है तथा जिसका अन्तिम परिणाम कभी सुखकर नही हो सकता ऐसी पाण्डवों के साथ सन्धि को मैं दुर्योधन कर सकता हूँ ?। और हे (नीति तत्त्वज्ञ) सञ्जय ! तुमतो नीतिशास्त्र पढे हो, नीति के तत्त्व को जानते हो—

१ 'हीयमानाः किल रिपोर्नृपाः सन्दधते परान्।
दुःशासने हतेऽहीनाः सानुजाः पाण्डवाः कथम्' ॥ —पा०

धृतराष्ट्रः—वत्स ! एवंगतेऽपि मत्प्रार्थनया किंन्न करोति युधिष्ठिरः ? । अन्यच्च सर्वमेवापकृतं नानुमन्यते ।

दुर्योधनः—कथमिव ? ।

धृतराष्ट्रः—वत्स ! श्रूयतां प्रतिज्ञा युधिष्ठिरस्य-'नाहमेकस्यापि भ्रातुर्विपत्तौ प्राणान्धारयामी'ति । बहुच्छलत्वा-

---

एवंगतेऽपि=नीतेरेवंविधत्वेऽपि । त्वदुक्तस्य यथार्थत्वेऽपि । **किंन करोति**= युक्तमयुक्तं वा सर्वं करोति । पाठान्तरे—**न किंचिन्न करोति**=सर्वं करोत्येव ।
सर्वमेव **अपकृतं**=सकलमपि भवता विप्रकृतम्। **नानुमन्यते**=नानुसन्धत्ते । धार्मिकत्वाद्गुरुजनाज्ञापालकत्वान्मदनुरागित्वाच्चेत्याशयः । पाठान्तरे—दैवा-**पकृष्टं**=दैवकृतम् । न मनुष्यकृतमित्यर्थः । **कथमिव**=कुत एतदित्यर्थः । **विपत्तौ**=विनाशे ।

क्या कोई भी राजा निर्बल हुए शत्रु से कभी सन्धि करता है ? । इस समय मैं भाई बन्धुओं के बल से हीन हो गया हूँ और पाण्डव (युधिष्ठिर) भ्रातृबल से परिपूर्ण है। अतः अब हमसे क्या कभी युधिष्ठिर सन्धि कर सकता है ?। कदापि नहीं॥

धृतराष्ट्र—वत्स ! नीति तो यही है, परन्तु मेरी प्रार्थनापर युधिष्ठिर उचित अनुचित सभी करने को सदा तैयार है । और युधिष्ठिर अपकारों को भूल कर शान्ति के लिए सदा ही तैयार रहता है ।

दुर्योधन—ऐसा क्यों ? ।

धृतराष्ट्र—क्योंकि हे वत्स ! युधिष्ठिर की यह प्रतिज्ञा है कि—'मेरे एक भी भाई की युद्ध में मृत्यु हो जाएगी तो मैं नहीं जीऊगा, प्राणत्याग दूंगा' । और युद्ध में कूट-कपट-छल तो सामान्य बात है, अतः कब कौन मारा जाएगा—यह नहीं कहा जा सकता । अतः युद्ध में अपने भाइयों के अनिष्ट की आशङ्का से युधिष्ठिर

---

१ 'न किञ्चिन्न करोति' । २ 'सर्वदैवा' । 'सदैवाऽ' 'सर्वं दैवापकृष्टं मन्यते युधिष्ठिरः' 'सर्वदैवापकृष्टमात्मानं मन्यते भवद्भ्यो युधिष्ठिरः' ।

त्सङ्ग्रामस्यानुजनाशमाशङ्कमानो यदैव भवते रोचते तदैवासौ सज्जः सन्धातुम् ।

सञ्जयः—एवमिदम् ।

गान्धारी—जाद ! उपपत्तिजुत्तं पडिवज्जस्स पिदुणो वअणम्।
[जात ! उपपत्तियुक्तं प्रतिपद्यस्व पितुर्वचनम्] ।

दुर्योधनः—तात ! अम्ब ! संजय !

एकेनापि विनानुजेन मरणं पार्थः प्रतिज्ञातवा-
न्भ्रातॄणां निहते शते विषहते दुर्योधनो जीवितुम् ! ।
तं दुःशासनशोणिताशनमरिं भिंत्त्व[1] गदाकोटिना
भीमं दिक्षु न विक्षिपामि, कृपणः सन्धिं विदध्यामहम्! ॥७॥

बहुच्छलत्वात् = विपत्तिसङ्कुलत्वात् । अनुजनाशं=भ्रातृवधम् । रोचते= तुभ्यं रुचिविषयो भवति । असौ=युधिष्ठिरः । सज्जः=सन्नद्धः । एवमिदं= सत्यमेतत् । उपपत्तियुक्तं=सयुक्तिकम् ।

प्रतिपद्यस्व=अङ्गीकुरु । जानीहि । एकेनापीति । एकेन अनुजेन= कनिष्ठेन भ्रात्रा विना पार्थः=युधिष्ठिरः, मरणं प्रतिज्ञातवान्=निश्चितवान् । दुर्योधनस्तु भ्रातॄणां शते निहते=विनाशितेऽपि, जीवितुं विषहते=शक्नोति । वाञ्छति वा । नैव शक्नोतीत्यर्थः । दुःशासनशोणिताशनं=दुःशासनरुधिर-भोजनं तम्, अरिं=शत्रुं भीमं, गदाकोटिना=गदाग्रेण भित्त्वा दिक्षु न विक्षि-पामि=किं न विक्षिपामि ? । किन्तु विक्षिपाम्येव । कृपणः=दीनो भूत्वा किमहं पाण्डवैररिभिः सह सन्धिं विदध्याम् ? । नैवेत्यर्थः ॥ ७ ॥

सदा भयभीत रहता है । और युद्ध उसे नापसन्द है अतः जब तुम चाहो उसी समय वह शान्ति के लिए तैयार है।

सञ्जय—यह बात बिलकुल ठीक है ।

गान्धारी—पुत्र ! अपने पिताकी युक्तिसङ्गत ये बातें अवश्य मान लो ।

दुर्योधन—पिता जी ! माता जी ! सञ्जय ! देखो

[1] 'शोणिताशिनमहं भिन्दन्गदाकोटिभिः' ।

गान्धारी—'हा जाद दुस्सासण, हा दुम्मरिसण, हा विकण्ण, हा वीरसप्पसविणि गान्धारि दुक्खसदंप्पसूदा ण सुदसदम् ।

[हा जात दुश्शासन ! हा दुर्मर्षण ! हा विकर्ण ! हा वीरशतप्रसविनी गान्धारी दुःखशतं प्रसूता न सुतशतम्] ।

(सर्वे रुदन्ति) ।

दुमर्षणो विकर्णश्च दुर्योधनभ्रातरौ । गान्धारीति सम्बुद्ध्यन्तं प्रथमान्तं वा क्वचित्पठ्यते । पाठान्तरे—मदङ्केति । मदुत्सङ्गत्रणयिन्नित्यर्थः ।

ईदृशी=पुत्रशतमृत्युरूपा । हन्तेति खेदे ।

युधिष्ठिर ने तो एक भी भाई के मारे जाने पर मरने की प्रतिज्ञा की है, और कहाँ मैं १०० सौ भाइयों के मरने पर भी जीने की इच्छा करूँ (सन्धि करूँ!)। मेरे भाई दुःशासन के मारने वाले शत्रु भीमसेन को मैं गदा की कोटि (कोने) से मारकर चील कौवों के खाने के लिए फकूंगा कि कृपण व निर्बल की तरह शत्रु से सन्धि करूंगा ?। अर्थात् मैं सन्धि कभी नहीं करूंगा ॥ ७ ॥

गान्धारी—हाय बेटा दुःशासन ? हाय दुर्मर्षण !! हाय विकर्ण !! हाय ! संसार मे ऐसा दुःख तो किसी पर भी न पड़ा होगा । वीर जननी इस गान्धारीनें १०० पुत्र नहीं जन्मे थे किन्तु पुत्ररूप से वे १०० दुःख ही पैदा किए थे। अर्थात् वे मेरे १०० पुत्र नहीं थे किन्तु १०० सौ दुःख ही थे जो मुझे इस प्रकार दुःखी कर चले गए ।

[सब रोते है] ।

---

१ हा जात दुस्सासण ! हा मदङ्कदुल्ललिद ! हा जुअराअ ! अस्सुदपुव्वा क्खु कस्स वि लोए इदिसी विपत्ती ! । हा बीरसदप्पसविणी हंद गान्धारी दुक्खसदं प्पसूदा ण उण सुदसदम् । [हा जात दुःशासन ! हा मदङ्कदुर्ललित, हा युवराज, अश्रुतपूर्वा खलु कस्यापि लोके ईदृशी विपत्तिः ! । हा वीरशतप्रसविनी हन्त गान्धारी दुःखशतं प्रसूता न पुनः सुतशतम्' । २ 'प्रसविनि गान्धारि' । ३ 'प्रसूतासि' ।

सञ्जयः—(बाष्पमुत्सृज्य) तात ! अम्ब ! प्रतिबोधयितुं महाराजमिमां भूमिं युवामागतौ[1] । तदात्माऽपि तावत्संस्तभ्यताम् ।

धृतराष्ट्रः—वत्स दुर्योधन ! एवं विमुखेषु भागधेयेषु त्वयि चामुञ्चति सहजं मानबन्धमरिषु[2] त्वदेकशेषजीवितालम्बनेयं तपस्विनी गान्धारी कमवलम्बतां[3] शरणमहं च ? ।

दुःखशतमिति । दुःखहेतुत्वाद्दुःखत्वेनोपादानम् । प्रतिबोधयितुं=सान्त्वयितुम् । संस्तभ्यतां=स्थिरीक्रियताम् । धैर्यं बध्नीत यूयमित्यर्थः । वत्स=पुत्र दुर्योधन । एवम्=इत्थम् । शतपुत्रवधात् । भागधेयेषु=भाग्येषु । 'त्वयि च अरिषु मानबन्धं-गर्वम्-अमुञ्चति सती'त्यन्वयः । त्वम् एकः शेषो जीवितावलम्बनं यस्याः सा त्वदेकशेषजीवितावलम्बना=त्वन्मात्रशरणा । तपस्विनी=वराकी । कष्टगता । गान्धारी=त्वन्माता । शरणं=रक्षकम् । अवलम्बताम्=आश्रयतु । कथय । अहञ्च । 'कं शरणमवलम्बिष्ये' इति शेषः ।

सञ्जय—[आँसू पोंछता हुआ] तात ! कहाँ तो महाराज दुर्योधन को समझाने के लिए आप दोनों यहाँ आए थे और कहाँ आप लोगों की स्वयं ही यह दशा होरही है । कमसें कम पहले अपनी आतमा को तो धीरज दीजिए ।

धृतराष्ट्र -(दुर्योधन से) बेटा ! एकतो हमारे ऊपर विधाता योंही कुपित है जो १०० पुत्र हमारे चल गए, फिर तुम भी शत्रुओं के सामने अभिमान छोडना नहीं चाहते हो तो बताओ यह तुमारी बेचारी माता गान्धारी जिसके तुम एकही जीवन के आधार बचे हो—किसके शरण जाएगी ? । इसका कौन सहारा है ? ! और कहो-मेरा भी अब कौन अवलम्ब है ? ।

१ क्वचिन्न ।

२ चाऽमुञ्चति मानबन्धमरिषु' ।

३ 'किमव' ।

दुर्योधनः—श्रूयतां [यत्प्रतिपत्तुमिदानीं प्राप्तकालम्]

कलितभुवना भुक्तैश्वर्यास्तिरस्कृतविद्विषः
प्रणतशिरसां राज्ञां चूडासहस्रकृतार्चनाः ।
अभिमुखमरीन्सङ्ख्ये घ्नन्तो हताः शतमात्मजा
वहतु सगरेणोढां तातो धुरं सहितोऽम्बया ॥ ८ ॥

प्रतिपत्तुं=कर्तुम् । निश्चेतुम् । कलितेति । कलितं=स्वायत्तीकृतं वशीकृतं भुवनं यैस्ते कलितभुवनाः=अधिष्ठितभुवनाः । त्रैलोक्याधिपतयः । भुक्तमैश्वर्यं यैस्ते भुक्तैश्वर्याः=भुक्तमहाभोगाः । तिरस्कृता विद्विषो यैस्ते तिरस्कृतविद्विषः=हतशात्रवः । विजितारयः । प्रणतानि शिरांसि येषां तेषां प्रणतशिरसां=नतमस्तकानां । राज्ञां=सामन्तनृपाणां । चूडासहस्रैः कृतमर्चनं येषां ते चूडासहस्रकृतार्चनाः=मौलिसहस्रकृतपूजनाः । सामन्तराजमण्डलशिखा-सहस्रकृतसत्कारातिशयाः । 'शिखा चूडा केशपाशः' इत्यमरः । सङ्ख्ये=युद्धे । अरीन्=शत्रून् । घ्नन्तः=विनाशयन्तः । अभिमुखं=संमुखम् । शतमात्मजाः=शतसङ्ख्याका भवत्पुत्राः । हताः=यतः सङ्ख्ये हताः । 'अत' इति शेषः । अम्बया=मज्जनन्या गान्धार्या । सह=साकम् । तात=पिता । भवान् । सगरेण=सूर्यवंशविख्यातेन महाराजेन । ऊढां=समारूढाम् । अधिगताम् । धुरं=भारं । कीर्त्तिम् । वहतु=धारयतु । आरोहतु । सगरस्य षष्टिः सहस्राणि ६०००० पुत्रा आसन् । ते सहसैव कपिलेन भगवता क्रुद्धेन भस्मसात्कृता इति पुराणप्रसिद्धिः । सगरवत्तवाऽपि लोके कीर्त्तिर्भविष्यतीत्याशयः । हरिणी वृत्तम् ॥ ८ ॥

दुर्योधन—पिता जी ! सुनिए जो इस समय निश्चय करने योग्य है—

त्रैलोक्य [यूरोप एशिया अमेरिका) पर जिनका आधिपत्य था, संसार के सभी ऐश्वर्य व सम्पत्ति का जिन्होंने उपभोग किया था, शत्रु को जिन्होंनें परास्त किया था, हजारों राजा जिनके पैरों पर शिर रख पूजा किया करते थे, ऐसे तुमारे १०० सौ पुत्र युद्ध में शत्रुओं को मारते हुए सन्मुख मृत्यु को प्राप्त हुए हैं । अतः जगत् में आपका नाम सदा के लिये अमर हो गया है । [राजा सगर के भी ६००००

१ क्वचिन्न । २ 'क्रुद्धान् घ्नन्तः' 'क्रुद्धा घ्नन्तः' ।

विपर्यये त्वस्याऽधिपतेरुल्लङ्घितः क्षात्रधर्मः स्यात् ।

[नेपथ्ये महान्कलकलः] ।

गान्धारी—(आकर्ण्य सभयम्) सञ्जये ! किं एदं हाहाकारमिस्सं तूररसिदं सुणीअदि ? ।

[सञ्जय ! किमेतद्धाहाकारमिश्रं तूर्यरसितं श्रूयते !] ।

सञ्जयः—अम्बे[3] ! भूमिरियमेवंविधानां भीरुजनत्रासजननी महानिनादानाम् ।

विपर्यये=अन्यथा तु । पुत्रनाशाद्भयाद्वा युद्धपरित्यागे तु । अस्य=एतस्य । अधिपतेः=राज्ञः । क्षात्रधर्मः=क्षत्रियधर्मः । उल्लङ्घितः=अतिक्रान्तः । स्यात्=भवेत् । अतो युद्धपरित्यागो नोचित इत्याशयः । कलकलः=कोलाहलः । हाहाकारमिश्रं=हाहाकारसहितम् । तूर्यरसितं=तूर्यशब्दः । एवंविधानाम्=ईदृशानाम् । महानिनादानां=भीषणमहाशब्दानाम् । भूमिः=स्थानम् । भीरुजनत्रासजननी=कातरजनभीतिजननी ।

साठ हजार पुत्र युद्ध में कपिल भगवान् के क्रोध से भस्म हो गए थे] ॥ ८ ॥

यदि ऐसा न करके युद्ध से मुख मोड़कर शत्रु से सन्धि की जायगी तो क्षत्रिय धर्म की अवहेलना होगी । और जो हमारे ऐसे क्षत्रियों के लिए बड़ी लज्जा की बात होगी ।

[नेपथ्य में बड़ा हल्ला होता है]

गान्धारी- (सुनकर डरती हुई) पुत्र (सञ्जय) ! यह हाहाकार से मिला हुआ तूर्य [तुरही] का शब्द कहां हो रहा है ? ।

सञ्जय—माताजी ! यह युद्धभूमि है, यहाँ तो कायरों को डराने वाले ऐसे२ भयङ्कर शब्द हुआ ही करते हैं ।

---

१ 'जाद ! कहिं-एदं' । [जात ! कुत्रैतत्] ।

२ 'विसमं रसिदं' । ३ 'अभूमिरियमेवंविधानां भीरुजनानाम्' ।

धृतराष्ट्रः—वत्स सञ्जय ! ज्ञायतामतिभैरवः खलु विस्तारी हाहारवः । कारणेनाऽस्य महता भवितव्यम् ।

दुर्योधनः—तात ! प्रसीद । पराङ्मुखं खलु दैवमस्माकम् । यावदपरमपि किञ्चिदत्याहितं न श्रावयति तावदेवाज्ञापय मां सङ्ग्रामावतरणाय ।

गान्धारी—जाद ! मुहुत्तअं दाव मं मन्दभाइणीं समस्ससिहि ।
[जात ! मुहूर्तकं तावन्मां मन्दभाग्यां समाश्वासय] ।

धृतराष्ट्रः—वत्स ! यद्यपि भवान्समराय कृतनिश्चयस्तथापि रहः[1] परप्रतीघातोपायश्चिन्त्यताम् ।

पाठान्तरे—अभूमिः=अस्थानम् । एवंविधानां=भवादृशानाम् । भवन्मा-मत्र न स्थेयं, भीरुस्वभावत्वादित्यर्थः । अतिभैरवः=अतिभीषणः । विस्तारी=प्रवर्द्धमानः । सन्निहितमागच्छन् । हाहारवः=हाहाशब्दः । 'अस्य महता कारणेन भवितव्य'मित्यन्वयः । प्रसीद=दयां कुरु । पराङ्मुखं= प्रतिकूलम् । अत्याहितम्=अनिष्टम् । श्रावयति=कर्णपथातिथिं करोति । मन्दभाग्यां=मन्दभागधेयाम् । रहः=निर्मूलं । एकान्ते वा । परेति । शत्रु-

धृतराष्ट्र—वत्स सञ्जय ! देखो तो ! क्या बात है । यह तो अत्यन्त भयानक हाहाकार का शब्द सुनाई दे रहा है अथच बढ़ता ही जारहा है । इसमें कोई विशेष कारण जरूर होगा ।

दुर्योधन—पिताजी ! प्रसन्न होइए कृपा करिए । हम लोगों का दैव [भाग्य] इस समय विपरीत है, जब तक और कोई भयङ्कर बात न सुनाई दे तबतक ही [उससे पहले ही] मुझे आप युद्ध में उतरने की आज्ञा दीजिए ।

गान्धारी—बेटा ! थोड़ी देर तो मुझ अभागी को धीरज दो । [थोड़ी देर तो और ठहरो] ।

धृतराष्ट्र—बेटा ! तुमारी यदि युद्ध के लिए ऐसी ही दृढ इच्छा व निश्चय है तो ठीक है, पर शत्रुओं को गुप्त रूप से मारने का कोई उपाय सोचो ।

१ कश्चिन्न ।

दुर्योधनः—

प्रत्यक्षं हतबान्धवा मम परे हन्तुं न योग्या रहः

किं वा तेन कृतेन तैरिह कृतं यन्न प्रकाश्यं रणे ?।

गान्धारी—**जाद ! एआइ तुमम्, को दे सहाअत्तण करिस्सदि ?।**

[जात ! एकाकी त्वम्, कस्ते साहाय्यं करिष्यति ?]।

विनाशोपाय इत्यर्थः। **प्रत्यक्षमिति। परे**=शत्रवः पाण्डवाः। अक्ष्णः समीपं-**प्रत्यक्षं**। हता बान्धवा यैस्ते **हतबान्धवाः**=अपरोक्षहतबन्धुबान्धववर्गाः। **रहः**=निगूढम्। उपह्वरम्। **हन्तुं योग्या न**। भवन्तीति शेषः। प्रत्यक्षं कृतापकाराणां तथैवापकारयोग्यत्वात्। **तैः**=शत्रुभिः। **रणे**=युद्धे। **कृतं**=विहितं। भीष्मद्रोणविनाशदुःशासनरुधिरपानादिकमनार्यं कर्म। यत्–**इह**=जगति। इह भवतोरग्रे इति वा। **न प्रकाश्यं**=न प्रकाशनार्हम्। अवाच्यम्। निन्दितत्वात्। **तेन**=तादृशेन। **कर्मणा**=गूढवधादिना। **किंवा**=किं प्रयोजनम्?। न प्रयोजनमित्यर्थः। वस्तुतस्तु–"**किं वा तेन कृतेन तैरिव कृतं यन्न प्रकाश्यं रणे**"इति'**प्रकाशं रणे**'इति वा क्वाचित्कः पाठ एव समुचितः।**तेन** शत्रुवधेन कर्मणा किं, **यत्** कर्म **तैरिव**=शत्रुभिरिव रणे **न प्रकाश्यं**=सर्वसमक्षं न कृतम्। यथा शत्रुभिरस्माकं बान्धवाः समक्षमस्माकं हतास्तथाऽस्माभिरपि तेषां बान्धवास्तत्समक्षं हन्तव्याः, न गूढमिति च तदर्थः।

एकोऽसहायः कथं शत्रून् हनिष्यसीति मातुः प्रश्ने उत्तरमाह–

दुर्योधन—पिताजी ! जिन्होने मेरी आखों के सामने मेरे बन्धु बान्धवो को मारा है उनको लुक छिपकर मै मारना अच्छा नही समझता हू। क्योंकि शत्रुओं की तरह खुले मैदान जो कार्य न किया गया, तो उसका करना ही व्यर्थ है।

गान्धारी—बेटा ! तुमतो एकाकी रह गए हो, अब तुमारा युद्ध में कौन सहायक होगा ?।

१ 'प्रत्यक्षं हतबान्धवस्य न परान् हन्तुं रथो मे क्षमः'—पा०।

दुर्योधनः—

एकोऽहं जगतीत्रयक्षयकरो मातः ! कियन्तोऽरयः
साम्यं केवलमेतु दैवमधुना निष्पाण्डवा मेदिनी ॥९॥

एक इति । अहमेकोऽपि जगतीत्रयक्षयकरः=त्रैलोक्यनाशक्षमः । अस्मीति शेषः । मातः ! अरयः=शत्रवः । कियन्तः=स्वल्पा एव । न मे सहायकस्याऽऽवश्यकतेत्यर्थः ।

सर्वथा प्रश्नाननुगुणे प्रचलिते भ्रष्टे'भवतीसुतक्षयकर'इति पाठे यदि योजनाग्रहस्तर्हि यद्यपि अहमेक एव—भवत्याःसुताना क्षयस्य करः—त्वत्पुत्रशतनाशनः। भ्रातृसाहाय्यविकलः। 'अवशिष्टोऽस्मि तथापी ति शेषः । यद्यपि भवत्याः सर्वेऽपि पुत्रा मृताः, अहमेव केवलमवशिष्टोऽस्मीति यावत् । तथापि मातः=हे मातः । अरयः=शत्रवः । कियन्तः=कियन्मात्राः । स्वल्पाः । न तेषां काऽपि गणना, तुच्छत्वादित्याशयः । (बहव इति वाऽर्थः) इत्येवं योजना कार्या । तर्हि कुतो न ते हन्यन्त इत्यत आह—साम्यमिति । दैवमेव केवलमधुना साम्यम्=आनुकूल्यम् । एतु=गच्छतु । दैवेऽनुकूले हि सति तु । मेदिनी=पृथिवी । निष्पाण्डवा=पाण्डवशून्यैव । भविष्यतीति शेषः । दैवेऽनुकूले एक एवाहं सर्वान्पाण्डवान्हन्तुं समर्थोऽस्मीत्याशयः । शार्दूलविक्रीडितं वृत्तम् ॥ ९ ॥

दुर्योधन—माताजी ! मै इकला भी तीनों लोक को नष्ट कर सकता हूँ, मुठ्ठी भर शत्रुओ की तो गिनती ही क्या है, केवल भाग्य अनुकूल होना चाहिए फिर तो पृथ्वी पर से पाण्डवों का नाम ही मिटा दूंगा ॥ ९ ॥

१ अयं वा, 'जगतीतलक्षयकरः'इति 'जगतीशतक्षयकरः' इति, 'धरणीतलक्षयकर' इति वा पाठो भवेत् । परं भवतीसुतेति पाठस्तु नास्त्येव,प्रश्नोत्तराऽसङ्गतेः,अप्रासङ्गिकत्वाच्चेति सर्वेऽत्र लिखितपुस्तकाक्षरवाचकमूलपुरुषभ्रान्त्या हन्त भ्रान्ता ! गौडैर्मार्ग दर्शिताः । अत्र 'भवतीसुतक्षयकरो'इति तु मुद्रितः पाठः ।

२ 'शाम्यं केवलमेतु दैवमधुना' 'श्लाघ्यं केवलमस्तु दैवमधुना' ।

[नेपथ्ये कलकलानन्तरम्–]

भो भो योधाः ! निवेदयन्तु भवन्तः कौरवेश्वराय, इदं महत्कदनं प्रवृत्तम् !। अलमप्रियश्रवणपराङ्मुखतया । यतः कालानुरूपं प्रतिविधातव्यमिदानीम् । तथा हि—

त्यक्तप्राजनरश्मिरङ्कितततनुः पार्थाङ्कितैर्मार्गणै-
र्वाहैः स्यन्दनवर्त्मनां परिचयादाकृष्यमाणः शनैः ।

कौरवेश्वराय=दुर्योधनाय । कदनं=भीषणम् । अनर्थो वा । प्रवृत्तं= जातम् । 'कदनं भीषणे पापे' इति विश्वः ।

इत्थं श्रुत्वा योधा भीताः सन्तः पराङ्मुखा भवन्तीति दृष्ट्वाह–अलमिति । अप्रियेति । अमङ्गलवार्त्ताश्रवणपराङ्मुखत्वेन अलं=न प्रयोजनमित्यर्थः । यतः= यस्मात् । कालानुरूपं=समयोचितम् । इदानीम्=सम्प्रति । प्रतिविधातव्यं= करणीयमेव । कदनमेवाह = तथाहीति ।

त्यक्तेति । प्राजनं च रश्मिश्च तौ प्राजनरश्मी । 'रश्मिः पुमान् दीधितौ स्यात्पक्ष्मप्रग्रहयोरपि' इति मेदिनी । 'प्राजनं तोदनं तोत्रम्' इत्यमरः । त्यक्तौ प्राजनरश्मी येनासौ–त्यक्तप्राजनरश्मिः=परित्यक्ततोत्र-प्रग्रहः । पार्थाङ्कितैः=अर्जुननामाङ्कितैः । मार्गणैः=बाणैः । अङ्किता तनुर्य-स्यासौ तथा । लाञ्छितशरीरः । एतेन कर्णार्जुनयोर्युद्धं जातमिति सूचितम् । स्यन्दनवर्त्मनां=रथमार्गाणाम् । परिचयात्=अनुसन्धानात् । वाहैः=अश्वैः ।

[नेपथ्य में कोलाहल के बाद]

अहो ! योद्धाओ ! आपलोग महाराज दुर्योधन से यह कहिए कि–यह बडा अनर्थ हो गया, (कदन=गडबडी, अनर्थ या युद्ध) । (योद्धाओ को दुःसंवाद सुनने के डर से टाल-टूल करते देखकर) हे योद्धाओं ! अप्रिय बात सुनने (या महाराज को सुनाने) से आप लोगों का मुख फेरना उचित नहीं है, क्योंकि समयानुसार प्रबन्ध तो करना ही पडेगा । क्योंकि—

वार्तामङ्गपतेर्विलोचनजलैरावेदयन्पृच्छतां
शून्येनैव रथेन याति शिबिरं शल्यः कुरूञ्छल्ययन्[1] ॥१०॥

दुर्योधनः—[श्रुत्वा साशङ्कम्] आः ! सूत ! **केनेदमविस्पष्टमशनिपातदारुणमुद्घोषितं [ज्ञायताम्[2]] । कः कोऽत्र भोः ?** ।

शनैः=मन्दम् । **आकृष्यमाणः**=शिबिरं प्रति नीयमानः। विकलहृदयः। **पृच्छतां**=कर्णवृत्तान्तं परिपृच्छतां कृते। **लोचनजलैः**=अश्रुभिः । **अङ्गपतेर्वार्त्तां**=कर्णवृत्तान्तम् । **आवेदयन्**=सूचयन् । **शल्यः**=कर्णसारथिर्मद्रराजः । **कुरून्**=कौरवान् , कौरवबलञ्च । **शल्ययन्**=पीडयन् । पाठान्तरे-**कम्पयन्**=वेपयन् सन् । **शून्येनैव रथेन**=कर्णरहितेनैव रथेन । **शिबिरं**=सेनासंनिवेशं । **याति**=गच्छति । शार्दूलविक्रीडितं वृत्तम् ॥ १० ॥

अविस्पष्टम्=अस्फुटम् । **अशनिपातदारुणं**=वज्रपातकठिनम् । इदं द्वयमपि क्रियाविशेषणमित्यवधेयम् । **उद्घोषितं**=उच्चैः समुच्चारितम् । **किमन्यदिति** । इतः परं किं कथनीयमित्यर्थः ।

जिसने हाथ से चाबूक एवं घोडों की रस्सी (लगाम) छोड दी है, अर्जुन के नाम से अङ्कित बाणों से जिसका शरीर चिह्नित एवं छिन्न भिन्न हो रहा है, रास्ता जानने के कारण रथके घोडेही जिसे धीरे २ पडाव की ओर खीचे ला रहे हैं, पूछने वालों को अङ्गराज कर्ण की बात आखों के आसुओं से ही कहता हुआ कौरवों के कलेजे को सेल की चोट से घायल करता हुआ यह शल्य (कर्ण का सारथि) खाली रथ लिए हुए पडाव की ओर जा रहा है ॥ १० ॥

दुर्योधन—(सुनकर शङ्कित हो) हैं ! वज्रपात की तरह भीषण व अस्पष्ट इस (गोलमोल) बात की किसने घोषणा की है ? ।

बाहर कौन है ? ।

---

१ 'कम्पयन्' । रोदनेनैव कर्णवधं सूचयन्नित्यर्थः ।

२ कचिन्न ।

[प्रविश्य संभ्रान्तः]

सूतः—**हा ! हता[1]ः स्मः । (इत्यात्मानं पातयति[2]) ।**

दुर्योधनः—**अयि ! कथय कथय ? ।**

[धृतराष्ट्रसंजयौ—**कथ्यतां कथ्यताम्**] ।

सूतः—**आयुष्मन्[3] ! किमन्यत्[4]—**

शल्येन यथा शल्येन[5] मूर्च्छितः प्रविशता जनौघोऽयम् ।
शून्यं कर्णस्य रथं मनोरथमिवाधिरूढेन ॥ ११ ॥

शल्येनेति । हे आयुष्मन् ! **अयं जनौघ**=जनसमूहः । कुरुबलम् । **यथा शल्येन**=अस्त्रविशेषण शल्येनेव । **प्रविशता**=जनौघं प्रविशता । जनसङ्कुलं मार्गं जनसंमर्दं वा प्रविशता। भवतोऽस्माकं वा **मनोरथमिव**=इच्छामिव, **शून्यं**=कर्णरहितम् । **कर्णस्य**=अङ्गराजस्य **रथं**=स्यन्दनम् । **अधिरूढेन**=अध्यारूढेन । **शल्येन**=मद्रराजेन शल्येन । **मूर्च्छितः**=व्याकुलीकृतः । मूर्च्छां प्रापितश्च । आर्याच्छन्दः ॥ ११ ॥ **मोहं**=मूर्च्छाम् । **उपगतः**=प्राप्तः ।

(घबडाया हुआ सारथि प्रवेश कर कहता है) ।

सूत—हाय ! हमलोग तो मारे गए ।

(ऐसा कहकर भूमिपर गिर पडता है) ।

दुर्योधन—अरे ! कहो कहो, बात क्या है ? ।

धृतराष्ट्र-व **सञ्जय**—कहो कहो क्या बात है ? ।

सूत—आयुष्मन् ! (सर्कार या चिरञ्जीव), और क्या है !

जैसे शल्य (भाला बाण आदि के अग्र भाग) के शरीर में प्रवेश करने से मनुष्य मूर्च्छित हो जाता है वैसे ही हमारे मनोरथों की तरह शून्य कर्ण के रथ पर बैठे हुए, जन समूह (भीड) मे घुसते हुए शल्य से (उस को देखकर) लोग मूर्छित हो गए है । (अर्थात् कर्ण मारे गए) ॥ ११ ॥

---

१ 'हतोऽस्मि' । २ 'अपातयत्' ।

३ सूतेन हि स्वस्वामी आयुष्मन्निति वाच्य इति भरतसमयः ।

४ कश्चिन्न । ५ 'स्वल्पेन' ।

दुर्योधनः—हा वयस्य कर्ण ! (इति मोहमुपगतः[1]) ।

गान्धारी—जाद ! समस्सस समस्सस ।

[जात ! समाश्वसिहि समाश्वसिहि] ।

संजयः—समाश्वसितु समाश्वसितु देवः[2] ।

धृतराष्ट्रः—भोः ! कष्टं कष्टम् ।

भीष्मे द्रोणे च निहते य आसीदवलम्बनम् ।
वत्सस्य[3] च सुहृच्छूरो राधेयः सोऽप्ययं गतः[4] ॥ १२ ॥

वत्स ! समाश्वसिहि समाश्वसिहि । ननु[5] भो हतविधे !

अन्धोऽनुभूतशतपुत्रविपत्तिदुःखः
शोच्यां दशामुपगतः सह भार्ययाऽहम् ।

भीष्म इति । भीष्मे द्रोणे च निहते=शत्रुभिर्निहते सति । वत्सस्य=मत्पुत्रस्य । अवलम्बनम्=आधारः । आश्वासहेतुः । राधेयः=राधासुतः कर्णः । गतः=परलोकमितो गतः ॥ १२ ॥

अन्ध इति । अन्धः=दृष्टिविकलः । अनुभूतं शतं पुत्राणां विपत्तिरेव-मृत्युरेव दुःखं=शोको येनासौ तथाभूतः, अहं=धृतराष्ट्रः । भार्यया सह=गान्धार्या सह । शोच्यां=शोचनीयाम् । दशाम्=अवस्थाम् । उपगतः=पूर्वमेव प्राप्तोऽस्मि । अशेषिताः=सर्वे हताः, सुहृदां गुरूणाम् बन्धूनां च वर्गा यस्य

दुर्योधन—हाय मित्र कर्ण ! (ऐसा कहकर मूर्च्छित होता है) ।

गान्धारी—बेटा ! धीरज धरो, धीरज धरो ।

सञ्जय—महाराज ! धैर्य धरिए, धैर्य धरिए ।

धृतराष्ट्र—बडे दुःख की बात है कि—भीष्म व द्रोण के मारे जाने पर मेरे पुत्र दुर्योधन का जो प्रिय मित्र व एकमात्र अवलम्बन (सहारा) था वह कर्ण भी हाय अब चला गया (मारा गया) ॥ १२ ॥

वत्स ! धैर्य धरो, धैर्य धरो । हे कुटिल क्रूर विधे ! (विधातः !)

१ 'उपागतः' । २ 'महाराजः' । 'समाश्वसिहि समाश्वसिहि महाराज' ।
३ 'पुत्रस्य मे सुहृत्प्रेयान्' ।
४ 'हतः' । 'वत्स दुर्योधन ! समाश्वासय तपस्विनीं मातरम्' ५ क्वचिन्न ।

अस्मिन्नशेषितसुहृद्गुरुबन्धुवर्गे
दुर्योधनेऽपि हि कृतो भवता निराशः ॥ १३ ॥

वत्स दुर्योधन ! समाश्वसिहि[1] [समाश्वसिहि]। समाश्वासय तपस्विनीं मातरं च।

दुर्योधनः—(लब्धसंज्ञः)

अयि कर्ण ! कर्णसुखदां प्रयच्छ मे
गिरमुद्गिरन्निव मुदं मयि स्थिराम्।
संतताऽवियुक्तमकृताऽप्रियं[2] कथं[3]
वृषसेनवत्सल ! विहाय यासि माम् ? ॥ १४ ॥

तथाभूते, अस्मिन्=मदवलम्बने। दुर्योधनेऽपि। भवता=विधिना। हि=निश्चयेन। निराशः=विगलिताशः। शिथिलाशः। कृतः=सम्प्रति विहितोऽस्मि। वसन्ततिलका वृत्तम् ॥ १३ ॥

लब्धसञ्ज्ञः=लब्धचेतनः। अयीति। अयि कर्ण ! मयि-स्थिरां=निश्चलाम्। मुदं=हर्षम्। उद्गिरन्निव=वमन्निव। हर्षेण मां योजयन्। मे=

सौ पुत्रों को मारे जाने से दुःखी व विपत्ति में पड़ा हुआ मैं अन्धा अपनी स्त्री के साथ इस कष्टमय दशा को भोग रहा था। मेरे सभी मित्र गुरु बन्धुबान्धवों के मारे जाने पर यह एक पुत्र दुर्योधन बचा था उससे भी तुमने मुझ अब निराश कर दिया। इसके भी बचने की मुझे अब आशा नहीं रही ॥ १३ ॥

बेटा ! दुर्योधन ? धैर्य धरो, और अपनी माता को भी धैर्य दो।

दुर्योधन—(होश में आकर)

हे कर्ण ! कानों को सुख देने वाली, मेरे मनकी स्थिर प्रीति को देने वाली अपनी मधुर वाणी को मुझे सुनाओ ! आजतक तुम कभी मेरे से अलग नहीं हुए

---

१ क्वचिन्न २ 'अनुजैर्वियुक्तमकृताप्रियं'। ३ 'प्रियम्'।

[इति पुनर्मोहमुपागतः। सर्वे समाश्वासयन्ति]।

दुर्योधनः—

मम प्राणाधिके तस्मिन्नङ्गानामधिपे हते।
उच्छ्वसन्नपि लज्जेऽहमाश्वासे तात ! का कथा ? ॥१५॥

मम। **कर्णसुखदां**=श्रोत्रसुखदाम्। **गिरं**=प्रतिवचनं। **प्रयच्छ**=देहि। वाचमुच्चारय। **वृषसेनवत्सल**=हे वृषसेनाख्यस्वसुतप्रिय। **सतताऽवियुक्तं**=निरन्तराऽविरहितम्। कदाप्यवियुक्तम्। अकृतमप्रियं येनासौ तम् **अकृताऽप्रियम्**=अविहितागसम्। अनपराधम। मां **विहाय**=परित्यज्य कथ यासि?। पाठान्तरे तु–**प्रियं**=सुहृदम्। **मां विहाय**=परित्यज्य। हे वृषसेनवत्सल ! त्वं **यासि**=गच्छसि। सुतवत्सलत्वादेव परलोके तं द्रष्टुं मां सुहृदमपि परित्यज्य परलोकं गच्छसीति भावः। मञ्जुभाषिणी वृत्तम् ॥ १४ ॥

ममेति। **तात**=हे तात ! मम प्राणेभ्योऽप्यधिके **अङ्गानां**=देशविशेषाणामधिपे=ईश्वरे, **तस्मिन्**=जगद्विदिते कर्णे, **हते**=युद्धे यशःशेषतां याते सति। **उच्छ्वसन्नपि**=श्वासं गृह्णन्नपि। जीवन्नपि। **अहं लज्जे**=लज्जामनुभवामि। **आश्वासे**=धैर्ये पुनः। **का कथा**=कैव किल वार्त्ता। जीवितेऽप्यद्य मे भारः। कुतो मे समाश्वास इत्याशयः ॥ १५ ॥

थे। और मैंने कोई अपराध भी नहीं किया है। मैं तुमारा प्रीति पात्र हूँ पर तुम्हें तो अपना पुत्र वृषसेन ही ज्यादा प्यारा मालुम होता है जो मुझ मित्र को छोडकर अपनें पुत्र कुमार वृषसेन के पास [स्वर्ग] जा रहे हो ? ॥ १४ ॥

[ऐसा कहकर पुनः मूर्च्छित हो जाता है। उसे सब धीरज देते हैं, एवं पंखा आदि झलते हैं]।

दुर्योधन—(होश में आकर) हे पिताजी ! मेरे प्राणों से भी प्यारे अङ्गराज कर्ण के मारे जाने पर अब मैं श्वास लेते (जीते) हुए भी लज्जित होता हूँ धैर्य की तो बात ही क्या है ॥ १५ ॥

१ कश्चिन्न। २ 'मीश्वरे'।

अपि च—

शोचामि शोच्यमपि शत्रुहतं न वत्स
दुःशासनं तमधुना न च बन्धुवर्गम् ।
येनातिदुःश्रवमसाधु कृतं तु कर्णे
कर्ताऽस्मि तस्य निधनं समरे कुलस्य ॥ १६ ॥

गान्धारी—जाद ! सिढिलोह दाव क्खणमेत्तं बाप्पमोक्खम् ।
[जात ! शिथिलय तावत्क्षणमात्रं बाष्पमोक्षम्] ।

धृतराष्ट्रः—वत्स ! क्षणमात्रं परिमार्जयाऽश्रूणि ।

शोचामीति । शत्रुहतं=रिपुहतम् । अतएव शोच्यम्=अवश्यं शोचनार्ह । वत्सं=स्वानुजं । तं=ममातिप्रियं दुःशासनम् , अधुना=सम्प्रति न शोचामि=न शोचिष्यामि । न च=नैव बन्धुवर्गं=बान्धववृन्दम् । शोचामीति शेषः । तु=किन्तु । येन=अर्जुनेन । पाण्डवकुलेन वा । अतिदुःश्रवं=नितरां श्रोतुमशक्यम् , असाधु=अनार्यम् वध इति यावत् । कर्णे=अङ्गराजे । कृतम्=आचरितम् । तस्य कुलस्य = तत्कुलस्य । न केवलं तस्यैव, किन्तु तद्वंशमात्रस्य । समरे=युद्धे । निधनं=विनाशम्, कर्त्तास्मि=करिष्यामि । वसन्ततिलका वृत्तम् ॥ १६ ॥

शिथिलय=त्यज । बाष्पमोक्षम्=अश्रुमोचनम् । परिमार्जय=शोधय ।

और भी—अब तो ।

जिसका अवश्य सोच करना चाहिए ऐसे, शत्रुद्वारा मारे गए, अपने प्रिय भाई दुःशासन का भी मैं सोच नहीं करता हूँ, और न इस समय बन्धु बान्धव गुरु आदि का ही सोच करता हूं । किन्तु जिसने कर्ण के प्रति ऐसा दुःसह अनार्य कर्म किया है (उसे मारा है), युद्धमें मैं उसके सब कुल का ही विनाश करूँगा यही मेरी प्रतिज्ञा है ॥ १६ ॥

गान्धारी—बेटा ! थोड़ी देर तो आसुओं को कम करो । (रोओ मत) ।

धृतराष्ट्र—वत्स ! थोड़ी देरतो आंसुओं को पोंछलो । [रोओ मत] ।

१ 'कर्णे' कर्णस्य तस्य निधने निधनं कुलस्य' ।

दुर्योधनः—

मामुद्दिश्य त्यजन्प्राणान्केनचिन्न निवारितः ।
तत्कृते त्यजतो वाष्पं किं मे दीनस्य वार्यते ? ॥ १७ ॥

सूत ! केनैतदसंभावनीयमस्मत्कुलान्तकरं कर्म कृतं स्यात् ? ।

सूतः—**आयुष्मन् ! एवं किल जनः कथयति-**

भूमौ निमग्नचक्रश्चक्रायुधसारथेः शरैस्तस्य ।
निहतः किलेन्द्रसूनोरस्मत्सेनाकृतान्तस्य ॥ १८ ॥

दूरीकुरु । **मामिति । मामुद्दिश्य**=मत्कृते । **प्राणान् त्यजन्**=जीवितमपि मुञ्चन् । 'य' इति शेषः । कर्ण इत्यर्थः । **केनचिन्न निवारितः**=न निषिद्धः । **तत्कृते**= तस्य कृते । तदर्थम् । तमुद्दिश्य । **बाष्पम्**=अश्रूणि । **त्यजतः**=मुञ्चतः । **दीनस्य**=आर्त्तस्य, दुःखकातरस्य । **मे**=मम । **किं**=किमिति । **वार्यते**= निषिध्यते । 'अश्रुमोक्ष' इति शेषः ॥ १७ ॥

असम्भावनीयं=दुष्करम् । **अस्मत्कुलस्यान्तकरं**=विनाशकरम् । **कर्म**= कर्णवधः । **जनः**=लोकः । **भूमाविति ।**

भूमौ=युद्धभुवि । गुरुशापात् निमग्नं चक्रं यस्यासौ तथाभूतः कर्णः । चक्रमायुधं यस्यासौ **चक्रायुधः**=वासुदेवः, स सारथिर्यस्य तस्य—**चक्रायुधसारथेः**= कृष्णसारथेः । 'चक्रं सैन्यरथाङ्गयोः' इति विश्वः । **तस्य** = जगद्विदितस्य । अस्मत्सेनायां कृतान्त इव—अस्मत्सेनाकृतान्तः, तस्य—**अस्मत्सेनाकृतान्तस्य**=

दुर्योधन—तात ! मेरे लिए जिसने प्राणतक त्याग दिए उसे तो किसी ने नहीं रोका कि तुम प्राण मत त्यागो । अब उसके लिए जब मैं रोता हूँ आंसू बहाता हूँ तो मुझ गरीब को आप लोग क्यों रोकते है ? ॥ १७ ॥

(सूत से) हे सूत ! यह असम्भावित कार्य—[कर्णका वध] जिससे हमारा तो कुलही विनष्ट होगया—किसने किया होगा ? ।

सूत—आयुष्मन् ! (सर्कार), लोग ऐसा कहते हैं कि जब कर्ण के रथ का पहिया

---

१ 'करणं' ।

दुर्योधनः—[कष्टं भोः कष्टम्]।

कर्णाननेन्दुस्मरणात्क्षुभितः शोकसागरः।
वाडवेनेव शिखिना पीयते क्रोधजेन मे ॥ १९ ॥

तात ! अम्ब ! प्रसीदतम्।

कौरवसैन्यकालस्य। इन्द्रसूनोः=महेन्द्रपुत्रस्य अर्जुनस्य। शरैः=बाणैः। निहतः=विनाशितः। किल–इति लोकोक्तौ ॥ १८ ॥

कर्णेति। कर्णस्य—आननं=मुखमेव इन्दुः=चन्द्रः, तस्य स्मरणात्=चिन्तनात्। क्षुभितः=विक्षुब्धः। मे=मम। शोकसागरः=शोकसमुद्रः। क्रोधजेन=कोपसमुद्भूतन। शिखिना=वह्निना। वाडवेनेव=वडवानलेनेव। पीयते=विशोष्यते। कर्णमुखस्मरणादुद्भूतः शोकः क्रोधाग्निवार्यते इव। चन्द्रोद्गमात्समुद्रवृद्धिर्वडवाग्निना समुद्रजलशोषश्च प्रसिद्धः ॥ १९ ॥

प्रसीदतम्=युद्धाऽनुज्ञां दत्तम्।

युद्ध भूमि में धंस गया उस समय हमारी सेना के लिये यमराज के समान उस कृष्णसारथि अर्जुन ने बाणों से कर्ण को मार दिया ॥ १८ ॥

दुर्योधन—कर्ण के मुखरूपी चन्द्रमा के स्मरण से जो शोकरूपी समुद्र क्षुब्ध हो बढता है उसे क्रोध से उत्पन्न अग्नि [सन्ताप] वडवाग्नि की तरह शोष रही है। (चन्द्रमा की वृद्धि से समुद्र में भी वृद्धि होती है। पर समुद्र में रहने वाला वडवाग्नि समुद्र के जल को पीजाता हैं, इसी से समुद्र ज्यादा बढता नहीं है। अर्थात् क्रोध के कारण मेरा शोक मन्द पड रहा है और शत्रु से बदला लेने की इच्छा प्रबल हो रही हैं) ॥ १५ ॥

पिता जी ! माता जी ! दया करिए—

---

१ कचिन्न।

ज्वलनः शोकजन्मा मामयं दहति दुःसहः ।
समानायां विपत्तौ मे वरं संशयितो रणः ॥ २० ॥

धृतराष्ट्रः—(दुर्योधनं परिष्वज्य रुदन्)

भवति तनय ! लक्ष्मीः साहसेष्वीदृशेषु
द्रवति हृदयमेतद्भीममुत्प्रेक्ष्य भीमम् ।

ज्वलन इति । शोकाज्जन्म यस्यासौ **शोकजन्मा**=शोकसमुद्भूतः, अतएव—**दुःसहः**=नितरां सोढुमशक्यः, **अयं ज्वलन**—कर्णवधशोकाग्निः । **मां दहति**=भस्मीकरोति । युद्धं विनाऽपि मां द्राङ्नाशयिष्यति । अतः—**समानायां**=दाहमरणयोस्तुल्यायाम् । युद्धेऽयुद्धे च तुल्यायाम् । **मे**=मम । **विपत्तौ**=मरणे सति । **संशयितः**=जये पराजये च सन्दिग्धेऽपि । **रणः**=युद्धम् । **वरं**=श्रेष्ठः । युद्धाऽभावे शोकानलान्मे निश्चितो मृत्युः, युद्धे पुनर्जये सति सुखं जीवनं, पराजये तु मृत्युरिति युद्धे सन्धिग्धो मृत्युरिति युद्धमेव वरमित्याशयः ॥ २० ॥

भवतीति । **तनय**=हे पुत्र । **ईदृशेषु**=त्वदादृतेषु । **साहसेषु**=साहसकर्मसु । **लक्ष्मीः**=सम्पत्तिः । **भवति**=जायते । 'न साहसमनारुह्य नरो भद्राणि पश्यति' इत्युक्तेः । 'भवति तनय ! सत्यं संशयः साहसेषु' इति पाठे—साहसेषु सत्यं **संशयः**=सिद्ध्यसिद्धिसंशयो भवतीत्यर्थः । साहसे कदाचिद्विजयोऽपि भवेदिति यावत् । परन्तु—**भीमं** = भयानकं,**भीमं**=भीमसेनम् , **उत्प्रेक्ष्य**=

यह शोक से उत्पन्न हुई असह्य अग्नि मुझे जला रही है, अतः युद्ध में न जाने से भी इस अग्नि से मैं जल जाऊँगा । अतश्च इस तरह मरने की अपेक्षा युद्ध में जाना ही उत्तम समझता हूँ । क्योंकि युद्ध में कदाचित् मैं विजयी भी हो सकता हूँ, पर विना युद्ध तो मैं जरूर ही शोकाग्नि से भस्म हो जाऊंगा । युद्ध में तो मरने का सन्देह ही है, पर यों तो मृत्यु निश्चित है अतः हे पिताजी ! व माताजी ! मुझे युद्ध में जाने की आज्ञा दीजिए ॥ २० ॥

१ 'वरं संशयितुं रणे' ।

२ क्वचिन्न । ३ 'भवति तनय ! सत्यं संशयः साहसेषु' ।

अनिकृतिनिपुणं ते चेष्टितं मानशौण्ड !
च्छलबहुलमरीणां सङ्गरं, हा ! हतोऽस्मि ॥ २१ ॥

गान्धारी—**जाद ! तेण एव्व सुदसदकदन्तेण विओदलेण समं समलं मग्गसि ? ।**

[जात ! तेनैव सुतशतकृतान्तेन वृकोदरेण समं समरं मार्गयसे ?]।

दुर्योधनः—[अम्ब !] **तिष्ठतु तावद्वृकोदरः ।**

उद्भाव्य । स्मृत्वा । विचिन्त्य । एतन्मम हृदयं द्रवति=वेपते । चञ्चलं भवति । **मानशौण्ड**=हे अभिमानविख्यात । **ते**=तव । **चेष्टितं**=व्यापारः । **अनिकृतिनिपुणं**=कपटरचनाकौशलशून्यम् । अकुटिलम् । निश्छलम् । सरलत्वात् । 'कुसृतिर्निकृतिः शाठ्य'मित्यमरः ।

अरीणां=शत्रूणाम् । **सङ्गरं**=युद्धन्तु । **छलबहुलं**=कपटपूर्णम् । 'भवती'ति शेषः । बहल मिति पाठेऽपि—छलपूर्णमित्यर्थः । अतः—'हा'—इति खेदे । **हतोऽस्मि**=विनष्टोऽस्मि । हे पुत्र ! तव युद्धे विनाशस्याऽवश्यम्भावादिति भावः । मालिनी वृत्तम् ॥ २१ ॥

सुतेति । मत्पुत्रशतकालेनेत्यर्थः । **समरं**=युद्धम् । **मार्गयसे**=इच्छसि किमिति प्रश्नः ।

धृतराष्ट्र—(दुर्योधन को छाती से लगाकर) हे पुत्र ! यद्यपि इस प्रकार साहस से ही लक्ष्मी व सम्पत्ति प्राप्त होती है, और साहस में ह कार्यसिद्धि की संभावना रहती है, परन्तु उस भयङ्कर भीमसेन को यादकर मेरा कलेजा उछलने लगता है । हे मानियों में श्रेष्ठ ! तुम तो कपट रहित सरलस्वभाव (भोले-भाले) हो और शत्रुओं की युद्ध नीति कपट पूर्ण है । हाय ! मै तो मारा गया, कहीं का भी नहीं रहा । (इससे कृष्ण की कपटनीति व भावी दुर्योधन के ऊरुभङ्ग की सूचना दी है) ॥ २१ ॥

गान्धारी—बेटा ! क्या मेरे सौ पुत्रों को मारने में यमराज की तरह उस भीमसेन से ही तुम युद्ध करना चाहते हो ? ।

दुर्योधन—माताजी ! भीमसेन को जाने दो । तो भी—

---

१ 'बहलमरीणां' । २ कश्चिन्न । ३ 'विओदलहदएण [वृकोदरहतकेन] ।

पापेन येन हृदयस्य मनोरथो मे
सर्वाङ्गचन्दनरसो नयनाऽमलेन्दुः ।
पुत्रस्तवाम्ब !, तव तात ! नयैकशिष्यः
कर्णो हतः सपदि तत्र शराः पतन्तु ॥ २२ ॥

सूत ! अलमिदानीं कालातिपातेन, सज्जं मे रथमुपहर[1] । भयं चेत्पाण्डवेभ्यस्तिष्ठ[2] । गदामात्रसहाय एव समरभुवमवतरामि ।

पापेनेति । येन पापेन=दुष्टेन, मे=मम, हृदयस्य=चेतसः, मनोरथः–अभीष्टः, अभिलषणीयः । सर्वाङ्गेषु चन्दनरस इव–आह्लादकत्वात्, नयनयोः–अमलः=निर्मलः, इन्दुरिव=चन्द्र इव, सन्तापहारित्वादानन्दप्रदत्वाच्च । किञ्च अम्ब=हे मातः !, तव पुत्रः=पुत्रतुल्यः । तात=हे पितः, तव नये=नीतौ, एकः=प्रधानं, शिष्यः=छात्रः–भवदेकशिष्यः । कर्णो येन=अर्जुनेन । हतः=घातितः, तत्र=अर्जुने, सपदि=एकपदे । तावत् । शराः=मे बाणाः, पतन्तु=निपतन्तु । तेनैव सहाऽहं योत्स्ये । अर्जुनमेव तावन्निहन्मीति यावत् । वसन्ततिलका वृत्तम् ॥ २२ ॥

कालातिपातेन=कालक्षेपेण । अलं=न प्रयोजनम् । उपहर=आनय ।

मेरे हृदय के प्यारे, सब शरीर के लिये चन्दन की तरह शीतल व आनन्दप्रद, नेत्रों के लिए निर्मल चन्द्रमा की तरह सुखद और हे माता जी ! आपके प्यारे पुत्र, हे पिताजी ! आप के नीतिशास्त्र के प्रधान शिष्य कर्ण को जिस पापी ने मारा है उसी (अर्जुन) से ही मैं युद्ध करूँगा, मेरे बाण उसी पर पड़ेंगे ॥ २२ ॥

हे सूत ! अब समय खोने की जरूरत नहीं है,मेरा रथ तैयार करके लाओ । यदि तुम्हें पाण्डवों से भय लगता हो तो तुम रहने दो, खाली गदा लेकर मैं ही युद्धभूमि में उतरता हूँ ।

---

१ 'उपाहर' । २ 'त्वं चेद्बिभेषि पाण्डवेभ्यः' ।

सूतः—**अलमन्यथा संभावितेन । अयमहमागत एव ।**

[इति निष्क्रान्तः] ।

धृतराष्ट्रः—**वत्स दुर्योधन ! यदि स्थिर एवाऽस्मान्दग्धुमयं ते व्यवसायस्तद्यथा[2]संनिहितेषु वीरेषु सेनापतिः कश्चिदभिषिच्यताम् ।**

दुर्योधनः—**नन्वभिषिक्त एव ।**

गान्धारी—**जाद[1] ! कदरो उण सो, जहिं[3] एदं हदासं ओलम्बिस्सम् ।**

[जात[1] ! कतरः पुनः स, यत्रेमां हताशामवलम्बिष्ये ?] ।

धृतराष्ट्रः—**किं वा शल्य उत वाऽश्वत्थामा ? ।**

गदामात्रसहायः=गदामात्रद्वितीयः । एकाकीति यावत् । **अन्यथा सम्भावितेन** = भीतोऽयं पाण्डवेभ्य इति शङ्कया । **इति**=इत्युक्त्वा ।

निष्क्रान्तः=रथमुपनेतुं बहिर्गतः । **स्थिरः**=दृढः । **दग्धुं** = शोकानले निक्षेप्तुं । **व्यवसायः**=निश्चयः । **ननु**-इति निश्चये । **हत इति** । शरशय्यायां

सूत—आयुष्मन् ! आप दूसरी बात मत सोचिये । (मैं भयभीत नहीं हूँ) । ठहरिए मैं अभी रथ लेकर आता हूँ ।

[बाहर जाता है] ।

धृतराष्ट्र—बेटा दुर्योधन ! यदि हमे शोकाग्नि में जलाने के लिए तुमारा युद्ध करने का ही निश्चय हो तो बचे हुए बीरों में से ही किसी को सेनापति पद पर अभिषेक कर लेना चाहिए तब लडना चाहिए ।

दुर्योधन—हाँ, मैंने अभिषेक कर लिया है ।

गान्धारी—वह कौन है, जिस पर मैं आशा लगाऊँ ? ।

धृतराष्ट्र—क्या शल्य को सेनापति बनाया है या अश्वत्थामा को ? ।

---

१ क्वचिन्न । २ 'तत्सन्निहितेषु' ।

३ 'जस्सिं आशं' [यस्मिन्नाशाम्] ।

[संजयः[1]—हा कष्टम् ?।

हते[2] भीष्मे हते द्रोणे कर्णे च विनिपातिते[3]।
आशा बलवती राजञ्छल्यो जेष्यति पाण्डवान्] ॥ २३ ॥

दुर्योधनः—[किं वा[1] शल्येनोत वाऽश्वत्थाम्ना ?]।

कर्णालिङ्गनदायी वा पार्थप्राणहरोऽपि वा ।
अनिवारितसंपातैरयमात्माऽश्रुवारिभिः ॥ २४ ॥

निपातिते इत्यर्थः । **राजन्**=दुर्योधन । हे धृतराष्ट्रेति वा । **किं शल्येनेति** । शल्येनाश्वत्थाम्ना वाऽभिषिक्तेन किं ? । न प्रयोजनम् ? । अयं श्लोकेनाग्रिमेणान्वेति । **कर्णेति** । किन्तु **कर्णालिङ्गनदायी**=कर्णाश्लेषप्रदः । कर्णानुयायी । कर्णसमीपं गत्वा तस्यालिङ्गनं करिष्यतीति यावत् । **पार्थप्राणहरोऽपि**=अर्जुनप्राणहरो वा । **अयमात्मा**=मदीयोऽयमात्मा । अहमिति यावत् । **अनिवारितसम्पातैः**=अनिरुद्धधारासम्पातैः । निरर्गलैः । **अश्रुवारिभिः**=लोचनजलैः । '**अभिषिक्त**' इति पूर्वेण सम्बन्धः । अन्योऽपि सेनापतिर्जलकलशैरनिरुद्धधारैरभिषिच्यते । दुर्योधनेन च स्वात्माऽपि नयनजलैरभिषिक्त इति साम्यम् ॥ २४ ॥

सञ्जय-हाय ! बडे कष्ट की बात है कि—

हे महाराज ! भीष्म द्रोण व कर्ण के मारे जाने पर भी 'शल्य जीतेगा' यह प्रबल आशा आप लोगों की बनी ही हुई है ! ॥ २३ ॥

दुर्योधन-शल्य या अश्वत्थामा की क्या आवश्यकता है ? ।

मैंने अपने आपको ही अश्रुरूपी जल की अनवरत धारा से सेनापति पद पर अभिषेक कर दिया है । यातो मै कर्ण से जाकर मिलूंगा या फिर अर्जुन का ही प्राण लूंगा । अर्थात् यातो मेरा विजय या फिर विनाश ॥ २४ ॥

---

१ क्वचिन्न । २ 'गते' । ३ भारतमञ्जरीस्थः श्लोकोऽयम् ।

(नेपथ्ये कलकलं[1] कृत्वा)—

भो भोः कौरवबलप्रधानयोधाः!, अलमस्मानवलोक्य भयादितैस्ततो[2] गन्तुम्। कथयन्तु भवन्तः कस्मिन्नुद्देशे सुयोधनस्तिष्ठतीति।

(सर्वे ससंभ्रममाकर्णयन्ति)।

(प्रविश्य संभ्रान्तः-)

सूतः—**आयुष्मन् !**

प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्ततः ।

सर्वे—**कश्च कश्च ?।**

सूतः—

स कर्णारिः स च क्रूरो वृककर्मा वृकोदरः ॥ २५ ॥

इतो गन्तुम्=इतः प्रपलायितुम्। **अलं**=न प्रयोजनम्। **ससम्भ्रमं**=सोद्वेगम्। 'समौ संवेगसम्भ्रमौ'इत्यमरः।

प्राप्ताविति। **एकं रथमारूढौ**-एकस्यन्दनोपविष्टौ। **प्राप्तौ**=आयातौ। **कश्चेति**। कश्च कश्च ?। अयात इति शेषः। **कर्णारिः**=अर्जुनः। **वृककर्मा**=कोकक्रूरकर्मा। युद्धदुर्मदः। **वृकोदरः**=भीमः। 'कोकस्त्वीहामृगो वृकः' इत्यमरः॥ २५॥

(नेपथ में कोलाहल के बाद)

हे कौरवसेनाके प्रधान योद्धाओ ! हमे देखकर डरके मारे इधर उधर मत भागो। बताओ दुर्योधन कहाँ है ?।

[सब डर व घबडाहट से सुनते हैं]।

[सूत घबडाता हुआ आता है]।

सूत--आयुष्मन्! [सर्कार !],

एक रथ चढे हुए आपको इधर उधर पूछते हुए दोनों यहाँ आए है !।

सबलोग--कौन कौन आए हैं ?।

सूत—वह कर्ण का शत्रु अर्जुन और वह पापी भेडिए की तरह क्रूरकर्मा भीमसेन (ये दोनों आए हैं) ॥ २५ ॥

---

१ क्वचिन्न। २ 'भयादितो गन्तुं'।

गान्धारी—(सभयं) जाद ! किं एत्थ सम्पदं पडिपज्जिदव्वं ? ।
[जात ! किमत्र साम्प्रतं प्रतिपत्तव्यम् ?] ।

दुर्योधनः—अम्ब ! ननु संनिहितैवेयं गदा ।

गान्धारी—हा हदम्हि अहं मन्दभाइणी ।
[हा हताऽस्मि अहं मन्दभागिनी] ।

दुर्योधनः—अम्ब ! अलमिदानीं कार्पण्येन । सञ्जय ! सञ्जय !! रथमारोप्य पितरौ शिबिरं प्रतिष्ठस्व । समागतोऽस्माकं शोकापनोदप्रणयी जनः ।

धृतराष्ट्रः—वत्स ! क्षणमेकं प्रतीक्षस्व यावदनयोर्भावमुपलभे ।

प्रतिपत्तव्यं=करणीयम् । किं प्रतिविधातव्यम् । कार्पण्यं=दैन्यम् । शोकापनोदे=शोकप्रतीकारे, प्रणयी=प्रणयवान् । प्रवणः । शोकापहर्त्ता । युद्धे शत्रुविनाशाच्छोकापहारः । शोकप्रद इति यावत् । भावम्=अभि-

---

गान्धारी—बेटा ! अब इसका क्या प्रतीकार करें ? ।

दुर्योधन—माताजी ! डरो मत, यह मेरी तो गदा मेरे पास ही है ।

गान्धारी—हाय ! मैं अभागिनी तो विना मौत मारी गई ।

दुर्योधन—माता ! अब इस तरह दीनता व कायरता से कोई लाभ नहीं हैं । संजय ! रथ पर चढाकर माताजी व पिताजी को शिबिर की ओर ले जावो । अब हमारे शोक को दूर करने वाले लोग आगए । [मैं इन्हें अब मार डालूंगा और इनके मरने से हमारा सब शोक जाता रहेगा] ।

धृतराष्ट्र—बेटा ! थोड़ा ठहरो, मैं इनका अभिप्राय तो जानलूं कि इनका भाव क्या है ? ।

---

१ क्वचिन्न । २ 'प्रवेशय' ।

३ 'प्राप्तोऽस्मच्छोकापनोदी जनः' ।

दुर्योधनः—**तात ! किमनेनोपलब्धेन ? । तद्गम्यताम् ।**

[धृतराष्ट्रो गान्धारी च किञ्चिद्गत्वा तिष्ठतः] ।

(ततः प्रविशतो रथारूढौ भीमार्जुनौ).।

भीमः—**भो भोः सुयोधनानुजीविनः ! किमिति संभ्रमाद्-यथातथं सञ्चरन्ति भवन्तः । [कथयतं तावदिदमावयोरागमनं स्वामिनस्तस्य कुरुपतेः] । अलमावयोः शङ्कया—**

कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी
कृष्णाकेशोत्तरीयव्यपनयनमरुत्पाण्डवा यस्य दासाः ।

प्राप्तम् । अनेन=भावेन । किं=किं फलम् । न किमपीत्यर्थः ।

सुयोधनानुजीविनः=हे दुर्योधनपरिचारकलोकाः । 'सेवकार्थ्यनुजीविनः' इत्यमरः । **अयथातथम्=**अयथायोग्यम् । इतस्ततः । अयथायथमिति पाठेऽपि स एवाऽर्थः ।

कर्त्तेति । द्यूतमेवच्छलानि, द्यूतं च च्छलानि चेति वा । तेषां-**द्यूतच्छलानां**=द्यूतकपटानाम् । **कर्त्ता**=विधाता । जतुनो विकारो जतुमयं, तच्च तच्छरणं च=गृहं च तस्योद्दीपनः । जतुमयगृहदाहकर्त्ता । 'शरणं गृहरक्षित्रोः' इत्यमरः । **अभिमानी**=अहङ्कारवान् । गर्वोद्धुरः । कृष्णायाः-द्रौपद्याः, केशानामुत्तरीयस्य च **व्यपनयने**=हरणे,**मरुदिव**=वायुरिव । द्रौपदी-केशाम्बराकर्षणप्रकम्पनः । **यस्य च पाण्डवाः**=पाण्डुपुत्रा युधिष्ठिरादयो

दुर्योधन—पिताजी ! अब इनका अभिप्राय जानकर ही क्या होगा ? ।

(धृतराष्ट्र थोड़ी दूर जाकर फिर ठहर जाता है] ।

[भीम अर्जुन दोनों रथ पर चढे हुए प्रविष्ट होते (आते हैं)] ।

भीम—अरे दुर्योधन के सेवकलोगों ! डरके हुए मारे तुम लेग इधर उधर क्यों भाग रहे हो ? । हमसे डरने की कोई बात नहीं है । हमारे आने की बात अपने स्वामी से कहो ।

जूवा चोरी व कपट कर हमारे धन का हरण करने वाला, लाक्षाभवन में अग्नि लगा ने वाला, घमण्डी, द्रौपदी के केश व वस्त्र खीचनें में पटु (या वायुतुल्य)

---

१ क्वचिन्न । २ 'ससंभ्रममयथातथं' । ३ 'चरन्ति' । ४ 'व्यपनयनपटुः' ।

राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रं,
कास्ते दुर्योधनोऽसौ, कथयते न रुषा[1] द्रष्टुमभ्यागतौ स्वः। २६

धृतराष्ट्रः--सञ्जय ! दारुणः खलूपक्षेपः पापस्य[2] ।

सञ्जयः--तात ! कर्मणा कृतनिःशेषविप्रियाः संप्रति वाचा व्यवस्यन्ति[3] ।

वयं सर्वे दासाः=द्यूतविजिता दासाः । दुःशासनादेः-अविनयकरण्डभूतस्य, राजा=प्रभुः, अनुजशतस्य=लघुभ्रातृशतस्य, गुरुः=ज्येष्ठो भ्राता । अङ्गराजस्य=कर्णस्य,मित्रं=सुहृत्, असौ सः=लोकविदितः सः। दुर्योधनः कास्ते=क वर्त्तते ? । कथयत = ब्रूत यूयम् । न रुषा=नैव क्रोधेन । किमपि प्रयोजनमिति शेषः । यद्वा न रुषा आवां तं द्रष्टुमभ्यागतौ=प्राप्तौ । [illegible] । किन्तु एवमेव तं द्रष्टुमायातावित्यर्थः । स्रग्धरा वृत्तम् ॥ २६ ॥

दारुणः=भयानकः । उपक्षेपः=अधिक्षेपः । (ताना या दोषारोपण) । पापयोः-दुष्टात्मनोर्भीमार्जुनयोः । पापस्येति पाठे-पापस्य=भीमस्य । ज्येष्ठत्वात्पुत्रशतान्तकत्वाच्च तदुपन्यासः । कर्मणा=दुःशासनवधादिकर्मणा । कृतानि निश्शेषाणि सकलानि विप्रियाणि=अप्रियाणि कर्माणि यैस्ते—कृतनिःशेषविप्रियाः । संप्रति=इदानीम् । वाचेति । वाचा विप्रियाणि कर्त्तुं व्यवस्यन्ति=प्रयतन्ते । उद्युक्ता भवन्तीत्यर्थः ।

तथा हम पाण्डव जिसके जूवे में जीते हुए दास हैं, दुःशासन आदिका राजा, सौ १०० भाइयों में ज्येष्ठ,और अङ्गराज कर्ण का मित्र वह दुर्योधन कहां है ? बताओ । हम क्रोध मे उसे नहीं किन्तु केवल देखने के लिए ही आए हैं ॥ २६ ॥

धृतराष्ट्र—सञ्जय ! इन पापियों नें तो हमें यह बड़ा भारी दारुण ताना (बोल) मारा है ! ।

सञ्जय—तात ! अपने कार्यों से तो जितना इनसे बन सका इन्होंने बिगाड कर ही लिया अब बोली से भी हमारे ऊपर आघात करना चाहते हैं ।

---

१ 'पुरुषाः !' । २ 'पापयोः' । ३ 'व्यवस्यतः' ।

दुर्योधनः—सूत ! कथयं गत्वोभयोः-'अयं तिष्ठती'ति ।

सूतः—यथाऽऽज्ञापयति देवः । (तावुपसृत्य) ननु भो वृकोदरार्जुनौ ! एष महाराजस्तातेनाऽम्बया च सह न्यग्रोधच्छायायामुपविष्टस्तिष्ठति ।

अर्जुनः—आर्य ! प्रसीद । न युक्तं पुत्रशोकोपपीडितौ पितरौ पुनरस्मद्दर्शनेन भृशमुद्वेजयितुम् । तद्गच्छावः ।

भीमः—मूढ ! अनुल्लङ्घनीयः सदाचारः[2] । न युक्तमनभिवाद्य गुरून्गन्तुम् । [उपसृत्य] संजय[3] ! पित्रोर्नमस्कृतिं श्रावय । अथवा तिष्ठ[3] । स्वयमेव श्रावयावः । [इति रथादवतरतः] ।

प्रसीद=कृपां कुरु । पितरौ=गान्धारीधृतराष्ट्रौ । उद्वेजयितुं=व्यथयितुं । पीडयितुम् । तत्=तस्मात् । सदाचारः=शिष्टाचारः । सन्मार्गः । 'समुदाचार' इति पाठे—शिष्टव्यवहार इत्यर्थः ।

दुर्योधन—सूत ! जा इन दोनों से कह दे कि मैं यहाँ बैठा हूँ ।

सूत—जैसी महाराज की आज्ञा । (दोनों के पास जाकर) हे भीमसेन ! हे अर्जुन ! महाराज दुर्योधन माताजी व पिताजी के साथ यहाँ बड की छाया में बैठे हैं ।

अर्जुन—आर्य भीमसेन ! क्षमा करें । कहा मान ले, पुत्र शोक से पीडित पितृतुल्य धृतराष्ट्र व गान्धारी को जाकर ज्यादा दुःखी व उद्विग्न करना ठीक नहीं है, अतः चलिए चलें ।

भीमसेन—अरे मूर्ख ! सदाचार का उल्लङ्घन करना ठीक नहीं । गुरुजनो को प्रणाम किए विना जाना उचित नहीं है । [पास में जाकर] सञ्जय ! ताऊजी व ताई जी को हमारा प्रणाम कहो । अच्छा ठहरो ! हम स्वयं उनको जाकर प्रणाम करेगें । (रथ से उतरते हैं) ।

१ 'ब्रूहि' । २ 'समुदाचारः' । ३ कश्चिन्न ।

भीमः—विश्राव्य[1] स्वकर्म नाम च वन्दनीया गुरवः ।

अर्जुनः—(उपगम्य) तात ! अम्ब !

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोकः ।
रणशिरसि निहन्ता तस्य राधासुतस्य
प्रणमति पितरौ वां मध्यमः[2] पाण्डवोऽयम् ॥ २७ ॥

भीमः—

चूर्णिता[3]शेषकौरव्यः क्षीबो दुःशासनाऽसृजा ।
भङ्क्ता सुयोधनस्योर्वोर्भीमोऽयं शिरसा[4]ऽञ्चति ॥ २८ ॥

सकलेति । हे पितरौ !—सकलानां रिपूणां जयस्य आशा, ते सुतैः=पुत्रैः दुर्योधनादिभिः यत्र=यस्मिन्कर्णे, बद्धा=निबद्धा, कृता, यस्य=कर्णस्य, गर्वेण=अभिमानेन, लोकः=जगदिदम् । तृणमिव=घासवत् , परिभूतः=त्वत्पुत्रैस्तिरस्कृत आसीत् । तस्य राधासुतस्य=कर्णस्य,रणशिरसि=युद्धमूर्ध्नि, निहन्ता=विनाशकः । एष मध्यमपाण्डवः=अर्जुनः । वां=(पितरौ वामिति वा) । प्रणमति=नमस्करोति । मालिनी वृत्तम् ॥ २७ ॥

चूर्णितेति । चूर्णिताः=निष्पिष्टाः, निहताः, अशेषाः=सकलाः, कौरव्याः=कुरोरपत्यानि दुःशासनादयो येनासौ तथाभूतः । दुःशासना-

---

भीमसेन—अपना नाम व पराक्रम सुनाकर गुरुजनों को प्रणाम करना चाहिए ।

अर्जुन—[पास में जाकर] तात ! **अम्ब** !

—तुमारे पुत्रों नें जिसपर सब शत्रुओं के जीतने की आशा लगा रखी थी, जिसके गर्व से उन्होंने जगत् को तृण की तरह अपमानित व तिरस्कृत किया था, उसे राधापुत्र कर्ण का युद्ध मे मारने वाला यह पाण्डु का पुत्र अर्जुन आप दोनो को प्रणाम करता है ॥ २७ ॥

---

१ 'स्वयं विश्राव्य नामकर्मणी वन्दनीया गुरवः' ।

२ 'फाल्गुनः पाण्डवोऽयम् ' । ३ 'निहताऽशेष' । ४ 'शिरसाऽऽनतः' ।

धृतराष्ट्रः—दुरात्मन्वृकोदर ! [न तावद्विकत्थयात्मानम्] न खल्विदं भवतैव केवलं सपत्नानामपकृतम् । यावत्क्षत्रं तावत्समरविजयिनो जिता हताश्च वीराः । तत्किमेवं विकत्थनाभिरस्मानुद्वेजयसि ? ।

भीमः--तात ! अलेमलं मन्युना ।

कृष्णा केशेषु कृष्टा तव सदसि वधूः पाण्डवानां नृपैर्यैः
सर्वे ते क्रोधवह्नौ कृशशलभकुलावज्ञया येन दग्धाः ।

ऽसृजा=दुःशासनरुधिरेण, क्षीबः=मत्तः । दुर्योधनस्य ऊर्वोः=सक्थ्नोः, भङ्क्ता=शीघ्रमेव भङ्गकर्त्ता । अयं भीमः--शिरसा अञ्चति=पूजयति । नमस्करोति ॥ २८ ॥

विकत्थय=श्लाघस्व । सपत्नानां=स्वशत्रूणाम् । यावत्=यावदारभ्य । क्षत्रं=क्षत्रियाः । तावत्=तावदारभ्य । तावत्पर्यन्तं वा । समरविजयिनः=युद्धविजयिनः । जिताः=केचन पराजिताः, केचन-हताः-निहताश्च । क्षत्रियेष्विदं सृष्टेरादित एव दृश्यते न नवीनम् । विकत्थनाभिः-आत्मप्रशंसाभिः । मन्युना=क्रोधेन ।

कृष्णेति । तव=भवतः । सदसि=सभायाम्, पाण्डवानां=पाण्डुपुत्राणां, वधूः=पत्नी, 'नारी सीमन्तिनी वधूः' इत्यमरः । कृष्णा=द्रौपदी ।

भीमसेन—जिसने सब कौरवों का नाश क दिया है, दुःशासन का रुधिर पीकर जो मत्त हो रहा है, दुर्योधन की ऊरुओं (साथल,जांघों) का जो (भविष्यत् में) भङ्ग करने वाला हूं वह भीमसेन आपकी शिर नवाकर पूजा करता है ॥ २८ ॥

धृतराष्ट्र—अरे दुरात्मा भीमसेन ! शत्रुओं को मारकर बदला लेने का काम केवल तुमने ही नहीं किया है, किन्तु जबसे यह क्षत्रिय जाति है, तबसे (या सभी क्षत्रियों में) युद्ध में जीतनेवाले या युद्धमें मरने वाले वीरों की कमी नही है । फिर तूं क्यों अपनी झूठी बडाई करके हमें उद्विग्न (दुःखी) करता है ? ।

भीमसेन—तात ! क्रोध मत करिए-

---

१ क्वचिन्न । २ 'अलं' । ३ 'पुरः' । ४ 'अनेन' । 'तेन' ।

**एतस्माच्छ्रावयेऽहं न खलु भुजबलश्लाघया नापि दर्पा-
त्पुत्रैः पौत्रैश्च कर्मण्यतिगुरुणि कृते तात ! साक्षी त्वमेव ॥२९॥**

यैर्नृपैः=यै राजभिर्दुःशासनादिभिः। **केशेषु कृष्टा**=केशेषु गृहीत्वाऽऽकृष्टा। 'पुर' इति पाठे'पाण्डवानां पुरो यैः कृष्णा कृष्टे'त्यन्वयः। **ते सर्वे**=कर्णदुःशासनादयः सर्वे **क्रोधवह्नौ**=द्रौपद्याः पाण्डवानां वा कोपानले।कृशं यच्छलभानां क्षुद्रजन्तु-विशेषाणां, **कुलं**=समूहः,**तद्वदवज्ञया**=अपमानेन,अनायासेनैव। **येन**=यस्मात्। **दग्धाः**=भस्मीकृताः। 'अनेन दग्धाः'इति पाठे-**अनेन**=अर्जुनेन, मया भीमेन चेत्यर्थः। **एतस्मात्**=यस्मादस्माभिस्ते सर्वे दग्धा एतस्मात्कारणात्। **अहं श्रावये**=अहं वार्त्तामात्रं केवलं भवन्तं श्रावये। **न खलु**=नैव पुनः। **भुजबल-श्लाघया**=स्वबाहुबलप्रशंसार्थम्। **नापि**=नैव च। **दर्पात्**=अभिमानात्। 'श्रावये' इति शेषः। **तात**=हे पितृव्य!। **पुत्रैः पौत्रैश्च**-अस्माभिः सर्वैः त्वत्पुत्रपौत्रादिभिः। **गुरुणि**=महति, **कर्मणि**=शत्रुवधादिरूपे, कार्ये **कृते**-विहिते सति, **त्वमेव**=भवानेव। **साक्षी**=मध्यस्थः। द्रष्टा। स्वकृतं कर्म भवन्तमेव साक्षिभूतं वयं श्रावयामः। भवानस्माकं गुरुः पालकश्च,तद्भवतोऽग्रे कृतं कर्म उचितमनुचितं वा श्रावयाम इत्याशयः। स्रग्धरा वृत्तम् ॥ २९ ॥

हम पाण्डवों की स्त्री द्रौपदी को आपके सामने सभा में जिन राजाओं ने केश पकड कर खींचा था वे सब हमारी क्रोधरूपी अग्नि में पतङ्गों के समूह की तरह अनायास ही दग्ध होगए(मारे गए) है-इस बात की सूचनामात्रही मैं आपको देरहा हूं। अपनी भुजाओं की बल की प्रशंसा के लिए अथवा घमण्ड से मैं ऐसा नहीं कह रहा हूँ। क्यों कि हे तात! (हम सब) आपके पुत्र व पौत्रों द्वारा किए गए कार्यो के साक्षी भी तो आपही हैं। [अर्थात् जैसे बालक कोई अच्छा या बुरा कार्य करते हैं तो उसे आकर अपने बड़ों को सुनाते हैं वैसे ही हमने जो कुछ उचित अनुचित कर्म किया है उसे ही आपको सुनाया है] ॥ २९ ।

१ 'तस्मात्त्वा'।

दुर्योधनः—अरे रे मरुत्तनय ! किमेवं वृद्धस्य राज्ञः पुरतो निन्दितव्यमात्मकर्म श्लाघसे ?। अपि च—

कृष्टा केशेषु भार्या तव, तव च, पशोस्तस्य राज्ञस्तयोर्वा,
प्रत्यक्षं [1]क्ष्मापतीनां मम भुवनपतेराज्ञया द्यूतदासी।
अस्मिन्वैरानुबन्धे वद किमपकृतं तैर्हता ये नरेन्द्रा
बाह्वोर्वीर्याति[2]रेकद्रविणगुरुमदं मामजित्वैव दर्पः ! ॥३०॥

मरुत्तनय=वायुपुत्र भीम। एवं=विकत्थनामिश्रमधिक्षेपपूर्णम्। निन्दितव्यं=निन्दनीयम्। श्लाघसे=स्तवीषि। विकत्थसे।

कृष्टेति। तव=भीमस्य,तव च=अर्जुनस्य च, पशोः=पशुतुल्यस्य,राज्ञः=युधिष्ठिरस्य, तयोर्वा=नकुलसहदेवयोर्वा, प्रत्यक्षं=समक्षं। क्ष्मापतीनां=राज्ञां च। प्रत्यक्षं-संमुखम्। भुवनपतेः=लोकाधिपस्य। मम=दुर्योधनस्य। आज्ञया=शासनेन। द्यूतजिता दासी द्यूतदासी=अक्षवतीजिता दासी,भार्या=युष्माकं पत्नी। यद्वा—तव तव च पशोस्तस्य राज्ञस्तयोर्वा भार्या क्ष्मापतीनां प्रत्यक्षमिति योजना कार्या। अस्मिन् वैरानुबन्धे=अस्माकमस्मिन्वैरप्रसङ्गे। अनुबन्धः=प्रकरणम्। ये नरेन्द्राः=राजानः, हताः=त्वया हताः, तैः=नरेन्द्रैः, किमपकृतं=किमपराद्धं भवताम् ?। वद=कथय। मदाज्ञापरिपालकत्वात्ते नात्रापराध्यन्ति। अहमेवात्राऽपराधी। अतः बाह्वोः=भुजयोः, यो वीर्यातिरेकः=पराक्रमशौर्यतेजोबलाधिक्यं, तदेव द्रविणं=धनम्, तेन गुरुः=महान्, मदो यस्य तं-वीर्यातिरेकद्रविणगुरुमदं=भुजबलधनोन्मत्तम्। मां=दुर्योधनम्। अजित्वैव=अविजित्यैव। दर्पः=गर्वः। किं क्रियते त्वयेति शेषः। यद्वा 'बाह्वोर्दर्पः किं क्रियते' इति योजना। स्रग्धरा वृत्तम्॥ ३०॥

दुर्योधन—अरे ओ भीमसेन ! इस प्रकार वृद्ध महाराज के सामने अपने इन निन्दित कर्मों की क्या श्लाघा (बडाई) करता है ?। और भी-(सुन)।

तुमारी स्त्री द्रौपदी को जूवेमें जीतकर दासी बनाकर तेरे,और अर्जुन के, उस

१ 'भूपतीनां'। २ 'वीर्यातिभारद्रविण'।

आः ! दुरात्मन् ! एष न भवसि ।

[इति स[1]क्रोधमुत्थाय हन्तुमिच्छति] ।

धृतराष्ट्रः—धृत्वोपवेशयति ।

भीमः—क्रोधं नाटयति ।

अर्जुनः-[निवारयन्[2]] आर्य ! प्रसीद प्रसीद । किमत्र क्रोधेन ? ।

अप्रियाणि करोत्येष वाचा शक्तो न कर्मणा ।
हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा ? ॥ ३१ ॥

एष न भवसि=मत्प्रहारेण विलयमेष्यसि । इति=इत्युक्त्वा । नाटयति=दर्शयति । तथा चेष्टते ।

अप्रियाणीति । हतभ्रातृशतः=प्रमीतभ्रातृशतः । अत एव दुःखी=व्यथितः । एषः=दुर्योधनः । कर्मणा=युद्धेन पराक्रमेण च, न शक्तः=अशक्तः सन् , वाचा=वाण्यैव केवलम् । अप्रियाणि=अनिष्टम् । करोति=आचरति । अस्य प्रलापैः=अनर्थकैर्वचोभिः । 'प्रलापोऽनर्थकं वचः' इत्यमरः । का व्यथा=का पीडा ? । नैव व्यथा मनसि कार्येत्यर्थः ॥ ३१ ॥

पशु तुल्य राजा युधिष्ठिर के, और नकुल सहदेव, व सभी राजाओं के सामने ही केश पकड़ कर त्रैलोक्याधिपति मेरी ही आज्ञासे खीचीं गई थी । तुमारा हमारा यह वैर का जो प्रसङ्ग व कारण है उसमें उन बेचारे राजाओं नें कहो तो क्या बिगाडा था जिनको तुमने मार दिया ! भुजाओं को जो अतिभारभूत महान् बल, वही जो धन उससे जिसको बहुत गर्व है ऐसे मुझे दुर्योधन को जीते विना यह घमण्ड तुमारा वृथा है । (बेचारे उन राजाओं को मार कर तुम क्या बडाई मार रहे हो । मुझे जीतो तो एक बात है) ॥ ३० ॥

अरे पापी ! ले सम्हाल । अब तूं बचकर नहीं जा सकता, ले यह मरा ।

(ऐसा कहकर क्रोध से उठकर मारना चाहता है) ।

धृतराष्ट्र उसे पकड़ कर बैठाता है । भीमसेन क्रोध प्रकट करता है) ।

अर्जुन—आर्य ! जाने दीजिए, शान्त होइए, क्रोध करने की आवश्यकता नहीं है । क्योंकि—

१ अयं पाठः क्वचिन्न । २ क्वचिन्न ।

भीमः--अरे रे भरतकुलेन्दुकलङ्क !

अत्रैव किं न विशसेयमहं भवन्तं
दुःशासनानुगमनाय कटुप्रलापिन् !।
विघ्नं गुरुर्न कुरुते यदि मद्गदाग्र-
निर्भिद्यमानरणिताऽस्थनि ते शरीरे ॥ ३२ ॥

अत्रैवेति । कटुप्रलापिन्=हे कटुनिरर्थकभाषिन् ! अत्रैव = पित्रोरग्र एव । भवन्तं=त्वां, दुःशासनानुगमनाय=दुःशासनानुसरणाय । अहं किं न विशसेयं=न विनाशयेयम् ? । किन्तु विशसेयमेव । यदि–मद्गदाग्रेण निर्भिद्यमानानि=निष्पिष्यमाणानि, अत एव रणितानि=शब्दायमानानि अस्थीनि यत्र तादृशे । मदीयगदाकोटिखण्ड्यमानरणितकीकसे इत्यर्थः । तव शरीरे= वपुषि । तथाविधशरीरकरणे इति यावत् । 'कीकसं कुल्यमस्थि च' इत्यमरः । गुरुः=तातो धृतराष्ट्रः । विघ्नम्=अन्तरायम् । न कुरुते=न करोति चेत् । गुर्वनुरोधेन त्वां नहि निहन्मि, नोचेदत्रैव त्वां कटुभाषिणं विनाशयेय-मित्याशयः । वसन्ततिलका वृत्तम् ॥ ३२ ॥

इसमें कार्य (पराक्रम) से तो हमारा कुछ बिगाड़ करने की शक्ति है नहीं अतः बाणी से ही यह हमारा अप्रिय करना चाहता है । अपने १०० सौ भाइयों के मारे जाने के दुःख से पागल की तरह यह जो प्रलाप कर रहा है उससे आप कुछ बुरा न माने एवं दुःख न करें ॥ ३१ ॥

भीमसेन—अरे भरत कुल के कलङ्क !

हे कड़वे वचन बोलने वाले दुर्योधन ! मैं तेरे को इसी जगह मारकर दुःशासन के पास भेजताहूँ, यदि गदाके अग्रभागके आघात से चूर चूर होती हुई तेरी हड्डियों की कडकडाहट के साथ तेरे शरीर को पीस कर चूर २ कर देने में ये मेरे गुरु (पितृतुल्य धृतराष्ट्र) विघ्न न करें तो। अर्थात् इनके रोकने से ही मैं तेरे शरीर की हड्डियों को चूर २ कर अभी तुझे यमराज के घर नहीं भेज रहा हूँ ॥ ३२ ॥

---

१ 'कुलकलङ्क' । २ 'गुरुर्न कुरुतो' । ३ 'कराग्र' ।

अन्यच्च मूढ !

शोकं स्त्रीवन्नयनसलिलैर्यत्परित्याजितोऽसि
भ्रातुर्वक्षःस्थलविघटने यच्च साक्षीकृतोऽसि ।
आसीदेतत्तव कुनृपतेः कारणं जीवितस्य
क्रुद्धे युष्मत्कुलकमलिनीकुञ्जरे भीमसेने ॥ ३३ ॥

स्त्रीवत्=नारीवत् । नयनसलिलैः=लोचनजलैः, यत्=यस्मात्, शोकं परित्याजितोऽसि=शुचं परिहापितोऽसि । यथा प्रतिकर्तुमसमर्था स्त्री रुदित्वा शोकं त्यजति तथैव रुदित्वा त्वं शोकं त्याजितोऽस्माभिरित्यर्थः । च=किञ्च । भ्रातुः=दुःशासनस्य । वक्षःस्थलविघटने=उरःस्थलविदारणे यत् साक्षीकृतोऽसि=द्रष्टृतां नीतोऽसि । एतत्=एतद्द्वयं, युष्मत्कुलमेव कमलिनी=पद्मिनी, तस्याः कुञ्जर इव, तस्मिन् । युष्मत्कुलकमलिनीकुञ्जरे=भवत्कुलपद्मिनीविनाशगजे । भीमसेने=भीमे । क्रुद्धे=कुपिते सति, तव कुनृपतेः=नीचस्य राज्ञस्तव, जीवितस्य=अद्य यावत्प्राणधारणस्य । कारणं=हेतुः । जातमिति शेषः । ईदृशदुःखानुभवायैव तवाद्य यावन्मया विनाशो न कृतः । सम्प्रति सन्निहितस्तव मृत्युरित्याशयः । 'कारणे'ति पाठे–एतद्द्वयं तव जीवितस्य कारणा=तीव्रवेदनैव । एतदर्थमेव न मया त्वं यमातिथिर्न विहित इत्यर्थः । 'कारणा तीव्रवेदने' त्यमरः । मन्दाक्रान्ता वृत्तम् ॥ ३३ ॥

और भी—अरे मूर्ख !

हमनें तुझे (भाई व कर्ण के) शोक में स्त्रियों की तरह रुलाया, तेरे सामने ही तेरे भाई का वक्षःस्थल फाड़कर मैंने उसका रुधिर पिया, तुमारे कुलरूपी कमल की लता को नष्ट करने वाले मेरे भीमसेन के क्रुद्ध होने पर भी इसी दुःख को भोगने के लिए तूं अभी तक जीता रहा है । अर्थात् इसी दुःख को दिखाने के लिए मैंने तुझे पापी को जीता छोडा था । अब शीघ्र ही तुझे मारूंगा ॥ ३३ ॥

१ 'शोकैः स्त्रीवन्नयनसलिलं' । 'सलिलैः' ।
२ 'विदलने' । ३ 'कारणा' ।

दुर्योधनः—दुरात्मन् ! भरतकुलापसद ! पाण्डवपशो ! नाहं भवानिव विकत्थनाप्रगल्भः । किन्तु—

द्रक्ष्यन्ति नचिरात्सुप्तं बान्धवास्त्वां रणाङ्गणे[1] ।
मद्गदाभिन्नवक्षोऽस्थिवेणिका[3]भीमभूषणम् ॥ ३४ ॥

भीमः—(विहस्य) यद्येवं श्रद्धत्ते[4] भवांस्तदा प्रत्यासन्नमेव कथयामि ।

विकत्थना=आत्मश्लाघा । द्रक्ष्यन्तीति । मम या गदा तया भिन्नं यद्वक्षः, तस्य यान्यस्थीनि, तेषां या वेणीव वेणिका=समूहः । श्रेणिकेति पाठेऽपि स एवार्थः, सैव भीमं=भयानकं भूषणं यस्य तं, त्वां=भवन्तम्, बान्धवाः=पाण्डवाः, नचिरात्=अचिरेणैव, रणाङ्गणे=रणाऽजिरे । 'अङ्गणं चत्वराऽजिरे' इत्यमरः । सुप्तं=प्रसुप्तम् । निहतम् । द्रक्ष्यन्ति=विलोकयिष्यन्ति । मद्गदाप्रहारविचूर्णिताऽस्थिमात्रशेषं त्वां न चिराद्युद्धभुवि पातयिष्यामीत्याशयः । 'वेणी तु केशवेशे स्यात्प्रवाहे च निगद्यते' इति धरणिः ॥ ३४ ॥

दुर्योधन—अरे पापी, भरत कुलाधम, जूये में जीते हुए हमारे दास ! पाण्डवों में पशु ! मैं तेरी तरह बढबढ कर बोलना तो नही जानता परन्तु—

शीघ्र ही सब पाण्डव लोग मेरी गदा के आघात से टूटकर पसली व हड्डियाँ वेणी (गड्डी) की तरह होगई है, वही जिसका भयङ्कर भूषण है ऐसे तेरेको युद्ध भूमि में पड़ा हुआ शीघ्र ही देखेगें ; अर्थात् मेरी गदा से तेरी हड्डियां टूट २ कर एकत्र हो गड्डी सी बन जाएँगी और इस प्रकार तूं भूमि पर पड़ा हुआ शीघ्र ही मौत की घडियां गिनेगा ॥ ३४ ॥

भीमसेन—(हंसकर) तुम ठीक ही कह रहे हो । मैं युद्ध में जरूर है भीषण आभूषण धारण करूंगा । पर वह आभूषण कैसा होगा उसे सुनो—

---

१ 'पाण्डवास्त्वां' । २ 'रणाजिरे' । ३ 'कणिका' 'श्रेणिका' ।
४ 'यद्येवं नाऽश्रद्धेयो भवान्, तथापि प्रत्यासन्नमेव कथयामि ।

पीनाभ्यां मद्भुजाभ्यां भ्रमितगुरुगदाघातसंचूर्णितोरोः
क्रूरस्याधाय पादं तव शिरसि नृणां पश्यतां श्वः प्रभाते ।
त्वन्मुख्यभ्रातृचक्रोद्दलनगलदसृक्चन्दनेनाऽऽनखाग्रं
स्त्यानेनार्द्रेण चाऽऽक्तः स्वयमनुभविता भूषणं भीममस्मि ॥३५॥

प्रत्यासन्नं=सन्निहिततरम् । पीनाभ्यामिति । पीनाभ्यां = स्थूलाभ्याम् । श्वः प्रभाते = आगामिनि दिने । प्रभात एव । नृणां पश्यतां । पुरत इति शेषः । मद्भुजाभ्यां=मद्बाहुभ्याम् । भ्रमिता या गदा, तस्यास्तया वा य आघातः, तेन संचूर्णितावूरू यस्यासौ, तस्य । मदीयबलिष्ठभुजाभ्रमितगदाघातपिष्टोरुयुगलस्येत्यर्थः । क्रूरस्य=नृशंसस्य । तव शिरसि=मस्तके, पदमाधाय=चरणं विन्यस्य । त्वमेव मुख्यो ज्येष्ठो यस्य भ्रातृचक्रस्य, तस्य उद्दलनेन=खण्डनेन गलद्यत्–असृक्=रुधिरं, तदेव चन्दनं, तेन । स्त्यानेन=गाढेन । आर्द्रेण=स्तिमितेन । क्लिन्नेन । आनखाग्रं=नखपर्यन्तम् । आक्तः=आसमन्तात्लिप्तः । भीषणं=भयानकम् । भूषणं रुधिरलेपभूषणम् । स्वयमनुभविताऽस्मि । 'लोकानां पुरतो युद्धे' इति शेषः । स्रग्धरा वृत्तम् ॥३५॥

(पाठान्तरमें–यदि तूं मेरा विश्वास करे तो मैं तुझसे प्रत्यासन्न भावी कहता हूं) ।

कल प्रातःकाल, सब लोगों के सामने, दृढ व स्थूल मेरी भुजाओं से बड़े वेग से घुमाई गई इस महती गदा के आघात से जिसकी ऊरु चूर २ होगई है, ऐसे तेरे क्रूर पापी के शिर पर पैर रखकर आज तक मारे गए तेरे छोटे भाइयों के समूह से निकला हुआ रुधिररूपी गाढा चन्दन जो शरीर पर शिर से नख (पैर) तक पहिले से मेरे लगा हुआ है पर कुछ सूख गया है उसी के उपर तेरे रुधिर रूपी गीले चन्दन को लगाकर स्वयं ही एक भीषण आभूषण को धारण करूंगा । अर्थात् तेरे भाइयों के रुधिर को तो मैंने अपने शरीर पर पहिले ही से लगा (लीप) रखा है,अब तेरे भी ताजे रुधिर को उसीपर लीपकर भीषण आभूषण को धारण करूंगा ॥ ३५ ॥

(नेपथ्ये)

भो भो भीमसेनार्जुनौ ! एष खलु निहताशेषारातिचक्राक्रान्तपरशुरामाभिरामयशाः, प्रतापतापितदिङ्मण्डलः, स्थापितस्वजनः, श्रीमानजातशत्रुर्देवो युधिष्ठिरः समाज्ञापयति ।

उभौ—**किमाज्ञापयत्यार्यः ? ।**

(पुनर्नेपथ्ये)

कुर्वन्त्वाप्ता हतानां रणशिरसि नृणां वह्निसाद्देहभारा-
नश्रून्मिश्रं कथंचिद्ददतु जलममी बान्धवा बान्धवेभ्यः ।

निहतानि अशेषाणामरातीनां चक्राणि=सङ्घा येनासौ तथाभूतः । अत एव आक्रान्तं परशुरामस्याभिरामं-हृद्यं यशो येनाऽसौ तथाभूतः । प्रतापेन तापितं दिङ्मण्डलं येनासौ तथाभूतः । स्थापितः स्वजनो येनासौ तथाभूतः । तादृशे दिङ्मण्डले स्थापितः स्वजनो येनासौ तथेति वा विग्रहः । **देवः**=राजा । प्रतापवानिति वा । **आर्यः**=ज्येष्ठो भ्राता ।

कुर्वन्त्विति । आप्ताः=प्रामाणिका बान्धवादयः। **रणशिरसि**=युद्धमूर्ध्नि, **हतानां नृणां**=मनुजानां, **देहभारान्**=शरीरसङ्घान् , **वह्निसात्**=कार्त्स्न्येन वह्निदेयान् । **कुर्वन्तु**=विदधतु । अमी बान्धवाः-**बान्धवेभ्यः**=युद्धमृतेभ्यः सम्बन्धिभ्यः, **अश्रून्मिश्रं**=अश्रुमिलितं, **जलं**=जलाञ्जलिम् । **कथञ्चित्**=शोकभरेण कथ-

(नेपथ्य मे) हे भीमसेन ! हे अर्जुन ! सम्पूर्ण शत्रुओं को मार कर बदला लेने से जिनका यश परशुरामजी की तरह जगत् में फैल गया है, और अपने प्रताप से दिशाओं के मण्डल को जिन्होंने तपा दिया है, अपने स्वजनो को जिन्होंने संमान से स्थापित किया है, ऐसे ये महाराज युधिष्ठिर आज्ञा देते हैं कि--।

भीम व **अर्जुन**—आर्य क्या आज्ञा देते हैं ? ।

(फिर नेपथ्य में)

सम्बन्धी लोग युद्धमें मारे गए अपने२ बन्धु बान्धवोके शरीर का अग्नि संस्कार

१ 'चक्रो, विक्रमाक्रान्तपरशु' । २ क्वचिन्न । ३ 'मण्डलस्थापित' । ४ 'कुर्वन्त्वत्राहतानां' । ५ 'जनाः' । ६ 'अस्त्रैर्मिश्रं' ।

मार्गन्तां[1] ज्ञातिदेहान्हतनगरगहने खण्डितान्गृध्रकङ्कै-
रस्तं भास्वान्प्रयातः सह रिपुभिरयं संह्रियन्तां बलानि ॥३६॥

उभौ—**यदाज्ञापयत्यार्यः**। (इति निष्क्रान्तौ)।

(नेपथ्ये)

अरे रे गाण्डीवाकर्षणबाहुशालिन्! अर्जुन अर्जुन!, केदानीं गम्यते?।

कर्णक्रोधेन युष्मद्विजयि धनुरिदं त्यक्तमेतान्यहानि
प्रौढं विक्रान्तमासीद्वन इव भवतां[2] शूरशून्ये रणेऽस्मिन्।

श्मिन्। ददतु=वितरन्तु। किञ्च—**गृध्रकङ्कैः**=गृध्रकङ्कादिमांसाशिपक्षिभिः। **खण्डितान्**=विदलितान्। विरूपितान्। **ज्ञातिदेहान्**=स्वस्वबन्धुशरीराणि। **हतनरगहने**=हतमनुजसङ्कटे। शवसङ्कुदुःसंचरे रणशिरसि। **मार्गन्ताम्**=मृग्यन्ताम्। अन्विष्यन्तु। 'जना' इति शेषः। यतः-अयं **भास्वान्**=सूर्यः। **रिपुभिः सह**=अस्मच्छत्रुभिः सह। **अस्तं प्रयातः**=अस्तङ्गतः। शत्रवोऽस्माकं सर्वेऽपि प्रायो विनष्टा इत्यर्थः। अतो **बलानि**=सैन्यानि। **संह्रियन्ताम्**=उपसंह्रियन्ताम्। स्रग्धरा वृत्तम्॥ ३६॥

गाण्डीवस्याकर्षणे प्रसक्तौ यौ बाहू ताभ्यां शालते शोभते यस्तत्सम्बुद्धौ रूपम्। हे प्रशस्तबाहुविराजितेत्यर्थः। **कर्णेति**। **कर्णक्रोधेन**=कर्णोपरि जातन क्रोधेन हेतुना। **विजयि**=भवद्विजयशीलम्। **इदं धनुः**=कार्मुकमिदम्। **एतान्यहानि**=एतद्दिनपर्यन्तम्। **त्यक्तं**=मया परित्यक्तमासीत्। **शूरशून्ये**=भीष्मद्रोणा-

करें, बन्धु बान्धव किसी प्रकार अपने मृत बन्धुवों को अश्रुओ से मिला हुआ जल (तिलाञ्जलि) दें। मरे हुए मनुष्यों से गहन इस युद्ध भूमि में गृध्र (गीध) कङ्कों (कांवलों) से खाए गए अपने अपने बन्धु बान्धवों के शरीरों को खोजें। क्योंकि सब शत्रुओं के साथ ही साथ ये भगवान् सूर्य नारायण अस्ताचल को चले गए (या अस्त हो रहे) हैं। अतः सेनाओ को शिविर मे लौटाओ। और युद्ध बन्द करो॥ ३६॥

भीम व **अर्जुन**—जो आज्ञा आर्य (महाराज) की।

[दोनों जाते हैं]।

१ 'मृग्यन्तां' 'मृग्यन्ता'मित्युचितः पाठः। मृगधातोः परस्मैपदित्वात्।

२ 'भवता'।

स्पर्शं स्मृत्वोत्तमाङ्गे पितुरनवजितन्यस्तहेतेरुपेतः
कल्पाग्निः पाण्डवानां द्रुपदसुतचमूघस्मरो द्रौणिरस्मि ॥३७॥

धृतराष्ट्रः—(आकर्ण्य सहर्षं) **वत्स दुर्योधन ! द्रोणवधपरि-**

श्वत्थामादिवीररहिते । **अस्मिन् रणे**=अस्मिन् युद्धे । **वन इव**=कानन इव । **भवतः**=तव । **प्रौढं विक्रान्तं**=साटोपं विक्रमणम् । **आसीत्**=अभूत् । अनवजिता चासौ न्यस्ता च हेतिर्येन तस्य-**अनवजितन्यस्तहेतेः**=अनिर्जितपरित्यक्तशस्त्रस्य, **पितुः**=जनकस्य द्रोणस्य, **उत्तमाङ्गे**=शिरसि=मूर्ध्नि, **स्पर्शं**=पाञ्चालकृतकेशाभिमर्षणम् । **स्मृत्वा, पाण्डवानां**=भवतां, **कल्पाग्निः**=कालाग्नितुल्यः, प्रलयाग्निसमः । द्रुपदसुतस्य-धृष्टद्युम्नस्य या चमूः-सेना, तस्याः **घस्मरः**=अद्मरः । विनाशकः । द्रोणस्यापत्यं **द्रौणिः**=द्रोणपुत्रोऽश्वत्थामा । **उपेतोऽस्मि**=ममागतोऽस्मि । अर्जुन ! तिष्ठ, कदानीं गम्यते इति पूर्वेणान्वयः । स्रग्धरावृत्तम् ॥ ३७ ॥

द्रोणस्य वध एव परिभवः, वधश्च परिभवश्चेति वा, तेन ताभ्यां वा

[नेपथ्य में]

अरे गाण्डीव को खीचने वाले बाहुबल के घमण्डी अर्जुन ! अरे ओ अर्जुन ! अब कहां जाता है !

तुम लोगों को बात की बात में जीतने वाला यह धनुष मैंने कर्ण के क्रोध से इतने दिनो तक छोड रखा था, और इस कौरव सेना में शूरवीरों के अभाव में तुम लोगों ने युद्ध में—वनकी तरह—खूब उछल कूद मचा रखी थी (अर्थात् सिंह से रहित वन में जैसे गीदड भी उछल–कूद किया करते है ऐसे ही मेरे विना तुम लोगों ने युद्ध में वहुत उत्पात मचा रखा था) । अब तो शस्त्र त्याग कर समाधिस्थ हुए सर्वदा अपराजित अपने पिता के केश पकड़ कर खींचने के अपमान को याद करके, पाण्डवों के लिए प्रलय काल की अग्नि के समान, द्रुपदपुत्र (धृष्टधुम्न) की सेना को खा जाने वाला, द्रोणपुत्र अश्वत्थामा मैं आगया हूं । अब कहाँ जाते हो ठहरो ।। ३७ ॥

---

१ क्वचिन्न ।

भवोद्दीपितक्रोधपावकः, पितुरपि समधिकबलः, शिक्षावानमरोपमश्चायमश्वत्थामा प्राप्तः। तत्प्रत्युपगमनेन तावदयं संभाव्यतां वीरः।

गान्धारी—जाद ! पच्चुग्गच्छ एदं महाभाअम्।

[जात ! प्रत्युद्गच्छैनं महाभागम्]।

दुर्योधन—तात ! अम्ब ! किमनेनाङ्गराजवधाशंसिना वृथायौवनशस्त्रबलभरेण ?।

उद्दीपितः क्रोध एव पावको यस्यासौ तथाभूतः। पितृवधाऽमर्षित इत्यर्थः। समधिकबलः=अधिकबलः। शिक्षावान्=बाढं शिक्षितः। अमरोपमः=चिरजीवितया देवतुल्यः। तत्=तस्मात्। प्रत्युपगमनेन=प्रत्युत्थानेन सन्मुखव्रजनादिना च। सम्भाव्यतां=सत्क्रियताम्। सहर्षीक्रियताम्। प्रत्युद्गच्छ=आनेतुं कतिचन पदानि गच्छ।

अङ्गराजस्य वधमाशंसति तच्छीलेन—अङ्गराजवधाशंसिना=कर्णवधप्रस्तावशीलेन। कर्णवधाभिलाषिणा वा। वृथा=निष्फलः, यौवनस्य=तारुण्यस्य शस्त्राणां च बलस्य भरो यस्यासौ तेन तथाभूतेन। किं=किं प्रयोजनम् ?।

धृतराष्ट्र—(सुनकर हर्षपूर्वक) वत्स दुर्योधन ! द्रोण के अपमान से जिसका क्रोधरूपी अग्नि उद्दीपित हो गया है ऐसा, पिता से भी अधिक बली, धनुर्वेद में निष्णात, देवतुल्य [अमर, चिरजीवी] यह अश्वत्थामा आरहा है, अतः उठकर इस वीर का सत्कार करो।

गान्धारी—पुत्र ! इनको तुम सामने जाकर स्वागत करो।

दुर्योधन—पिताजी ! माताजी ! अङ्गराज कर्ण के बध चाहने वाले (या उसकी राह देखने वाले) वृथा यौवन व शस्त्र का भार उठाने वाले इस अश्वत्थामा से क्या फल सिद्धि है ? या मुझे इससे क्या प्रयोजन है ?। कुछ नहीं।

धृतराष्ट्रः—वत्स ! न खल्वस्मिन्काले पराक्रमवतामेवंविधानां वाङ्मात्रेणापि विरागमुत्पादयितुमर्हसि ।

(प्रविश्य)

अश्वत्थामा—विजयतां कौरवाधिपतिः ।

दुर्योधनः—(उत्थाय) गुरुपुत्र ! इत आस्यताम् । (इत्युपवेशयति) ।

अश्वत्थामा—(सास्र) राजन्दुर्योधन !

कर्णेन कर्णसुभगं बहु यत्तदुक्त्वा
यत्सङ्गरेषु विहितं विदितं त्वया तत् ।

न किमपीत्यर्थः । एवंविधानाम्=ईदृशानाम् । वाङ्मात्रेणापि=केवलया वाचाऽपि ।

इतः=इह । कर्णेनेति । कर्णेन=अङ्गराजेन, कर्णसुभगं=श्रवणमात्र-सुन्दरम् । बहु=अनल्पं । यत्तत्=यत्किञ्चित् । यथेच्छम्, उक्त्वा=अभिधायापि । सङ्गरेषु=युद्धेषु । यद्विहितं=यत्कृतम् । तत् त्वया विदितं=ज्ञातमेव । भवेदिति वा शेषः । एषः=अयम् । अधिज्यं धनुर्यस्यासौ अधिज्यधन्वा । अधिरोपि-

---

धृतराष्ट्र—पुत्र ! इस समय तुम्हें ऐसे पराक्रमी बीर को कटु वचनों से अप्रसन्न करना नहीं चाहिए ।

(प्रविष्ट होकर—)

अश्वत्थामा—कौरवराज की विजय हो ।

दुर्योधन—(उठकर) गुरुपुत्र ! यहाँ बैठिए ।

(पास में बैठाता है)

अश्वत्थामा—[आंखों में आंसू भरकर] राजन् ! दुर्योधन !

कर्ण नें कानों को प्रिय लगने वाली बड़ीबड़ी मीठी बातें बनाकर भी युद्धमें जो कुछ किया है वह तो तुमको मालूम ही है । अब मैं द्रोणपुत्र अश्वत्थामा धनुष

---

१ 'वचनमात्रेणैवं' । २ क्वचिन्न ।

द्रौणिस्त्वधिज्यधनुरापतितोऽभ्यमित्र-
मेषोऽधुना त्यज नृप ! प्रतिकार[1]चिन्ताम् ॥ ३८ ॥

दुर्योधनः—(साभ्यसूयम्) **आचार्यपुत्र !**

अवसानेऽङ्गराजस्य योद्धव्यं भवता किल ।
ममाप्यन्तं प्रतीक्षस्व, कः कर्णः कः सुयोधनः ? ॥३९॥

अश्वत्थामा—(स्वगतं) **कथमद्यापि स एव कर्णपक्षपातोऽ-**

चापः । **द्रौणिस्तु**=अश्वत्थामा तु । **अभ्यमित्रं**=शत्रूनभिमुखीकृत्य । शत्रु संमुखम् । **आपतितः**=समभ्यागतः । आयातः । **नृप**=हे राजन् । **अधुना**= सम्प्रति । **प्रतिकारचिन्तां**=शत्रुप्रतीकारचिन्ताम् । अप्रतिकारदुःखमिति पाठे–अप्रतीकारप्रभवं दुःख । **त्यज**=दूरीकुरु । **स्वस्थो भव** । अहमेव तव शत्रून्निहनिष्यामीत्याशयः । वसन्ततिलका वृत्तम् ॥ ३८ ॥

साभ्यसूयं=सतिरष्कारम् । सदोषाविष्कारम् । **अवसान इति** । **अङ्ग-राजस्य**=कर्णस्य । **अवसाने**=अन्ते । विनाशे सति । **भवता**=त्वया । किलेति निश्चये । योद्धव्यं तर्हि, **ममापि**=दुर्योधनस्यापि । **अन्तम्**=विनाशं । **प्रतीक्षस्व**=किञ्चित्कालं प्रतिपालय । **क इति** । कर्णदुर्योधनयोः को भेदः ? । न कोऽपीत्यर्थः । तत्कर्णस्य रिपुर्ममैव रिपुरित्याशयः ॥ ३९ ॥

चढ़ाकर शत्रुओं से लडने आ पहुंचा हूं । हे राजन् ! अब आप शत्रुओं से बदला लेन की चिन्ता व दुःख छोड़ दें ! (मैं अब बात की बात में शत्रुओं से सब बदला चुका लेता हूं) ॥ ३८ ॥

दुर्योधन—(असूयापूर्वक ताने के साथ) हे आचार्य पुत्र !—

अङ्गराजकी मृत्यु (अन्त) के बादही आप युद्ध करनेको प्रवृत्त हुए हैं । तो फिर मेरे भी अन्त की प्रतीक्षा करिए, तब लडिएगा । क्योंकि कर्णमें और मेरे में भेद ही क्या है ? ॥ ३९ ॥

अश्वत्थामा—[मनही मन] हैं ! अभी तक इसका कर्ण के प्रति

१ 'प्रतिकारदुःखम्' । 'नृ ऽप्रतिकार' ।

स्मासु च परिभवः ! । (प्रकाश) राजन्कौरवेश्वर ! एवं भवतु।

(इति निष्क्रान्तः) ।

धृतराष्ट्रः—वत्स ! क एष ते व्यामोहो यदस्मिन्नपि काले एवंविधस्य महाभागस्याश्वत्थाम्नो वाक्पारुष्येणापरागमुत्पादयसि ? ।

दुर्योधनः—किमस्याऽप्रियमनृतं च मयोक्तम् ? ।

किं वा नेदं क्रोधस्थानम् ? । पश्य—

अकलितमहिमानं क्षत्रियैरात्तचापैः

समरशिरसि युष्मद्भाग्यदोषाद्विपन्नम् ।

परिभवः=तिरस्कारः । एवं भवतु=तवाऽप्यन्तं प्रतीक्षिष्ये । यदा तवाऽप्यन्तसमयः समेष्यति तदैवाऽहं पुनरागमिष्यामीत्याशयः । व्यामोहः= वैचित्यम् । मूढता । अस्मिन्=विषमे हतसर्वमहारथे । महाभागस्य=महाप्रभावस्य । अपरागं=वैरागयम् । अस्य=अश्वत्थाम्नः । अनृतं=मिथ्या । इदं=अश्वत्थामभाषितम् ।

अकलितेति । समरशिरसि=युद्धभूम्नि । आत्ताश्चापा यैस्तैः–आत्तचापैः=गृहीतकोदण्डैः । क्षत्रियैः=महावीरैरपि । अकलितो महिमा यस्यासौ तम्–अकलितमहिमानम्=अज्ञातमाहात्म्यम् । महाप्रभावम् । युष्मद्भाग्यदोषात्=अस्मद्भाग्यविपर्ययात् । विपन्नं=विनष्टं । मृतम् । समरशिरसीत्यस्यात्र

पक्षपात बनाही हुआ है ! और हमारा यह तिरस्कार कर रहा है ! ।

[राजासे]

राजन् दुर्योधन ! जो तुम कहते हो वही होगा । एवमस्तु ।

(जाता है) ।

धृतराष्ट्र—वत्स ! यह तुमारी क्या मूर्खता व क्या मोह [भ्रान्ति] है जो तुम ऐसे समयमें ऐसे पराक्रमी अश्वत्थामा को कटु वचनो से अप्रसन्न कर रहे हो ।

दुर्योधन—मैनें इसमें इसको क्या अप्रिय वचन कहा है ? । अथवा क्या यह मेरे क्रोध का अवसर नहीं है ? । देखिए—

---

१ क्वचिन्न ।

परिवदति समक्षं मित्रमङ्गाधिराजं
मम खलु कथयास्मिन्को विशेषोऽर्जुने वा ? ॥ ४० ॥

धृतराष्ट्रः—[अथवा][1] वत्स ! तवापि कोऽत्र दोषः। अवसानमिदानीं भरतकुलस्य। गान्धारि ! किमिदानीं करोमि मन्दभाग्यः ?। (विचिन्त्य) भवत्वेवं तावत्। सञ्जय ! मद्वचनाद्ब्रूहि भारद्वाजमश्वत्थामानम् ।—

'स्मरति न भवान्पीतं स्तन्यं विभज्य[3] सहामुना,
मम च मृदितं क्षौमं बाल्ये त्वदङ्गविवर्तनैः ।

सम्बन्धो वा । मित्रं=सुहृदम् । अङ्गराजं=कर्णम् । मम समक्षं=मत्संमुखम् । परिवदति=निन्दति । अस्मिन्=अश्वत्थाम्नि । अर्जुने वा=धनञ्जये वा । कथय=हे तात ! त्वमेव कथय । को विशेषः=को भेदः ? । न कोऽपीत्यर्थः । अयमपि मे शत्रुतुल्य एवेत्याशयः । मालिनी वृत्तम् ॥ ४० ॥

अवसानम्=अन्तसमयः । एवं तावत्=एवं तावत्कृत्वा सन्दधामि महामानिनमश्वत्थामानम् । भारद्वाजं=द्रोणपुत्रम् । यत्—

बडे २ शूरबीर धनुर्धर क्षत्रिय भी युद्ध में जिसकी महिमा को नहीं पासकते थे, ऐसे मेरे मित्र अङ्गराज कर्ण—जो हमारे दुर्भाग्य से ही मृत्यु को प्राप्त हुए हैं—उनकी यह मेरे सामने निन्दा करता था ! । आपही कहिए—इसमें और अर्जुन में फिर क्या विशेषता [भेद] रह गई ? । जैसे कर्ण का शत्रु अर्जुन मेरा वैरी है ऐसे ही यह भी कर्ण का शत्रु होने से मेरे लिए अर्जुन की तरह ही शत्रु है ॥ ४० ॥

धृतराष्ट्र—बेटा ! इसमें तेरे को क्या दोष दूं, इस समय भरत कुल का अवसान काल (विनाश काल) ही आगया है ।

गान्धारी—मैं मन्दभागी अब क्या करूं ? । [कुछ विचार कर] अच्छा ऐसे करता हूँ । सञ्जय ! मेरे वचन से द्रोणपुत्र अश्वत्थामा से जाकर कहो कि—

१ क्वचिन्न । २ 'सञ्जय' । ३ 'चिराय' ।

अनुजनिधनस्फीताच्छोकादतिप्रणयाच्च य-
द्विकृतवचने मास्मिन्क्रोधश्चिरं क्रियतां त्वया'[1] ॥ ४१ ॥

स्मरतीति । भवान् बाल्ये=बाल्यावस्थायाम् । **अमुना**=दुर्योधनेन सह, **विभज्य**=विभागं कृत्वा, कदाचित् **स्तन्यं**=दुग्धं **पीतं**=निपीतं, **न स्मरति**=नैव स्मरति किम् ? । गान्धार्या एकः स्तनस्त्वया पीतोऽपरश्च दुर्योधनेनेति वार्त्ता किं त्वया विस्मृता ? । भ्रातृकल्प एवायं ते दुर्योधन इत्याशयः । च=किञ्च । **त्वदङ्गविवर्त्तनैः**=त्वदीयाङ्गपरिवर्त्तनैः । **क्षौमं**=महार्हं मम पट्टवस्त्रम् । चीनांशुकं वा । यत् **मृदितं**=मलिनतां नीतं । [तत्] **न स्मरति भवान्**=किं न स्मरति भवानिति पूर्वेण सहान्वयः ।

अनुजानां निधनं=वधः **तस्मात्स्फीतं**=प्रवृद्धं तस्मात्–**अनुजनिधनस्फीतात्**=भ्रातृशतवधप्रवृद्धात् , **शोकात्**=शुचः, **अतिप्रणयात्**=कर्णेऽतिस्नेहाच्च । **विकृतवचने** = विकृतभाषणे, **अस्मिन्**=दुर्योधने । ['यद्विकृतवचनं माऽस्मिन् क्रोध' इति पाठो भवेत् । तत्र च–यद्विकृतवचनं=रूक्षवचनम्, **अस्मिन्**=वचने इत्यर्थः] । **चिरं**=बहुकालं । **क्रोधः**=कोपः । त्वया **मा क्रियतां**=माकारि । न कार्यः । **यदित्यस्य** यत्पीतं तन्न स्मरतीत्येवमन्वयः, आदावेव **गद्येन** सहैव वाऽन्वयः । हरिणी वृत्तम् ॥ ४१ ॥

क्या इस (दुर्योधन) के साथ आप गान्धारी के स्तनों से बहुत दिनों तक दूध पीते थे यह बात आपको याद है ? । क्या आपको याद है कि बाल्यावस्था में मेरे रेशमी बहुमूल्य वस्त्रों को अपने शरीर के परिवर्तन से मैला कर दिया करते थे । [अर्थात् तुम मेरे पुत्र के समान हो] । भाइयों के मारे जाने से तथा अपने मित्र कर्ण के मारे जाने से एवं तुमारे में भाई का सा प्रेम रहने से इस (दुर्योधन) ने जो कुछ अनुचित भी कह दिया हो उसपर आपको अधिक क्रोध नहीं करना चाहिए । अर्थात् पूर्वके प्रेम व स्नेह को देखकर इसे क्षमा कर देना चाहिए ॥४१॥

---

१ 'द्वचनविकृतिष्वस्य क्रोधो मुधा क्रियते त्वया' ।

संजयः—**यदाज्ञापयति तातः।** (इत्युत्तिष्ठति)।

धृतराष्ट्रः—**अपि चेदमन्यत्त्वया वक्तव्यम्।**

यन्मोचितस्तव पिता वितथेन शस्त्रं
यत्तादृशः परिभवः स तथाविधोऽभूत्।
एतद्विचिन्त्य बलमात्मनि पौरुषं च
दुर्योधनोक्तमपहाय विधास्यतीति॥ ४२॥

अन्यत् = अन्यदपि। **वक्तव्यम्**=अश्वत्थाम्ने सन्देष्टव्यम्। **यदिति।** **यत्**—यस्मात्। **तव**=भवतः। **पिता**=तातो द्रोणाचार्यः। **वितथेन**=मिथ्याभाषणेन। कपटेन। **शस्त्रं**=हेतिम्। **मोचितः**=युधिष्ठिरादिभिस्त्याजितः। **यत्**=यच्च। **तादृशः**=केशाकर्षणरूपः प्रसिद्धः। **तथाविधः**=तत्तत्प्रकारकः। खड्गप्रहार·शरःकर्त्तनादिनानाप्रकारकः। **परिभवः**=तिरस्कारः। तव पितुरिति शेषः। **अभूत्**=बभूव। 'तथाविधे' इति पाठे—तथाविधे महात्मनि द्रोणे तादृशः परिभवोऽभूदिति सरलोऽर्थः। 'तादृश' इति षष्ठ्यन्तं वा। **तादृश**=तथाविधगौरवान्वितस्य गुरोः। **तथाविधः**=नितरामनुचितः, **पराभवः**=तिरस्कारोऽभूदिति तदाऽर्थः।

एतत्=एतत्सर्वम्। **विचिन्त्य**=विचार्य। **आत्मनि**=स्वस्मिन्। **बलं**=शक्तिम्। **पौरुषं**=पुरुषार्थं। पराक्रममुत्साहातिशयञ्च। 'विचिन्त्ये'ति पूर्वेणान्वयः। **दुर्योधनोक्तं**=सुयोधनोक्तम्। **अपहाय**=अपनीय। **विधास्यति**=भवान्करिष्यति। शत्रुप्रतीकारं करिष्यति। यद्वा 'बलमात्मनि पौरुषं च विधास्यती'त्यन्वयः। **इति**=इति वक्तव्यमिति पूर्वेणान्वयः। वसन्ततिलकावृत्तम्॥ ४२॥

सञ्जय—जैसी महाराज की आज्ञा।

(उठता है)।

धृतराष्ट्र—यह और भी कहना कि—

शत्रुओं नें झूठ बोलकर ('अश्वत्थामा हाथी—मारा गया' यह कहकर) आपके पिताजी के हाथ सें शस्त्र रखवा दिए, और फिर जैसा उनका अपमान

संजयः—**यदाज्ञापयति तातः ।** (इति निष्कान्तः) ।

दुर्योधनः—**सूत ! साङ्ग्रामिकं मे रथमुपकल्पय ।**

सूतः—**यदाज्ञापयत्यायुष्मान् ।** (इति निष्कान्तः) ।

धृतराष्ट्रः—**गान्धारि ! इतो वयं मद्राधिपतेः शल्यस्य शिविरमेव गच्छावः । वत्स ! त्वमप्येवं कुरु ।**

(इति परिक्रम्य निष्क्रान्ताः सर्वे) ।

इति पञ्चमोऽङ्कः ।

यदाज्ञापयतीति । अस्य 'तत्करोमी'ति शेषः । **उपकल्पय**=सम्पादय । सज्जीकुरु । उपस्थापयेति वा ।

मद्राधिपतेः=मद्रराजस्य शल्यस्य । 'तं सेनापतिपदेऽभिषेक्तु'मिति शेषः । **एवं कुरु**=तस्यैव शिबिरसंनिवेशं गच्छ । गत्वा च तं सेनापतिपदे नियोजयेति भावः । **परिक्रम्य**=किञ्चित्पादविक्षेपं कृत्वा । चलित्वा । रङ्गे तथाभिनीयेति यावत् ।

ॐ इति श्रीगुरुप्रसादशास्त्रिविरचितायां **वेणीसंहारटीकायां पञ्चमोऽङ्कः** ॐ

किया गया—यह सब स्मरण कर, दुर्योधन के कहे हुए को भुला कर, अपने बल और पौरुष [पराक्रम] को दिखाइए। (अर्थात् शत्रुओं से अपने पिता के अपमान का बदला लेने में अपने योग्य पराक्रम को दिखाइए) ॥ ४२ ॥

सञ्जय—जैसी आपकी आज्ञा ।

[जाता है]

दुर्योधन—सूत ! मेरा युद्ध के लिए उपयोगी रथ तैयार करो ।

सूत—जो आज्ञा सर्कार की ।

(रथ लाने जाता है) ।

धृतराष्ट्र—गान्धारि ! यहाँ से हम लोग मद्रराज शल्य के पडाव (तम्बू) पर चलते हैं । वत्स ! दुर्योधन ! तुम भी वहीं चलो । (वहाँ चलकर शल्य को सेनापतिपद के लिए राजी करें) ।

[सब जाते हैं] ।

इति पञ्चमोऽङ्कः ।

अथ षष्ठोऽङ्कः ।

(ततः प्रविशत्यासनस्थो युधिष्ठिरो द्रौपदी चेटी पुरुषश्च) ।

युधिष्ठिरः--(विचिन्त्य निःश्वस्य च) कष्टं[1] भोः कष्टम् !

तीर्णे भीष्ममहोदधौ[2] कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्ये च[3] याते दिवम् ।
भीमेन प्रियसाहसेन रभसात्स्वल्पावशेषे[4] जये
सर्वे जीवितसंशयं वयममी वाचा समारोपिताः ॥ १ ॥

अथ वेणीसंहारटीकायां षष्ठोऽङ्कः

आसनस्थः=सिंहासनस्थः । **चेटी**=दासी । **पुरुषः**=राजपुरुषः । कञ्चुकी वा । **तीर्णे** इति । भीष्म एव महोदधिः-अलङ्घ्यत्वात्-भीष्ममहोदधिः, तस्मिन्, **कथमपि**=कथंचित् । **तीर्णे**=उत्तीर्णे । अतिक्रान्ते सति । द्रोणएवानलस्तस्मिन् **द्रोणानले**=द्रोणकालाग्नौ । (कथंचित्) **निर्वृते**=उपशान्ते सति । **कर्ण एव-आश्यां**=सर्पदंष्ट्रायां 'विषं यस्यासौ-आशीविषो **भोगी=सर्पः**-कर्णाशीविषभोगी, तस्मिन्-**कर्णाशीविषभोगिनि**=विषोल्बणकर्णमहाभुजङ्गे । 'आशीरप्यहिदंष्ट्रिका' इत्यमरः । **प्रशमिते**=प्रशान्ते । **शल्ये च**=मद्रराजे च । **दिवं**=स्वर्गे । **याते**=मृते । जये=विजये च । **स्वल्पावशेषे**=किञ्चिदेवावशिष्टे

अथ षष्ठोऽङ्कः ।

[सिंहासन पर बैठे हुए युधिष्ठिर द्रौपदी उसकी दासी व पुरुष का प्रवेश]

युधिष्ठिर—(सोचकर लम्बी सांस लेकर)

भीष्मरूपी महोदधि के किसी तरह पारकर लेने पर, द्रोणरूपी अग्नि के किसी प्रकार बुझजाने पर (शान्त होने पर), कर्णरूपी तीक्ष्णविषवाले भयङ्कर नाग के किसी प्रकार शान्त होने पर, शल्य के भी स्वर्ग को चल जाने पर जब

१ कच्चिन्न । २ 'महार्णवे' । ३ 'शल्येऽपि' । ४ 'स्वल्पावशिष्टे' ।

द्रौपदी--(सबाष्पं) **महाराज ! पञ्चालिए त्ति किं ण भेणिदम् ?** ।

[**महाराज ! पाञ्चाल्येति किं न भणितम् ?**] ।

युधिष्ठिरः—**कृष्णे ! ननु मया** । (पुरुषमवलोक्य) **बुधक !**

सति । प्रियं साहसं यस्यासौ प्रियसाहसः, तेन-**प्रियसाहसेन**=साहसरसिकेन । **भीमेन**=भीमसेनेन । **रभसात्**=वेगेन । सहसा । **वयममी सर्वे**=सर्वे वयं पाण्डवाः । **वाचा**=प्रतिज्ञया । 'दुर्योधनं वा हनिष्यामि स्वयं वा मरिष्यामी'त्येवं प्रतिज्ञया । जीवितस्य संशयः-जीवितसंशयः तं, **जीवितसंशयं**=प्राणसंशयम् । **आरोपिताः**=स्थापिताः । गमिताः । प्रापिताः । दुर्योधनस्य क्वचिन्निलीय स्थितत्वात्तदलाभे भीमसेनमरणे सर्वेषामप्यस्माकं मरणस्य निश्चितत्वात्सर्वेषां जीवितसंशयः स्पष्ट एवेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥

पाञ्चाल्येतीति । न भीमेन सर्वे संशयमारोपिताः, किन्तु **पाञ्चाल्या**=द्रौपद्या मया सर्वे जीवितसंशयमारोपिता इति किं न भणितं । एवमेव वदेत्यर्थः । द्रौपदीतिरस्कारेणैव भीमसेनेन दुर्योधनोरुभङ्गप्रतिज्ञायाः कृतत्वात्पाञ्चाल्यहं सर्वानर्थमूलमिति भावः । **कृष्णे**=हे द्रौपदि । **ननु मयेति** । द्यूतादिकर्तृत्वेनाहमेव भवत्यास्तिरस्कारादेर्महायुद्धस्य च बीजमिति ममैवाऽयमपराध इति भावः ।

कि हमारा विजय थोडा ही बाकी था उसी समय इस भीमने अनुचित साहस कर 'आज ही दुर्योधन को मारूँगा नहीं तो मैं ही मर जाऊँगा' ऐसी प्रतिज्ञा करके हम सबके जीवित का भी संशय खडाकर दिया है। (अर्थात् यदि आज भीम की प्रतिज्ञा पूरी नहीं हुई तो उसके साथ ही साथ हम सबको भी मरना ही पडेगा) ॥ १ ॥

द्रौपदी—(आंसुओं से डबडबाई हुई आखों से) महाराज ! 'द्रौपदी नें हीं सबके प्राणों को संशय में डाल दिया है' ऐसा कहिए। (भीमसेन का क्या दोष है)!

युधिष्ठिर—हे द्रौपदी ! मैने ही (जूआ खेलकर) सबको इस प्रकार विपत्ति डाला है-इसलिये 'मैंने ही विपत्ति में डाला' यही कहना ठीक होगा। (क्योंकि यह सब मेरे ही कारण हो रहा है) ।

१ क्वचिन्न । २ 'भणासि' । [भणसि] ।

पुरुषः—देव ! आज्ञापय ।

युधिष्ठिरः—उच्यतां सहदेवः—'क्रुद्धस्य वृकोदरस्यापर्युषितां[2] प्रतिज्ञामुपलभ्य प्रनष्टस्य मानिनः कौरवराजस्य पदवीमन्वेष्टुमतिनिपुणमतयस्तेषु तेषु स्थानेषु यथार्थाभिज्ञाश्चराः[3], सुसचिवाश्च भक्तिमन्तः पटुपटहरवव्यक्तघोषणाः[1] सुयोधन-

एवञ्च 'सर्वे जीवितसंशयं ननु मया वाचा समारोपिताः' इत्येवं मया श्लोकः पठनीय इति तत्त्वम् । बुधक इति पुरुषस्य नामधेयम् ।

क्रुद्धस्य=कुपितस्य । **वृकोदरस्य**=भीमसेनस्य । **अपर्युषितां**=नान्यद्दिनगामिनीम् । अद्यैव पूरणीयां न तु कालातिपातसहाम् । 'अपूर्णाम् । सद्यो वा-स्वीकृता'मिति तु गौडाः । **उपलभ्य**=ज्ञात्वा । **प्रनष्टस्य**=अदर्शनं गतस्य । निलीय स्थितस्य । **मानिनः**=अभिमानिनः । **पदवीं**=पन्थानम् । 'अयनं वर्त्म-मार्गाध्वपन्थानः पदवी सृतिः' इत्यमरः । **अन्वेष्टुं**=मार्गितुम् । **अतिनिपुणा**=कुशला मतिर्बुद्धिर्येषान्ते–तथोक्ताः । **यथार्थाभिज्ञाः**=तत्त्वतोऽभिज्ञाः । तत्त्व-विदः । 'परमार्थाभिज्ञा'इत्यपि पाठः । **चराः**=गूढपुरुषाः । चरन्त्विति योजना । किञ्च **सुसचिवाश्च**=सुमन्त्रिणश्च । राजप्रतिनिधयश्च । **भक्तिमन्तः**=अस्मास्वनुरागभाजः । **पट्विति** । पटुः=स्फुटो यः **पटहस्य**=वाद्यभेदस्य **रवः**=शब्दः, तेन **व्यक्ता**–प्रकटा स्फुटा च **घोषणा**=दुर्योधनपदवीनिर्देशकायेदं धनं दीयेते-

(पुरुष की ओर देखकर) बुधक !

बुधक—महाराज ! क्या आज्ञा है ? ।

युधिष्ठिर—सहदेव से जाकर कहो कि क्रुद्ध-भीमसेन की अभी तक नहीं पूरी हुई (ताजी) भयङ्कर प्रतिज्ञा को सुनकर भागे हुए अभिमानी कौरवराज दुर्योधन को खोजने के लिए—

अति कुशल बुद्धि वाले विशेषज्ञ जासूस जगह २ लगादो । और विश्वासी मन्त्रियों

१ कचिन्न । २ 'अपर्युषितदारुणां' । ३ 'परमार्थाभिज्ञाः' ।

पदसंचारवेदिनः प्रतिश्रुतधनपूजाप्रत्युपक्रियाश्चरन्तु समन्तात्समन्तपञ्चकम्। अपि च—

पङ्के वा सैकते वा सुनिभृतपदवीवेदिनो यान्तु दाशाः
कक्षेषु क्षुण्णवीरुन्निचयपरिचया बल्लवाः संचरन्तु।

त्येवं येषान्ते तथोक्ताः। पटहेनोच्चैर्घोषयन्त इति यावत्। 'उच्चैर्घुष्टं तु घोषणा' इत्यमरः। 'पटुर्दक्षे च नीरोगे चतुरेऽप्यभिधेयवत्' इति मेदिनी। सुयोधनस्य=दुर्योधनस्य संचारं विदन्ति तच्छीलाः-सुयोधनसंचारवेदिनः। दुर्योधनसञ्चरणविदः। ~~प्रतिश्रुताः=सम्यक् प्रतिज्ञाताः~~-धनं=द्रव्यं, पूजा=सत्कारः, प्रत्युपक्रिया=प्रत्युपकारश्च यैर्येभ्यो वा, ते तथाभूताः। प्रतिश्रुताऽङ्गीकृता मद्दत्तधनादीनां प्रत्युपक्रिया यैस्ते इति वा। धनपूजेति पाठान्तरम्। विशिष्टपूजेति तदर्थः। समन्तपञ्चकं=तन्नामकक्षेत्रम्। कुरुक्षेत्रम्। समन्तात्=सर्वतः। समन्तायोगे द्वितीया, 'ततोऽन्यत्रापि दृश्यते' इत्युक्तेः। अपि च=किञ्च।

कुत्र कुत्र कीदृशाश्चरा नियोज्या इति स्वयमेव निर्दिशति-पङ्क इति। पङ्के वा=कर्दमे वा, सैकते वा=बालुकामये प्रदेशे वा। सैकतं सिकतामयम्' इत्यमरः। सुनिभृतां=गुप्तां, पदवीं=मार्गं विदन्ति तथाभूताः। दाशाः=धीवराः। मत्स्याजीविनः। 'कैवर्त्ते दाशधीवरौ' इत्यमरः। यान्तु=गच्छन्तु। चरन्तु। दुर्योधनान्वेषणायेति शेषः। कक्षेषु=शुष्कवीरुत्तृणेषु। 'कक्षस्तु दोर्मूले कच्छवीरुत्तृणेषु चे'ति मेदिनी। क्षुण्णाः=पादाघातैर्मृदिता या वीरुधः=लताः, तासां निचयेषु=समूहेषु परिचयो येषान्ते तथोक्ताः।

को भी नियुक्त करो जो साफ २ डुग्गी पिटवाकर जगह २ दुर्योधन के बताने वाले को महाराज युधिष्ठिर की ओर से धन, सम्पत्ति, मान, मर्यादा व सहायता देने की घोषणा करें, और वे लोग स्वयं भी दुर्योधन का पता लगाते हुए समन्तपञ्चक ('रामहृद' 'रामरा' 'पिण्डारा' कुरुक्षेत्र) के चारों ओर घूमें। और भी—

१ 'धनपूजा'। २ 'दासाः'। ३ 'कुञ्जेष्वाक्रान्तवीरुन्निचय'।

नागव्याघ्राटवीषु श्वपचपुरविदो ये च रन्ध्रेष्वभिज्ञा
ये सिद्धव्यञ्जना वा प्रतिमुनिनिलयं ते च चाराश्चरन्तु ॥२॥

पुरुषः—**यथाऽऽज्ञापयति देवः ।**

बल्लवाः=गोपाः। **सञ्चरन्तु**=प्रचरन्तु अन्विष्यन्तु। तेषां गोचारणाय वने भ्रमतां गोमनुष्यादिपादाघातचूर्णितासु लतासु विवेको भवतीति तेषां तत्र विनियोग इत्याशयः। 'लता प्रतानिनी वीरुत्' इत्यमरः। 'गोधुगाभीरबल्लवा' इत्यमरः। 'कुञ्जेषु' इति पाठस्तु नातिरुचिरः। नागव्याघ्रप्रधाना अटव्यस्तासु—**नागव्याघ्राटवीषु**=गजशार्दूलदुर्गमकाननेषु। 'शार्दूलद्वीपिनौ व्याघ्रे' इत्यमरः। **श्वपचपुरविदः**=भिल्लपल्लीमार्गादिविदः। 'सञ्चरन्तु' इति सम्बध्यते। क्वचित्तु **'व्याधा व्याघ्राटवीषु स्वपरपदविदः'** इति पाठः। तत्र स्वकीयपरकीयचरणचिह्नविदो व्याधाश्चरन्त्वित्यर्थः। परन्त्वत्र पाठे नात्र कश्चिच्चमत्कार इति नात्रास्माकमादरः। ये च **रन्ध्रेषु**=छिद्रेषु। पातालमार्गगुहागर्त्तादिषु। **अभिज्ञाः**=तत्त्वविदः। **ये वा सिद्धव्यञ्जनाः**—सिद्धानां व्यञ्जनं चिह्नं—जटादिकं येषान्ते तथाभूताः। सिद्धवेषधारिणः। **ते च**=ते वै। **चाराः**=गूढपुरुषाः। मुनीनां—निलयं मुनिनिलयं। मुनिनिलयं मुनिनिलयं प्रतीति **प्रतिमुनिनिलयं**=प्रतिमुनिगृहम्। **चरन्तु**=सञ्चरन्तु। स्रग्धरा वृत्तम् ॥ २ ॥

कीचड में, बालु प्रदेश में गुप्त पैरों के चिह्नों (खोज) को खूब पहिचानने वाले मल्लाह मांझी ('खोजी') लोग जाएं, सूखी लता आदि के समूह में (वनमें) पैर से दबी हुई लताओं को ठीक २ पहिचानने वाले ग्वाल ('ग्वालिया' 'चरवाहा') लोग जाएं। हाथी व बघेरा आदि हिंस्रजन्तुओं से परिपूर्ण वनों में कोल भीलों के गावों को जानने वाले, तथा दरी कन्दरा गुफा आदि को जानने वाले कोल भील लोग खोजें। और सिद्ध महात्माओं के वेष को धारण करने वाले जासूस बनवासी मुनि तपस्वियों की कुटियों में तथा आश्रमों में दुर्योधन को खोजें ॥ २ ॥

पुरुष—जो महाराज की आज्ञा।

१ व्याधा व्याघ्राटवीषु स्वपरपदविदो'। २ 'तेषु चाराः'।

युधिष्ठिरः—तिष्ठ । एवं च वक्तव्यः सहदेवः ।

ज्ञेया रहः शङ्कितमालपन्तः
सुप्ता रुगार्ताश्च, वने विचेयाः ।
त्रासो मृगाणां, वयसां विरावो
नृपाङ्कपादप्रतिमाश्च यत्र ॥ ३ ॥

एवञ्च=इदमपि । पाठान्तरे-अपरम्=अन्यदपि । ज्ञेया इति । रहः=एकान्ते । शङ्कितं=शङ्काकुलं शङ्काकरं च यथा स्यात्तथा । आलपन्तः=मिथो भाषमाणाः । परस्परं जल्पन्तः । ज्ञेयाः=चारयितव्याः । किमेते भाषन्ते इति तत्त्वतो ज्ञातव्याः । किञ्च—सुप्ताः=प्रसुप्ताः । रुजाऽऽर्ताः—रुगार्त्ताः=रोगपीडिताः । किञ्च एते वनप्रदेशा वने विचेयाः । के ते इत्यत आह—त्रास इति । पाठान्तरे मदिराया विधेयाः-वशीभूताः मदिराविधेयाः=सुरोन्मत्ताः । मदिरोन्मत्ताः । सदा मद्यप्रसक्ता इति वा । ज्ञेयाः=तत्त्वतो ज्ञातव्याः । निद्रारोगच्छलेन गूढः शत्रुरेवायमन्यो वेति जिज्ञासार्थं तत्सञ्चरणम् । रहस्याख्यानश्रवणार्थं वा । मदिरोन्मत्ता अपि कदाचिद्रहस्यं वमन्तीति धिया तदन्वेषणोपदेशः । किञ्च यत्र=यस्मिन् देशे, मृगाणां=हरिणादिवन्यपशूनाम् । त्रासः=उद्वेगः । स प्रदेशो विचेयो ज्ञेयो वेति सम्बध्यते । यत्र च वयसां=पक्षिणां । विरावः=आक्रन्दः । स विचेयो,ज्ञेय इति वा सम्बन्धः।मनुष्ये सन्निहिते हि भीरुस्वभावा मृगास्त्रस्यन्ति,पक्षिणो विरुवन्ति चेति तत्त्वम् । च=पुनः। यत्र=यस्मिन्देशे । नृपस्य येऽङ्काः मत्स्यच्छत्रध्वजकमलादयः, तदन्विताः पादप्रतिमाः=

युधिष्ठिर—ठहरो । सहदेव से यह और कहना कि—

जो लोग एकान्त में (गुप्त रूप से) शङ्कित भाव से बातचीत करते हों उनकी, सूते हुए लोगों की,एवं रोगियों की जाँच भी करना । बनमें भी जहाँ मृगों को त्रास

१ इदमपरं वक्तव्यः सहदेवः' । २ 'रुगार्त्ता मदिराविधेयाः' ।
३ 'प्रतिमा च' ।

पुरुषः—**यदाज्ञापयति देवः ।** (इति निष्क्रम्य, पुनः प्रविश्य सहर्षं) **देव ! पाञ्चालकः प्राप्तः ।**

युधिष्ठिरः—**त्वरितं प्रवेशय ।**

पुरुषः—(निष्क्रम्य, पाञ्चालकेन सह प्रविश्य) **एष देवः । उपसर्पतु पाञ्चालकः ।**

पाञ्चालकः—**जयतु जयतु देवः । प्रियमावेदयामि महाराजाय, देव्यै च ।**

चरणप्रतिकृतयः-**नृराऽङ्कपादप्रतिमाः**=राजचिह्नाङ्कितपादप्रतिच्छायाः स्युस्ते हि प्रदेशा विचेया ज्ञेया वेति सम्बन्धः । उपजातिर्वृत्तम् ॥ ३ ॥

सहर्षं=सानन्दं । **पाञ्चालकः**=तन्नामा राजपुरुषः। पञ्चालदेशोद्भवो धृष्टद्युम्नदूतो वा । एतेन पाञ्चालीपक्षपातिता तत्र सूच्यते । देवः । तिष्ठतीतिशेषः। **पाञ्चालक इति ।** भवान् पाञ्चालको देवसमीपं गच्छत्वित्यर्थः । आवेदयामि=

हो तथा पक्षियों का कोलाहल हो उस स्थान की भी जांच करना । [पास में कहीं मनुष्य के छिपे रहने पर हरिण भयभीत व त्रस्त-से हो जाते हैं, इसी तरह पक्षी भी पास में किसी मनुष्य के रहने पर शब्द किया करते है] और राज चिह्नों से अङ्कित पैरों के चिह्न [खोज] जहाँ हो उस स्थान की भी खूब जांच कराना ।। ३ ।।

पुरुष—जो आज्ञा महाराज की ।

[जाकर, पुनः आकर हर्षपूर्वक]

महाराज ! युद्ध भूमि से पाञ्चालक (दूत) आया है ।

युधिष्ठिर—जल्दी ले आ ।

(बाहर जाकर पाञ्चालक के साथ आकर)

पुरुष—पाञ्चालक ! ये महाराज बैठे हैं, उनके पास जावो ।

पाञ्चालक—(पास में जाकर) महाराज की जय हो । महाराज ! आपको और देवी द्रौपदी को मैं हर्ष का वृत्तान्त सुनाता हूँ ।

---

१ कच्चिन्न ।

युधिष्ठिरः—**भद्र पाञ्चालक ! कच्चिदासादिता तस्य दुरात्मनः कौरवाधमस्य पदवी ?।**

पाञ्चालकः—**देव[1] ! न केवलं पदवी, स एव[2] दुरात्मा देवीकेशपाशस्पर्शपातकप्रधानहेतुरुपलब्धः।**[3]

युधिष्ठिरः— [सहर्षं पाञ्चालकं परिष्वज्य] **साधु भद्र ! साधु। भवता प्रियमावेदितम्। अथ दर्शनगोचरं गतः ?।**

पाञ्चालकः—**देव ! समरगोचरं पृच्छ।**

विज्ञापयामि। देव्य=द्रौपद्यै। आसादिता=प्राप्ता। **दुरात्मनः**=दुष्टस्वभावस्य। पदवी=मार्गः। देवीति। देव्याः=द्रौपद्याः, केशपाशस्य=कचसमूहस्य, कबरीभारस्य यः स्पर्शः, स एव पातकं=पापं, तस्य प्रधानो हेतुः=द्रौपदीधर्षणप्रधानहेतुः। 'पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे' इत्यमरः। **उपलब्धः**=आसादितः। आवेदितम्=कथितम्। अथेति प्रश्ने। **समरेति**। किं समरस्य=युद्धस्य, गोचरं=विषयं, गतः=प्राप्त इति पृच्छेत्यर्थः। भीमसेनस्तेन सह युद्धमपि प्रवर्त्तितवानिति यावत्। **साशङ्कमिति**। स्वजनत्वादाशङ्का। 'पापाशङ्की

युधिष्ठिर—पाञ्चालक ! क्या उस दुरात्मा कौरवाधम दुर्योधन (के खोजों) का कहीं पता चला ?।

पाञ्चालक—महाराज ! उस[के खोजो (पैरों के चिन्हों)] का पता क्या, द्रौपदीके केशों को पकड़ने का प्रधान हेतु वही दुष्ट पातकी दुर्योधन ही मिल गया।

युधिष्ठिर—वाह ! तूने बडे आनन्द का समाचार सुनाया। हाँ, तो क्या वह दिखाई दिया ?।

पाञ्चालक—महाराज ! दिखाई दिया यह क्या पूछते हैं, अबतो उसके युद्ध के विषय में ही पूछिये। (अर्थात् अब तो उनका युद्ध हो रहा है)।

---

१ कच्चिन्न।   २ 'सोऽपि'।

३ देवीकेशाम्बराकर्षणमहापातकप्रधानहेतुः'।

द्रौपदी—([1]सभयं) कहं समरगोअरो वट्टइ मे णाहो ? ।
[कथं समरगोचरो वर्तते मे नाथः ?] ।

युधिष्ठिरः—(साशङ्कं) सत्यं समरगोचरो मे वत्सः ? ।

पाञ्चालकः—सत्यम् । किमन्यथा वक्ष्यते महाराजाय ।

युधिष्ठिरः—

[2]त्रस्तं विनापि विषयादुरुविक्रमस्य
चेतो विवेकपरिमन्थरतां प्रयाति ।
जानामि [3]चोद्यतगदस्य वृकोदरस्य
सारं रणेषु [4]भुजयोः, परिशङ्कितश्च [5] ॥ ४ ॥

स्वजनः' इत्युक्तेः । समरगोचरः=युद्धप्रसक्तः । अन्यथा=असत्यम् । किमिति । नैवेत्यर्थः ।

त्रस्तमिति । उरुः विपुलो विक्रमः=पराक्रमो यस्यासौ तस्यापि । विपुलबलस्यापि पुंसः । चेतः=मनः कर्तृभूतम् । विषयात् विनापि=त्रासहेतोर्विनापि, भयस्थानं विनापि । विवेके परिमन्थरं=मन्दं विवेकपरिमन्थरं,तस्य भावस्तत्तां—विवेकपरिमन्थरतां=विवेकशून्यताम् । प्रयाति=गच्छति । विदुषो बलिनश्चापि पुंसो मनोऽनवसरेऽपि त्रासं प्रतिपद्यते, निश्चितेऽपि विषये वृथैव शङ्कते, निर्णयं च नाधिगच्छतीत्याशयः । केचित्तु—विषयात्=त्रासकारणाद्विनाऽपि त्रस्तं=

द्रौपदी—(भय पूर्वक) हैं ! क्या मेरे प्राणनाथ युद्ध कर रहे हैं ? ।

युधिष्ठिर—(आशङ्का पूर्वक) क्या यह सत्य है कि मेरा वत्स भीम युद्ध कर रहा है ? ।

पाञ्चालक—महाराज ! बिलकुल सत्य है । क्या आप से मिथ्या भी कहा जा सकता है ? ।

युधिष्ठिरः—(आशङ्का प्रकट करते हुए)

वीर व पराक्रमी पुरुष का भी चित्त विनाकारण के भी त्रस्त हो विवेक में

१ साशङ्कम् । २ 'भ्रातुर्विनापि विजयादुरुविक्रमस्य' ।
३ 'चोद्धत' । ४ 'विजये' । ५ 'परिशङ्कितं वा' ।

([1]द्रौपदीमवलोक्य) अयि सुक्षत्रिये !

गुरूणां बन्धूनां क्षितिपतिसहस्रस्य च पुरः
पुराऽभूदस्माकं नृपसदसि योऽयं परिभवः।
प्रिये ! प्रायस्तस्य द्वितयमपि पारं गमयेति[2]
क्षयः प्राणानां नः[3] कुरुपतिपशोर्वाद्य[4] निधनम् ॥ ५ ॥

प्रकृत्यैव भीतं मे चेतो विवेकपरिमन्थरतां=भीमो जेष्यति नवेति निर्णये मन्दतां, प्रयाति। ऊरुविक्रमस्येति च वृकोदरस्य विशेषणमित्याहुः। विवेक-मान्द्यमेव स्वस्य दर्शयति-**जानामीति**। रणे=युद्धे, उद्यता=उत्तोलिता गदा येन तस्य-उद्यतगदस्य=उत्तोलितगदस्य। उद्धतगदस्येति पाठे उत्थापित-गदस्य, अमोघगदस्येत्यादिरर्थः। वृकोदरस्य = भीमस्य, भुजयोः = बाह्वोः, सारं=बलं, जानामि=अवगच्छामि। तस्य पराक्रमं जानामि, निश्चितस्तस्य विजय इति च दृढं जानामि,तथापि परिशङ्कितश्च = शङ्कापर्याकुलोऽस्मीत्यर्थः।

भीमस्य महाबलस्य बाह्वोर्बलं जानतोऽपि मे चेतः शङ्काकुलमिति भावः। **विजये परिशङ्कितश्चेत्यपि** पाठः। विजये = भीमस्य विजये। 'परिशङ्कित'मिति पाठे तु मनोविशेषणं तद्बोध्यम्। वसन्ततिलका वृत्तम् ॥ ४ ॥

गुरूणामिति। हे प्रिये ! **गुरूणां**=वृद्धानां द्रोणादीनां, **बन्धूनां**=बान्धवानां धृतराष्ट्रादीनाञ्च, **क्षितिपतिसहस्रस्य**=राजसहस्रस्य च। **पुरः**=अग्रे। **पुरा**=द्यूतावसरे। नृपस्य सदः नृपसदः, तस्मिन्-**नृपसदसि**=राजसभायाम्। **अस्माकं**=भवत्या अस्माकञ्च। **योऽयं**=संप्रत्यपि बुद्धिस्थत्वेन पुर इव स्फुरन्

मन्थर (भय से विह्वल हो विवेक शून्य) हो जाता है। देखो मैं गदाधारी भीमसेन के युद्ध में पराक्रम को अच्छी तरह जानता हुआ भी, (उसकी भुजाओं का तथा गदा का महत्त्व व बल जानता हुआ भी) शङ्कित हो रहा हूँ ॥ ४ ॥

(द्रौपदी को देखकर) अयि वीर क्षत्राणी !

गुरुजन, बन्धु-बान्धव, एवं हजारों राजा महाराजाओं के सामने उस समय

१ 'द्रौपदीमवलोक्य मुखादस्या बाष्पं नयति।

२ 'गमयतु'। ३ 'प्राणानां वा'। ४ 'पशोस्तस्य'।

अथवा कृतं संदेहेन ।

नूनं तेनाऽद्य वीरेण प्रतिज्ञाभङ्गभीरुणा ।
बध्यते केशपाशस्ते, स चास्याकर्षणक्षमः[1] ॥ ६ ॥

पाञ्चालक ! कथय कथय, कथमुपलब्धः स दुरात्मा कस्मि-

परिभवः=तिरस्कारः, केशाकर्षणादिप्रभवः परिभवः । **अभूत्**=जातः । **तस्य**=परिभवस्य । **द्वितयमपि**=द्वयमप्येतत् । **पारम्**=अन्तम् । **गमयति**=प्रापयिष्यति । गमयत्विति तु शोभनः पाठः । **अद्य**=अस्मिन् दिवसे, **नः**=अस्माकं सर्वेषाम् । **प्राणानां**=जीवितानाम् । **क्षयः**=विनाशः । भीमपराजये सति सर्वेषां नः प्राणविनाश इति भावः । **वा**=अथवा । **कुरुपतिपशोः**=कुरुराजाधमस्य दुर्योधनस्य । **निधनं**=मरणं वा । इदं द्वयमेव पराभवस्याऽन्तं करिष्यति । वयं वा मृताः सन्तः परिभवान्मुच्यामहे, दुर्योधनविनाशाद्वैरनिर्यातनाद्वा परिभवान्मुच्यामहे इति भावः । सन्देहश्चायं प्रदर्शितः । शिखरिणी वृत्तम् ॥ ५ ॥

कृतम्=अलम् । **नूनमिति** । **अद्य**=अद्यैव, **प्रतिज्ञाभङ्गभीरुणा**=स्वप्रतिज्ञाभङ्गभीरुणा । तेन **वीरेण**=शूरेण भीमसेनेन । **ते इव**=तव । **केशपाशः**=केशसमूहः । **नूनं**=निश्चितं । **बध्यते**=निबध्यते । भन्त्स्यते इत्यर्थः । **च**=किञ्च ।

(जूवे के समय) जो राजसभा में हमारा अपमान हुआ था उस अपमानरूपी समुद्र से हमें दो ही बातें आज पार कर सकती हैं, या तो हमारी सब की मृत्यु, या उस कौरवपशु दुर्योधन का विनाश । अर्थात् आज या तो दुर्योधन मरेगा या हम सबको मरना होगा तभी हमारे अपमान का बदला चुकेगा ॥ ५ ॥

अथवा इसमें सन्देह करने की आवश्यकता नहीं है । निश्चय ही—

आज वह प्रतिज्ञाभङ्गभीरु भीमसेन आकर तेरे खुले हुए केशोंको बान्धेगा, और तेरे केशों के खींचने वाले उस पापी दुर्योधन को भी निगृहीत करेगा (मारेगा) ॥ ६ ॥

पाञ्चालक ! कहो वह दुरात्मा दुर्योधन कहाँ और कैसे मिला ? । और

---

१ 'कर्षणे प्रभुः' ।

न्नुदेशे किं वाऽधुना प्रवृत्तमिति ?।

द्रौपदी—भद्द ! कहेहि कहेहि।

[भद्र ! कथय कथय]।

पाञ्चालकः—शृणोतु देवो देवी च। अस्तीह देवेन हते मद्राधिपतौ शल्ये, गान्धारराजकुलशलभे[2] सहदेवशस्त्रानलप्रविष्टे, सेनापतिनिधननिराक्रन्द[3]विरलयोधोज्झितासु समरभूमिषु, रिपुबलपराजयोद्धतवेल्लित[4]विचित्रपराक्रमासादितविमुखाराति-

अस्य=केशपाशस्य। आकर्षणक्षम=आकर्षणपरः। दुर्योधन इति यावत्। उपलब्धः=प्राप्तः। पूर्वस्य अस्तीत्यस्य वाक्यस्यान्ते सम्बन्धः। देवेन=युधिष्ठिरेण भवता। गान्धारराजकुलस्य शलभः=शकुनिः। पाठान्तरे- गान्धारराजः—शकुनिरेव शलभः=पतङ्गस्तस्य। कुले=वंशे। तद्बन्धुबान्धववर्गे इत्यर्थः। सहदेवस्य शस्त्राण्येव अनलो वह्निः, दाहकत्वात्। तं—सहदेवशस्त्रानलं प्रविष्टः, तस्मिन्—सहदेवानलप्रविष्टे। किञ्च सेनापतेः— शल्यस्य निधनेन=वधेन, निराक्रन्दाः=निःशब्दाः, मूकाः, नितरां रुदन्तो वा, विरलाः=स्वल्पाः, ये योधाः=सेनाभटाः, तैरुज्झितासु=रहितासु। सेनापतिवधविह्वलशोकमौनयोधविरलासु शून्यासु। यद्वा सेनापतिवधविकलरुदत्स्वल्पयोधावशिष्टासु। समरभूमिषु=युद्धभूमिष्वित्यर्थः। रिपोर्बलानां=सेनानां,पराजयेन= भङ्गेन, उद्धतं=उद्धतं,प्रवृद्धमितियावत्,यत् वेल्लितं=कुटिलतीव्रगतिविशेषः,तेन विचित्रेण=विशिष्टेन, पराक्रमेण=विक्रमेण च, आसादितानि=समाक्रान्तानि

इस समय वह क्या कर रहा है ?।

द्रौपदी—भद्र ! कहो, शीघ्र कहो।

पाञ्चालक—महाराज व महारानीजी ! आप लोग ध्यान से सुनें। जब आपने मद्रराजशल्य को मार दिया,और गान्धार(कन्धार)राजकुल का शलभ(पतङ्ग) शकुनि जब सहदेव के शस्त्ररूपी अग्नि में जल गया, और युद्धभूमि जब सेनापति के मारे

१ कचिन्न। २ 'गान्धारराजशलभकुले सहदेवानलं प्रविष्टे'।

३ 'नराक्रन्द'! ४ 'चलितविचित्र'। 'वलिगतविचित्र'।

चक्रासु धृष्टद्युम्नाधिष्ठितासु च युष्मत्सेनासु, प्रनष्टेषु कृपकृतवर्माश्वत्थामसु, तथा दारुणामपर्युषितां प्रतिज्ञामुपलभ्य कुमारवृकोदरस्य न ज्ञायते क्वापि प्रलीनः स दुरात्मा कौरवाधमः ।

युधिष्ठिरः—ततस्ततः ? ।

द्रौपदी—अयि ! परदो[2] कहेहि[1] ।

[अयि ! परतः कथय] ।

विमुखारातीनां=पलायमानशत्रूणां, चक्राणि=यूथानि याभिस्तासु। शत्रुपराजयप्रवृद्धगतिविशेष-पराक्रमाक्रान्त-पलायमानशत्रुसेनास्वित्यर्थः। यद्वा उद्धतं यथा स्यात्तथा वेल्लितः=उच्छलितः (प्रवृद्धो) यः पराक्रम इत्येवमर्थः। धृष्टेति। द्रुपदतनयाधिष्ठितास्वित्यर्थः । प्रनष्टेषु=कुत्रापि निलीय स्थितेषु । पलायितेषु इति यावत् । तथा=तादृशीम् । दारुणां=भीषणाम् । अपर्युषिताम्=असाध्यपूर्णाम् । कुमारवृकोदरस्य=युवराजभीमसेनस्य । प्रतिज्ञां=स्ववधप्रतिज्ञाम् । उपलभ्य=श्रुत्वा । प्रलीनः=प्रच्छन्नः । कौरवाधमः=कौरवकुलाधमो दुर्योधनः ।

जाने से एवं बचे खुचे योद्धाओं के उदास हो चले जाने से शून्य (सून-सान) सी हो गई थी, और जब आपकी सेनाएँ धृष्टद्युम्न के सेनापतित्व में शत्रुओं (कौरवों) की सेना के पराजय से उत्साहित हो झपट कर तिर्छे दौड़कर—भागते हुए शत्रुओं के झुण्ड को अद्भुत पराक्रम से पकड़ रही थी, और जब कृप कृतवर्मा अश्वत्थामा कहीं इधर-उधर चले गए थे, उस समय कुमार भीमसेन की अभी तक पूरी नहीं हुई दुर्योधन के मारने की दारुण (नवीन) प्रतिज्ञा सुनकर वह दुरात्मा एवं कौरवों में अधम राजा दुर्योधन कहीं जाकर छिप (भाग) गया ।

युधिष्ठर—तब क्या हुआ ? ।

द्रौपदी—(उकता कर) अरे ! जल्दी आगे कहो ।

---

१ कच्चित्र । २ 'अग्गदो' [अग्रतः] ।

पाञ्चालकः—अवधत्तां देवो देवी च । ततश्च भगवता वासुदेवेनाधिष्ठितमेकरथमारूढौ कुमारभीमार्जुनौ[1] समन्तात्समन्तपञ्चकं पर्यटितुमारब्धौ, तमनासादितवन्तौ च । अनन्तरं [च[2]] दैवमनुशोचति मादृशे भृत्यवर्गे, दीर्घमुष्णं च निःश्वसति कुमारबीभत्सौ[3], जलधरसमयनिशासंचारिखद्योतप्रकरपिङ्गलैः[4] कटाक्षैरादीपयति गदां नाथे वृकोदरे, यत्किंचनकारितामधिक्षिपति विधेर्भगवति नारायणे, कश्चित्संविदितः कुमारस्य

पूर्वोपात्तस्य अस्तीत्यस्य अत्रैवान्वयो विधेयः । इत्यस्तीति वार्थः । अवधत्तां=सावधानतया शृणोतु । देवः=राजा युधिष्ठिरः । देवी=राजमहिषी द्रौपदी । अधिष्ठितम्=परिचालितम् । एकरथम्=एकमेव रथम् । पर्यटितुं=भ्रमितुम् । च=पुनः । तम्=दुर्योधनम् । अनासादितवन्तौ=अप्राप्तवन्तौ । अनन्तरं=तदनन्तरम् । बीभत्सौ=अर्जुने । जलधरसमयः=प्रावृट्कालः।तस्य या निशा=रात्रिः, तस्यां संचारिणो ये खद्योताः=ज्योतिरिङ्गणाः,तेषां यः प्रकरः=समूहः,तद्वत्पिङ्गलैः=कपिशैः । गदां=स्वगदाम् । आदीपयति=उद्द्योतयति सति । द्विगुणितकान्तिमतीं कुर्वति सतीति यावत् । विधेः=दैवस्य । यत्किञ्च करोति तच्छीलो यत्किञ्चकारी, तस्य भावस्तां यत्किञ्चकारितां=यदृच्छाकारिताम् । अनुचितकारिताम् । नारायणे=वासुदेवे । अधिक्षिपति=निन्दति सति । विदितः = ज्ञातवृत्तान्तः । कुमारमारुतेः=युवराजभीमसेनस्य ।'अन्तिकमुपेत्य वाचा कथितवा'नित्यन्वयः।

पाञ्चालक—महाराज ! और महारानीजी ! आप सावधान हो सुनिए । तब भगवान् श्रीकृष्ण से अधिष्ठित (चलाए गए) एक रथ पर बैठ कर कुमार भीम और अर्जुन दोनों (और हम लोग) समन्तपञ्चक के चारों ओर उसे खोजने लगे ।

---

१ 'कुमारभीमार्जुनौ वयं च समन्तात्समन्तपञ्चकं पर्यटितुमारब्धास्तमनार्यमनासादितवन्तश्च' । इति तु काचित्कः पाठो युक्तः । २ क्वचिन्न । ३ 'कुमारे' । ४ 'तडित्प्रकरपिङ्गलैः' ।

मारुतेरुज्झितमांसभारः, प्रत्यग्रविशसितमृगलोहितैर्लोहित-चरणनिवसनस्त्वरमाणोऽन्तिकमुपेत्य पुरुषः, परुषश्वास-ग्रस्तार्द्धश्रुतवर्णानुमेयपदया वाचा कथितवान्-देव कुमार !, 'अस्मिन्महतोऽस्य सरसस्तीरे द्वे पदपद्धती समवतीर्ण-

अन्येतु-कुमारमारुतेर्विदितः=परिचितः, अन्तिकं-तत्समीपमुपेत्य वाचा कथितवानित्यर्थमाहुः। उज्झितो मांसस्य भारो येनासौ तथाविधः। अवतारितमांसभार इत्यर्थः। प्रत्यग्रं=सद्यः विशसितो=हतो यो मृगः=हरिणः, तस्य लोहितेन=रुधिरेण, लोहितौ चरणौ, निवसनं=वस्त्रं च यस्यासौ तथा-विधः। सद्योहतमृगरुधिरबिन्दुलोहितचरणनिवसेनो व्याधः कश्चिदित्यर्थः। त्वरमाणः=धावमानः। पुरुषः=पुमान्। व्याधः। कश्चिदित्यस्याऽत्रैव सम्बन्धः। तारः=उच्चैस्तरो यः श्वासः, तेन ग्रस्ताः निगीर्णाः अत एव अर्द्धश्रुताः= अस्पष्टा ये वर्णाः, तैरनुमेयानि पदानि यस्यां सा तया-परुषश्वासग्रस्तार्द्धश्रुत-वर्णानुमेयया=त्वराविलुप्तवर्णया। वाचा=गिरा। 'अस्य महतः सरसः अस्मिन्

परन्तु उस पापी का कुछ भी पता नहीं लगा। तब हमारे ऐसे नौकर-चाकर जब दैव की विमुखता की निन्दा कर रहे थे, कुमार अर्जुन जब लम्बी २ गर्म साँस छोड़ रहे थे, कुमार भीमसेन भी जब वर्षाऋतु की रात में उड़नेवाले खद्योतो ('पट्-बीजना' 'जुगनू') के समूह की तरह पीली २ चिनगारियाँ जिनसे निकल रही हैं ऐसे कटाक्षों से (लाल २ अङ्गार की तरह,तथा जिनसे चिनगारिया निकल रही हैं ऐसी आँखों से) अपनी स्वयं प्रकाशमान गदाको और भी प्रकाशित कर रहे थे, भगवान् कृष्ण भी विधाताके अट-पट (ऊट-पटांग, अनुचित) करनेके स्वभावकी निन्दा कर रहे थे--उसी समय कुमार भीमसेन का परिचित कोई व्याध (बहेलिया) जिसने शिरपर से मांसका बोझा उतार दिया है,तथा ताजा मारे गए हरिणोंके रुधिर से जिसके पैर और वस्त्र लाल हो गए हैं-भागता हुआ पासमें आकर हाँफते २ टूटे फूटे शब्दों में (टूटती हुई वाणी से) कहने लगा कि-"हे कुमार ! इस बड़े सरोवर

१ कश्चिन्न। २ 'पदपद्धती जलमवतीर्णे'।

प्रतिबिम्बे । तयोरेका स्थलमुत्तीर्णा, न द्वितीया । परत्र कुमारः प्रमाण'मिति ।

ततः ससंभ्रमं प्रस्थिताः सर्वे वयं तमेव पुरुषं पुरस्कृत्य[१] । गत्वा च सरस्तीरं, परिज्ञायमानसुयोधनपद्लाञ्छनां पदवीमासाद्य भगवता वासुदेवेनोक्तं—'भो वीर वृकोदर ! जानाति किल सुयोधनः सलिलस्तम्भनीं विद्याम् । तन्नूनं तेन त्वद्भयात्सरसीमेनामधिशयितेन भवितव्यम् ।' एतच्च वचनमुपश्रुत्य

तीरे' इत्यन्वयः । पदपद्धती=पदपङ्क्ती । समवतीर्णः=अङ्कितः प्रतिबिम्बः= अनुकृतिर्ययोस्त तथाभूते । (खोज साफ२ उभडे हुए है) । तयोः=पदपद्धत्योः । एका=पदपङ्क्तिः । परत्र=इतः परं किङ्कर्त्तव्यमित्यत्र विषये । देवः= भवान् । प्रमाण=प्रभुः । यथोचितं कुर्वित्यर्थः । इति=इति कथितवान् । परिज्ञायमानं सुयोधनस्य पदयोर्लाञ्छनं यस्यां सा ताम् । पदवीं=वीथीम् । आसाद्य=प्राप्य । किलेति प्रसिद्धौ । सलिलं स्तभ्यते ययातां–सलिलस्तम्भनीं नाम । विद्यां=मन्त्रविद्याम् । रहस्यम् । तत्=तस्मात् । नूनं=निश्चयेन ।

(झील) मे दो आदमियों के पैरोंके साफ २ निशान (खोज) उतरते हुए साफ २ मालूम हो रहे हैं । उनमें से एक आदमी के पैरो के चिह्न तो वापिस लौटकर ऊपर आए है, पर दूसरी पदपङ्क्ति वापिस नही आई है । आगे जो उचित हो सो कुमार (आप) जाने । मुझे जो मालूम था सो मैने आपको सुना दिया ।

तब हम लोग उस आदमी को साथ ले बड़ी शीघ्रता से उस सरोवर के किनारे गए । और दुर्योधन के राजचिह्नों (पद्म छत्र आदि लक्षणों) से उसके पैरो के चिह्नों (खोजों) को पहिचान कर भगवान् श्रीकृष्णने कहा कि–'हे वीर भीमसेन ! दुर्योधन को जल स्तम्भन करने की विद्या मालूम है, अतः मालूम होता है–तुमारे भय से वह इस सरोवर में छिपकर कहीं बैठा हुआ है'। भगवान् कृष्णका ऐसा वचन

१ 'पुरस्कृत्य सरसस्तीरम् । परिज्ञाय सुयोधनपदलाञ्छितां पदवीं कथितं भगवता वासुदेवेन' । २ कच्चिन्न ।

रामाऽनुजस्य[1] सकलदिक्प्रपूरितातिरिक्तम् ,उद्भ्रान्तसकलसलिलचारिचक्रं,त्रासोद्धतनक्रग्राहम् ,आलोडितं सरःसलिलं। भैरवं च गर्जित्वा कुमारवृकोदरेणाभिहितम्-अरे रे वृथाप्रख्यापिता-

तेन=दुर्योधनेन । त्वद्भयात्=भीमभयात् । अभिशयितेन=सुप्तेन । रामानुजस्य=बलरामानुजस्य श्रीकृष्णस्य । सकलेत्यादिविशेषणानि सरः सलिले भैरवगर्जने च योजयितुं शक्यानि। तत्रादौ सरःसलिले यथा-सकलानां दिशां यत्प्रपूरितं=प्रपूरणं, ततोऽतिरिक्तम्=अवशिष्टम् । ततोऽपि उर्वरितं । दिङ्मुखपूरणादप्यवशिष्टम् । सकलदिङ्निकुञ्जेति पाठेऽपि-सकलदिग्वर्त्तिनिकुञ्जपूरणादप्यवशिष्टमित्यर्थः । भैरवगर्जनपक्षे-सकलदिङ्मण्डलपूरणोर्वरितम् । अतिमहदित्यर्थः । उद्भ्रान्तं=त्रस्तं, सकलसलिलचारिणां=सर्वजलचराणां, चक्रं=समूहो यस्मिन् यस्माद्वेति विग्रहः । त्रस्तजलचरशकुन्तमित्यर्थः । इदं सलिले गर्जितं च तुल्यं विशेषणम् । त्रासेनोद्धता नक्रा यस्माद्यस्मिन् वा तत्तथाभूतम् । नक्रो जलजन्तुभेदः (नाका) । नक्रग्राहमिति पाठे ग्राहो=मकरः । (मगरमच्छ) । आलोड्य=सर्वतो विलोड्य । विलोडनं च दुर्योधनान्वेषणायैवेति ध्येयम् । गर्जनपक्षे सकलदिगित्यादिकानि क्रियाविशेषणानि बोध्यानि । भैरवं=भीषणं । वृथा=मुधैव, प्रख्यापितं यत् अलीकं=मिथ्या·

यह सुनकर-भीमने उस सरोवरको ऐसा आलोडित किया कि उसका जल किनारे के (कुञ्जो) को बहाता हुआ बाहर बहने लगा, जलचरपक्षियों के समूह भी घबडा कर इधर उधर उडने लगे,डरके मारे नाका मगर घडियाल आदि जलके हिंस्रजन्तु इधर उधर दौडने लगे । और इस प्रकार सरोवर के जलको आलोडन कर वह भीमसेन भयङ्करध्वनि से गर्जा । जिससे सारा जङ्गल गूंज उठा, जलचर पक्षिगण घबडा कर उडने लगे, ग्राह नक्र आदि जन्तु भी त्रस्त हो गए । और इस प्रकार गर्ज

१ 'बलाऽनुजस्य सकलदिङ्निकुञ्जपूरितातिरिक्तमुद्भ्रान्तसलिलचरशकुन्तकुलं, त्रासोद्धतनक्रग्राहमालोड्य सरःसलिलं, भैरवं च गर्जित्वा' ।

लीकपौरुषाभिमानिन् ! पाञ्चालराजतनयाकेशाम्बराकर्षण-महापातकिन् ! धृतराष्ट्रापसद !

जन्मेन्दोरमले कुले व्यपदिशस्यद्यापि धत्से गदां,
मां दुःशासनकोष्णशोणितसुराक्षीबं रिपुं भाषसे ।
दर्पान्धो मधुकैटभद्विषि हरावप्युद्धतं चेष्टसे,
मत्त्रासान्नृपशो ! विहाय समरं पङ्केऽधुना लीयसे ! ॥७॥

पौरुषं=वृथापराक्रमः, तेन अभिमानी=गर्वोद्धुरस्तत्सम्बुद्धौ रूपम् ।

पाञ्चालेति । द्रुपदराजपुत्रीद्रौपदीकेशवसनाकर्षणमहापापिन्धृतराष्ट्रपुत्राधम दुर्योधनेत्यर्थः ।

जन्मेन्दोरिति । अद्यापि=सम्प्रत्यपि । इन्दोः=चन्द्रमसः। विमले=निर्मले, कुले=कुरुकुले । जन्म=उत्पत्तिम् । व्यपदिशसि=कथयसि । आत्मानं चन्द्रवंशोद्भवं संप्रत्यपि कथयसीत्यर्थः। अद्यापि=सम्प्रत्यपि । गदां धत्से=धारयसि । किञ्च दुःशासनस्य कोष्णं=मन्दोष्णं ('कोष्णं कवोष्णं मन्दोष्ण'मित्यमरः) । यत् शोणितं=रुधिरं, तदेव सुरा=मद्यं, तया क्षीबः=मत्तः, तं । दुःशासनकवोष्णरुधिरपानमत्तम् । मां=भीमम् । रिपुं=शत्रुम् । भाषसे=कथयसि । मधुकैटभद्विषि=मधुकैटभासुरहन्तरि । हरौ=वासुदेवेऽपि । दर्पान्धः=अभिमानान्धः सन्, उद्धतम्=उच्छृङ्खलं यथा स्यात्तथा । चेष्टसे=आचरसि । नृपशो=हे नराधम । मत्त्रासात्=मद्भयात् । समरं=युद्धं । विहाय=परित्यज्य । अधुना पङ्के=कर्दमे । लीयसे=निलीय तिष्ठसि ! । अनुचितमेतत्तवाभिमानिन इत्याशयः । शार्दूलविक्रीडितं वृत्तम् ॥ ७ ॥

कर भीमसेन बोला कि—अरे झूठे बलका घमण्ड करने वाले, अभिमानी, द्रौपदीके केश व वस्त्र पकड कर खीचने वाले, पापी, दुर्योधन !

अभी तक पवित्र चन्द्र वंशमें ही तूं अपना जन्म बताता है, अभी तक तूं गदा भी धारण किए हुए है, दुःशासन के गर्मागर्म रुधिररूपी मदिरा को

---

१ कचिन्न । २ 'जन्मेन्दोर्विमले' ।

अपि च-भो मानान्ध ! कौरवाधम ! [1]

पाञ्चाल्या मन्युवह्निः[2] स्फुटमुपशमितप्राय एवं[3] प्रसह्य
प्रोन्मुक्तैः[4] केशपाशैर्हतपतिषु मया कौरवान्तःपुरेषु ।
भ्रातुर्दुःशासनस्य स्रवदसृगुरसः पीयमानं निरीक्ष्य
क्रोधात्किं भीमसेने विहितमसमये यत्त्वयाऽस्तोऽभिमानः ?॥

मानेन=गर्वेण, अन्ध=अन्धवद्विवेकविकल । पाञ्चाल्या इति । मया= भीमेन । प्रसह्य=बलात्कारेण । कौरवान्तःपुरेषु=कौरवशुद्धान्तःस्त्रीजनेषु । हताः पतयो येषान्तेषु । प्रमीतभर्तृकासु सत्सु । प्रोन्मुक्तैः=हतभर्तृकतया उन्मुक्तबन्धनैः । केशपाशैः=केशसमूहैर्हेतुभूतैः । पाञ्चाल्याः=द्रौपद्याः । मन्युः= क्रोधः। उपशमितप्राय एव=शान्तप्राय एव जातः। भ्रातुर्दुश्शासनस्य उरसः= वक्षस्थलात् । स्रवत्=क्षरत् । रुधिरं=रक्तं । पीयमानं=मया पीयमानं । निरीक्ष्य=दृष्ट्वाऽपि । क्रोधात्=कोपात् । मयि=भीमसेने । किं विहितं=त्वया किमपकृतम् । यत्=येन । असमये=अनवसरे । (त्वया) अभिमानः=दर्पः । अस्तः=दूरीकृतः । अभिमानं त्यक्त्वा युद्धात्प्रपलाय्य किमिति निलीय स्थितोऽसीत्यर्थः । स्रग्धरा वृत्तम् ॥ ८ ॥

पीकर मस्त होने वाले मुझ भीमसेन को अभी तक तूं शत्रु भी कहता है, मधुकैटभ के शत्रु भगवान् श्रीकृष्ण के प्रति अभी तक उद्धतभाव से आचरण भी करता है, तो फिर हे नरपशो ! मेरे डर से युद्ध छोड कर इस सरोवर में आकर क्यों छिपा है ? । आ, हिम्मत हो तो युद्ध कर ॥ ७ ॥

और भी-हे अभिमान से अन्धे, घमण्डी दुर्योधन--

द्रौपदी का क्रोध रूपी अग्नि मेरे द्वारा बलपूर्वक जिनके पति मारे गए हैं ऐसी कौरवों की विधवा रानियों के खुले हुए केशपाशों से शान्तप्राय ही है । (अर्थात् तुमारे भाइयों की विधवा स्त्रियों को देखकर द्रौपदी का शोक कुछ कम पड गया है) । और भी अपने भाई दुःशासन के वक्षस्थल से गर्मागर्म निकले हुए रुधिरको तुमारे सामने ही पीनेवाले मुझ भीमसेन का तुमने क्रोधकर क्या कर

१ क्वचिन्न २ 'क्रोधवह्निः' । ३ 'एव प्रसह्य' । ४ 'व्यासक्तैः' ।

द्रौपदी--**णाह ! अवणीदो मे मण्णू जइ पुणो वि सुलहं दंसणं भविस्सदि ।**

[नाथ ! अपनीतो मे मन्युर्यदि पुनरपि सुलभं दर्शनं भविष्यति]।

युधिष्ठिरः—**कृष्णे ! नाऽमङ्गलानि व्याहर्तुमर्हस्यस्मिन्काले । भद्र ! ततस्ततः ? !**

पाञ्चालकः—**देव ! ततश्चैवं भाषमाणेन वृकोदरेणावतीर्य [वीर्य]-क्रोधोद्धतं भ्रमितगदापरिघपाणिनासहसैवोल्लङ्घिततीरम्**

मन्युः=क्रोधः । 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः । **सुलभं**=शीघ्रमेव सुलभम् । **दर्शनं**=त्वद्दर्शनम् । **कृष्णे**=हे द्रौपदि । **अमङ्गलानि**=अमङ्गलसूचकानि 'यदि पुनः सुलभ'मित्यादीनि । **व्याहर्तुं**=वक्तुम् । **अस्मिन्काले**=युद्धावसरे । **नार्हसि**=न योग्यासि । **देव**=हे राजन् । **अवतीर्य**=सरसि समवतीर्य । [वीर्येण] क्रोधेन च उद्धतं यथा स्यात्तथेति क्रियाविशेषणमेतत् । क्रोधेनोच्छृङ्खलम् । गदा परिघ इव गदापरिघः,स पाणौ यस्यासौ, तेन। गदापरिघौ वा पाणौ यस्येति विग्रहः । **परिघः**=मुद्गरः । (मोगरी) । उल्लङ्घितं तीरं येन

लिया है, (मुझको तुमने क्या दण्ड दिया है ?) जो इस प्रकार अनवसर में ही अभिमान छोडकर तुम यहाँ छिपे बैठे हो ? ॥ ८ ॥

द्रौपदी-हे नाथ ! मेरा शोक तो तुमने दूर ही कर दिया है, यदि तुमारा पुनः दर्शन सुलभ होगा तो । (अर्थात् आपका यदि दर्शन सुलभ होगा तो मैं अपना सभी शोक दूर हुआ समझूंगी) ।

युधिष्ठिर--हे द्रौपदि ! इस प्रकार सन्देह युक्त निराशा भरी अमङ्गलमय बातें इस समय मत कहो । हाँ भद्र ! (भाई) तब क्या हुआ ? ।

पाञ्चालक—तब महाराज ! इस प्रकार क्रोध से उद्धत वचन बोलते हुए भीमसेन ने उस सरोवर में उतर कर अपनी लम्बी २ भुजाओं से गदा और परिघ

१ 'क्वचिन्न' । २ 'क्रोधोद्धतभ्रमितगदा' ।

उत्सन्ननलिनीवनम्, अपविद्धमूर्च्छितग्राहम्, उद्भ्रान्तमत्स्यशकुन्तम्, अतिभैरवारवभ्रमितवारिसञ्चयम्, आयतमपि तत्सरः समन्तादालोडितम्।

युधिष्ठिरः—**भद्र! तथापि किं नोत्थितः?।**

पाञ्चालकः—**देव! कथं[1] नोत्थितः[2]?—**

तत्–**उल्लङ्घिततीरं**=समतिक्रान्ततटम्। **उत्सन्नं**=विनष्टं, नलिनी **वनं**=कमलिनीवनं यस्य येन वा तत्। **अपविद्धाः**=बहिर्विक्षिप्ताः, **मूर्च्छिताः**=विगतचेतनाः, ग्राहा येन यस्य वा तत्। **उद्भ्रान्ताः**=परित्रस्ताः मत्स्याः **शकुन्ताः**=पक्षिणश्च यस्मिंस्तत्तथाभूतम्। **अतिभैरवेण**=नितरां भीषणेन, **आरवेण**=शब्देन, (अतिभैरवारवं यथा स्यात्तथा भ्रमित इति वा)। भ्रमितो वारिणः **चयो**=जलसमूहो यस्य तत्। **आयतमपि**=विस्तृतमपि। 'वृकोदरेणावतीर्य तत्सरः समन्तादालोडित' मिति योजना।

भद्र=हे साधो। **नोत्थितः**=सलिलाद्बहिर्नायातः किमिति प्रश्नः।

(मुद्गर) हाथ में लेकर उस सरोवर को ऐसा विलोडित किया कि सहसा उस सरोवर में भीषण बाढ़सी आगई, उसका जल उछलकर तीर पर बहने लगा, कमलिनो का वन उखड़ गया, उसके जलचर ग्राह (मगर मच्छ घड़ियाल आदि) मूर्च्छित हो बाहर फेंक दिए गए, मत्स्य और पक्षीगण हड़बड़ाकर इधर उधर भागने व उड़ने लगे और बड़े ही भीषण वेग व शब्द से जल घूमने लगा।

युधिष्ठिर--भद्र! तब भी क्या वह दुर्योधन बाहर नहीं निकला?।

पाञ्चालक--महाराज! क्यों नहीं निकला?। प्रचण्ड क्रोध से जिसके

१ क्वचिन्न। २ 'देव! ततश्चैवं भाषमाणेन वृकोदरेण वीर्यक्रोधोद्धतभ्रमितभीषणगदापाणिना सहसैवोल्लङ्घिततीरमुत्सन्ननलिनमाविद्धमूर्च्छितग्राहमुद्भ्रान्तसमस्तशकुन्तमतिभैरवं वेगभ्रमितवारिसञ्चयवमायतमपि सरः समन्तादवलोडितम्।'

त्यक्त्वोत्थितः सरभसं सरसः स मूल-
मुद्भूत[3]कोपदहनोग्रविषस्फुलिङ्गः।
आयस्तभीमभुजमन्दरवेल्लनाभिः
क्षीरोदाम्बुधेः[3] सुमथितादिव[4] कालकूटः॥ ९॥

युधिष्ठिरः—साधु सुक्षत्रिय ! साधु।

त्यक्त्वेति। सरभसं=सत्वरम्। सवेगम्। सरसः—मूलं=तलम्। पाठान्तरे—सलीलं=सहेलम्। सावज्ञमिति वा। सलिलं=सरोवरजलं। त्यक्त्वा=परित्यज्य। विहाय। उद्भूत=प्रवृद्धो यः कोपाग्निः स एव उग्रविषस्य=महोग्रविषस्य (तादृशविषेण वा) स्फुलिङ्गो=यत्रासौ तथा। प्रोद्भूत-क्रोधाग्निविषकणावलीढः। 'त्रिषु स्फुलिङ्गोऽग्निकणः' इत्यमरः। उद्भूताः—कोपदहन एव उग्रविषं तस्य स्फुलिङ्गा यस्येति वा विग्रहः। आयस्ताः=क्षिप्ताः ये भीमाः=शत्रुभीषणाः,भुजाः=देवासुरबाहवः,तैर्या मन्दरस्य वेल्लना=भ्रमणं, ताभिः—आयस्तभीमभुजमन्दरवेल्लनाभिः=परिभ्रमितदेवासुरमहाबाहुकृत-मन्दराचलपरिभ्रमणैः। यद्वा व्यापृतदेवासुरभुजैर्मन्दराचलवेल्लनाभिश्चेति विग्रहः। सुमथितात्=विलोडितात्। पाठान्तरे—सुमथनात्=विलोडनात्।

क्षीरोदधेः=क्षीरार्णवात्। कालकूट इव=महाविषमिव। हलाहलमिव। उत्थित.=सरसः समुत्थितः। परेतु—'त्यक्त्वोत्थितः सरभसं सरसः स मूल'मित्येव पाठो युक्तः। क्षीरोदधेः कालकूट इव सरसः सकाशादुत्थित इति च तत्र योजनेत्याहुः। 'सरभसं सलिलं सलील'मिति पाठस्तु व्याख्यात एवाऽस्माभिः। वसन्ततिलका वृत्तम्॥ ९॥

सुक्षत्रिय=वीरक्षत्रिय। प्रतिपन्नः=तेन स्वीकृतः। प्रारब्ध इति यावत्।

शरीर से भीषण अग्नि की विषमय चिनगारियाँ निकल रही हैं ऐसा—वह दुर्योधन उस सरोवर के तल को छोड़कर उसी प्रकार निकला, जिस प्रकार मथन कार्य में चलती देव दानवों की भीम भुजाओं से घुमाए गए मन्दराचल के घूमने से क्षीरसमुद्र से ज्वालामय भीषण हलाहल विष निकला था॥ ९॥

युधिष्ठिर—वाह ! वीर क्षत्रिय ! वाह।

१ 'सरभसं सलिलं सलील'। २ 'मुद्भ्रान्त'। ३ 'क्षीरोदधेः'। ४ 'सुमथनादिव'।

द्रौपदी—**पडिवण्णो समरो ण वा ?।**
[प्रतिपन्नः समरो न वा ?] ।

पाञ्चालकः—**उत्थाय च तस्मा[1]त्सलिलाशयात्करयुगलोत्तम्भित-तोरणीकृतभीमगदः कथयति स्म-'अरे[2] रे मारुते ! किं भयेन प्रलीनं दुर्योधनं मन्यते भवान् ? । मूढ ! अ[3]निहतपाण्डुपुत्रः प्रकाशं लज्जमानो विश्रमितुमध्यवसितवानस्मि पातालम् ।' एवं चोक्त[4]वति वासुदेवकिरीटिभ्यां द्वावप्यन्तःसलिलं निषिद्ध-समरारम्भौ[5] स्थलमुत्तारितौ [भीमसुयोधनौ] । आसीनश्च**

सलिलाशयात्=सरोवरात् । **उत्थाय**=समुत्थाय । **करयुगलेन-उत्तम्भिता**=समुत्तोलिता-अतएव-~~तोरणीकृता=बहिर्द्वारस्वरूपकृता~~ **भीमा**=भयङ्करी गदा येनासौ तथाभूतः । परिभ्रमितभीमगद इत्यर्थः। **प्रलीनं**=प्रच्छन्नम् । **अनिहत-पाण्डुपुत्रः**=अविनाशितपाण्डवः । **प्रकाशं**=प्रकटं । बहिः । **लज्जमानः**=लोकाद्व्रीडामनुभवन् । **अध्यवसितवान्**=निश्चितवान् । **उक्तवति**=दुर्योधने कथयति सति । **वासुदेवकिरीटिभ्यां**=कृष्णाऽर्जुनाभ्याम् । **अन्तःसलिलं**=जलमध्ये । **निषिद्धः समरारम्भो**-युद्धारम्भो ययोस्तौ ।

आसीनश्च=स्थितश्च । विशीर्णानि रथानां सहस्राणि यस्मिंस्तत्तथा-

द्रौपदी—उसने युद्ध करना स्वीकार किया कि नहीं ? ।

पाञ्चालक—उस सरोवर से निकलकर दोनों हाथों से अपनी भीषण गदा को शिर पर अर्द्ध गोलाकार घुमाता हुआ वह दुर्योधन यों बोला कि—अरे भीमसेन ! क्या तूं दुर्योधन को डर से छिपा हुआ समझता है ? ।

अरे मूर्ख ! अभी तक मैंने पाण्डवों को नहीं मारा है इससे लज्जित हो मैं बाहर मुख दिखाने में असमर्थ था, अतः पाताल में जाकर विश्राम ले रहा था ।

जब उसने ऐसा कहा तब कृष्ण और अर्जुन जल में युद्ध करने से मनाकर उन दोनों को जल में से स्थल (भूमि) पर खींच कर ले आए । तब कौरवराज

१ 'चाऽस्मात्' । २ क्वचिन्न । ३ 'अनभिहत' ।
४ 'चोक्तं' । ५ 'समरसमारम्भौ' ।

कौरवराजः क्षितितले गदां निक्षिप्य विशीर्णरथसहस्रं, निहत-कुरुशतगजवाजिनरसहस्रकलेवरसंमर्दसंपतद्गृध्रकङ्कजम्बुकम्, उत्सन्नसुयोधनबलम्, अस्मद्वीरमुक्तसिंहनादसंवलितसमरतूर्यम्, अबान्धवम्, अमित्रबान्धवमकौरवं रणस्थानमवलोक्यायतमुष्णं च निःश्वसितवान्। ततश्च वृकोदरेणाभिहितम्—'अयि भोः कौरवराज! कृतं बन्धुनाशदर्शनमन्युना। मैवं विषादं कृथाः— 'पर्याप्ताः पाण्डवाः समरायाऽहमसहाय' इति। [किञ्च-]

भूतम्। निहतानां कुरूणां शतं, गजानां वाजिनाम्=अश्वानां, नराणां च सहस्राणि तेषां, तत्सङ्ख्याकानि वा, कलेवराणि, तैर्यः संमर्दः=सङ्घट्टः, तत्र सम्पतन्तो गृध्राः कङ्काः जम्बुकाश्च=मांसाशिपक्षिविशेषा यत्र तत्तथाभूतम्। बहुसहस्रशवनिपतद्गृध्रादिदूषितमित्यर्थः। उत्सन्नेति। विनष्टप्रपलायित-दुर्योधनसैन्यमित्यर्थः। अस्मादिति। अस्मदीयसेनावीरोच्चरितसिंहनाद-मिलिततूर्यशब्दान्वितम्। अबान्धवं=बान्धवरहितम्। अमित्रबान्धवं= शत्रुजनाकीर्णम्। शत्रुवर्गबान्धवान्वितमिति वा। अकौरवं=कौरवशून्यम्। आयतं=दीर्घम्। बन्धुनाशदर्शनजेन शोकेन, कृतम्=अलमित्यर्थः।

पर्याप्ताः=बहवः। ससहायाः। असहायः=एकाकी। इति=इत्येवं, विषादं=

दुर्योधन ने पृथ्वी पर गदा पटक कर—जहाँ हजारों रथ जिसमें इधर उधर टूटे हुए पडे हैं, और मारे गए सौ कौरवों की तथा हजारों हाथी घोडे मनुष्यों की इधर उधर पडी हुई लाशों पर जहाँ गृध्र और कङ्क पड रहे हैं, कौरवों की सेनाएं जिससे भाग गई है, जहाँ हमारे वीरों द्वारा छोड़े गए सिंहनाद के साथ ही साथ युद्ध की तुरही (नगाड़ा) बज रही है, जहाँ उसका कोई बन्धु अवशिष्ट नहीं रहा है, जहाँ सभी भाई बन्धु सखा सुहृद् मारे गए, कौरवों से शून्य ऐसी युद्धभूमि को देखकर लम्बी

१ क्वचिन्न। २ 'कुरुसहस्र'। ३ 'नरशत'। ४ 'पतित'।
५ 'मुत्सन्नयोधं'। ६ 'सिंहनादमपमित्र'।
७ 'कौरवसङ्ग्रामस्थानमवलोक्य'। ८ 'सोऽहमसहायः'। ९ क्वचिन्न।

पञ्चानां मन्यसेऽस्माकं यं सुयोधं सुयोधन ! ।
दंशितस्या[1]ऽऽत्तशस्त्रस्य तेन तेऽस्तु रणोत्सवः ॥ १० ॥
इत्थं श्रुत्वाऽसूया[2]न्वितां दृष्टिं कुमारयोर्निक्षिप्योक्तवान्धार्तराष्ट्रः[3] ।
कर्णदुःशासनवधात्तुल्यावेव युवां मम ।
अप्रियोऽपि प्रियो योद्धुं त्वमेव प्रियसाहसः ॥ ११ ॥

दुःखम् । माकृथाः=माकार्षीः । यतः—पञ्चानामिति । हे सुयोधन ! अस्माकं= पाण्डवानां मध्ये यं सुयोधं=सुखेन योध्यं मन्यसे तेन सह दंशितस्य=कृत-सन्नाहस्य । वर्मितस्य । आत्तशस्त्रस्य=गृहीतशस्त्रस्य । ते=तव । रणोत्सवः= युद्धमहोत्सवः । अस्तु=भवतु ॥ १० ॥

कुमारयोः=भीमार्जुनयोः । कर्णेति । युवां=भीमार्जुनौ । कर्णवधादर्जुनः, दुःशासनवधाच्च भीमः । तुल्यावेव=युवां तुल्यावेव वैरिणौ । अपकारकारित्वस्य तुल्यत्वात्तुल्यत्वमित्याशयः । तथापि हे भीम ! अप्रियोऽपि=द्वेष्योपि, प्रियं साहसं यस्यासौ—प्रियसाहसः=महासाहसरसिकः । त्वमेव=भवानेव । योद्धुं=द्वन्द्वयुद्धं कर्तुम् । प्रियः=मम अभीष्टः । 'त्वयैव साहसपरायणेन योत्स्ये' इत्यर्थः ॥ ११ ॥

गर्म सांस छोड़ी । तब भीमसेन ने कहा कि--अहो कौरवराज ! आपने बन्धु बान्धवों के मरने को देखकर शोक मत करो । और 'पाण्डव बहुत हैं मैं इकला हूँ' ऐसा विषाद (दुःख) भी मत करो । क्यों कि--

हे दुर्योधन ! तुम कवच पहिन लो । शस्त्र ले लो, और हमारे पांच भाइयों में से जिससे युद्ध करना चाहो उसीसे तुम द्वन्द्व युद्ध कर सकते हो ।

ऐसा सुनकर भीम व अर्जुन पर तिरस्कार युक्त नजर फेंककर दुर्योधन कहने लगा--हे भीमसेन ! अर्जुन ने मेरे प्रिय मित्र कर्ण को मारा है, तुमने मेरे भाई दुःशासन को मारा है, अतः तुम दोनों ही मेरे बराबर ही वैरी हो । परन्तु तुम बड़े साहसी हो, अतः तेरे से ही मैं युद्ध करना चाहता हूँ । अर्थात् युद्ध के लिए तुम्हें ही पसन्द करता हूँ ॥ ११ ॥

१ 'वर्मितस्या' । २ 'इत्थञ्च श्रुत्वा किञ्चिदश्रुपातान्वितां दृष्टिं' । ३ क्वचिन्न ।

-इत्युत्थाय च[1] परस्परक्रोधा[2]धिक्षेपपरुषवाक्कलहप्रस्ता[3]वितघोर-सङ्ग्रामौ, विचित्रै[4]र्विभ्रमभ्रमितगदापरिभासुरभुजदण्डौ, मण्डलै-र्विचरितुमारब्धौ भीमदुर्योधनौ। अहं च[1] देवेन चक्रपाणिना देवसकाशमनुप्रेषितः। आह च देवो देवकीनन्दनः—'अपर्यु-षितप्रतिज्ञे च मारुतौ प्रनष्टे कौरवराजे, महानासीन्नो विषादः। संप्रति पुनर्भीमसेनेनासादिते सुयोधने निष्कण्टकीभूतं भुवन-

परस्परेति। परस्परं क्रोधेन य **अधिक्षेपः**=आक्षेपः,तेन **परुषः**=क्रूरः, कठोरो, यो **वाक्कलहः**=झकटकः (झगडा) तेन **प्रस्तावितः**=प्रवर्त्तितो, **घोरः**=भयानकः सङ्ग्रामो युद्धं याभ्यान्तौ तथाभूतौ। आदौ ताभ्यां क्रोधः प्रकटितः, ततोऽधिक्षेपः, ततः कठोरो वाक्कलहः कृतः, ततो युद्धं प्रवृत्तमिति युद्धप्रवृत्ति-क्रमोऽत्र प्रदर्शितो वेदितव्यः। विचित्रेण **विभ्रमेण**=विलासेन। लीलया। वेगेन, त्वरया वा, प्रकारविशेषेण वा, भ्रमिता या गदा सैव परिघः, (गदा परिघ इवेति वा, गदा च परिघश्च ताविति वा) तेन **भासुरौ**=शोभितौ भुजदण्डौ ययोस्तौ। '**गदापरिभासुरभुजदण्डौ**' इति क्वचित्पाठः। 'चित्रगदा-परिघभासुरभुजभरौ'इति च पाठान्तरम्। **मण्डलैः**=प्रकारविशेषैः। करणभेदैः। ('पैंतरा' 'पटा' 'दांव पेंच')। **चक्रपाणिना**=वासुदेवेन। **देवसकाशं**=त्वत्समीपम्। **मारुतौ**=वायुपुत्रे भीमे। **अपर्युषितप्रतिज्ञे**=अपूर्णप्रतिज्ञे सति। **कौरवराजे**=दुर्योधने। **प्रनष्टे**=अदर्शनं गते। अदृष्टे। पलायिते सति। **नः**=अस्माकम्। **सम्प्रति**=इदानीन्तु। **आसादिते**=प्राप्ते। लब्धे। **निष्कण्टकीभूतं**=

इस प्रकार परस्पर क्रोध एवं आक्षेप (दोषारोपण) तथा कड़े शब्दों से लड़ते-झगड़त हुए उन दोनों का (क्रमशः) घोर सङ्ग्राम प्रारम्भ हुआ। विचित्र गदारूपी परिघों से शोभित भुजदण्ड वाले वे भीम और दुर्योधन पैंतरा बदल २ कर दाव पेंच दिखाते हुए चक्कर काटने लगे। और मुझे भगवान् चक्रपाणि श्रीकृष्णने आपके पास भेजा है। और भगवान् ने कहा है कि—दुर्योधन के भागकर

१ क्वचिन्न। २ 'क्रोधाक्षेप'। ३ 'प्रसारित'।
४ 'चित्रगदापरिघभासुरभुजभरौ मण्डलैर्विहर्तुमारब्धौ'।

तलं परिकलयतु भवान् । अभ्युदयोचिताश्च[1] प्रवर्त्यन्तामनवरतंमङ्गलसमारम्भाः[2] । कृतं संदेहेन ।

पूर्यन्तां सलिलेन रत्नकलसा[3] राज्याभिषेकाय ते
कृष्णाऽत्यन्तचिरोज्झिते च कबरीबन्धे करोतु क्षणम् ।
रामे घोरकुठारभासुरकरे[3] क्षत्रद्रुमोच्छेदिनि[4],
क्रोधान्धे च वृकोदरे परिपतत्याजौ कुतः संशयः ?॥

शत्रुशून्यम् । निःसपत्नम् । परिकलयतु=निश्चिनोति । अभ्युदयोचिताः=विजययोग्याः । समृद्धिसमुचिताः । अभ्युदयावसरयोग्याः । अनवरतं=निरन्तरम् । मङ्गलसमारम्भाः=उत्सवाः । शुभा मङ्गलगीतवाद्यादिक्रियाः । सन्देहेन = भीमसेनविजयविषयकेण सशयेन ।

समारम्भप्रकारमेवाह—पूर्यन्तामिति । ते=तव युधिष्ठिरस्य । राज्याभिषेकाय=राज्येऽभिषेचनाय । रत्नकलसाः=नानारत्नघटिताः कलसाः । पूर्यन्तां=तीर्थजलैर्भ्रियन्ताम् । अत्यन्तचिरेण=भूयसा कालेन, उज्झिते=उन्मुक्ते । विगलितबन्धे । दुर्योधनकृताऽपमानेन हि द्रौपद्या केशबन्धनं परित्यक्तमासीत् । कबरीबन्धे=केशवेशबन्धननिमित्तं । निमित्तसप्तमीयम् । कृष्णा=द्रौपदी । क्षणम्=उत्सवम् । केशवेशबन्धोत्सवमिति यावत् । करोतु = विदधातु । यतः—घोरेण कुठारेण = परशुना, भासुरः=प्रदीप्तः

छिप जाने से भीमसेन की प्रतिज्ञा अधूरी ही रह गई थी उस समय तो हम सब बड़े दुःखी व विषण्ण हो गए थे। पर अब तो भीमसेनने दुर्योधन को खोज निकाला है। अतः अब आप त्रैलोक्य को निष्कण्टक हुआ ही समझें । और अभ्युदयकालोचित मङ्गल महोत्सव प्रारम्भ करावें । और उस उत्सवको अनवरत चलने दें । आप विजय के विषय में सन्देह न करें । और—

अब तो आपके राज्याभिषेक के लिए रत्नके कलशों को जलसे भरवाइए । द्रौपदी भी अपने बहुत दिनों से खुले हुए केशों के जूड़े को फिर से बान्धने का

१ 'चिताश्चानवरतं प्रवर्त्यन्तां समारम्भाः' । २ 'कलशाः' ।
३ 'शात' । ४ 'द्रुमच्छेदिनि' ।

द्रौपदी—(सबाष्पं) **जं देवो त्तिहुअणणाहो भणादि[1] तं कहं अण्णहा हुविस्सदि ।**

[यद्देवस्त्रिभुवननाथो भणति तत्कथमन्यथा भविष्यति] ।

पाञ्चालकः—**न केवलमियमाशीः, असुरनिषूदनस्यादेशोऽपि ।**

युधिष्ठिरः—**को हि नाम भगवता[2] संदिष्टं विकल्पयति ? ।**

करो यस्यास्यौ तस्मिन्-घोरकुठारभासुरकरे=भीषणपरशुप्रदीप्तपाणौ । क्षत्रा एव द्रुमाः, तानुच्छेत्तुं शीलमस्य तस्मिन् । क्षत्रियवंशविनाशशीले । **रामे**= परशुरामे । आजौ =युद्धे । **परिपतति**=निविष्टे सति । प्रवृत्ते सति । **च**= किञ्च । **क्रोधान्धे**=कोपान्धे । **वृकोदरे**=भीमे च । [आजौ-युद्धे, **परिपतति**= संप्रवृत्ते सति] । कुतः **संशयः**=क्व विजयसन्देहावसरः=सर्वथा भीमस्य विजयः सिद्ध एवेत्याशयः ॥ १२ ॥

त्रिभुवननाथः=त्रैलोक्याधिपतिः । **देवः**=भगवान्कृष्णः । **आज्ञापयति**= निर्दिशति । 'भणती'ति पाठान्तरम् । **अन्यथा**=विपरीतम् । नान्यथा भविष्यतीत्यर्थः । **इयं**=सन्देशविषयीभूता । **असुरनिषूदनस्य**=दैत्यारेः श्रीकृष्णस्य । **आशीः**=शुभाशंसनम् । शुभानुध्यानम् । **आदेशः**=आज्ञा । **भगवता**=सर्वशक्तिमता । **संदिष्टं**=वाचिकं सन्देशम् । समुपदिष्टम् ।

महान् उत्सव मनावे । क्योंकि तीखे कुठारको धारणकर क्षत्रिय वंशको उच्छन्न करने के लिए युद्धमें जानेवाले भगवान् परशुरामजी के विषय में, तथा क्रोधान्ध भीमसेन के युद्ध में उतर पड़ने पर कहिए सन्देह कहां हो सकता है ? ॥ १३ ॥

द्रौपदी—(आंखों मे आंसू भरकर) जो त्रिभुवननाथ भगवान् वासुदेव कहते हैं वह अन्यथा कैसे हो सकता है ।

पाञ्चालक—यह (भीम विजय महोत्सव का प्रारम्भ करना) केवल भगवान् का आशीर्वाद ही नहीं है किन्तु यह उनकी आज्ञा भी है ।

युधिष्ठिर—भगवान् के आदेश (आज्ञा) को कौन टाल सकता है ? । (दर्वाजे की ओर देखकर) दर्वाजे पर कौन है ? ।

---

१ 'आणवेदि' । २ 'भगवतां' ।

कः कोऽत्र भोः ?।

(प्रविश्य)

कञ्चुकी—**आज्ञापयतु देवः।**

युधिष्ठिरः—**[कञ्चुकिन् !] देवस्य देवकीनन्दनस्य बहुमानाद्वत्सस्य मे विजयमङ्गलाय प्रवर्त्यन्तां तदुचिताः समारम्भाः।**

कञ्चुकी—**यथाऽऽज्ञापयति देवः।** (सोत्साहं परिक्रम्य) **भो भोः संविधातृणां पुरस्सराः! यथाप्रधानमन्तर्वैश्मिका, दौवारिकाश्च !**

आदिष्टं । कथितं वा । विकल्पयति=वितर्कयति । क इति । अत्र=द्वारि कः । कः पुरुषोऽस्तीत्यर्थः । **बहुमानात्**=नितरामादरणीयत्वात् । तदादिष्टस्य कथमप्यन्यथयितुमशक्यत्वात् । **मे वत्सस्य**=भीमस्य विजयमङ्गलाय=शत्रुविजयमङ्गलमहोत्सवाय । **समारम्भाः**=प्रारम्भाः । मङ्गलोचिताः क्रियाः । गीतवाद्यादिकं प्रवर्त्ततामिति यावत् । **यथेति** । यथाऽऽज्ञापयति तथा गत्वा-कथयामि, तथैव भविष्यतीत्यर्थः । **परिक्रम्य**=किञ्चिद्गत्वा । **संविधातृणां**=राजकार्यकर्तृणाम । [अफसर] । राजपुरोहितादीनामिति तु जगद्धरः । **पुरस्सराः**=अग्रेसराः । **अन्तर्वैश्मिकाः**=अन्तःपुराधिकृताः । अन्तःपुररक्षकाः । **यथाप्रधानं**=प्रधानमनतिक्रम्य । प्रधानसहिता इत्यर्थः ।

कञ्चुकी—(भीतर आकर) महाराज आज्ञा करें ।

युधिष्ठिर—भगवान् देवकीनन्दन श्रीकृष्णचन्द्र के बहुमान पूर्ण आदेश से, वत्स भीमसेन के विजय की कामना से, मङ्गलमय समयोचित महोत्सव प्रारम्भ किए जाएँ ।

कञ्चुकी—(बड़े उत्साह से बाहर जाकर) अहो ! कार्यकर्त्ताओं के प्रधानों ! महलके सिपाहियोंके मुखिया लोगो ! एवं प्रधान द्वारपालो ! अपने भुजाओंके बलसे कौरवों द्वारा किए गए अपमानरूपी समुद्रको पार करने वाले, दुर्द्धर प्रतिज्ञाओं के भार को पूरी तरह से निभाने वाले, दुर्योधन के सौ भाइयों को धुनकर फेकने

---

१ कश्चिन्न ।　　२ 'अन्तर्वेश्मनि' । अन्तपुरे इत्यर्थः ।

एष खलु भुजबलपरिक्षेपोत्तीर्णकौरवपरिभवसागरस्य, निर्व्यूढ-[1]दुर्वहप्रतिज्ञाभारस्य, सुयोधनाऽनुजशतोन्[2]मूलनप्रभञ्जनस्य, दुशासनोरःस्थलविदलननरसिंहस्य, [दुर्योधनोरुस्[3]तम्भभङ्ग-विनिश्चितविजयस्य] बलिनः प्राभञ्जनेर्वृकोदरस्य [सहोदर]-स्नेहपक्षपातिना मनसा मङ्गलानि कर्तुमाज्ञापयति देवो युधिष्ठिरः । (आकाशे **) किं ब्रूथ—'सर्वतोऽधिकतरमपि प्रवृत्तं**

दौवारिकाः=द्वारनियुक्ताः । भुजेति । भुजबलस्य परिक्षेपेण=प्रदर्शनेन, प्रयोगेण वा, **उत्तीर्णः**=समुत्तीर्णः परिभवसागरो येन तस्य । स्वभुजवीर्य-समुत्तीर्णपरिभवाब्धेरित्यर्थः । **निर्व्यूढ**=सुतरां समुन्नीतः । **दुर्वहायाः**=वोढु-मशक्यायाः, **प्रतिज्ञायाः**=दुःशासनरुधिरपानदुर्योधनोरुभङ्ग दिरूपायाः, भारो येन तस्य । परिपूरितनिजप्रतिज्ञामहाभारस्येत्यर्थः । (निर्व्यूढ–निभाया गया)

दुर्योधनस्य यत् **अनुजानां**=भ्रातृणां, शतं, तस्य **उन्मूलने**=विनाशे, **प्रभञ्जनस्य**=महावातसदृशस्य । 'उद्धूननप्रभञ्जनस्येतिपाठे–**उद्धूननं**=विनाशः । 'प्रभञ्जनो महावातः' इत्यमरः । दुःशासनस्य यदुरःस्थलं, तस्य **विदलने**=विदारण, **नरसिंह इव**=नृसिंह इव, तस्य । दुर्योधनस्य ऊरुरेव स्तम्भः, (उरुःस्तम्भ इवेतिवा) तस्य **भङ्गेन**=विचूर्णनेन, विनिश्चितो विजयो यस्य तस्येत्यर्थः । **बलिनः**=पराक्रमशालिनः । प्रभञ्ज-नस्यापत्यं प्राभञ्जनिः, **तस्य**=**प्राभञ्जनेः**=मारुतपुत्रस्य । **वृकोदरस्य**=भीमस्य । **सहोदरपक्षपातिना**=भ्रातृपक्षपातिना । **चेतसा**=मनसा ।

(मारने) में प्रचण्ड वायुकी तरह, एवं दुर्योधन की जङ्घाओं को तोड़कर निश्चय ही विजय पानेवाले, बली वायुपुत्र, दुःशासन के वक्षः स्थलको फाड़ने में नृसिंह की तरह, अपने भाई भीमसेन की विजय कामना के लिए स्नेह युक्त मनसे मङ्गल महोत्सव करने के लिए महाराज युधिष्ठिर आप लोगों को आज्ञा देते हैं ।

---

१ 'दुर्द्धर' । २ 'द्धूनन' । ३ क्वचिन्न । ४ 'जयस्य' ।

किं नालोकयसि' ? इति । साधु पुत्रकाः ! साधु । अनुक्तहित-कारिता हि[1] प्रकाशयति मनोगतां स्वामिभक्तिम् ।

[युधिष्ठिरः[2]—आर्य जयन्धर !

कञ्चुकी—आज्ञापयतु देवः] ।

युधिष्ठिरः—गच्छ प्रियख्यापकं पाञ्चालकं पारितोषिकेण परितोषय ।

कञ्चुकी—यदाज्ञापयति देवः । (इति पाञ्चालकेन सह निष्क्रान्तः) ।

द्रौपदी—महाराअ ! किंणिमित्तं उण णाहभीमसेणेण सो दुराआरो भणिदो—'पञ्चाणं वि अम्हाणं मज्झे जेण दे रोअदि

आकाशे=शून्ये । स्वयमेव उत्तरं कल्पयतीत्यर्थः । सर्वतः=सर्वासु दिक्षु । अधिकतरं=नितराम् । प्रवृत्तं=प्रारब्धं गीतवाद्यादिमङ्गलं। किं=किमिति । अनु-कम्पिताः पुत्राः—पुत्रकाः=हे वत्साः। साधु=युक्तमनुष्ठितं भवद्भिः । अनुक्तमपि हितं कर्तुं शीलमस्यासौ—अनुक्तहितकारी, तस्य भावस्तत्ता, ताम् । अनाख्यात-स्वामिहितकारिताम् । मनोगतां=हृद्गताम् । जयन्धरेति कञ्चुकिसम्बोधनम् । प्रियख्यापकम्=अभीष्टसूचकम् । मङ्गलसन्देशहारिणम्। दुराचारः=दुर्वृत्तः। सः=

[आकाश में]—क्या कहते हो कि—"आपके कहने से पहिले ही मङ्गल कामना से चारों ओर मङ्गल महोत्सव हो रहे हैं । आप क्या इसे नहीं देख रहे हैं ?" । वाह ! मेरे प्यारे पुत्रो ! वाह ! विना कहे ही स्वामी के हितकार्य को करना हार्दिक स्वामी भक्तिको प्रकट करता है ।

युधिष्ठिर—आर्य जयन्धर !

कञ्चुकी—महाराज ! आज्ञा करिए ।

युधिष्ठिर—जाओ ! और प्रिय सन्देश को सुनाने वाले इस पाञ्चालक को पारितोषिक दे प्रसन्न करो ।

कञ्चुकी—जो आज्ञा महाराज की ।

[पाञ्चालक को साथ लेकर जाता है]

द्रौपदी—महाराज ! मेरे नाथ भीमसेन ने उस पापी दुर्योधन से ऐसा

१ 'कि वा नालोकयसि' । २ कचिन्न ।

तेण सह दे सङ्गामो होदु' त्ति। कहं णाम एदाणं मद्दीसुदाणं एकदरेण पत्थिदो सङ्गामो भवे तदो अच्चाहिदं भवे।

[महाराज ! किंनिमित्तं पुनर्नाथभीमसेनेन स दुराचारो भणितः—'पञ्चानामप्यस्माकं मध्ये येन ते रोचते तेन सह ते संग्रामो भवतु'इति?। कथं नामैतयोः माद्रीसुतयोरेकतरेण प्रार्थितस्तेन संग्रामो भवेत्ततोऽत्याहितं भवेत्]।

युधिष्ठिरः—कृष्णे ! एवं मन्यते जरासन्धघाती, हतसकलसुहृद्बन्धुवीरानुजराजन्यासु, कृपकृतवर्माश्वत्थामशेषास्वेकादशास्वक्षौहिणीष्वबान्धवः शरीरमात्रविभवः कदाचिदुत्सृष्टनिजाभिमानो धार्तराष्ट्रः परित्यजेदायुधं तपोवनं वा व्रजेत्सन्धिं वा

दुर्योधनः। उक्तः=अभिहितः। अस्माकं=पाण्डवानां मध्ये। तेन=दुर्योधनेन। माद्रीसुतौ=नकुलसहदेवौ। कथं नाम=कियत्। अतिमहदित्यर्थः। अत्याहितम्=अनर्थः। जरासन्धघाती=भीमसेनः। हताः सकलाः सुहृदः=मित्राणि, बन्धवः, वीरा, अनुजाः=कनिष्ठा भ्रातरः, राजन्याः=क्षत्रियाश्च यासां यासु वा ताः, तासु। अबान्धवः=बन्धुबान्धवविकलः। शरीरमात्रविभवः=कायमात्रवैभवः। उत्सृष्टः=त्यक्तः, निजोऽभिमानो

क्यों कहा कि—"हम पांचों में से जिस किसी से चाहो तुम लड़ सकते हो'। यदि कहीं उसने माद्रीपुत्रों (नकुल सहदेव) से युद्ध करने की इच्छा की होती तो फिर क्या होता ?। [अर्थात् बड़ा अनर्थ हो जाता]।

युधिष्ठिर—हे द्रौपदी ! कदाचित् भीमसेन का यह अभिप्राय था कि इसकी ११ अक्षौहिणी सेना में से सभी बन्धु बान्धव छोटे भाई व सामन्त राजा क्षत्रिय आदि मारे गए हैं, केवल—कृप, कृतवर्मा, अश्वत्थामा येही तीन ११ अक्षौहिणी में से बचे हैं, अतः बन्धु बान्धवों से रहित एकाकी यह दुर्योधन कहीं अपनें अभिमान को छोड़ कर शस्त्रों का परित्याग न करदे। कहीं विरक्त हो तपस्या करने न चला जाए, या अपने पिता धृतराष्ट्र के द्वारा सन्धि की भिक्षा न मांग

---

१ 'जइ मद्दीसुदाणं एकदरेण सहसङ्गम्मो तेण पत्थिदो भवे'।

पितृमुखेन याचेत, एवं सति सुदूरमतिक्रान्तः प्रतिज्ञाभारो भवेत्सकलरिपुजयस्येति। समरं प्रतिपत्तुं पञ्चानामपि पाण्डवामेकस्यापि नैव क्षमः सुयोधनः। शङ्के चाहं गदायुधं वृकोदरस्यैवाऽनेन। अयि सुक्षत्रिये! पश्य—

क्रोधोद्गूर्णगदस्य नास्ति सदृशः सत्यं रणे मारुतेः,
कौरव्ये कृतहस्तता पुनरियं देवे यथा सीरिणि।
स्वस्त्यस्तूद्धतधार्तराष्ट्रनलिनीनागाय वत्साय मे,
शङ्के तस्य सुयोधनेन समरं, नैवेतरेषामहम्॥ १३॥

येनासौ तथाभूतः। त्यक्तगर्व इत्यर्थः। **पितृमुखेन**=पितृद्वारा। **अतिक्रान्तः**=अतिवाहितः। विनाशितः। **प्रतिपत्तुं**=विजेतुम्। **क्षमः**=समर्थः। 'गदायुद्ध' मित्यस्य प्रवृत्तमिति शेषः। **अनेन**=भीमेन।

क्रोध इति। क्रोधेन उद्गूर्णा=उद्यता गदा येनासौ तस्य। क्रोधोत्थापितगदस्य। 'उद्गूर्णोद्यत' इत्यमरः। **मारुतेः**=वायुपुत्रस्य भीमस्य। **रणे**=युद्धे। **सत्यं**=सत्यमहं ब्रवीमि। यद्यपि। **सदृशः**=तुल्यः। **नास्ति**=कोऽपिनास्ति। **पुनः**=किन्तु। **कौरव्ये**=दुर्योधनं। **इयं**=प्रसिद्धा। **कृतहस्तता**=हस्तकौशलम्। शीघ्रप्रहारिता। अस्त्राभ्यासः। **देवे**=भगवति। **सीरिणि**=यथा बलभद्रे इव।

बैठे। कहीं ऐसा हुआ तो फिर मेरी प्रतिज्ञा का पूर्ण होना असम्भव होगा, तथा सब शत्रुओं के विजय की मेरी आशा विनष्ट ही हो जाएगी। इसलिए ही भीमसेन नें चाहे जिस भाई से युद्ध करने के लिए उसे ललकारा था। और पांचो पाण्डवों में से वह किसी से भी लड़ कर जीत नहीं सकता। (या भीमसेन को छोड़ कर वह दुर्योधन से दूसरे किसी से भी लड़ने को राजी नहीं होगा)। अतः मुझे ऐसी शङ्का है कि—भीम और दुर्योधन का ही गदा युद्ध हो रहा है। क्योंकि देख—

यद्यपि क्रोध से गदा को उठा कर युद्ध में विचरण करने वाले भीमसेन के समान

(नेपथ्ये)

तृषितोऽस्मि भोस्तृषितोऽस्मि, सम्भावयतु कश्चित्सलिलच्छायासम्प्रदानेन माम् ।

युधिष्ठिरः—(आकर्ण्य) **कः कोऽत्र भोः ? ।**

(प्रविश्य सत्वरं—)

कञ्चुकी—**आज्ञापयतु देवः ।**

'अस्ती'तिशेषः । 'देवस्य या सीरिण' इतिपाठेपि स एवार्थः । उद्धतो **यो धार्त्तराष्ट्रः=**दुर्योधनः, सैव **नलिनी=**कमलिनी, तस्या नाग इव–उद्धतधृतराष्ट्रनलिनीनागः, तस्मै । उद्धतदुर्योधनपद्मिनीसमुन्मूलनहस्तिने । **वत्साय=**अनुजाय । **स्वस्ति=**कल्याणम् । **अस्तु=**भवतु । **तस्य=**भीमस्य । सुयोधनेन **समरं=**=युद्धम् । अहं शङ्के । **इतरेषाम्=**अन्येषाम् । अर्जुनादीनाम् । अहं तेन युद्धं नाशङ्के इत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

सम्भावयतु=उपकरोतु । अनुगृह्णातु । सलिलं च छाया च सलिलच्छायम् । **सलिलस्य=**जलस्य, **छायायाः=**अनातपस्य च । विश्रामभुव इति यावत् । संप्रदानेन । **क इति** । द्वारि कोऽस्ति ? । योऽस्ति स इह आयातु

दूसरा कोई योद्धा नहीं हैं। परन्तु दुर्योधन भी गदा युद्ध में भगवान् बलरामजी की ही तरह अत्यन्त निपुण है, अर्थात् दुर्योधन की जोड़ भीमसेन से ही है, दूसरा उसकी बराबरी नहीं कर सकता है । मेरे वत्स, धृतराष्ट्र के पुत्रों को कमल की लता की तरह उखाड़ कर फेकने वाले, भीमसेन का भगवान् मङ्गल करें । उसीके साथ दुर्योधन का युद्ध हो रहा है ऐसी मुझे शङ्का है । क्योंकि दूसरों के साथ वह कभी युद्ध को स्वीकार करही नहीं सकता । (पहलवान अपने जोड़ी के पहलवान से ही लड़ता है, अपने से कमसे नहीं) ॥ १४ ॥

[नेपथ्य में]

अहो ! मैं बहुत प्यासा हूँ, बहुत प्यासा हूँ, कोई धर्मात्मा मुझे ठण्डा जल एवं छाया (विश्राम स्थान) प्रदान कर अनुगृहीत करे ।

युधिष्ठिर—(सुन कर) यहां कौन है ? ।

कञ्चुकी—(जल्दी से आकर) महाराज आज्ञा करें ।

१ कश्चिन्न ।

युधिष्ठिरः—ज्ञायतां किमेतत् ? ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रम्य पुनः प्रविश्य) देव ! क्षुण्मानतिथिरुपस्थितः ।

युधिष्ठिरः—शीघ्रं प्रवेशय ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः) ।

(तत प्रविशति मुनिवेषधारी चार्वाको नाम राक्षसः) ।

राक्षसः—(आत्मगतम्) एषोऽस्मि [चार्वाको नाम राक्षसः] सुयोधनस्य मित्रं पाण्डवान्वञ्चयितुं भ्रमामि ।

(प्रकाशम्) तृषितोऽस्मि, तृषितोऽस्मि । संभावयतु मां कश्चिज्जलच्छायाप्रदानेन ।

(इति राज्ञः समीपमुपसर्पति) ।

इत्यर्थः । 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इत्यमरः । छायेव सुखदत्वाच्छायेति विश्रामभूरिति वा । क्षुण्मान्=क्षुधार्त्तः। आत्मगतं=स्वगतम्। अभिवादये=आशीर्वादं देहीति विनतः प्रार्थये । अकालः=अनवसरः । समु-

---

युधिष्ठिर—देखो बाहर क्या बात है ? ।

कञ्चुकी—जो आज्ञा महाराज की । [बाहर जाकर पुनः भीतर आकर] महाराज ! एक भूखा-प्यासा अतिथि बाहर खड़ा है ।

युधिष्ठिर—जल्दी उसे भीतर ले आओ ।

कञ्चुकी—जो आज्ञा महाराज की । [जाता है] ।

[मुनिवेषधारी चार्वाक नामक राक्षस प्रवेश करता है] ।

राक्षस—[मनही मन] मैं दुर्योधन का मित्र चार्वाक पाण्डवों को धोखा देने के लिए घूम रहा हूँ । [प्रकट] मैं प्यासा हूँ, कोई मुझे जल एवं छाया (आश्रय) प्रदान कर अनुगृहीत करे ।

[ऐसा कहता हुआ राजा के पास जाता है] ।

---

१ 'क्षुन्मान्' । क्षुधाम्लानो' । २ कश्चिन्न । ३ 'भोः' ।

(सर्वे उत्तिष्ठन्ति)।

युधिष्ठिरः—(सहसोत्थाय) मुने ! अभिवादये ।

राक्षसः—अकालोऽयं समुदाचारस्य, जलप्रदानेन संभावयतु मां [भवान्[1]]।

युधिष्ठिरः—मुने ! इदमासनम्[2] । उपविश्यताम् ।

राक्षसः—(उपविश्य) ननु भवतापि क्रियतामासनपरिग्रहः।

युधिष्ठिरः—(उपविश्य) कः कोऽत्र भोः ? । सलिलमुपनय ।

(प्रविश्य गृहीतभृङ्गारः—)

कञ्चुकी—(उपसृत्य) महाराज ! शिशिरसुरभिसलिलसंपूर्णोऽयं भृङ्गारः, पानभाजनं चेदम् ।

दाचारस्य=शिष्टाचारस्य अभिवादनाशीर्वादादेः । सम्भावयतु=सत्करोतु ।

शिशिरेति=शीतलसुगन्धिजलपरिपूर्णो यं भृङ्गारः=जलपात्रविशेष इत्यर्थः । 'भृङ्गारः कनकालुका' इत्यमरः । भृङ्गारः-झारी] । पानभाजनं= सलिलपानपात्रम् । ['गिलास' या 'कटोरा') । 'गृह्यता'मिति शेषः ।

[सब खड़े हो जाते हैं]

युधिष्ठिर—(खड़ा हो कर) हे मुने ! मैं अभिवादन करता हूँ ।

राक्षस—इस समय ऐसे शिष्टाचार की जरूरत नहीं है, मुझे तो जल पिलाइए । [यह वैरीको आशीर्वाद देना नहीं चाहता है अतः इस प्रकार बहाना कर रहा है]।

युधिष्ठिर—मुने ! यह आसन है, इस आसन पर बैठिए ।

राक्षस—[आसन पर बैठ कर] आप भी बैठिए ।

युधिष्ठिर—(बैठकर) बाहर कौन है ? । ठण्डा जल लाओ ।

कञ्चुकी-[हाथमें जलकी झारी लिए भीतर आकर] महाराज लीजिए ठण्ढे व सुगन्धित जल से भरी हुई यह झारी है, और यह जल पीने का पात्र (गिलास या कटोरा) तैयार है ।

---

१ क्वचिन्न । २ 'उपविश्यतामासने' ।

युधिष्ठिरः—**मुने ! निर्वर्त्यतामुदन्याप्रतीकारः ।**

राक्षसः—(पादौ प्रक्षाल्योपस्पृशन्निर्वर्ण्य) **भोः ! भोः क्षत्रियस्त्वमिति मन्ये ? ।**

युधिष्ठिरः—**सम्यग्वेदी भवान् । क्षत्रिय एवाऽस्मि ।**

राक्षसः—**यद्येवं प्रतिदिनसुलभस्वजनविनाशनेषु सङ्ग्रामेषु युष्मत्तो नादेयं सलिलादिकम् । भवतु । छाययैवानया सरस्वती-शिशिरतरङ्गस्पृशा मरुता चाऽनेन विगतक्लमो भविष्यामि ।**

उदन्याप्रतीकारः=तृषाशान्तिः । 'उदन्या तु पिपासा तृड्' इत्यमरः । **निर्वर्त्यतां**=क्रियताम् । **उपस्पृशन्**=आचमनं कुर्वन् । **त्वं**=युधिष्ठिरः । सम्यग्वेत्ति तच्छीलः-**सम्यग्वेदी**=सम्यग्वेत्ता । यथार्थं जानाति भवान् । **एवं**=क्षत्रियोऽसि चेत् । प्रतिदिनं सुलभं **स्वजनानां**=बन्धूनां विनाशनं येषु तेषु । प्रतिदिनसुलभबन्धुबान्धवविनाशेषु इत्यर्थः । **सङ्ग्रामेषु**=युद्धेषु । प्रचलत्सु' इति शेषः । 'युद्धसमये' इति यावत् । **नादेयं**=नैव ग्राह्यम् । आशौचसम्पर्काद्भवतां जलं न ग्राह्यमस्मादृशैरित्याशयः । **छायया**=अनातपेनैव । **सरस्वतीशिशिरतरङ्गस्पृशा**=कुरुक्षेत्रगतसरस्वतीनदीशीतलोर्मिस्पर्शशिशिरेण । **मरुता च**=वायुना च । 'भङ्गस्तरङ्ग ऊर्मिर्वा' इत्यमरः ।

युधिष्ठिर—मुने ! इससे अपनी प्यास को दूर करिए (जल पीजिए) ।

राक्षस—[पैर धोकर, आचमन करता हुआ] अहो ! मैं समझता हूं कि कदाचित् आप क्षत्रिय हैं ? ।

युधिष्ठिर—आप ठीक कहते हैं, मैं क्षत्रिय ही हूँ ।

राक्षस—इस युद्धकाल में प्रतिदिन क्षत्रियों के बन्धु बान्धव मारे जा रहे हैं, अतः तुमारा (क्षत्रियों का) जल पीना इस समय उचित नहीं है । (अथात् तुम्हें तो आशौच लगा है अतः तुमारा जल ग्राह्य नहीं है] । अच्छा रहने दो, इस शीतल छाया से, तथा सरस्वती नदी (कुरुक्षेत्र की एक नदी) की शीतल

१ क्वचिन्न । २ 'सम्यग्वेत्ति' ।

३ 'सुलभश्च स्वजनविनाशः सङ्ग्रामेषु प्रतिदिनमतो नादेयं भवद्भ्यो जलादिकम्' ।

द्रौपदी—बुद्धिमदिए ! वीएहि महसिं [इमिणा] तालविन्तेण ।

[बुद्धिमतिके ! वीजय महर्षिमनेन तालवृन्तेन] ।

(चेटी तथा करोति) ।

राक्षसः—भवति ! अनुचितोऽयमस्मासु समुदाचारः ।

युधिष्ठिरः—मुने ! कथय कथमेवं भवान्परिश्रान्तः ? ।

राक्षसः—मुनिजनसुलभेन कौतूहलेन तत्र भवतां महाक्षत्रियाणां द्वन्द्वयुद्धमवलोकयितुं पर्यटामि समन्तपञ्चकम् । अद्य तु बलवत्तया शारदातपस्याऽपर्याप्तमेवावलोक्य गदायुद्धमर्जुनसुयोधनयोरागतोऽस्मि ।

तालवृन्तेन=व्यजनेन । 'व्यजनं तालवृन्तकम्' इत्यमरः । अयं=दासीकृतव्यजनान्दोलनात्मकः । समुदाचारः = व्यवहारः । अस्मासु = विरक्तेषु मुनिषु । तत्र भवतां=शूराणां भवताम् । शारदातपस्य=शरदृतुप्रभवस्य-

---

तरङ्गों के संसर्ग से शीतल इस वायु से ही मेरी थकावट दूर हो जाएगी । (अर्थात् इस ठण्डी छाया में थोड़ा विश्राम करता हूँ) ।

द्रौपदी—[दासी से] अरी बुद्धिमतिके ! ले इस पङ्खे से मुनि को हवा कर । [दासी पङ्खा झलती है] ।

राक्षस—श्रीमती जी ! हम विरक्त हैं हमारा ऐसा सत्कार (स्त्रियों द्वारा पङ्खा करना आदि) उचित नहीं हैं ।

युधिष्ठिर—हे मुने ! आप इस प्रकार कैसे थक रहे हैं ? ।

राक्षस—मुनिजनसुलभ कौतूहल से मैं आप ऐसे वीर क्षत्रियों का द्वन्द्व युद्ध देखने की इच्छा से कुरुक्षेत्र में घूम रहा हूँ । आज तो शरदृतु (आश्विन मास) की कड़ी धूप से व्याकुल हो अर्जुन और दुर्योधन के गदा युद्ध को बीच में ही छोड़ कर आ रहा हूँ ।

---

१ क्वचिन्न । २ 'शारदातपस्य' ।

(सर्वे विषादं नाटयन्ति)।

कञ्चुकी—**मुने ! न खल्वेवम् । भीमसुयोधनयोरिति कथय।**

राक्षसः—**आः ! अविदितवृत्तान्त एव कथं मामाक्षिपसि ?।**

युधिष्ठिरः—**महर्षे ! कथय कथय[1] ।**

राक्षसः—**क्षणमात्रं[2] विश्रम्य सर्वं कथयामि भवतो[3], न पुनरस्य वृद्धस्य ।**

युधिष्ठिरः—**भगवन् ! एतावदेव कथय[4]—किम्पुनरर्जुन-सुयोधनयोरिति ?।**

राक्षसः—**पूर्वमेव कथितं मया—प्रवृत्तं गदायुद्धमर्जुन-सुयोधनयोरिति ।**

युधिष्ठिरः—**न भीमसुयोधनयोरिति ?।**

शारदघर्मस्य । **अपर्याप्तम्**=असमाप्तम् । **एवम्** = इत्थम् । **न खलु**=नैव ।

अविदितवृत्तान्तः=अज्ञातयुद्धसमाचारः । **आक्षिपसि**=भ्रान्तोऽसीति मां विनिन्दसि । **अर्जुनसुयोधनयोः**=अर्जुनदुर्योधनयोः । **किं**=किन्नु जातम्?।

कञ्चुकी—मुने ! ऐसा नहीं, भीमसेन व दुर्योधन का युद्ध कहिए ।

राक्षस—(बिगड़ कर) विना पूरी बात समझे हुए ही मुझे क्यों दोष दे रहे हो ?।

युधिष्ठिर—हे महर्षे ! कहिए कहिए, क्या बात है ?।

राक्षस—थोड़ा विश्राम लेकर मैं आपको सब सुना दूंगा, पर उस बुड्ढे (कञ्चुकी) को नहीं सुनाऊँगा ।

युधिष्ठिर—इतनाही पहिले कहिए—अर्जुन और दुर्योधन का क्या ?।

राक्षस—मैं पहिले ही कह चुका हूँ कि—अर्जुन और दुर्योधन का गदा युद्ध प्रारम्भ हुआ ।

युधिष्ठिर—तो क्या भीम दुर्योधन का गदा युद्ध नहीं प्रारम्भ हुआ ?।

१ क्वचिन्न । २ 'मुहूर्तं तिष्ठ । विश्रम्य सर्वं' । ३ 'भवते'। 'भवते, न पुनरस्य वृद्धापसदस्य पुरतः ।' ४ 'कथय किमर्जुन' ।

राक्षसः—वृत्तं तत् ।

(युधिष्ठिरो द्रौपदी च मोहमुपगतौ) ।

कञ्चुकी—(सलिलेनासिच्य) समाश्वसितु देवो [देवी च] ।

चेटी—(देवीं प्रति) समस्ससदु समस्ससदु देवी ।

[समाश्वसितु समाश्वसितु देवी] ।

(उभौ संज्ञां लभेते) ।

युधिष्ठिरः-किं कथयसि मुने ! वृत्तं भीमसुयोधनयोर्गदायुद्धमिति ? ।

द्रौपदी—भअवं ! कहेहि कहेहि किं वृत्तं त्ति ? ।

[भगवन् ! कथय कथय किं वृत्तमिति ?] ।

राक्षसः—कञ्चुकिन् ! कौ पुनरेतौ ? ।

तत्त्वरितं कथयेति सम्बन्धः । तत् = भीमदुर्योधनयुद्धम् । वृत्तं=जातम् । समाप्तम् । भीमो मृतः सम्प्रति अर्जुनेन सह युद्धं प्रचलति दुर्योधनस्येति यावत् । मोहं = मूर्च्छाम् । उभौ = द्रौपदीयुधिष्ठिरौ । संज्ञां=चैतन्यम् ।

राक्षस—वह युद्ध तो हो चुका । (अर्थात् भीमसेन मारा गया) ।

[युधिष्ठिर और द्रौपदी सुन कर मूर्च्छित हो जाते हैं] ।

कञ्चुकी-[जलके छीटे देकर] महाराज ! [व महारानीजी !] । धैर्य धारण करिए २ ।

चेटी—देवी जी ! धैर्य धारण करिए २ ।

[युधिष्ठिर द्रौपदी दोनों होश में आते हैं] ।

युधिष्ठिर-हे मुने ! क्या कहते हो कि—भीमसेन और दुर्योधन का युद्ध हो चुका ? ।

द्रौपदी—भगवन् ! कहिए क्या हुआ ? ।

राक्षस—कञ्चुकी ! ये दोनों कौन है ? ।

---

१ 'राजा-हा वत्स भीमसेन ! क्वासि । प्रयच्छ मे प्रतिवचनम् । द्रौपदी-णाह भीमसेण ! कहिं सि ? । देहि मे पडिवअणम् । (इति मोहमुपागतौ) । कञ्चुकी-महाराज ! समाश्वसिहि समाश्वसिहि । प्रकृतिमापाद्यताम् । चेटी-(देवीं प्रति) समस्ससदु समस्ससदु देवी । राजा-(संज्ञां लब्ध्वा) भगवन् ! किं कथयसि' ? इति तु पाठो युक्तः । २ 'सलिलमासिच्य' । ३ क्वचिन्न ।

कञ्चुकी—एष[1] देवो युधिष्ठिरः, इयमपि पाञ्चाल[2]तनया ।

राक्षसः—आः ! दारुणमुपक्रान्तं मया नृशंसेन ।

द्रौपदी—हा णाह भीम[3]सेण ! । (इति मोहमुपगता) ।

[हा नाथ भीमसेन ! ।]

कञ्चुकी—किं[4] नाम कथितम् ? ।

चेटी—समस्ससदु समस्ससदु देवी ।

[समाश्वसितु समाश्वसितु देवी] ।

युधिष्ठिरः—(सास्रं) ब्रह्मन् !

पदे सन्दिग्ध एवास्मिन्दुःखमास्ते युधिष्ठिरः ।
वत्सस्य निश्चिते तत्त्वे प्राणत्यागादयं सुखी ॥ १४ ॥

दारुणम्=क्रूरम् । कठिनम् । अनुचितमिति यावत् । उपक्रान्तं=प्रारब्धम् । नृशंसेन=परमर्मपीडाजनकवार्त्ताप्रस्तावनात्क्रूरेण मया । किं नाम=किन्तु भवता कथितं, तत्स्पष्टं ब्रूहि । यद्वा-किं=किमिति ? । नाम=निश्चयेन । कथितम्=भवताऽयं वृत्तान्त उक्तः । नायं त्वयाऽत्रासौ वृत्तान्तः कथयितुमुचित इत्यर्थो वा । परन्त्वाद्य एवार्थ उचितः ।

कञ्चुकी—हे ब्रह्मन् ! ये तो महाराज युधिष्ठिर है,और य देवी द्रौपदीजी है ।

राक्षस—हाय ! मैंने पापी ने बड़ा ही अनर्थ कर दिया [जो इन्हे यह वृत्तान्त सुनाया] ।

द्रौपदी—हा नाथ भीमसेन !

[ऐसा कह मूर्छित हो जाती है] ।

कञ्चुकी—साफ २ कहिए, आप क्या कह रहे है ? ।

चेटी—महारानी जी ! धैर्य धारण करिए, धैर्य धरिए ।

युधिष्ठिर—[आंखों में आंसू भर कर] हे ब्रह्मन् !

१ 'एषा' । २ 'पञ्चाल' । ३ 'भीम' । ४ कच्चित् ।

राक्षसः—(सानन्दमात्मगतम्) अयमेव[1] मे यत्नः ।
(प्रकाशं) यद्येवमवश्यं[2] कथनीयं, तदा संक्षेपतः कथयामि, न युक्तं बन्धुव्यसनं विस्तरेणावेदयितुम् ।

युधिष्ठिरः—(अश्रूणि मुञ्चन्[3]) ।

सर्वथा कथय ब्रह्मन्संक्षेपाद्विस्तरेण वा ।
वत्सस्य किमपि श्रोतुमेषं[4] दत्तः क्षणो मया ॥ १५ ॥

पद इति । युधिष्ठिरः = अहं । सन्दिग्धे एव अस्मिन् । पदे = 'वृत्तं त'दिति पदे । अस्मिन् विषये इति वा । दुःखमास्ते = दुःखितस्तिष्ठति । वत्सस्य=भीमस्य, [redacted], निश्चिते तु=निर्णीते तु । अहं प्राणत्यागात्= प्राणमोक्षणात् । सुखी । भविष्यामीति शेषः ॥ १४ ॥

अयमेव=तव प्राणनाशः स्यादित्येवमेव मे यत्नः । एवं=इत्थं तव निश्चयार्थं । कथनीयं तदा=वृत्तं निवेदनीयन्तर्हि । बन्धुव्यसनं=भ्रातृवधादिविपत्तिः । किमपीति । शुभमशुभं वा । क्षणः=अवसरः । निर्व्यापारस्थितिः । 'निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः' इत्यमरः । सर्वमन्यत्परित्यज्य श्रोतुं सावधानस्तिष्ठामीत्याशयः ॥ १५ ॥

आपके इस सन्दिग्ध पदको सुनकर ही मुझे दुःख हो रहा है । यदि मेरे वत्स (भीम) के विषय में मुझे कुछ (मृत्यु का) निश्चय हो जाए तो फिर इन प्राणों को त्याग कर सुखी हो जाऊं ॥ १५ ॥

राक्षस—[आनन्दपूर्वक मन में] यही तो मेरा भी प्रयत्न है [कि तुम मर जाओ] । [प्रकट में] अच्छा तो यदि मुझे यह प्रसङ्ग अगत्या कहना ही पड़ रहा है तो भी मै इसे संक्षेप में ही कहता हूं । क्योकि बन्धुव्यसन (प्यारे की मृत्यु) की बात विस्तार से कहना उचित नहीं है ।

युधिष्ठिर—[आंसू बहाता हुआ, या आंसू पोंछता हुआ] । हे ब्रह्मन् ! संक्षेप से या विस्तार से-जैसे भी हो-कहिए । अपने बच्चे के विषय में सब कुछ (मृत्यु की बात तक भी) सुनने को मै तैयार हूं ॥ १६ ॥

---

१ कचिन्न । २ 'यदि त्ववश्य' । 'यदि वाऽवश्यं' ।
३ 'विमुञ्चन्' । ४ 'एतद्दत्तं मनो मया' ।

राक्षसः—**श्रूयताम् ।**

तस्मिन्कौरवभीमयोर्गुरुगदाघोरध्वनौ संयुगे ।

द्रौपदी—(सहसोत्थाय) **तदो तदो ? ।**

[ततस्ततः ?] ।

राक्षसः—(स्वगतं) **कथं पुनरनयोर्लब्धसंज्ञतामपनयामि ? ।**

(प्रकाशम्)

सीरी सत्वरमागतश्चिरमभूत्तस्याग्रतः सङ्गरः ।

आलम्ब्य प्रियशिष्यतां तु हलिना संज्ञा रहस्याहिता

यामासाद्य कुरूत्तमः प्रतिकृतिं दुःशासनारौ गतः ॥ १६ ॥

तस्मिन्निति । **कौरवभीमयोः**=दुर्योधनभीमसेनयोः, **गुरुगदाघोरध्वनौ**=गुरुगदाभीषणध्वनौ, **संयुगे**=युद्धे । **लब्धसञ्ज्ञतां**=चैतन्यम् । विवेकं वा । **अपनयामि**=अपहरामि । **सीरी**=बलरामः । **सत्वरं**=सवेगम् । **आगतः**=तीर्थयात्राप्रसङ्गेन भ्रमन् कुरुक्षेत्रमायातः । **तस्याग्रतः**=तत्पुरतः, तयोः **सङ्गरः**=युद्धम् । **चिरमभूत्**=चिरकालं प्रवृत्तः ।

प्रियः शिष्यो यस्यासौ, तस्य भावस्तत्ता । तां–**प्रियशिष्यतां**=दुर्योधनप्रियताम् । दुर्योधनपक्षपातिताम् । वाप्रियस्येति प्रियस्य पूर्वनिपातः। **आलम्ब्य**=स्वीकृत्य । **हलिना**=बलभद्रेण । **रहसि**=एकान्ते । **संज्ञा**=सङ्केतः । **आहिता**=दत्ता । कृता । **यां**=सञ्ज्ञाम् । **आसाद्य**=प्राप्य । **कुरूत्तमः**=कौरवश्रेष्ठो दुर्योधनः । **दुःशासनारौ**=भीमे । **प्रतिकृतिं**=प्रतीकारम् । दुःशासनवधप्रतीकारम् । **गतः**=प्राप्तः । भीमं दुर्योधनो जघानेत्यर्थः । शार्दूलविक्रीडितं **वृत्तम्** ॥ १६ ॥

राक्षस—अच्छा तो फिर सुनिए ।

उस भीम और दुर्योधन का ऐसा भीषण युद्ध होने लगा कि-बडी २ गदाओं की टक्कर की भीषणध्वनि होने लगी ।

द्रौपदी—(सहसा चैतन्य लाभ कर उठती हुई) हाँ तब क्या हुआ ? ।

राक्षस—(मनही मन) इनकी चेतनाको मैं कैसे नष्ट करूँ ? । (प्रकट)

३ 'तदो कि' ।　　२ 'व्यालम्ब्य प्रियशिष्यतां मुपलिना' ।

युधिष्ठिरः—**हा वत्स वृकोदर !।** (**इति मोहमुपगता**) ।

द्रौपदी—**हा णाह भीमसेण ! हा मह परिभवपडीआरपरिच्चत्तजीविअ । जडासुरबअहिडिम्बकिम्मीरकीचअजरासन्धणिसूदण, सोअन्धिआहरणचाडुआर, देहि मे पडिवअणम् ।**

(**इति मोहमुपगता**)।

[हा नाथ भीमसेन ! हा मम परिभवप्रतीकारपरित्यक्तजीवित ! जटासुर-बक-हिडिम्ब किर्मीर-कीचक-जरासन्ध-निषूदन ! सौगन्धिकाहरण चाटुकार ! देहि[1] मे प्रतिवचनम्] ।

परिभवस्य=तिरस्कारस्य प्रतिकारे परित्यक्तं जीवितं येनासौ तत्सम्बोधने रूपम् । जटासुरादीनां राक्षसानां **निषूदनः**=हन्ताः । **सौगन्धिकस्य**=स्वर्णकह्लारस्य । कमलभेदस्य, आहरणं तदेव **चाटु**=प्रिय, तत्करोति तच्छीलः । द्रौपदीचाटुकारेत्यर्थः । गन्धमादनेपर्वतात्स्वर्णकह्लारं द्रौपद्यर्थं भीमसेन आनीतवानिति वनपर्वणि महाभारते कथाऽस्ति । 'सौगन्धिकं तु कह्लार'मित्यमरः । **प्रतिवचनम्**=उत्तरम् । 'सौगन्धिकाहरणाद्यद्द्रौपद्या आराधनं तत्र चाटुकारः=प्रेम यस्येत्यर्थः' इति तु जगद्धरः ।

तब घूमते-घामते बलरामजी आ पहुँचे । और उनके सामने उनका युद्ध होने लगा । तब बलरामजी ने अपने प्रिय शिष्य दुर्योधन को कुछ गुप्त सङ्केत (इशारा) किया, इस कारण दुर्योधनने भीमसेन को पछाड़ दिया । (मार दिया) ॥ १६ ॥

युधिष्ठिर—हाय वत्स वृकोदर ! (मूर्च्छित होजाता है) ।

द्रौपदी—हा नाथ भीमसेन ! मेरे अपमान का बदला चुकाते हुए ही तुमने प्राण दे दिए । तुमने जटासुर, बकासुर, हिडिम्ब, किर्मीर, कीचक, आदि बड़े २ बली दैत्य दानव आदि और जरासन्ध को मारा था । तुम मेरे को प्रसन्न करने के लिए गन्धमादन पर्वत पर से सुवर्ण सुगन्धित कमल पुष्पों को लाए थे । हाय मुझे उत्तर तो दीजिए । आप कहां हो । (मूर्च्छित हो गिरती है) ।

---

१ क्वचिन्न ।

कञ्चुकी—(सास्रं) हा कुमार भीमसेन ! धार्तराष्ट्रकुल-कमलिनीप्रालेयवर्ष ! (ससंभ्रमं) समाश्वसितु महाराजः । भद्रे ! समाश्वासय स्वामिनीम् । महर्षे ! त्वमपि तावदाश्वासय राजानम् ।

राक्षसः—(स्वगतम्) आश्वासयामि प्राणान्परित्याजयितुम् । (प्रकाशं) अपि भो भीमाग्रज ! क्षणमेकं चीयतां समाश्वासः । कथाशेषोऽप्यस्ति ।

युधिष्ठिरः—(समाश्वस्य) महर्षे ! किमस्ति कथाशेषः ? ।

द्रौपदी—(प्रतिबुद्धा) भअवं ! कहेहि कीदिसो कहासेसो त्ति? । [भगवन् ! कथय कीदृशः कथाशेष इति ?] ।

कञ्चुकी—कथय कथय ? ।

सास्रं=साऽश्रु । धार्तराष्ट्रकुलमेव कमलिनी, तस्याः प्रालेयवर्षः= तुषारपाततुल्यः । तुषारपातेन कमललता नश्यतीति तद्विदः । चीयताम्=

कञ्चुकी—(आखों मे ऑसू भर कर) हाय कुमार भीमसेन ! तुम धृतराष्ट्रों के कुल रूपी कमलिनी को नष्ट करने में बर्फ की वर्षा की तरह थे । (बड़ी हडबडाहट से) महाराज धैर्य धरिए ! (चेटी से) भद्रे ! महारानी को धैर्य दो । हे महर्षे ! आप भी महाराज को धैर्य दीजिए ।

राक्षस—(मनही मन) अच्छा इसे मरने के उत्साहित करता हुआ मैं धीरज देता हूँ । (प्रकट में) हे युधिष्ठिर ! थोड़ी दर धीरज धरिए, क्योंकि अभी इस कथा का कुछ शेष भाग भी कहना बाकी है ।

युधिष्ठिर—(धीरज बान्ध कर, उठ कर) हे महर्षे ! क्या अभी कुछ और भी कथा शेष (कहना बाकी) है ? ।

द्रौपदी—(चैतन्य हो उठ कर) भगवन् ! कहिए, क्या कथा शेष है ? ।

कञ्चुकी—कहिए कहिए, और क्या बात है ? ।

---

१ क्वचिन्न ।　　२ 'अत्र भवतीं' । 'तत्र भवतीं' ।
३ 'प्राणांस्त्याजयितुं' ।　　४ क्वचिन्न ।　　५ 'आधीयतां' ।

चेटी—कहे हि कहे हि।

राक्षसः—ततश्च हते तस्मिन्सुक्षत्रिये वीरसुलभां गतिमुपगते समग्रसंगलितं भ्रातृवधशोकजं बाष्पं प्रमृज्य [भ्रातृवधशोकादपहाय गाण्डीवं] प्रत्यग्रक्षतजच्छटाचर्चितां तामेव गदां भ्रातृहस्ताद्यत्नादाकृष्य निवार्यमाणोऽपि सन्धित्सुना [भगवता] वासुदेवेन, आगच्छागच्छेति सोपहासं भ्रमितगदाझङ्कारमूर्च्छितगम्भीरवचनध्वनिनाऽऽहूयमानः कौरवराजेन, तृतीयोऽ

आधीयताम्। क्वचित्तथैव पाठः। सुक्षत्रिये=वीरे भीमसेने। वीरसुलभां=वीरोचितां परां। गतिं=स्वर्गादिगतिम्। उपगते=प्राप्ते सति। समग्रसङ्कलितं=धारावर्षेण विपुलं परिपतितम्। प्रमृज्य=विशोध्य। अपनीय। उत्सृज्य। प्रत्यग्रस्य=सद्यःसमुद्भूतस्य, क्षतजस्य=रुधिरस्य या छटा=लेशः, समूहो वा, तया चर्चिताम्=लिप्ताम्। भ्रातृहस्तात्=भीमहस्तात्। सन्धित्सुना=सन्धिं कर्त्तुमिच्छुना। भ्रमिता या गदा, तस्या झङ्कारेण मूर्च्छितः=मिलितो गम्भीरवचनस्य ध्वनिः=शब्दो यस्यासौ तेन। अथवा

चेटी—कहिए कहिए।

राक्षस—जब-महावीर भीमसेन वीरोचित गति (मृत्यु) को प्राप्त हुए, तब अर्जुन अपने भाई के मारे जाने के शोक में धारा प्रवाह बहते हुए आंसुओं की धारा को रोक कर, भाई की मृत्यु के शोक से गाण्डीव धनुष को छोड़ कर, ताजा लोहू के लगने से लहू-लुहान (रुधिराक्त) भीमसेन की गदा को (अपने भाई) भीमसेन के हाथ से बड़े प्रयत्न से खींचकर सन्धि की इच्छा करने वाले भगवान् वासुदेव (श्री कृष्ण) के द्वारा बहुत मना करते रहने पर भी—'आओ' 'आओ' इस प्रकार हंस कर घुमाई गई गदा की झनकार से मिली हुई गम्भीर ध्वनि जिसकी है ऐसे कौरवराज के द्वारा ललकारा गया तुम्हारा तीसरा भाई

१ क्वचिन्न। २ 'उत्सृज्य'। ३ 'राजेन सह'।

नुजस्ते किरीटी योद्धुमारब्धः। [1]तथाऽकृतिनस्तस्य गदाघातान्निधनमुत्प्रेक्षमाणेन कामपालेनाऽर्जुनपक्षपाती देवकीसूनुर[3]तिप्रयत्नात्स्वरथमारोप्य द्वारकां नीतः।

युधिष्ठिर—साधु भो अर्जुन! तदैव प्रतिपन्ना वृकोदरपदवी गाण्डीवं परित्यजता। अहं पुनः केनोपायेन प्राणापगमनमहोत्सव[4]मुत्सहिष्ये?।

द्रौपदी—हा णाह भीमसेण! ण जुत्तं दाणिं दे [5]कणीअसं भादरं असिक्खिदं गदाये, दारुणस्स सत्तुणो अहिमुहं गच्छन्तं उवक्खिदुम्। (मोहमुपगता)।

मूर्च्छितो यो ध्वनिस्तेनेति तत्पुरुषो वा। **किरीटी**=अर्जुनः। **अकृतिनः**=अकुशलस्य। **निधनं**=मृत्युम्। **उत्प्रेक्षमाणेन**=इच्छता विभावयता। **कामपालेन**=हलायुधेन बलरामेण। 'कामपालो हलायुधः' इत्यमरः। **देवकीसूनुः**=कृष्णः। **तदैव**=भीमवधसमय एव। **प्रतिपन्ना**=स्वीकृता। **वृकोदरपदवी**=परलोकमार्गः। अङ्गीकृतोऽर्जुनेन मृत्युरिति यावत्। निश्चित एवेत्थमर्जुनस्य वध इति तत्त्वम्। पाठान्तरे-**उत्साहयिष्ये**=सन्तोषं नेष्यामि। 'गदायाम-

(अर्जुन) दुर्योधन से युद्ध करने लगा। परन्तु 'अर्जुन तो गदायुद्ध में नितान्त अनभिज्ञ है अतः अवश्य ही गदाके आघातसे मारा जाएगा' ऐसा मनहीमन अर्जुन की मृत्युको चाहते हुए बलदेवजी अर्जुन के पक्षपाती श्रीकृष्णको किसी तरह समझा बुझा कर अपने रथ पर चढा कर द्वारका ले गए।

युधिष्ठिर—वाह अर्जुन! वाह; गाण्डीव के छोडने से ही तुमने-अपने प्राणों को त्यागकर भीमसेन के पास जाने का निश्चय प्रकट करदिया है। पर मैं अब किस प्रकार प्राणों का त्याग कर परलोक यात्रा करूं?।

द्रौपदी—हे नाथ भीमसेन! गदा युद्ध में अशिक्षित अपने छोटे भाई की —जो क्रूर हृदय वैरी (दुर्योधन) के सामने लड़ने जा रहा है—उपेक्षा करना

१ क्वचिन्न। २ 'अकृतिनः'। 'तथा कृतिनः'। ३ 'प्रयत्नात्'।
४ 'प्राणपरित्यागाद्धृदयमुत्साहयिष्य'। ५ क्वचिन्न।

[हा नाथ भीमसेन ! न युक्तमिदानीं ते कनीयांसं भ्रातरमशिक्षितं गदायां, दारुणस्य शत्रोरभिमुखं गच्छन्तमुपेक्षितम्]।

राक्षसः—**ततश्चाहं**—"

युधिष्ठिरः—**भवतु मुने ! किमतः परं श्रुतेन। हा तात कान्तारव्यसनबान्धव! हा मच्छरीरस्थितिविच्छेदकातर[2] ! जतुगृहविपत्समुद्रतरणयानपात्र[3] ! हा किर्मीरहिडिम्बासुरजरासन्धविजय[4]मल्ल ! हा कीचकसुयोधनानुजशतकमलिनीकुञ्जर ! हा द्यूतपणप्रणयिन् ! हा मदाज्ञासम्पादक ! हा कौरववनदावानल!**

शिक्षितं भ्रातरं दारुणस्य=क्रूरस्य, शत्रोरभिमुखं गच्छन्तमुपेक्षितुं न युक्तम्' इति सम्बन्धः। उत्तिष्ठ तं निवारयेत्याशयः। **कान्तारेति**। दुर्गममार्गोत्क्रमणविपत्तिसहायभूत। 'कान्तारं वर्त्म दुर्गमम्' इत्यमरः।

मदिति। मदीयशरीरस्थितिविलोपभीरो। **शरीरस्थितिः**--जीवनम्। पाठान्तर–मदीयशरीरयात्राक्लेशशङ्काविनाशनेत्यर्थः। मच्छरीररक्षकेति यावत्। जतुगृहमेव विपत्समुद्रः, तस्य सन्तरणे **यानपात्र**=पोतभूत। कीर्मीरादिदैत्यविजये मल्ल। कीचकः, दुर्योधनानुजशतञ्च, ते एव कमलिनी, तदुन्मूलने **कुञ्जर** = मत्तहस्तिन्। **द्यूतेति**। मया द्यूते पणीकृतेत्यर्थः। मत्कृतद्यूते पणीभूतेति यावत्।

आपके लिए उचित नहीं है। अतः उठिए उसे रोकिए।

(इस प्रकार विलाप करतीं हुई मूर्च्छित होती है)।

राक्षस—तब मैं······'

युधिष्ठिर—हे मुने ! जाने दो, अधिक सुनने से अब कोई प्रयोजन नहीं है। हाय तात भीमसन ! हमें वनवास के अवसर पर बड़े गहन जङ्गलों से पार लगाने वाले बन्धु ! हाय मेरे लिए तुम बन में भटक–भटक कर खाने पीने को लाते थे, मेरी थोड़ीसी पीड़ा से तुम व्याकुल हो उठते थे। हाय ! लाक्षागृह की विपत्तिरूपी समुद्र से हमें जहाज की तरह बचाकर पार लगाने वाले, किर्मीर

---

१ क्वचिन्न। २ 'मम शरीरस्थितिपरिखेदशङ्कासूदन'।

३ 'पोत्र'। ४ 'जय'।

निर्लज्जस्य दुरोदरव्यसनिनो वत्स ! त्वया सा[1] तदा
भक्त्या मे समदद्विपाऽयुतबलेनाङ्गीकृता दासता ! ।
किं नामाऽपकृतं मया तदधिकं त्वय्यद्य[2] यद्गम्यते
त्यक्त्वाऽनाथमबान्धवं[3] सपदि मां प्रीतिः क्व ते साऽधुना? ॥

निर्लज्जस्येति । **वत्स**=हे भीम । **दुरोदरव्यसनिनः**=द्यूतव्यसनिनः । द्यूतव्यासक्तस्य । **निर्लज्जस्य**=निस्त्रपस्य । **मे**=मम । **भक्त्या**=अनुरागेण, **समदद्विपायुतबलेन**=मन्दोन्मत्तदशसहस्रगजबलेन । **त्वया**=भवता । **तदा**=तस्मिन्काले । **सा दासता**=प्रसिद्धा, **दासता**=आज्ञाकारिता । **अङ्गीकृता**=स्वीकृताऽऽसीत् । 'सीदता' इतिपाठे-वने कष्टान्यनुभवताऽपीत्यर्थः । **अद्य**=सम्प्रति । **तदधिकं**=वनवासदुःखादधिकम् । **किं नाम**=किंतत् ? कथय । **मया त्वयि अपकृतम्**=अपकारः कृतः । न किमपीत्यर्थः । यत्—**अनाथम्**=अरक्षकम् । **अबान्धवं**=बान्धवशून्यम् । **मां**=युधिष्ठिरं । **सपदि**=एकपदे एव । सहसा । **त्यक्त्वा**=विहाय । **गम्यते**=परलोकं गम्यते । **सा**=प्रसिद्धा । **ते**=तव । **प्रीतिः**=भ्रातृस्नेहः । **अधुना क्व**=क्वास्ति ? । मां विहाय अनुचितं तवेतः परलोकगमनमित्याशयः। पाठान्तरे—**निर्वत्सलं**=निःस्नेहमिति क्रियाविशेषणम् । **दूरंगतः**=स्वर्यातः । शार्दूलविक्रीडितं वृत्तम् ॥ १७ ॥

हिडिम्बासुर जरासन्ध को जीतने वाले प्रचण्ड पहलवान ! कीचक, व दुर्योधन के सौ भाईयो को कमल की तरह उखाड़ कर फेंकने वाले मस्त हाथी ! मेरे द्वारा जूवे में बाजी पर लगा दिए जाने पर भी कुछ न बोलने वाले, मेरे आज्ञा पालक, कौरवो के वनको दरवानल की तरह जलाने वाले ! भाई भीमसेन !

जब मैंने जूवे के फन्दे में फस कर निर्लज्जतापूर्वक तुमको बाजी पर लगा दिया था उस समय भी तुमने (जिसका १० हजार हाथियों का सा बल है–) भक्तिपूर्वक मेरी दासता (आज्ञापालकता) ही स्वीकार की थी । अर्थात् ऐसे बली होकर भी मेरे द्वारा जूए मे दांव पर रखे जाकर भी तुमने मेरी आज्ञा का पालन ही किया था । तो अब मैंने उससे बड़ा कौन ऐसा तुमारा अपकार किया

१ 'सीदता' । २ 'त्वय्यद्य निर्वत्सलं' । ३ 'त्यक्त्वानाथ सबान्धवं' ।

द्रौपदी—(संज्ञामुपलभ्योत्थाय च) **महाराअ ! किं एदं वट्टइ ?।**
[महाराज ! किमेतद्वर्तते ?]।

युधिष्ठिरः—**कृष्णे ! किमन्यत् ?—**

स कीचकनिषूदनो बकहिडिम्बकिर्मीरहा
मदान्धमगधाधिपद्विरदसन्धिभेदाशनिः।
गदापरिघशोभिना भुजयुगेन तेनान्वितः
प्रियस्तव, ममानुजोऽर्जुनगुरुर्गतोऽस्तं किल ॥ १८ ॥

किं **वर्त्तते**=वद किमयं कथयति ? किमस्ति ? । किमिदं जातमित्यर्थः । **स** इति । **कीचकनिषूदनः**=विराटश्यालककीचकनिहन्ता । बकहिडम्बकिर्मीरान्दैत्यभेदान् हन्तीतितथा । मदर्नान्धो यो **मगधाधिपः**=जरासन्धः, स एव महाबलत्वाद्विरद इव **द्विरदः**=हस्ती, तस्य सन्धिभेदे **अशनिरिव**=वज्रमिव । जरासन्धघातीत्यर्थः । गदैव परिघस्तेन शोभते तच्छीलेन–**गदापरिघशोभिना**= गदापाणिना । तेन **भुजयुगेन**=बाहुयुगलेन । **अन्वितः**=विराजितः । **तव**= भवत्याः, **प्रियः**=प्रियो भर्त्ता, मम–प्रियः–अनुजः, **अर्जुनगुरुः**=अर्जुनज्येष्ठो भीमसेनः । **अस्तं**=नाशं । **गतः**=यातः । 'किल' इति निश्चये, अनुवादे वा । पृथ्वी वृत्तम् ॥ १८ ॥

है जिससे मुझे अनाथ, अबान्धव को छोड़कर (मुझे अनाथ असहाय बनाकर) तुम परलोक जा रहे हो ? । कहो मेरा क्या अपराध है ? । वह तुमारी प्रीति अब कहां गई ? ॥ १७ ॥

द्रौपदी—(चेतन हो, उठकर) महाराज ! यह क्या अनर्थ है ? । (क्या बात है ?) ।

युधिष्ठिर--हे द्रौपदी !, और क्या है,--

वह कीचक, बक, हिडिम्ब, किर्मीर को मारने वाला, मदान्ध मगधराज जरासन्ध के शरीर की सन्धिको फाड़कर फेंकने में वज्रकी तरह, गदा परिघ (मुद्गर) से शोभित दो भुजदण्ड वाला, तेरा प्यारा, मेरा छोटा भाई, अर्जुन का गुरु (बडा भाई) भीमसेन परलोक चला गया । (मारा गया) ॥ १८ ॥

द्रौपदी—(आकाशे दत्तदृष्टिः) **णाह भीमसेण ! तुए किल मे केसा संजमिदव्वा। ण जुत्तं वीरस्स खत्तिअस्स पडिण्णादं सिढिलेदुम्। ता पडिवालेहि मं जाव उवसप्पामि।**

(पुनर्मोह[2]मुपगता)।

[नाथ ! भीमसेन ! त्वया किल मे केशाः संयम[3]यितव्याः। न युक्तं वीरस्य क्षत्रियस्य प्रतिज्ञातं शिथिलयितुम्। तत्प्रतिपालय मां यावदुपसर्पामि]।

युधिष्ठिरः—(आकाशे दत्तदृष्टिः) **अम्ब पृथे ! श्रुतोऽयं तव पुत्रस्य समुदाचारः ?। मामेकमनाथं विलपन्तमुत्सृज्य क्वापि गतः !। तात जरासन्धशत्रो ! किं नाम वैपरीत्यमेतावता**

संयमयितव्याः=पुनर्बन्धनीयाः। तथा कर्तुं भवता प्रतिज्ञातमित्यर्थः। **वीरस्य**=शूरस्य, शक्तस्य। **शिथिलयितुं**=परित्यक्तुम्। **प्रतिपालय**=प्रतीक्षस्व। **उपसर्पामि**=त्वत्सन्निधावागच्छामि। **पृथे**=हे कुन्ति। **समुदाचारः**=शिष्टाचारः। व्यवहारः। **विलपन्तं**=रुदन्तम्। **क्वापि**—यत्र क्वापि। परलोकं। **जरासन्धशत्रो**=हे भीम।

वैपरीत्यम्=अल्पायुष्ट्वसूचकमशुभलक्षणम्। **जनेन**=लोकेन। न

द्रौपदी—(आकाश की ओर देखती हुई) नाथ भीमसेन ! तुमने तो मेरे खुले हुए केशों को बान्धने की प्रतिज्ञा की थी। तुमारे ऐसे वीर क्षत्रिय को उचित नहीं है कि वह अपनी प्रतिज्ञा को पूरी किए विना ही छोड़ दे। अतः थोड़ा ठहरो, मैं भी तुमारे पास ही आती हूँ। (ऐसा कह फिर मूर्च्छित हो जाती है)।

युधिष्ठिर—(आकाश की ओर देखता हुआ) हे माता कुन्ती ! तुमने अपने पुत्र (भीम) का शिष्टाचार सुना ?। मुझे अनाथ व विलाप करते हुए छोड़ कर कहीं चला गया !। हे जरासन्ध के शत्रु भाई भीमसेन ! तुमारे अल्पायु होने का कोई भी चिह्न कभी भी लोगों (ज्यौतिषी लोग) नें नही बताये थे। या उन्हें ऐसे चिह्न दिखाई नहीं दिए थे। फिर तुम अल्पायु कैसे हुए ?। अथवा मैंने

१ क्वचिन्न।　२ 'उपागता'।　३ 'संयमितव्याः।

कालेनाल्पायुषि त्वयि समालोकितं जनेन ?। अथवा मयैव बहूपलब्धम्।

दत्त्वा मे करदीकृताऽखिलनृपां यन्मेदिनीं लज्जसे,
द्यूते यच्च पणीकृतोऽपि हि मया न क्रुध्यसि, प्रीयसे।
स्थित्यर्थं मम मत्स्यराजभवने प्राप्तोऽसि यत्सूदतां
वत्सैतानि विनश्वरस्य सहसा दृष्टानि चिह्नानि ते ॥१९॥

किमपीत्यर्थः । **बहु**=विपुलम् । **उपलब्धं**=प्राप्तम् । वैपरीत्यमिति शेषः ।

तदेव दर्शयति—**दत्त्वेति**। हे वत्स, न करदाः अकरदाः, अकरदाः करदाः सम्पद्यमानाः कृताः **अखिलाः**=सकलाः नृपाः यस्याः सा तां—**करदीकृताऽखिलनृपां**=वशीभूतराजस्वप्रदानतत्परमकलराजचक्राम्। **मेदिनीं**=पृथ्वीम्। **मे**=मम। **दत्त्वा**=प्रदायापि। **लज्जसे**=जिह्रेषि ।लज्जितोऽभूः। **यच्च द्यूते**=अक्षवत्याम्। मया—**पणीकृतोऽपि**=पणतया स्थापितोऽपि । **न क्रुध्यसि**=न कुप्यसि । नैव कुपितः। किन्तु **प्रीयसे**=स्निह्यसि । **यत्**=यच्च, **मम स्थित्यर्थम्**=गूढमवस्थानसिद्धये । **मत्स्यराजभवने**=मत्स्यदेशाधिपविराटभवने । **सूदतां**=सूपकारताम् । **प्राप्तोऽसि**=स्वीकृतवानसि । **एतानि**=पूर्वोक्तानि । **सहसा**=अकस्मात् । **विनश्वरस्य**=विनाशशीलस्य । अल्पायुषः । **ते**=तव । **चिह्नानि**=विनयादिलक्षणानि **दृष्टानि**=मयोपलब्धानि । 'विद्या बुद्धिर्यशो बलम् । अल्पे वयसि यस्य स्युः न स जीवेच्चिरं नरः' इत्युक्तेः । शार्दूलविक्रीडितं वृत्तम् ॥ १९ ॥

पहिलेही तुमारे अल्पायु होने के बहुत चिह्न जानलिए थे—

सम्पूर्ण भूमण्डल के राजाओं को वशीभूत कर उनको अधीन व करद करके संपूर्ण पृथ्वी को मुझे सौंपते हुए भी तुम्हें लज्जा का ही अनुभव होरहा था कि मैंने बहुत थोडाही लाकर भैया को दिया है। और जूए मे मेरे द्वार हारे जाने पर भी तुम क्रुद्ध नहीं हुए, किन्तु प्रसन्न ही हुए थे। और मत्स्यराज (विराट) के घरमें सूद (रसोईदार) होकर छिपकर मेरे ही लिए तुम रहे । भैया ! ये सब तुमारे शीघ्र ही परलोक जाने के ही चिह्न थे। (ज्यादा विनय, छोटी ही अवस्था में ज्यादा विद्या, ज्यादा यश आदिका होना अल्पायु के लक्षण है) ॥ १९ ॥

मुने ! किं कथयसि—('तस्मिन्कौरवभीमयोः' (६।१६) इत्यादि[1] पठति)।

राक्षसः—एवमेतत् ।

युधिष्ठिरः—धिगस्मद्भागधेयानि[2] । [आकाशमवलोकयन्[3]] भगवन्कामपाल ! कृष्णाग्रज ! सुभद्राभ्रातः !

ज्ञातिप्रीतिर्मनसि न कृता, क्षत्रियाणां न धर्मो,
रूढं सख्यं तदपि गणितं नानुजस्यार्जुनेन ।
तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः[4]
कोऽयं पन्था यदसि विमुखो मन्दभाग्ये मयीत्थम् ! ॥२०॥

पठतीति । किं 'भीमदुर्योधनयोर्युद्धे बलरामण दुर्योधनपक्षपातः कृत' इति वदसी'ति प्रश्नाशयः । एवमेतत्=एवमिदम् । तेन पक्षपातः कृत इति सत्यमित्यर्थः ।

भागधेयानि=भाग्यानि । कामपाल=हे हलायुध ! । ज्ञातीति । ज्ञाति-प्रीतिः=सपिण्डस्नेहः । पैतृस्वसेयतया हि पाण्डवानां तेन सपिण्डता । मनसि=चित्ते । न कृता=न गणिता । नादृता । क्षत्रियाणां धर्मः= अकूटयोधि[illegible]शिष्यपक्षपातितादिधर्मः । 'मनसि न कृत' इति सम्बन्धः ।

हे मुने ! क्या कहते हो कि–"भीमसेन दुर्योधन का युद्ध जब हो रहा था तब बलदेवजी आगए और उन्हों ने इशारा (कुछ दावपेंच बता) करके भीम को मरवा दिया" ?।

राक्षस—हाँ, ठीक है, ऐसी ही बात है ।

युधिष्ठिर—हाय ! यह हमारा मन्दप्रारब्ध ही है । (आकाश की ओर देखता हुआ) भगवन् हलायुध ! हे कृष्ण के बडे भैया बलदाऊजी ! हे सुभद्रा (अर्जुन की स्त्री) के भाई !

आपने ज्ञातियों के (हमारे) प्रति उचित स्नेह का ध्यान नहीं रखा, क्षत्रियों का धर्म भी आपने कुछ न समझा, अर्जुन का व अपने छोटे भाई कृष्ण का बढा हुआ प्रेम

१ 'इति' । २ 'भाग्यानि' । ३ क्वचिन्न । ४ 'प्रेमबन्धः' ।

(द्रौपदीमुपगम्य) अयि पाञ्चालि ! उत्तिष्ठोत्तिष्ठ । समानदुःखावेवावां भवावः । मूर्च्छया किं मामेवमतिसन्धत्से ? ।

अनुजस्य=स्वानुजस्य । कृष्णस्य । मे=मम । अनुजे=भ्रातरि अर्जुने । यत्-रूढं = प्ररूढं । सुदृढम् । सख्यं = मैत्री, तत् = तदपि । न गणितं=नादृतम् । भवतः=तव । कामं=यथेच्छम् । शिष्ययोः=भीमदुर्योधनयोः । तुल्यः=समान एव । स्नेहबन्धः=अनुरागसम्बन्धः । भवतु=अस्तु नाम । परन्तु-मन्दभाग्ये=मन्दप्रारब्धे । मयि=युधिष्ठिरे । यद्विमुखोऽसि त्वं=यत्पराङ्मुखोऽसि त्वं । प्रतिकूलोऽसि । अयं कः पन्थाः=कोऽयं मार्गः । भीमसुयोधनयोः शिष्ययोस्तुल्ये स्नेहे सत्यपि मम पक्षपातेन भीमेऽनुग्रहस्त्वया कर्त्तव्य आसीत् । विपरीतं भवता सङ्केतं दत्त्वा भीमो घातित इति कोऽयं भवतामनुचितो मार्गइत्याशयः । मन्दाक्रान्ता वृत्तम् ॥ २० ॥

अतिसन्धत्से=अतिवर्त्तसे । मामतिक्राम्यसि । अहं तु न मूर्च्छितः, परं भवती मूर्च्छितेति मत्तोऽधिकं दुःखमनुभवन्ती मामतिक्राम्यसीत्याशयः । ~~अभिसन्धत्से=आकुलयसीति~~ व्याख्यानन्तु न रुचिरम् ।

भी कुछ न समझा । आपका प्रेम भीम और दुर्योधन पर बराबर ही हो सकता है परन्तु मेरे मन्दप्रारब्धी पर भी आप इस प्रकार विमुख हो गए-यह क्या बात है ? । अर्थात् भीमसेन व दुर्योधन दोनों ही आपके शिष्य थे, अतः आपने दुर्योधन को कमजोर होते देख कर कुछ सङ्केत किया सो तो ठीक है, परन्तु कुछ मेरा भी तो आपको ध्यान रखना था । मेरा भी तो आपसे स्नेह था ; मुझे आपने इस प्रकार अनाथ क्यों कर दिया ? ॥ २० ॥

(द्रौपदी के पास जाकर) अयि द्रौपदी ! उठ ! । आओ, हम और तुम समानही दुःख उठावें । तूं यों मूर्च्छित हो मेरे से अधिक दुःख को क्यों उठाती है ? । अर्थात् मेरे से अधिक तुम्हें दुःखित होते देख मुझे ईर्ष्या होती है । अतः आवो हम तुम दोनों समानही दुःख का अनुभव करें । (साथही मरें)

१ क्वचिन्न । २ 'अभिसंधत्से' ।

द्रौपदी—(लब्धसंज्ञा) बन्धेदु[1] बन्धेदु णाहो दुज्जोहणरुधिलाद्देण हत्थेण दुस्सासणविमुक्कं मे कसहत्थम् । हञ्जे बुद्धिमदिए ! तव पच्चक्खं एव्व णाहेण पडिण्णादम् । (कञ्चुकिनमुपत्य) अज्ज ! किं संदिट्ठं दाव मे देवेण देवकीणन्दणेण–'पुणो[2] वि केसबन्धनं आरम्भीअदु'त्ति ? । ता उवणेहि मे पुप्फदामाइं[3] । विरएहि दाव कबरीम् । करेहि भअवदो पुरिसोत्तमस्स[4] वअणम् । ण क्खु सो[5] अलीअं संदिसदि । अहवा किं मए अदिसंतत्ताए[6] भणिदम् । अचिरगदं अज्जउत्तं अणुगमिस्सम् । (युधिष्ठिरमुपगम्य) महाराअ ! आदीवअ चिदाम् । तुमं वि खत्तधम्मं अणुबन्ट्टन्तो[7] एव्व णाहस्स जीविदहरस्स अहिमुहो होहि । अहवा जं दे रोअदि ।

[बध्नातु नाथो दुर्योधनरुधिरार्द्रेण हस्तेन दुःशासनविमुक्तं मे केशहस्तम् । हञ्जे बुद्धिमतिके ! तव प्रत्यक्षमेव नाथेन प्रतिज्ञातम् ।

नाथः=भीमः। दुर्योधनरुधिरार्द्रेण=हतसुयोधनक्षतजोक्षितेन । हस्तेन=पाणिना। केशहस्तं=कबरीबन्धम् । नाथेन=भीमसेनेन । पुष्पदामानि=पुष्पमाल्यादीनि ।

द्रौपदी—(चैतन्य होकर) हे नाथ भीम ! दुर्योधन के रुधिर से लिप्त हाथों से मेरे उन केशों को बांधिए जो दुःशासन नें खोल दिए थे । हे बुद्धिमतिके ! तेरे सामनें ही तो नाथ भीमसेन ने मेरे केश बान्धने की प्रतिज्ञा की थी ।

(कञ्चुकी के पास जाकर) आर्य ! भगवान् देवकीनन्दन कृष्ण ने मुझे क्या सन्देश भेजवाया था कि–'तुम अपने केशों को फिर बान्धो ?' । (दासी से) अच्छा तो पुष्पों की मालाएँ ला । मेरी कबरी (जूडा) बान्ध दे । भगवान् कृष्ण के वचन का पालन कर । भगवान् कभी झूठा सन्देश नहीं कह सकते ।

---

१ क्वचिन्न । २ 'केसरअणा आरम्भीअदु त्ति' ।
३ 'फुल्लदामाइं' । ४ 'णाराअणस्स' [नारायणस्य] ।
५ 'णहि अलीअं मन्तदि सो' । ६ 'संतत्ताए' । [संतप्तया] ।
७ 'अनुबन्धन्तो' । [अनुबध्नन्] ।

आर्य ! किं संदिष्टं तावन्मे देवेन देवकीनन्दनेन-'पुनरपि केशबन्धनमारभ्यता'मिति ? । तदुपनय मे पुष्पदामानि । विरचय तावत्कबरीम् । कुरु भगवतः पुरुषोत्तमस्य वचनम् । न खलु सोऽलीकं संदिशति । अथवा किं मयाऽतिसंतप्तया भणितम् । अचिरगतमार्यपुत्रमनुगमिष्यामि । महाराज ! आदीपय चिताम् । त्वमपि क्षत्रधर्ममनुवर्तमान एव नाथस्य जीवितहरस्याभिमुखो भव । अथवा यत्ते रोचते ।]

युधिष्ठिरः—युक्तमाह पाञ्चाली । कञ्चुकिन् ! क्रियतामियं तपस्विनी चितासंविभागेन सह्यवेदना । ममापि सज्जं धनुरुपनय । अलमथवा धनुषा—

कबरीं=केशरचनाविशेषम् । पुरुषोत्तमस्य=वासुदेवस्य । अलीकं=मिथ्या । अचिरगतं=सद्योमृतम् । आर्यपुत्रं=भीमम् । नाथजीवितहरस्य=भीमहन्तुदुर्योधनस्य । अभिमुख=सन्मुखः । युद्धायेति शेषः । युक्तं=समुचितम् । चितासंविभागेन=चिताविरचनेन । सह्या वेदना यस्याः सा सह्यवेदना=वेदनासहनसमर्था । सज्जं=समौर्वीकम् । उपनय=आनय ।

अथवा मैंने शोकसन्तप्त मन से क्या अनुचित कह दिया । आर्यपुत्र (मेरे पति भीमसेन) अभी (तुरन्त) परलोक गए हैं, अतः मैं भी उनका ही अनुगमन करूंगी । महाराज ! मेरे लिए चिता प्रदीप्त कराइए । और आप भी क्षत्रियों के धर्म को देखते हुए मेरे प्राणनाथ भीमसेन के मारने वाले दुर्योधन का सामना करिए । या जो आपको अच्छा लगे वही करिए ।

युधिष्ठिर—पाञ्चाली ठीक कहती है कन्चुकी ! इस विचारी के लिए चिता तैयार करके इसकी शोक वेदना को कम करो । और मेरा भी सज्जित धनुष लाओ । अथवा धनुष को रहने दो । क्योंकि—

१ 'नारायणस्य' । २ 'नह्यलीकं मन्त्रयति सः' ।

३ 'अदूरगदं' [अदूरगतं] ।

तस्यैव देहरुधिरोक्षितपाटलाङ्गी-
मादाय संप्रति गदामपविद्ध[2]चापम् ।
भ्रातृप्रियेण कृतमद्य यदर्जुनेन
श्रेयो ममापि हि तदेव, कृतं जयेन ॥ २१ ॥

राक्षसः—(सविषाद[3]मात्मगतम्) कथं गच्छति ? । भवत्वेवं तावत् । (प्रकाशम्) । राजन् ! रिपुजयविमुखं ते यदि चेतस्तदा यत्र तत्र वा प्राणत्यागं कुरु, वृथा तत्र गमनम् ।

तस्यैवेति । सम्प्रति=इदानीम् । तस्यैव=भीमस्यैव । देहरुधिरेण-उक्षितानि=चर्चितानि, अत एव पाटलानि अङ्गानि यस्याः सा । भीमरुधिर-सम्पर्केण ईषद्रक्ताङ्गी । ताम् । 'ईषद्रक्तस्तु पाटलः' इत्यमरः । गदाम् । आदाय=गृहीत्वा । भ्रातृप्रियेण=भीमप्रियेण । अर्जुनेनाद्य—अपविद्धः चापो यस्मिन् कर्मणि तद्यथा स्यात्तथा=त्यक्तशरासनं यथा स्यात्तथा । यत्कृतं=यत्कर्म कृतम् । तदनुगमनं कृतम् । तदेव=तदेव कर्म । ममापि हि=मम युधिष्ठिरस्यापि । श्रेयः=कल्याणकारकम् । जयेन—शत्रुविजयेन । कृतम्=अलम् । न प्रयोजनम् । 'अपविद्धचाप' इति पाठं धृत्वा 'संयति अवतरन् निधनं गच्छामी'-त्यध्याहारेण व्याख्यानं तु नैवोचितमिति गौडाः । वसन्ततिलका वृत्तम् ॥२१॥

गच्छति=युद्धभुवमयं युधिष्ठिरो गन्तुमिच्छति । तत्र=युद्धभुवि ।

धनुष को छोड़कर, भीमसेन के रुधिर के लगने से लाल हुई उसकी गदा को लेकर जो काम अर्जुन ने किया (लड़कर मरने का निश्चय किया) वही मुझे भी करना चाहिये । अब विजय की आशा किसके लिए करूंगा ? ॥ २१ ॥

राक्षस—(विषादपूर्वक मन ही मन) हैं ! यह तो युद्ध भूमि में जा रहा है ! क्या करूं ? । अच्छा ऐसा करता हूं । (प्रकट) राजन् ! यदि आप शत्रु के विजय से मुख मोड रहे हैं तो फिर चाहे जहाँ मरिए । युद्धभूमि में जाना तो आपका वृथा ही है ।

---

१ 'संयति' । २ 'अपविध्यचापं । 'चापः' । ३ क्वचिन्न ।

कञ्चुकी—(सरोषम्) धिङ् मुनिजनासदृशं राक्षसस्य सदृशं भवता व्याहृतम्।

राक्षसः—(सभयं स्वगतं) किं ज्ञातोऽहमनेन ! (प्रकाशं)। भोः कञ्चुकिन् ! एतद्ब्रवीमि-तयोर्गदया खलु युद्धं प्रवृत्तमर्जुन-दुर्योधनयोः। जानामि च तयोर्गदायां भुजसारम्। दुःखितस्य पुनरस्य राजर्षेरपरमनिष्टश्रवणं परिहरन्नेवं ब्रवीमि।

युधिष्ठिरः—(बाष्पं विसृजन्) साधु महर्षे ! साधु। सुस्निग्ध-मभिहितम्।

भुजसारं=भुजबलम्। अर्जुनो हि गदायुद्धेऽकुशल इति जानामीत्याशयः। अर्जुनोऽपि मृत इति तत्त्वम्। अपरम्=द्वितीयम्। अनिष्टश्रवणम्=अर्जुनमरणश्रवणम्। परिहरन्=निवारयन्। एवं=युद्धभुवि न गन्तव्यमित्यादि। सुस्निग्धं=स्नेहान्वितम्। स्नेहसिक्तम्। देवकल्पेन=देवोपमेन।

कञ्चुकी—(क्रोधपूर्वक) धिक्कार है, तुमारा मन तो मुनि लोगों की तरह न होकर राक्षस की तरह क्रूर है।

राक्षस—(मनही मन डरता हुआ) क्या इसनें मुझे पहिचान लिया है ?। (प्रकट में) हे कञ्चुकिन् ! मैं इसलिए ऐसा कर रहा हूँ कि—अर्जुन दुर्योधन का गदायुद्ध हो रहा था, और उनमें गदायुद्ध मे कौन प्रबल है यह मैं अच्छी तरह जानता हू। (अर्जुन गदायुद्ध में बिलकुल अनभिज्ञ हैं, यह मै अच्छी तरह जानता हूं)! और यह राजर्षि युधिष्ठिर एक तो योंही दुःखित है, फिर वहाँ जाकर दूसरा अनिष्ट (अर्जुनमरण) सुनेगें तो इनके दुःख का कोई पार न रहेगा। (अतः इनके दुःख को बढ़ने न देने के लिए ही मैं ऐसा कह रहा हूं)।

युधिष्ठिर—(आंसू बहाता हुआ, या पोछता हुआ) ठीक है मुनि जी ! ठीक है। आपनें स्नेह के अनुरूप ठीक ही कहा है।

---

१ 'धिङ्मुने ! राक्षससदृशं हृदयं भवत.'। २ क्वचिन्न।
३ 'गदायाः'। ४ 'गदायुद्धे'।

कञ्चुकी—महाराज ! किं नाम शोकान्धतया देवकल्पेनापि[1] देवेन प्राकृतेनेव त्यज्यते क्षात्रधर्मः[2] ! ।

युधिष्ठिरः—आर्य जयन्धर !

शक्ष्यामि नो[3] परिघपीवरबाहुदण्डौ
वित्तेशशक्रपुरदर्शितवीर्यसारौ[4] ।
भीमार्जुनौ क्षितितले प्रविचेष्टमानौ
द्रष्टुं, तयोश्च निधनेन रिपुं कृतार्थम् ॥ २२ ॥

प्राकृतेनेव=साधारणजनेनेव । क्षात्रधर्मः=वीरत्वम् । अकातरत्वम् । युद्धम् ।

शक्ष्यामीति । परिघ इव पीवरौ=स्थूलौ, बाहुदण्डौ ययोस्तौ तथाभूतौ । स्थूलभुजदण्डौ । वित्तेशश्च शक्रश्च, तयोः पुरौ इति वित्तेशशक्रपुरे, तयोः दर्शितो वीर्यस्य सारो याभ्यां तौ तथाभूतौ। क्रमशः कुबेरमहेन्द्रनगरप्रदर्शितभुजबलौ । 'वित्तेशशक्रवरुणाधिकवीर्यवन्तौ' इति पाठे—कुबेरमहेन्द्रवरुणाधिकबलपराक्रमशालिनावित्यर्थः । क्षितितले=पृथ्वीतले । प्रविचेष्टमानौ=लुठन्तौ । विवर्त्तमानौ । विस्फुरन्तौ । भीमार्जुनौ=वृकोदरार्जुनौ । द्रष्टुं=विलोकयितुम् । च=किञ्च । तयोः=भीमार्जुनयोः । निधनेन=मरणेन। पतनेन च । कृतार्थं=सिद्धार्थम् । रिपुं=शत्रुं दुर्योधनं च । द्रष्टुं । न शक्ष्यामि=न समर्थो भविष्यामि । अतो मया युद्धभुवि न गम्यते इत्याशयः । वसन्ततिलका वृत्तम् ॥ २२ ॥

कञ्चुकी—महाराज ! आप देवतुल्य पराक्रमशाली होकर भी शोक से अन्धे होने के कारण क्षत्रिय धर्म (युद्ध) छोड़ कर ऐसा अनुचित कार्य करने (शोक में मरने) के लिए तैयार हो रहे है ।—यह अनुचित है ।

युधिष्ठिर—आर्य जयन्धर !

मैं परिघ (मुद्गर) की तरह स्थूल बाहुदण्ड वाले, कुबेर और इन्द्र की पुरियों में अपना पराक्रम दिखाने वाले, (कुबेर की अलका पुरी में भीमसेन नें पराक्रम दिखाया था, और इन्द्रपुरी में अर्जुन ने अपना पराक्रम दिखाया था) उन

१ 'देवेन देवकल्पेनापि' । २ 'क्षत्रधर्मः' । ३ 'शक्ष्यामि तौ' ।
४ 'वित्तेशशक्रवरुणाधिकवीर्यवन्तौ' ।

अयि पाञ्चालराजतनये ! मद्दुर्नयप्राप्तशोच्यदशे ! यथा संदीप्यते पावकस्तथा सहितावेव बन्धुजनं संभावयावः ।

द्रौपदी—**अज्ज ! करेहि दारुसंचअम् । [पज्जलीअदु चिदा] । तुवरदि मे हिअअं णाधं पेक्खिदुम् ।** (सर्वतोऽवलोक्य) **कहं ण को वि णाधेण विणा महाराअस्स वअणं करेदि । हा णाह भीमसेण ! तं एव्व एदं राअउलं तुए विरहिदं पडिअणो वि संपदं परिहरदि ।**

[आर्य ! कुरु दारुसंचयम् । [प्रज्वाल्यतां चिता । त्वरते मे हृदयं नाथं प्रेक्षितुम्]। कथं न कोऽपि नाथेन विना महाराजस्य वचनं करोति?। हा नाथ भीमसेन ! तदेवेदं राजकुलं त्वया विरहितं परिजनो ऽपि सांप्रतं परिहरति] ।

मदिति । मम दुर्नयेन=मदपराधेन, द्यूतेन, प्राप्ता शोच्या दशा यया तत्सम्बुद्धौ रूपम् । मद्दोषप्राप्तदुर्दशे इत्यर्थः । **यथेति** । यावताऽग्निः प्रदीप्तो भवति तावतैवेत्यर्थः । वह्नौ शरीरपातेनेति यावत् । **सम्भावयावः**=द्रक्ष्यावः । **पावकः**=वह्निः । **नाथेन**=भीमेन । **परिजन**=सेवकलोकः । **अनुमरणं**=

भीम और अर्जुन को भूमि पर पड़े हुए (लोटते हुए) देखने में, तथा विजय से गर्वित शत्रु दुर्योधन को देखने में मैं समर्थ नहीं हूँ । (युद्ध भूमि में जाकर अपने भाइयों को की दुर्दशा व शत्रु की विजय देखने में मैं समर्थ नहीं हूँ अतः मैं यहीं मरूंगा, युद्ध भूमि में नहीं जाऊंगा) ॥ २२ ॥

हे द्रौपदी ! तेरी यह दुर्दशा मेरे ही अन्याय के कारण हो रही है, अतः मैं और तुम दोनों साथ ही चिता की प्रदीप्त अग्नि में जलकर अपने बन्धुओ से मिलेगें ।

द्रौपदी—आर्य (कञ्चुकिन् !) लकड़ी इकठ्ठी करके चिता जलाओ । मेरा हृदय अपने प्यारे पतिको देखने को उतावला हो रहा है । (चारों ओर

---

१ क्वचिन्न ।

२ हा णाह ! अज्ज तुए विणा महाराओ परिअणेण वि परिहवीअदि' ।

[हा नाथ ! अद्य त्वया विना महाराजः परिजनेनाऽपि परिभूयते'] ।

राक्षसः—सदृशमिदं भरतकुलवधूनां यत्पत्युरनुमरणम्।

युधिष्ठिरः—महर्षे! न कश्चिच्छृणोति[1] तावदावयोर्वचनम्[2]। तदिन्धनप्रदानेन प्रसादः क्रियताम्।

राक्षस—मुनिजनविरुद्धमिदम्। (स्वगतं) पूर्णो मे मनोरथः[3]। यावदनुपलक्षितः समीपेऽहं समिन्धयामि[4] वह्निम्। (प्रकाशम्) राजन्! न शक्नुमो वयमवस्थातुम्[5]। (इति निष्क्रान्तः)।

सहमरणम्। सदृशम्=अनुरूपम्। उचितम्। भरतकुलवधूनां=भरतवंशप्रसूतपाण्डवादिपत्नीनाम्। इन्धनप्रदानेन=चिताकाष्ठसञ्चयेन। मुनिजनविरुद्धं=मुनिधर्मविरुद्धं काष्ठरनम्। अनुपलक्षित=अदृष्टः। अतर्कितः।

देखकर) है! यह क्या बात है, आज मेरे प्राणप्यारे (भीम) के न रहने से मेरी आज्ञा का कोइ भी पालन नही कर रहा है। हाय नाथ भीमसेन! इस राजकुल को तुमारे अभाव में नौकर चाकर भी छोड़ रहे है। (वे भी हमारी आज्ञा का पालन नही कर रहे हैं)।

राक्षस—वाह! भरतकुल की स्त्रियों को अपने पति का अनुगमन करना उचित ही है। (जल्दी से जल मरो)।

युधिष्ठिर—हे महर्षे! हमारी बातें कोई नही सुन रहा है। अतः आप ही हमें लकडी देकर (चिता बनाकर) कृतार्थ करे।

राक्षस—यह कार्य मुनिजनो के विरुद्ध है, हम ऐसा नही कर सकते (मन ही मन) अब मेरी इच्छा पूर्ण हो गई, मेरा काम बन गया। अब मुझ कोई न देखे इस तरह मैं छिपकर चिता में आग लगा दूंगा (प्रकट में) राजन्! अब हम यहा ठहर नही सकते है। (मैं जाता हूँ)। (ऐसा कह कर जाता है)।

१ क्वचिन्न। २ 'कश्चिदिदानीं शृणोति'। 'तदिन्धनप्रदानेन प्रसादं कर्तुमर्हसि'। ३ 'पूर्णा मे मनोरथाः'।

४ 'समीपेऽहमिन्धनमादीपयामि'। ५ 'मिहैव स्थातुम्'।

युधिष्ठिरः—कृष्णे ! न कश्चिदस्मद्वचनं करोति। भवतु। स्वयमेवाऽहं दारुसंचयं कृत्वा चितामादीपयामि।

द्रौपदी—तुवरदु तुवरदु महाराओ।

[त्वरतां त्वरतां महाराजः।]

(नेपथ्ये कलकलः)।

द्रौपदी—(सभयमाकर्ण्य) महाराअ ! कस्स वि एसो तेजो-बलदृप्पिदस्स विसमो सङ्खणिग्घोसो सुणीअदि। अवरं वि अप्पिअं सुणिदुं अत्थि णिब्बन्धो, तदो बिलम्बीअदु !।

[महाराज ! कस्याप्येष तेजोबलदर्पितस्य विषमः शङ्खनिर्घोषः श्रूयते। अपरमप्यप्रियं श्रोतुमस्ति निर्बन्ध·, ? ततो विलम्ब्यते]।

युधिष्ठिरः—न खलु विलम्ब्यते। उत्तिष्ठ।

(इति सर्वे परिक्रामन्ति)।

आदीपयामि=प्रज्वलयामि। तेजोबलदर्पितस्य=तेजःपराक्रमबलगर्वितस्य। तेजः=तेजस्विता। ('हेकडी')। विषमः=भयङ्करः। समुद्धतो वा।

विषमः=क्रूरः। निर्बन्धः=अभिलाषः। किमपरं कमप्यनर्थमनुभवितुं श्रोतुं वा विलम्बः क्रियेत ?। अतस्त्वर्यतां। त्वरितं चितां प्रविशाव इत्यर्थः। परिक्रामन्ति=प्रचलन्ति।

युधिष्ठिरः—हे द्रौपदी ! हमारी बात कोई नहीं सुन रहा है। अच्छा ! मैं स्वयं ही लकड़ी इकट्ठी कर चिता को जलाता हूं।

द्रौपदी—जल्दी करिए, जल्दी करिए।

(नेपथ्य में कोलाहल होता है)।

द्रौपदी-(भयपूर्वक सुनकर) महाराज ! यह देखिए बलके दर्प (घमण्ड) से गर्वित किस वीरके द्वारा बजाये गए शङ्खकी भीषण ध्वनि सुनाई दे रही है। आपको औरभी कुछ अप्रिय बात सुननेकी इच्छा है क्या ? जो इस तरह देरीकर रहे हैं?।

युधिष्ठिर—नहीं, देरी नहीं कर रहा हूं। उठो चलें।

[सब उठकर चलते है]।

१ क्वचिन्न। २ 'विलम्ब्यताम्'।

युधिष्ठिरः—**अयि पाञ्चालि ! अम्बायाः सपत्नीजनस्य च किंचित्संदिश्य निवर्तय परिजनम् ।**

द्रौपदी—**महाराअ ! अम्बाए एव्वं सन्दिसिस्सम्-'जो सो बअहिडिम्बकिम्मीरजडासुरजरासन्धविजअमल्लो वि दे मज्झमपुत्तो मम हदासाए पक्खवादेण परलोअं गदो त्ति' ।**

[महाराज ! अम्बायै एवं सन्देक्ष्यामि-'यः स बकहिडिम्बकिर्मीरजटासुरजरासन्धविजयमल्लोऽपि ते मध्यमपुत्रो मम हताशायाः पक्षपातेन परलोकं गतः' इति ।]

युधिष्ठिरः—**भद्रे बुद्धिमतिके ! उच्यतामस्मद्वचनादम्बा—**

सपत्नीजनस्य=सुभद्रादेः सपत्नीजनस्य । **सन्दिश्य**=सन्देशं दत्वा । **निवर्त्तय**=निवारय । **परिजनं**=दास्यादिसेवकपरिचारकवर्गम् । बकादयो दैत्याः, जरासन्धो मगधाधिपश्च भीमेन हताः। **मध्यमपुत्रः**=भीमसेनः । **हताशायाः**=हतमनोरथायाः । दुर्भगायाः । **पक्षपातेनेति** । मदुपरोधेन शत्रुकृततिरस्कारप्रतीकारं कर्त्तु प्रयतमानो हत इत्यर्थः । **बुद्धिमतिका**-द्रौपदी चेटी । **अम्बा**=कुन्ती ।

युधिष्ठिर—अयि द्रौपदी ! माता कुन्तीजी को तथा अपनी सपत्नियों (सुभद्रा आदि सौतो) को कुछ सन्देशा देकर इन सब परिजनों (दास दासी आदि) को यहीं से बिदा कर दो ।

द्रौपदी—महाराज ! माता (श्वश्रू कुन्तीजी) को मैं यह सन्देशा दूंगी कि—"हे माताजी ! जो बकासुर, हिडिम्बासुर, किर्मीर, जटासुर आदि बड़े २ राक्षसों, व जरासन्ध ऐसे पहलवान को जीतनेवाला आपका मध्यम पुत्र (भीम) था वह मेरे अपमान का बदला लेने के कारण लड़ता हुआ युद्ध में मारा जाकर परलोक को चला गया।"

युधिष्ठिर—हे बुद्धिमतिके ! मेरी माता को मेरा भी यह सन्देश कहना कि—

---

१ 'निवारय'।　　२ 'निवार्यतां परिजनः' ।

येनासि तत्र जतुवेश्मनि दीप्यमाने
उत्तारिता सह सुतैर्भुजयोर्बलेन ।
तस्य प्रियस्य बलिनस्तनयस्य पाप-
माख्यामि तेऽम्ब !, कथयेत्कथमीदृगन्यः ॥ २३ ॥

आर्य जयन्धर ! त्वमपि सहदेवसकाशं गच्छ । वक्तव्यश्च तत्रभवान्माद्रेयः कनीयान्सकलकुरुकुलकमलाकरदावानलो,—

येनासीति । हे अम्ब ! =मातः । तत्र=प्रवासे । =जतुवेश्मनि=लाक्षागृहे । दीप्यमाने=प्रज्वलति सति । येन=भीमेन । भुजयोर्बलेन=बाहुबलेन । सुतैः सह=युधिष्ठिरादिभिः स्वपुत्रैः सह । उत्तारिता=बहिर्निःसारिता । तस्य बलिनः=पराक्रमवतः । प्रियस्य=स्निग्धस्य । तनयस्य=पुत्रस्य । पापं=[illegible]र्थम् । ते=तव । आख्यामि = निवेदयामि । कथयामि । अन्यः= क्रूराशयान्मत्तोऽन्यः । ईदृक्=ईदृशमतिक्रूरम् । कथं कथयेत् । नैवमन्यो वक्तुं प्रभवति, अतोऽहमेव श्रावयामीत्यर्थः । 'कोऽन्यस्तवाम्ब ! कथयेत्कथमीदृशस्ये'ति पाठे–ईदृशस्य=गुणिन उपकारपरस्येत्यर्थः । वसन्ततिलका वृत्तम् ॥ २३ ॥

माद्रेयः=माद्रीपुत्रः । 'वैमात्रेय' इति पाठेऽपि स एवार्थः । बृहस्पतिः= तत्तुल्यः । प्रशस्तबुद्धिः । कमलाकरः=कमलवनं, तत्र दावानल इवेत्यर्थः । 'वडवानल' इति पाठे—कुरुकुलकमलाकरः पद्मसागर इव, तत्र बडवानल

हे अम्ब ! दुर्योधनद्वारा लाक्षागृह में आग लगा देने पर आपके पुत्रों के साथ आपको उस विपत्ति से अपनी भुजाओं के बलसे बचाकर जिसने बाहर निकाला था उस बली तुम्हारे पुत्र भीम के विषय में मैं अनिष्ट बात आपको सुनाता हूँ । अर्थात् 'भीम मारा गया' यह बुरी खबर मुझे ही देनी पड़ रही है । और ऐसी बात मेरे पापी के सिवाय दूसरा सुना भी कैसे सकता है ? ॥ २३ ॥

आर्य जयन्धर ! तुम सहदेव के पास जाओ । और उस माद्री के पुत्र, पाण्डु

१ 'निर्वाहिता' । २ 'कोऽन्यस्तवाम्ब ! कथयेत्कथमीदृशस्य' ।
३ 'त्वया' । ४ 'गन्तव्यं' ।
५ 'तत्रभवान्पाण्डुकुलबृहस्पतिर्वैमात्रेयः सकलकुरुकुलकमलाकरवडवानलः' ।



लाक्षागृहानलविषान्नसभाप्रवेशः

(जतुगृहदाहः) प्रथम अङ्क —

युधिष्ठिरः परलोकमभिप्रस्थितः प्रियानुजमप्रतिकूलं सततमाशंसनीयमसंमूढं व्यसनेऽभ्युदये च, भवन्तमविरलमालिङ्ग्य शिरसि चाघ्रायेदं प्रार्थयते—

मम हि वयसा दूरेणाऽल्पः, श्रुतेन समो भवा-
न्सहजकृपया बुद्ध्या ज्येष्ठो, मनीषितया गुरुः ।
शिरसि मुकुलौ पाणी कृत्वा भवन्तमतोऽर्थये
'मयि विरलतां नेयः स्नेहः, पितुर्भव वारिदः' ॥२४॥

इत्यर्थः । सकलेत्यादि सहदेवविशेषणम् । प्रियानुजं=प्रियं कनिष्ठं भ्रातरम् । सहदेवमिति यावत् । अप्रतिकूलम्=अनुकूलम् । अधीनम् । आशंसनीयं=प्रत्याशार्हम् । व्यसने=विपदि, अभ्युदये च=सम्पत्तौ च । असंमूढम्=अभ्रान्तम् । असुग्धम् । अविरलं=गाढम् ।

ममेति । मम हि दूरेण=अधिकेन । नितरामसंनिकृष्टेन । वयसा=अवस्थया । अल्पः=कनिष्ठः । सर्वतो हि भवान्मत्तः कनिष्ठः । परन्तु-श्रुतेन=शास्त्रेण तु । तदध्ययनेन । ज्ञानेन तु । समः=तुल्यः ।

सहजा स्वाभाविकी दया=कृपा यस्यां सा, तया । स्वाभाविकदयावत्या । बुद्ध्या=मत्या । मम ज्येष्ठः=मत्तः श्रेष्ठः । मनीषितया=पाण्डित्येन ।

कुल में बृहस्पति की समान बुद्धिमान्, मेरे छोटे भाई, कुरुकुलरूपी कमल के समुद्र को (या सरोवर को) जलाने में बडवानल (या दावानल) की तरह, सहदेव से कहना कि—युधिष्ठिर परलोक जाते समय अपने प्यारे भाई, सदा आज्ञा को माननेवाले, प्रत्युपकार के लिए जिससे सदा आशा रखी जा सकती है, (कृतज्ञ), ऐसे विश्वासी, कार्यकुशल, विपत्ति और सम्पत्ति में समानरूप से धैर्यशाली, सहदेव को दृढ आलिङ्गन कर शिर पर प्रेमपूर्वक सूंघ कर यह प्रार्थना करते हैं कि—

तुम मेरेसे अवस्था में तो बहुत ही छोटे हो, पर विद्या में मेरे बराबर ही हो, सहजदयालुता में, तथा बुद्धिमें मेरे से भी तुम बड़े हो, विद्वत्ता में तुम गुरु

१ 'दूरेण त्वं' ।

अपि च,—बालिश[1]चरितस्य नित्याभिमानिनोऽश्मसदृशं[2]-हृदयसारस्यापि नकुलस्य ममाज्ञया वचने स्थातव्यम्। नानु-गन्तव्याऽस्मत्पदवी। त्वया हि वत्स!

विस्मृत्याऽस्मान्श्रुतिविशद[3]या प्रज्ञया सानुजांश्च
पिण्डान्पाण्डोरुदकपृषतानश्रुगर्भान्प्रदातुम्।
दायादानामपि तु भवने, यादवानां कुले वा,
कान्तारे वा कृतवसतिना रक्षणीयं शरीरम्॥ २५॥

'धीरो मनीषी ज्ञः प्राज्ञः' इत्यमरः। गुरु=मान्यः। गुरुतुल्यः। सुरगुरुर्वा। अतः=अस्मात्कारणात्। शिरसि=मस्तके। मुकुलौ=मुकुलाकारौ। पाणी=हस्तौ। कृत्वा=विधाय। शिरस्यञ्जलिमाधाय। भवन्तं=त्वाम्। अर्थये=प्रार्थये। याचे। प्रार्थनामेवाह-मयीति। मयि=युधिष्ठिरे। स्नेहः=अनुरागः। विरलतां=कृशतां। स्वल्पतां। नेयः=प्रापणीयः। पितुः=पाण्डोः। वारिदः=जलाञ्जलिप्रदः। भव=एधि। स्नेहान्मदनुगमनं विहाय पितृभ्यो जलादिदानाय प्राणधारणं कुर्वित्यर्थः। हरिणी वृत्तम्॥ २४॥

बालिशचरितस्य=मूढचरितस्य। जडमतेः। नित्याभिमानिनः=सदा गर्वोद्धुरस्य। अश्मसदृशेति। प्रस्तरतुल्यकठोरहृदयस्येत्यर्थः। नकुलस्य=स्वज्येष्ठभ्रातुः। वचने-आज्ञायाम्। ममाज्ञया=मद्वचनगौरवात्। स्थातव्यं=वर्तितव्यम्। तेन कलहो न कर्त्तव्यः।

(बृहस्पति) के समान हो, अतः मैं शिर पर अञ्जलि बान्ध कर (हाथ जोड़ कर) आपसे भी यह प्रार्थना करता हूँ कि-मेरे में स्नेह बन्धन को ढीला करना और पिता को जल देने के लिए जीते रहना। अर्थात् मेरे पीछे शरीर मत त्यागना॥२४॥

और भी—'जड़बुद्धि, नित्य अभिमानी, पत्थर की तरह कठिन हृदय वाले अपने बड़े भाई नकुल की भी आज्ञा का सदा पालन करना'—यह मेरी आज्ञा है।

---

१ 'बालिशचरितस्य विद्याभिमानिनो मद्धृदयसारस्य'। 'बाल्ये संवर्धितस्य नित्यमभिमानिनोऽस्मत्सदृशहृदयसारस्य'। २ 'अस्मत्सदृश'।
३ 'श्रुतविशदया स्वाग्रजौ चात्मबुद्ध्या। क्षीणे पाण्डावुदकपृषतानश्रुगर्भान्प्रदातुम्'।

गच्छ जयन्धर ! अस्मच्छरीरस्पृष्टिकया शापितोसि-त्वया-ऽकालहीनमिवमवश्यमावेदनीयम् ।

विस्मृत्येति । **सानुजांश्च**=सभीमादिकांश्च । **अस्मान्**=युधिष्ठिरं माम् । **श्रुतिविशदया**=शास्त्रविशुद्धया । तत्त्वज्ञाननिर्मलया । **प्रज्ञया**=बुद्ध्या । **विस्मृत्य**=स्मृतिपथादुदस्य । **पाण्डोः**=पाण्डवे स्वपित्रे । **पिण्डान्**=श्राद्ध-पिण्डान् । **अश्रुगर्भान्**=लोचनजलमिश्रितान् । **उदकपृषतान्**=जलबिन्दून् । 'पृषन्ति बिन्दुपृषताः' इत्यमरः । **प्रदातुं**=संप्रदातुम् । **दायादानामपि तु**=शत्रूणां कौरवाणां,**भवने**=गृहे । अथवा-**यादवानां**=यदुवंश्यानां श्रीकृष्णादीनां । **कुले वा**=गृहे वा । वंशे वा । **कान्तारे वा**=दुर्गमे वर्त्मनि वा । **कृतवसतिना**=कृतनिवासेन । निवसता भवता । **शरीरं**=स्वशरीरम् । **रक्षणीयं**=पालनीयमेव । **'स्वाग्रजौ चात्मबुद्ध्या । क्षीणे पाण्डावुदकपृषता'निति पाठे-स्वाग्रजौ**=भीमार्जुनौ च विस्मृत्य, **क्षीणे**=परलोकं गते, **पाण्डौ**=स्वपितरि, उदकपृषता-न्दातुं शरीरं रक्षेत्यर्थः । मन्दाक्रान्ता वृत्तम् ॥ २५ ॥

शरीरस्पृष्टिकया=शरीरस्पर्शेन । कालेन न हीनम्-**अकालहीनम्** = काल-

---

और हमारे पीछे तुम अपना शरीर का त्याग नहीं करना ।'

और मेरे प्यारे भाई ! तुमको चाहिए कि—

शास्त्र के अभ्यास से निर्मल हुई बुद्धि से हमें तथा हमारे भाइयों को भूल कर अपने पिता पाण्डु को अश्रुमिश्रित (आंसुओं से भीगे हुए) पिण्डों को तथा जलाञ्जलि को देने के लिए अपने पट्टीदारों (दायादों कौरवों) के घर में रह कर, या यादवों के कुल (द्वारका) में रह कर, या किसी निर्जन बीहड़ वन में रह कर भी अपने शरीर की रक्षा करना । (अर्थात् अपने पिताको जल देने के लिए तुमारा जीते रहना आवश्यक है । अतः तुम हमारा अनुसरण मत करना) ॥२५॥

हे जयन्धर ! जाओ तुमको हमारे शरीर की सौगन्द है, इस हमारे सन्देश को जल्दी से जल्दी सहदेव को जरूर कह देना । बिलम्ब मत करना ।

---

१ 'शापितेन । भवताऽकालहीनमिदमवश्यमावेदनीयम्' ।

द्रौपदी—**हला बुद्धिमदिए ! भणाहि मह वअणेण पिअसहीं सुभद्दाम्—अज्ज वच्छाए उत्तराएं चउत्थो मासो पडिवण्णस्स गब्भस्स। तुमं एव्व कुलपडिट्ठाअवं सावहाणं रक्ख त्ति। सव्वथा णाविउले तं निक्खिवसि। कदा वि इदो लोआदो गदस्स ससुरउस्स अम्हाणं व सलिलबिन्दुदो भविस्सदि त्ति'।**

[हला बुद्धिमतिके ! भण मम वचनेन प्रियसखीं सुभद्राम्-वत्साया उत्तरायाश्चतुर्थो मासः प्रतिपन्नस्य गर्भस्य । त्वमेव कुलप्रतिष्ठापकं सावधानं रक्षेति । सर्वथा नाभिकुले तां निक्षिपसि । कदापीतो लोकाद्गतस्य श्वशुरकुलस्याऽस्माकञ्च सलिलबिन्दुदो भविष्यतीति]।

क्षेपमकृत्वैवेत्यर्थः । सद्य एवेति यावत् । **प्रतिपन्नस्य**=गृहीतस्य ।' **सलिलबिन्दुदः**=जलबिन्दुदः । **नाभिकुले**=पितृकुले । विराटकुले । स्वपितृकुले यादवकुले इति वाऽर्थः । **ताम्**=उत्तराम् । तमिति पाठे तं-बालमित्यर्थः । **निक्षिपसि**=स्थापयसि । **श्वशुरकुलस्य**=पाण्डुकुलस्य ।

द्रौपदी-अरी बुद्धिमतिके ! मेरे वचन से मेरी प्रियसखी सुभद्रा (अर्जुन की स्त्री) से कहना कि–अभिमन्यु की स्त्री उत्तरा को गर्भ धारण किए हुए यह चौथा महीना है, पाण्डुकुल की प्रतिष्ठा करने वाले इस गर्भ (या बालक या उसकी माता उत्तरा) की तुम सावधानी से रक्षा करना, इसे अपने पिता के घर में द्वारका में, (या उत्तरा के पिता के घर विराट नगर में) रख देना । कदाचित् इस गर्भ से जो बालक उत्पन्न होगा वह परलोक गत हमारे श्वशुर (पाण्डु) को तथा हम लोगों को जल देने वाला उत्पन्न हो सकता है ।

---

१ 'आवण्णसत्ताए चउत्थो मासो वट्टदि । सव्वेथा णाविउले तं णिक्खिवेसि । कदा वि इदो परलोअगदस्स ससुरउलस्स अम्हाणं वि सलिलबिन्दुदो भविस्सदि'त्ति ।

[अद्य वत्साया उत्तराया आपन्नसत्त्वायाश्चतुर्थो मासो वर्तते । सर्वथा नाभिकुले तां निक्षिपसि । कदापीतः परलोकगतस्य श्वशुरकुलस्याऽस्माकमपि सलिलबिन्दुदो भविष्यति' इति] । २ 'तं निक्षिपसि' ।

युधिष्ठिरः—(सास्रम्) भोः कष्टम् !

शाखारोधस्थगितवसुधामण्डले मण्डिताशे
पीनस्कन्धे सुसदृशमहामूलपर्यन्तबन्धे।
दग्धे दैवात्सुमहति तरौ, तस्य सूक्ष्माङ्कुरेऽस्मि-
न्नाशाबन्धं कमपि कुरुते छाययार्थी जनोऽयम्! ॥२६॥

शाखेति । शाखारोधेन=शाखाऽवरोधेन, तद्व्याप्त्या, स्थगितं=समवरुद्धं, वसुधामण्डलं येन तस्मिन्–**शाखारोधस्थगितवसुधामण्डले**=शाखाविस्तारभरितभूमण्डले । सकलभुवनाधीशे इति प्रकृतेऽर्थः । मण्डिता आशा येन तस्मिन् । भूषितदिशि । पूरिताऽऽशाबन्धे इति वा । **पीनस्कन्धे**=स्थूलतरस्कन्धप्रदेशे । पीनांसे इति प्रकृतेऽर्थः । 'अस्त्री प्रकाण्डः स्कन्धः स्यात्' इत्यमरः। 'स्कन्धो भुजशिरोंऽशोऽस्त्री' इत्यमरः। सुसदृशो सुसदृशस्य वा महामूलस्य पर्यन्तबन्धो यस्यासौ तस्मिन्–**सुसदृशमहामूलपर्यन्तबन्धे**=समुचितमहामूलपरिवारानुबन्धशालिनि । दृढमूले, विशालाऽऽलवालपरिवृते चेत्यर्थः । सुदृढे बद्धमूले दृढपरिकरे चेति च प्रकृतेऽर्थः । 'पर्यङ्कबन्धे' इति पाठे—**पर्यङ्कबन्धः**=आलवालम् । ईदृशे **सुमहति**=अतिमहति । **तरौ**=वृक्षे । पाण्डववंशे । **दैवात्**=दुर्भाग्यात् । **दग्धे**=दैवाद्विनष्टे सति । भीमादिवधाद्विनष्टे सति । **तस्य**=पाण्डुवंशस्य । अस्मिन् **सूक्ष्माङ्कुरे**=गर्भरूपे-

---

युधिष्ठिर—(आँखों में आंसू भर कर) हाय ! बड़े दुःख व कष्ट की बात है कि—

जिसने अपनी शाखाओं से सम्पूर्ण पृथ्वीमण्डल को व्याप्त कर रखा था, जिससे सब दिशाओं की शोभा बढ़ रही थी, जिसका स्कन्ध (तना पेड़ कन्धा) बहुत मोटा था, जिसकी जड़ बहुत नीचे तक थी, तथा जिसका आलवाल (थाल) या परिवारानुबन्ध भी उसके अनुरूप ही महान् था, ऐसे पाण्डुकुलरूपी महान् वृक्ष के दुर्दैव के कारण जलजाने पर भी छाया के चाहने वाले ये लोग उसके छोटे से अङ्कुर पर ही आशा लगाये हैं ! (भीम अर्जुन ऐसे महाबलियों के मारे जाने पर

---

१ 'पर्यङ्कबन्धे'।

साधु[1]। इदानीमध्यवसितं करणीयम्। (कञ्चुकिनमवलोक्य) आर्य जयन्धर! स्वशरीरेण[2] शापितोऽसि, तथापि न गम्यते ?।

कञ्चुकी--(साक्रन्दं) हा देव पाण्डो! तव सुतानामजातशत्रुभीमार्जुननकुलसहदेवानामयं दारुणः परिणामः!।

हा देवि कुन्ति! भोजराजभवनपताके!

भ्रातुस्ते तनयेन शौरिगुरुणा श्यालेन गाण्डीविन-
स्तस्यैवाखिलधार्तराष्ट्रनलिनी[3]व्यालोलने[4] दन्तिनः।

ऽङ्कुरे। छायया अर्थी=छायाभिलाषी। सुखार्थी च। अयं जनः=द्रौपदीरूपो जनः। कमपि=विशिष्टम्। आशाबन्धम्=आशाऽनुबन्धम्। कुरुते=धत्ते। जयन्धरेति-कञ्चुकिनामधेयम्। साक्रन्दं=सफूत्कारम्। सविलापं वा। दारुणः=भीषणः। 'दारुणं भीषणं भीष्मम्' इत्यमरः। परिणामः=परिपाकः। भोजराजः=कुन्तीपिता। भोजदेशश्च सम्प्रति भोपाल इति प्रसिद्धः। तस्य भवनं=गृहं, तस्य पताकेव-पताका। यशोहेतुत्वात्। पुत्रीत्यर्थः। भ्रातुरिति। ते भ्रातुस्तनयेन=तव भ्रातुर्वसुदेवस्य पुत्रेण। शौरिः=श्रीकृष्णः। तस्य गुरुणा= ज्येष्ठेन। गाण्डीविनः=अर्जुनस्य। श्यालेन=पत्नीसुभद्राभ्रात्रा। अखिलेति।

भी उनके वंश की रक्षा के लिए ४ मास के गर्भ पर ही हाय! यह द्रौपदी आशा लगाती है)॥ २६ ॥

अच्छा। अब जो हमने निश्चय कर लिया उस कार्य (चितारोहण) को करना चाहिए। (कञ्चुकी को देख कर) आर्य जयन्धर! हमने तुम्हें अपने शरीर की शपथ दिलादी तो भी तुम नहीं जा रहे हो!।

कञ्चुकी—(बड़े जोर से रोता हुआ) हाय महाराज पाण्डु! आपके वीर पुत्र युधिष्ठिर, भीम, अर्जुन, नकुल, सहदेव की आज यह दारुण दशा हो रही है!। हाय देवी, भोजराज (भोपाल के राजा) के घर की पताकास्वरूप, कुन्ती जी!

तुमारे भाई वसुदेवजी के पुत्र, श्रीकृष्ण के बड़े भाई, अर्जुन के शाले, सम्पूर्ण

---

१ क्वचिन्न। २ 'अस्मच्छरीरेण'। ३ 'नलिन'। ४ 'व्यालोलना'।

आचार्येण वृकोदरस्य हलिनोन्मत्तेन मत्तेन वा
दग्धं त्वत्सुतकाननं, ननु मही यस्याश्रयाच्छीतला ॥२७॥

(इति रुदन्निष्क्रान्तः)।

युधिष्ठिरः—**जयन्धर जयन्धर !**

(प्रविश्य)

कञ्चुकी—**आज्ञापयतु देवः।**

युधिष्ठिरः—**वक्तव्यमिति ब्रवीमि, न पुनरेतावन्ति भागधेयानि नः, यदि कदाचिद्विजयी स्याद्वत्सोऽर्जुनस्तद्वक्तव्योऽस्मद्वचनाद्भवता।**

सकलधार्तराष्ट्रकुलकमलिनीदलने हस्तिन इवेत्यर्थः। आचार्येण=गुरुणा। हलिना=बलभद्रेण, मूर्खेण वा। त्वत्सुता एव काननम्=उपवनं, वनं वा। यस्य=त्वत्सुतकाननस्य। आश्रयात्=उपाश्रयणात्। शीतला=समाश्वस्ता। रक्षिता। आसीत्=अभूत्। उन्मत्तेन=अतिक्षीबेन। विक्षिप्तेन वा। मत्तेन=गर्वितेन। उन्मत्तेन वा। जगद्रक्षकत्वत्पुत्रकाननं विनाशितम्। शार्दूलविक्रीडितं वृत्तम्॥ २७॥

वक्तव्यं=हृदि वक्तव्यतया समागतमिति। एतावन्ति=अर्जुनविजयसम्भावना-

---

धार्त्तराष्ट्रों (धृतराष्ट्र के पुत्रों) को कमल की लताकी तरह उखाड़ कर फेंकने वाले—भीमसेन के गुरु, बलदेवजी ने मदिरा से उन्मत्त हो, या पागल हो तुमारे पुत्र रूपी उस उपवन (बगीचे) को—जिससे जगत् शान्ति पाता था—नष्ट कर दिया ॥ २७ ॥

(इस प्रकार रोता हुआ जाता है)

युधिष्ठिर—आर्य जयन्धर ! जयन्धर !!

(पुनः आकर—)

कञ्चुकी--महाराज आज्ञा करिए।

युधिष्ठिर—मन में आया (कहने की इच्छा हुई) है इसलिए ही कहता हूँ,

---

१ 'तत्सुतकाननं'।

२ 'तव मही'।   ३ 'वक्तुमिच्छामि'।

हली हेतुः सत्यं भवति मम वत्सस्य निधने,
तथाप्येष भ्राता सहजसुहृदस्ते मधुरिपोः ।
अतः क्रोधः कार्यो न खलु मयि चेत्प्रेम भवतो
वनं गच्छेर्मा गाः पुनरकरुणां क्षात्रपदवीम् ॥ २८ ॥

कञ्चुकी—**यदाज्ञापयति देवः ।** (इति निष्क्रान्तः) ।

युधिष्ठिरः—(अग्निं दृष्ट्वा, सहर्षं) **कृष्णे ! ननूद्धतशिखाहस्ता-**

योग्यानि । **भाग्यानि**=सौभाग्यानि । वक्तव्यमेवाह-हलीति । **सत्यं**=यद्यपि । वस्तुतः । **हली**=बलभद्रः । **वत्सस्य**=भीमस्य । **निधने**=मरणे । **एषः**=बलभद्रः । **मधुरिपोः**=श्रीकृष्णस्य । **चेत्**=यदि भवतो मयि प्रेम अस्ति तर्हि वनं गच्छेः । 'भवता' इति पाठे 'भवता क्रोधो न कार्य' इति सम्बन्धः । 'यदि प्राणिषी'ति पाठे-मदनुगमनं यदि न करोषि, किन्तु जीवितुमिच्छसि तदापीत्यर्थः । **क्षात्रपदवीं**=क्षत्रियादृतां प्रतीकारपद्धतिम् । बलभद्रवध-रूपाम् । **मा गाः**=मा गमिष्यसि । शिखरिणी वृत्तम् ॥ २८ ॥

उद्धूता=चटचटायमाना । पाठान्तरे-उद्धता=प्रौढा या **शिखा**=अर्चिः । 'अर्चिर्हेतिः शिखा स्त्रियाम्' इत्यमरः । सैव हस्तः

अन्यथा हमारे ऐसे बड़े भाग तो कहाँ हैं ।--कदाचित् अर्जुन शत्रु पर विजय प्राप्त कर लौटे तो हमारी ओर से तुम उन्हें कहना कि--

यह बात सच है कि--मेरे वत्स भीम के मारने में बलरामजी ही हेतु हैं, तो भी ये तुमारा सच्चे मित्र श्रीकृष्ण के बड़े भाई हैं, अतः उनपर क्रोध मत करना, यदि तुमारा मेरे में प्रेम है तो मेरी आज्ञा मानना । (तुम किसी प्रकार जीते बच जाओ तो वन को चले जाना, संन्यास ले लेना) । परन्तु क्रूर व निर्दय क्षत्रियोचित जो बदला लेने की पद्धति है उस पर मत चलना । (बलरामजी से बदला लेने का प्रयत्न मत करना) ॥ २८ ॥

कञ्चुकी—जो आज्ञा महाराज की ।
(ऐसा कह कर जाता है) ।

युधिष्ठिर—(राक्षस द्वारा गुप्तरूप से प्रज्वलित की गई अग्नि को देखकर)

१ 'मयि च प्रेम' । 'यदि च प्राणिषि ततो' । २ कश्चिन्न । ३ 'ननूद्धूतशिखा' ।

हूताऽस्मद्विधव्यसनिजनः समिद्धो भगवान्हुताशनः । तत्रेन्धनीकरोम्यात्मानम्[१] ।

द्रौपदी—प्पसीददु प्पसीददु[२] महाराओ-इमिणा अपच्छिमेण पणएण । अहं दाव अग्गदो[३] प्पविसामि ।

[प्रसीदतु प्रसीदतु महाराजोऽनेनाऽपश्चिमेन प्रणयेन । अहं तावदग्रतः प्रविशामि ।]

युधिष्ठिरः—यद्येवं[४] सहितावेवाभ्युदयमुपभोक्ष्यावहे ।

चेटी--हा भअवन्तो[५] लोअवाला ! परित्ताअह परित्ताअह । एसो क्खु सोमवंसराएसी राअसूअसंतप्पिदहव्ववाहो, खण्डव-

तेनाहूताः अस्मद्विधाः व्यसनिजनाः=दुःखशोकातुरलोका येनासौ तथाभूतः । समिद्धः=प्रदीप्तः । इन्धनं=काष्ठम् । अपश्चिमेन=प्रथमेन । प्रणयेन=याच्ञया । 'प्रणयः प्रेम्णि याच्ञायाम्' इति धरणिः । याच्ञामेवाह—अहमिति । अभ्युदयं=महोत्सवम् । सुखम् । उपभोक्ष्यावहे=अनुभविष्यावः । लोकपालाः=लोकरक्षकाः शक्रादयो देवा इति । राजसूयेति ।

हे द्रौपदी ! यह भगवान् अग्नि अपनी लम्बी २ शिखारूपी हाथों से हमारे एसे दुःखी लोगों को बुलाते हुए प्रदीप्त हो रहे हैं, इसमें मै अपने शरीर को जलाता हूँ।

द्रौपदी—महाराज ! दया करिए, दया करिए । मै आपसे एक अन्तिम प्रार्थना करती हूं कि–मुझे ही पहिले अग्नि में प्रवेश करने दीजिए ।

युधिष्ठिर—यदि ऐसी बात है तो फिर हम और तुम साथही इस अभ्युदय (सुख) का उपभोग करेंगें ।

दासी—हे भगवन लोकपालो ! रक्षा करिए, रक्षा करिए ।

इस सोमवंशोत्पन्न राजर्षि की रक्षा करिए । यह सोम (चन्द्र) वंश में

१ 'तत्रेन्धनमात्मानं करिष्ये' ।　　२ क्वचिन्न ।

३ 'गमिस्सं' ।　　४ 'मपि भोक्ष्यावहे' ।

५ भअवन्तो लोअवाला ! परित्ताअह सोमवंसराएसी । अअं क्खु राआ राअसूअसंतप्पिदहुव्वहो' [हा भगवन्तो लोकपालाः ! परित्रायध्वं सोमवंशराजर्षिम् । अय खलु राजा राजसूयसन्तर्पितहुतवहो] ।

संतप्पिदहुदवहस्स किरीडिणो जेट्ठो भादा, सुग्गहीदणामहेओ महाराअजुहिट्ठिरो । एसा वि[1] पाञ्चालराअतणआ देवी वेदिमज्झसम्भवा जण्णसेणी । दुवे वि सरीरेण[2] णिक्करुण[3]जलणस्स प्पवेसेण इन्धणीहोन्ति । ता परित्ताअह अज्जा[2] ! परित्ताअह । [कधं ण को वि परित्ताअदि] । (तयोरग्रतः पतित्वा) किं ववसिदं देवीए देवेण अ ? ।

[हा भगवन्तो लोकपालाः ! परित्रायध्वं परित्रायध्वम् । एष खलु सोमवंशराजर्षी राजसूयसंतर्पितहव्यवाहः, खाण्डवसंतर्पितहुतवहस्य किरीटिनो ज्येष्ठो भ्राता, सुगृहीतनामधेयो महाराजयुधिष्ठिरः । एषापि पाञ्चालराजतनया देवी वेदिमध्यसंभवा याज्ञसेनी । द्वावपि शरीरेण[2] निष्करुण[3]ज्वलनस्य प्रवेशेनेन्धनीभवतः । तत्परित्रायध्वमार्याः ! परित्रायध्वम् । [कथं न कोऽपि परित्रायते] । किं व्यवसितं देव्या देवेन च ? ।]

कृतराजसूययज्ञसन्तर्पितवह्निरित्यर्थः । खाण्डवं=वनम् । तच्च वह्निप्रार्थितेनार्जुनेन बुभुक्षाकृशाय वह्नये दत्तम् । अर्जुनरक्षितेन वह्निना च तद्दग्धमिति महाभारतकथा । सुगृहीतनामधेयः=पुण्यकीर्तिः । प्रातःस्मरणीयनामधेयः ।

उत्पन्न हुए राजर्षि, जिन्होंने राजसूय यज्ञ करके अग्नि भगवान् की तृप्ति की है, खाण्डववन देकर [उसे समर्पित कर] जिसने अग्नि भगवान् को प्रसन्न किया था ऐसे महाबली अर्जुन के बड़े भाई, सुगृहीत नामधेय (यशस्वी) महाराज युधिष्ठिर हैं । और ये महारानी पञ्चालराजकी पुत्री यज्ञवेदि से उत्पन्न हुई देवी द्रौपदी है । ये दोनों ही इस भयानक अग्नि में जल कर भस्म होना चाहते हैं । अतः हे आर्यो ! (हे सज्जनों ! या देवताओं) रक्षा करिए रक्षा करिए । हाय क्या कारण है कि कोई भी बचाने नहीं आरहा है ? । (उन दोनों के आगे गिरकर) हाय महाराज और महारानी ने [आप लोगों ने] यह क्या विचारा है ? ।

१ 'एसा देवी पञ्चालराअकुलदेवदा, जण्णवेदिमज्झसम्भवा' ।

२ कश्चिन्न ।

३ 'णिक्करुणस्स कालाणलस्स' । [निष्करुणस्य कालानलस्य] ।

युधिष्ठिरः—अयि बुद्धिमतिके ! यन्नाथेन[1] प्रियानुजेन विना सदृशं तत् । उत्तिष्ठोत्तिष्ठ[2], भद्रे ! उदकमुपानय[3] ।

चेटी—जं देवो आणवेदि । (इति निष्क्रम्य पुनः प्रविश्य च) जेदु जेदु महाराओ ।

[यद्देव आज्ञापयति । जयतु जयतु महाराजः] ।

युधिष्ठिरः—पाञ्चालि ! त्वमपि तावत्स्वपक्षपातिनो वृकोदरस्य प्रियस्यार्जुनस्योदकक्रियां कुरु ।

द्रौपदी—महाराओ एव्व करेदु । अहं उण जलणं पविसिस्सम् ।

[महाराज एव करोतु । अह पुनर्ज्वलनं प्रवेक्ष्यामि] ।

युधिष्ठिरः—अनतिक्रमणीयं लोकवृत्तम् । भद्रे ! उदकमुपानय[4] ।

वेदिः=यज्ञवेदिः । याज्ञसेनी=द्रौपदी । व्यवसितं=निर्णीतमिति प्रश्नः । उत्तरयति–यदिति । नाथेन=पत्या विना यत्कर्त्तुमुचितं तद्द्रौपद्या निश्चितम् ।

युधिष्ठिर—अयि बुद्धिमतिके ! जो अपने प्रिय पति व प्रिय भाई के परलोक जाने पर निश्चय करना चाहिए वही (मरना) हम लोगों ने भी निश्चय किया है । उठ जा जल ले आ ।

चेटी—जो महाराजकी आज्ञा । [बाहर जाकर जल लेकर पुनः आकर] महाराज की जय हो । जय हो ।

युधिष्ठिर—हे द्रौपदी ! आओ तुम भी अपने प्रिय एवं पक्षपाती भीमसेन और अर्जुन को तिलाञ्जलि दे दो ।

द्रौपदी—महाराज ! आपही तिलाञ्जलि दीजिए, मै तो अग्नि मे प्रवेश करूंगी ।

युधिष्ठिर—देवि ! लोकाचार का उलङ्घन कभी नही करना चाहिए, अतः आओ । भद्रे बुद्धिमतिके ! लाओ जल दो ।

१ 'यद्वत्सलेन' । २ क्वचिन्न । ३ 'सलिलमुपा' । ४ पुनरुक्तवत्पाठः ।

(चेटी तथा करोति)।

युधिष्ठिरः—(पादौ प्रक्षाल्योपस्पृश्य च) एष तावत्सलिलाञ्जलिर्गाङ्गेयाय भीष्माय गुरवे प्रपितामहाय शान्तनवे । अयमपि पितामहाय विचित्रवीर्याय । (सास्र) तातस्याधुनाऽवसरः । अयं तावत्स्वर्गस्थिताय सुगृहीतनाम्ने पित्रे पाण्डवे ।

अद्यप्रभृति वारीदमस्मत्तो दुर्लभं पुनः ।
तात ! माद्र्योऽम्बया सार्धं मया दत्तं निपीयताम् ॥२९॥

प्रियानुजेन विना यत्कर्तुमुचितं तच्च मया व्यवसितमित्यन्वयः । पाठान्तरे-वत्सलेन=स्नेहपात्रेण । उपस्पृश्य=आचम्य । रोदनानन्तरमाचमनस्योचितत्वात् । तातस्य=पितुः । सुगृहीतनाम्ने=पुण्यश्लोकाय ।
वारि=निवापजलम् ॥ २९ ॥

(चेटी जल लाकर देती है)।

युधिष्ठिर—[हाथ पैर धोकर, आचमन कर] यह जलाञ्जलि हमारे गुरु गङ्गापुत्र भीष्म को । यह जलाञ्जलि हमारे प्रपितामह शान्तनु को। यह जलाञ्जलि हमारे पितामह विचित्रवीर्य को । (आँखों में आँसू भरकर) अब यह पिताजी का अवसर है । यह जलाञ्जलि पूज्य स्वर्गस्थ हमारे पिता व गुरु पाण्डु को ।

हे पिताजी ! अब इसके बाद हमारे द्वारा आपको तर्पण का जल मिलना दुर्लभ हो जायगा । अतः हे पिताजी ! आप माता माद्रीजी के साथ यह मेरे द्वारा दिया गया जलाञ्जलि पीजिए ॥ २९ ॥

१ क्वचिन्न । २ 'तात ! तवाधुनाऽवसरः' । 'तातस्येदानीमवसर.' ।
३ 'अयमपि तत्रभवते स्वर्गस्थाय गुरवे सुगृहीतनाम्ने पित्रे पाण्डवे' ।
४ 'वा दत्त' । ५ 'मा ऽम्बया' । 'त्वमाऽम्बया' ।
६ 'एतद्दत्त निपीयताम्' ।

एतज्जलं जलजनील[1]विलोचना[2]य
भीमाय[3] भोस्तव ममाऽप्यविभक्तमस्तु ।
एकं[4] क्षणं विरमं वत्स ! पिपासितोऽपि
पातुं त्वया सह जवाद[5]यमागतोऽस्मि ॥ ३० ॥

अथवा सुक्षत्रियाणां गतिमुपगतं वत्समहमुपगतोऽप्यकृती द्रष्टुम् । वत्स भीमसेन !

मया पीतं पीतं[6] तदनु भवताऽम्बास्तनयुगं,
मदुच्छिष्टैर्वृत्तिं जनयसि रसैर्वत्सलतया ।

एतदिति । जलं=निवापोदकम् । जलजवत्–नीलकमलवन्नीले लोचने यस्य तस्मै इति विग्रहः । नीलकमललोचनायेत्यर्थः । 'नीलविलोचनस्ये'ति पाठान्तरम् । वत्स=भीम । जवात्=वेगात् । सद्य एव । अयम्=अहम् । युधिष्ठिरोऽहम् । पाठान्तरे–भीमप्रियस्य=भीमप्रणयिनः। भीमेति पृथक्पदं वा । जलजलीलविलोचनस्येति क्वाचित्कः युक्ततरः पाठः। जलजस्य लीला विलासो यत्र तादृशं लोचनं यस्येति च तदाऽर्थः। वसन्ततिलका वृत्तम् ॥ ३० ॥

गतिं=स्वर्गादिगतिम् । अकृती=असमर्थः । तदनु=तत्पश्चात् । वृत्तिं=

और यह जल कमलनीललोचन भीमसेन और मेरे लिए (हम दोनों के लिए) अविभक्त ही हो । और हे वत्स ! तू यद्यपि पिपासित भी है तो भी एक क्षण ठहर, तेरे साथही इस जल को पीने के लिए शीघ्र ही मैं आ ही रहा हूँ । (अर्थात् अब मैं अग्नि में प्रवेश कर तेरे पास आता हूँ) ॥ ३० ॥

अथवा–वत्स भीमसेन तो वीरक्षत्रियोचित गति को प्राप्त हुए हैं, मैं यदि अग्नि में अपने शरीर को भस्म भी करूँगा तो भी उस गति को पाना और भीमसेन से मिल सकना मेरे लिए सम्भव नहीं है ।

१ 'जलजलीलविलोचनस्य' । २ 'विलोचनस्य' ।
३ 'भीमप्रियस्य मम चाऽप्यविभक्तमस्तु' ।
४ 'एकं क्षणं तु विपहस्व पिपा' । ५ 'अहं' । ६ 'पूर्वं' ।

वितानेष्वप्येवं तव मम च सोमे विधिरभू-
न्निवापाम्भः पूर्वं पिबसि कथमेवं त्वमधुना ? ॥३१॥

कृष्णे ! त्वमपि देहि सलिलाञ्जलिम् ।

द्रौपदी—हञ्जे बुद्धिमदिए ! उवणेहि मे सलिलम् ।

[हञ्जे बुद्धिमतिके ! उपनय मे सलिलम्] ।

(चेटी तथा करोति) ।

द्रौपदी—(उपसृत्य जलाञ्जलिं पूरयित्वा) महाराअ ! कस्स सलिलं देम्हि ? ।

जीवनम् । रसैः=दुग्धैः । वितानेषु=यज्ञेषु । सोमे=सोमरसपाने । तन्नामकयज्ञे वा । पाठान्तरे-साम्ये=तुल्यत्वे । विधिः = प्रकारः । साम्यो विधिरिति पाठे-समानः प्रकार इत्यर्थः । निवापः=पितृदेयम् । अम्भः = जलम् । मत्तः पूर्वं कथं परलोकं गतोऽसीत्यर्थः ॥ ३१ ॥

हञ्जे इति चेटीसम्बोधनम् । 'हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति' इत्यमरः । तथा करोति=जलमुपनयति । कृष्णे=हे द्रौपदि । सहसा=

हे वत्स ! मैं पहिले माताजी का स्तन पी चुका तब तुमने माता कुन्ती का दूध पीया था । और मेरे उच्छिष्ट (पदार्थों व) दूध आदि रसों का ही तुम सदा से सेवन करते आए हो । सोमयज्ञमें (या सभी यज्ञों में) भी तुम इसी प्रकार मेरे पीए हुए रस का ही सेवन किया था तो अब यह तिल जलाञ्जलि मेरे से पहिले क्यों पी रहे हो ? ॥ ३१ ॥

हे द्रौपदी ! तूं भी जलाञ्जलि दे ।

द्रौपदी—अरी बुद्धिमतिके ! ला जल ला ।

[दासी जल देती है] ।

द्रौपदी—[पास में जाकर जल से अञ्जलि भरकर] महाराज ! किसको जलाञ्जलि दूँ ? ।

---

१ 'साम्ये विधिः' । २ 'कृष्णे ! देहि जलाञ्जलिं तत्रभवते भीमाय' ।

३ 'देहि मे उदअम्' । [देहि मे उदकम्] । ४ कञ्चिन्न ।

[महाराज ! कस्य सलिलं ददामि ?] ।

युधिष्ठिरः—

तस्मै देहि जलं कृष्णे ! सहसा गच्छते दिवम् ।

अम्बाऽपि येन गान्धारीरुदितेन सखीकृता ॥ ३२ ॥

द्रौपदी—**णाह भीमसेण ! परिअणोवणीदं उदअं सग्गगदस्स दे पादोदअं भोदु ।**

[नाथ भीमसेन ! परिजनोपनीतमुदकं स्वर्गगतस्य ते पादोदकं भवतु]।

युधिष्ठिरः—**फाल्गुनाग्रज !**

असमाप्तप्रतिज्ञेऽपि याते त्वयि महाभुजे ।

मुक्तकेश्यैव दत्तस्ते प्रियया सलिलाञ्जलिः ॥ ३३ ॥

अकस्मात् । शीघ्रं दिवं=स्वर्गम् । गच्छते=याते, तस्मै जलं देहि, येन=भीमेन, अम्बा=कुन्ती । गान्धारीरुदितेन=दुर्योधनजननीरुदितेन । पुत्रशतमरणाद्गान्धार्या रोदनं । सखीकृता–तथैव रोदनवती कृता । स्वमरणाद्येन कुन्ती रोदनं कारितेत्यर्थः ॥ ३२ ॥

परिजनोपनीतम्=मद्दत्तं । पादोदकं=पाद्यम् । युधिष्ठिरदत्तस्य पानयोग्यता, मद्दत्तस्य तु पादप्रक्षालनोपयोगितेति हृदयम्। फाल्गुनाग्रज=हेभीम । असमाप्तप्रतिज्ञे=अपूरितवेणीसंवरणप्रतिज्ञे । मुक्तकेश्या=अबद्धकेशया । प्रियया=तव कान्तया द्रौपद्या ॥ ३३ ॥

युधिष्ठिर—हे द्रौपदी ! तूं उसी [भीम] को जल दे, जो गान्धारी के साथ ही साथ माता कुन्ती को भी रुलाकर स्वर्ग चला गया । [भीम ने १०० सौ पुत्र मारकर दुर्योधन की माता गान्धारी को रुलाया था] ॥ ३२ ॥

द्रौपदी—नाथ भीमसेन ! तुमारे हम सब परिजनों के द्वारा दिया गया यह जल स्वर्गगत आपके लिए पादोदक [पैर धोने का जल] हो ।

---

१ 'पूर्वं' । २ 'गान्धार्या' । ३ 'समीकृता' । ४ कश्चिन्न ।

५ 'भविस्सदि एदं' । [भविष्यत्येतत्] । ६ 'ममानुजे' । ७ 'ते दत्तः' ।

द्रौपदी—उट्ठेहि महाराअ ! दूरं गच्छदि दे भादा ।

[उत्तिष्ठ महाराज ! दूरं गच्छति ते भ्राता]।

युधिष्ठिरः—(दक्षिणाक्षिस्पन्दनं सूचयित्वा) पाञ्चालि ! निमित्तानि मे कथयन्ति-सम्भावयिष्यसि[1] वृकोदरमिति । भवतु[2] शीघ्रं दहनमुपसर्पावः ।

द्रौपदी[3]—महाराअ ! सुणिमित्तं भोदु ।

[महाराज ! सुनिमित्तं भवतु]।

(नेपथ्ये कलकलः) ।

(प्रविश्य सम्भ्रान्तः—)

कञ्चुकी[4]—परित्रायतां परित्रायतां महाराजः । एष खलु दुरात्मा कौरवापसदः क्षतजाभिषेकपाटलिताम्बर[5]शरीरः समु-

निमित्तानि=शुभशकुनानि । संभावयिष्यसि=द्रक्ष्यसि । क्षतजेति ।

युधिष्ठिर—हे अर्जुन के बड़े भाई भीमसेन ! हे महावीर ! तुम अपनी प्रतिज्ञा पूरी किए विना ही परलोक चले गए, अतः तुमारी प्रिया द्रौपदी तुम्हें खुले केशों से ही जलाञ्जलि दे रही है ॥ ३३ ॥

द्रौपदी—महाराज ! उठिए । देखिए आपका भाई [भीम] दूर चला जारहा है ।

युधिष्ठिर—(दहिनी आंख का फड़कना सूचित कर) द्रौपदी ! शुभ शकुन कह रहे है कि तूं शीघ्र ही भीमसेन से मिलेगी । अच्छा ! चलो जल्दी अग्नि की ओर (पाठान्तर में या भीम के पीछे) चलें ।

द्रौपदी—महाराज ! भगवान् करें आपका शकुन शुभ व सच्चा हो ।
[आह ! अग्नि भगवान् खूब प्रज्वलित हो उठे हैं ।]

---

१ 'सम्भावयसि' । २ 'भवतु शीघ्रतरमनुगच्छामि' । ३ अस्य स्थाने- 'आः ! पज्जलिदो भअवं हुदवहो ।' [आः ! प्रज्वलितो भगवान् हुतवहः] ।

४ **कञ्चुकी**-(प्रविश्य सम्भ्रान्तः)' ।

५ 'पाटलीकृताम्बरो' ।

च्छ्रितदिग्धभीषणगदाशनिरुद्यतकालदण्ड इव कृतान्तोऽत्रभवतीं पाञ्चालराजतनयामितस्ततः परिमार्गमाण इत एवाभिवर्तते ।

युधिष्ठिरः—हा दैव ! तेन निर्णयो जातः । हा गाण्डीवधन्वन् !

(इति मुह्यति) ।

द्रौपदी—हा अज्जउत्त ! हा मम सअम्वरसअङ्गाहदुल्लिद ! धणंजअ ! पिअं भादुअं अणुगदोसि, ण उण महाराअं, इमं दासजणं अ ।

(इति मोहमुपगता) ।

[हा आर्यपुत्र ! हा मम स्वयंवरस्वयंग्राहदुर्ललित ! धनञ्जय ! प्रियं भ्रातरमनुगतोऽसि, न पुनर्महाराजमिमं दासजनं च] ।

रुधिरस्नानरक्तीकृतवस्त्रदेहः। उच्छ्रिता=उद्यता । दिग्धा=लिप्ता । अत्र-उद्यतगदस्योद्यतकालदण्डेन कृतान्तेन=यमेन साम्यं दर्शितम् । अभिवर्तते=अभ्यागच्छति । निर्णयः=अर्जुनो जीवति वा मृतो वेति सन्देहस्य निर्णयः। मृतोऽर्जुन इति यावत् । मुह्यति=मूर्च्छितः पतति । स्वयंवरेति । स्वयंवर एव स्वयं-

---

[नेपथ्य में हल्ला होता है] ।

[कन्चुकी घबड़ाकर भीतर आता है] .

कञ्चुकी—महाराज ! बचाइए ! बचाइए ! यह कौरवाधम दुर्योधन-रक्त में स्नान करने से जिसके वस्त्र लाल हो गए हैं—ऐसा, रुधिर से लाल हुई भीषण गदा रूपी वज्र को लिए हुए, भयङ्कर कालदण्ड को उठाए हुए यमराज की तरह, भगवती द्रौपदी को खोजता हुआ—इधर ही आ रहा है ।

युधिष्ठिर--हा दैव ! अब अर्जुन के विषय में भी (मृत्यु का) निर्णय हो गया । (नहीं तो दुर्योधन यहाँ कैसे आता !) । हा गाण्डीवधनुषधारी अर्जुन ! (ऐसा कह कर मूर्च्छित हो जाता है) ।

द्रौपदी—हाय आर्यपुत्र ! हाय मेरे स्वयंवर में मुझे जीत कर लाने वाले !

---

१ 'रक्तभीषणगदाशनिरुद्धतकालदण्ड इव' ।

२ 'उद्धतकालदण्ड इवान्तको' । ३ 'ते निर्णयः' । ४ क्वचिन्न ।

५ 'सअङ्गह-कुडुम्ब' । ६ 'सम्भावेसि' । [सम्भावयसि] ।

युधिष्ठिरः—**हा वत्स सव्यसाचिन् ! हा त्रिलोचनाङ्गनिष्पेष-मल्ल ! हा निवातकवचोद्धरणनिष्कण्टकीकृतामरलोक ! हा बदर्याश्रममुनिद्वितीयतापस ! हा द्रोणाचार्यप्रियशिष्य ! हा अस्त्र-शिक्षाबलपरितोषितगाङ्गेय ! हा राधेयकुलकमलिनीप्रालेयवर्ष ! हा गन्धर्वनिर्वासितदुर्योधन ! हा पाण्डवकुलकमलिनीराजहंस !**

ग्राहः=स्वयं ग्रहणम् । तत्र **दुर्ललित**=दुराग्रहग्रहिलेत्यर्थः। सव्यसाचिन्=अर्जुन। **त्रिलोचनः**=शिवः। **निष्पेषः**=निष्पेषणम्। मर्दनम्। निपातकवचा नाम दैत्याः स्वर्गोपद्रवकर्त्तारः। तेषां हननेन निःसपत्नीकृतदेवलोक इत्यर्थः। प्रथमस्तापसो नारायणः। तत्रत्योऽपरस्तापसो नरः। नारायणावतारश्च भगवान् वासुदेवः। नरावतारश्चार्जुनः। **राधेयकुलं**=कर्णवंशः। वृषसेनवधाद्विनाशित-कर्णकुलेत्यर्थः। **गन्धर्वेति**। गन्धर्वग्रहणान्मोचितो दुर्योधनो येनेत्यर्थः। वने निवसताऽर्जुनेन गन्धर्वराजगृहीतो दुर्योधनो युधिष्ठिराज्ञया मोचित इति पौरा-णिकी गाथा। **राजहंस**=हंस। 'राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः' इत्यमरः। राजहंसः सूर्यो वा। 'भानुर्हंसः सहस्रांशुः' इत्यमरः।

धनञ्जय ! आप अपने प्रिय भाई के पीछे चले गए, पर महाराज का या हम सब दास दासियों का आपने कुछ भी ध्यान नहीं दिया। [मूर्च्छित हो जाती है]।

युधिष्ठिर—हा सव्यसाचिन् ! (दोनों हाथ से धनुष चलाने वाले !) हा त्रिलोचन (भगवान् शिवजी) से कुश्ती लड़कर उनके अङ्गों को पीसने वाले, हा निवातकवचनामक दैत्यों को मार कर देवलोक के कण्टक को उखाड़ फेंकने वाले !, हा बदरिकाश्रम के दूसरे तपस्वी !(बदरिकाश्रम के पहिले तपस्वी नारायण हैं, दूसरे तपस्वी नर=अर्जुन हैं)। हाय द्रोणाचार्य के प्रिय शिष्य ! हाय अस्त्रों की शिक्षा व बल से भीष्मजी को सन्तुष्ट करने वाले ! हाय राधेय (कर्ण) के कुल-कमलिनी के लिए हिमवर्षा के तुल्य !, हाय गन्धर्वों से दुर्योधन को छुड़ाने वाले ! हाय ! पाण्डवकुलकमलिनी के लिए राजहंस की तरह, अर्जुन !

तां वत्सलामनभिवाद्य¹ विनीतमम्बां,
गाढं च मामनुपगुह्य मयाप्यनुक्तः ।
एतां स्वयंवरवधूं दयितामपृष्ट्वा²
दीर्घप्रवासमयि³ तात ! कथं गतोऽसि ? ॥ ३४ ॥

(मोहमुपगतः) ।

कञ्चुकी⁴—(चेटीं प्रति) इदानीं भोः कष्टम् । एष कौरवाधमो यथेष्टमिहैवं प्रवर्तते । सर्वथाऽयं प्रवेशकालः । चिता-

तामिति । वत्सलां=स्नेहाकुलाम् । अम्बां=जननीं कुन्तीम् । विनीतं=सविनयमिति क्रियाविशेषणम् । अनुपगुह्य=अनालिङ्ग्य । अनुक्तः=अनाज्ञप्तः । स्वयंवरवधूं=स्वयंवराहृताम् । दयितां=प्रियाम् । अपृष्ट्वा=अनापृच्छय । दीर्घप्रवासं=दीर्घयात्रां १ महायात्रां । मरणम् । कथं=कस्मात् । तात=भ्रातः । 'तातोऽनुकम्प्ये जनके' इति विश्वः । वसन्ततिलका वृत्तम् ॥ ३४ ॥

तुम अपनी स्नेहार्द्र माता को विनय से प्रणाम किए विनाही, तथा मेरे से गाढ़ आलिङ्गन किए विना, एवं पूछे विनाही, तथा अपनी स्वयंवर से लाई गई बधू द्रौपदी को भी पूछे विना ही हे तात ! इस लम्बे प्रवास (दूरयात्रा, स्वर्ग) में कैसे चले गए ? ॥ ३४ ॥

[मूर्च्छित हो जाता है]।

कञ्चुकी—(चेटी के प्रति) यह तो बड़ी विपत्ति आई है ! यह कौरवाधम

१ 'अनभिवन्द्य' । २ 'मदृष्ट्वा' । ३ 'मपि' ।

४ 'कञ्चुकी—'भोः कष्टम् । एष दुरात्मा सुयोधनो यथेष्टमित एवाभिवर्तते । सर्वथा संप्रत्ययमेव कालोचितः प्रतीकारः । भद्रे बुद्धिमतिके ! चितासमीपमुपनयाऽत्रभवतीं पाञ्चालराजतनयाम् । (चेटीं प्रति) भद्रे ! त्वमपि देव्या भ्रातरं धृष्टद्युम्नं नकुलसहदेवौ वा ब्रूहि । अथवा एवमेव स्थिते महाराजेऽस्तमितयोः भीमार्जुनयोः क्व नु परित्राणम्' । ५ कश्चिन्न ।

६ 'दुरात्मा सुयोधनो' । ७ 'मित एवाऽभिवर्तते' ।

समीपमुपनयाम्यत्रभवतीं पाञ्चालराजतनयाम्। अहमप्येवमेवानुगच्छामि। भद्रे ! त्वमपि देव्या भ्रातरं [1]धृष्टद्युम्नं नकुलसहदेवौ वाऽवाप्नुहि । एवमवस्थिते महाराजेऽस्तमितयोर्भीमार्जुनयोः कुतोऽत्र परित्राणाऽऽशा ?।

[चेटी—परित्ताअह परित्ताअह अज्जा !]।

[परित्रायध्वं परित्रायध्वमार्याः !]।

(नेपथ्ये कलकलानन्तरम्)

भो भोः समन्तपञ्चकसंचारिणः ! [2]क्षतजास्वादमत्तयक्षराक्षसपिशाचभूतवेतालकङ्कगृध्रजम्बुकोलूकवायसभूयिष्ठा अवशिष्टविरलाश्च योधाः!, कृतम[3]स्मद्दर्शनत्रासेन। कथयत[4] भवन्तः

यथेष्टं=निर्बाधम्। यथेच्छम्। एवं=शोकावेगविकलं यथा स्यात्तथा। परित्राणाशा=रक्षणाशा। नैवाशेत्यर्थः। आर्याः=लोकाः। हे साधवः। क्षतजमेव आसवः=मद्यं, तेन मत्ता ये यक्षादयस्ते भूयिष्ठाः विपुला येषु ते तथाभूताः। विरलयोधपुरुषाः=इे हतशिष्टाः स्वल्पा योद्धाः। कृतम्=अलम्। त्रासः=

बिना रोक-टोक इधर ही आ रहा है, इस समय यही समयोचित प्रतीकार है कि हे भद्रे बुद्धिमतिके ! महारानी श्रीमती द्रौपदी को चिता के पास ले चल। मैं भी पीछे पीछे आता हूँ। और भद्रे ! तू भी देवी के भाई धृष्टद्युम्न या नकुल सहदेव के पास चली जाना। क्योंकि महाराज की तो यह दशा हैं, भीम और अर्जुन दोनों परलोक ही चले गए हैं, अतः यहाँ अब रक्षा की क्या आशा है ?। यहाँ रक्षा कौन करेगा ?।

चेटी—लोगो ! बचाओ, बचाओ !

[नेपथ्य में कोलाहल के अनन्तर]

अहो समन्तपञ्चक (युद्धभूमि कुरुक्षेत्र) में चलने फिरने वाले ! रुधिर रूपी मदिरा के आस्वाद से मत्त हुए यक्ष राक्षस पिशाच भूत वेताल कङ्क गृध्र

१ क्वचिन्न। २ 'क्षतजासवमत्तयक्षराक्षसपिशाचगृध्रजम्बुकवायसभूयिष्ठा विरलयोधपुरुषाः'। 'भूयिष्ठाऽवशिष्ट'। ३ 'मद्दर्शनसंत्रासेन'। ४ 'कथय'।

कस्मिन्नुद्देशे याज्ञसेनी सन्निहितेति[1] ? । कथयामि लक्षणं तस्याः—

ऊरू करेण परिघट्टयतः सलीलं
दुर्योधनस्य पुरतोऽपहृताम्बरा या ।
दुःशासनेन कचकर्षणभिन्नमौलिः[3]
सा द्रौपदी कथयत क्व पुनः प्रदेशे ? ॥ ३५ ॥

कञ्चुकी—हा देवि यज्ञवेदिसंभवे[4] ! परिभूयसे संप्रत्यनाथा कुरुकुलकलङ्केन ।

उद्देशे=प्रदेशे । याज्ञसेनी=द्रौपदी । लक्षणं=चिह्नम् । पाठान्तरे–उपलक्षणं–परिचायकम् ।

ऊरू इति । ऊरू=निजोरुयुगम् । करेण=पाणिना । सलीलं=सविलासम् । ससङ्केतम् । परिघट्टयतः=ताडयतः । द्रौपदीं लक्ष्यीकृत्य कामिलोकप्रसिद्धः सुयोधनस्य सङ्केतोऽयम् । आयाहि, अत्रोपविशेति च तदर्थः । रोषेणेति वदन् जगद्धरस्तु भ्रान्त एव । सुयोधनस्य पुरतः–अपहृताम्बरा=अपसारितवसना । दुःशासनेनेति । दुःशासनाकर्षणमुक्तधमिल्ला । 'मौलिः किरीटे धम्मिल्ले' इति विश्वः । यूयं कथयत क्व पुनः प्रदेशे=स्थले । वसन्ततिलकं वृत्तम् ॥ ३५ ॥

देवि=द्रौपदि । कुरुकुलेति । कुरुकुलकलङ्कभूतेन दुर्योधनेनेत्यर्थः ।

गीदड़, उल्लू, कौवों, तथा बचे-खुचे इने-गिने योद्धाओ ! मुझे देखकर व्यर्थ ही डरो मत । कहो तुम याज्ञसेनी (द्रौपदी) किस जगह है ? । उसके लक्षण मैं तुम लोगों को सुनाता हूँ, सुनो—

जो बड़े हाव-भाव व इशारों से अपने हाथ से अपनी ऊरु को थपथपाते हुए दुर्योधन के सामने वस्त्र खींच कर नंगी कर दी गई थी, दुःशासन के द्वारा बाल पकड़ कर खींचे जाने से जिसकी बेणी (जूड़ा) खुल गई थी, वह द्रौपदी कहां है ? कहिए ॥ ३५ ॥

कञ्चुकी—हाय ! यज्ञवेदी से उत्पन्न हुए देवी द्रौपदी ! अब नाथरहित आपका यह कौरव कुल कलङ्क दुर्योधन यों अपमान कर रहा है ।

१ क्वचिन्न । २ 'कथयाम्युपलक्षणं' । किं कथयामि तस्या लक्षणं ।
३ 'करकर्षण' । ४ 'देवि याज्ञसेनि' ।

युधिष्ठिरः—(सहसोत्थाय) पाञ्चालि ! न भेतव्यं न भेतव्यम् । (ससंभ्रमम्) कः कोऽत्र भोः ? । सनिषङ्गं मे धनुरुपनय । दुरात्मन्दुर्योधनहतक !, आगच्छागच्छ । अपनयामि ते गदाकौशलसंभृतं भुजदर्पं शिलीमुखासारेण । अन्यच्च रे कुरुकुलाङ्गार !

प्रियमनुजमपश्यंस्तं जरासन्धशत्रुं,
कुपितहरकिराताद्वेषिणं तं च वत्सम् ।
त्वमिव कठिनचेताः प्राणितुं नास्मि शक्तो,
न च पुनरपहर्तुं बाणवर्षैस्तवासून् ? ॥ ३६ ॥

सनिषङ्गं=सतूणीरम् । 'तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः' इत्यमरः । गदायाः कौशलेन=तद्युद्धनैपुणेन, संभृतं=प्रवृद्धम् । भुजदर्पं=बाहुबलगर्वम् । शिलीमुखासारेण=बाणवर्षेण । 'आसारो वेगवान् वर्षः' इति हैमः ।

प्रियमिति । जरासन्धमल्लं=जरासन्धघातिनम् । वत्सं=भीमसेनम् । कुपितेति । हर एव किरातः, हरः किरात इवेति वा । किरातरूपधारी महादेव इत्यर्थः । तद्द्वेषिणं=तेन सह विस्तारितयुद्धमित्यर्थः । तं=प्रसिद्धमर्जुनम् । त्वमिवेति । व्यतिरेकेऽयं दृष्टान्तः । शतभ्रातृवधेऽपि त्वं यथा जीवसि तथा यद्यपि नाऽहं शक्त इत्यर्थः । कठिनचेताः=क्रूरचित्तः । प्राणितुं=जीवितुम् । न शक्तस्तथापि किं तव असून्=प्राणान् । बाणवर्षैः=शरवर्षैः । अपहर्त्तुं= नाशयितुमपि । न च शक्तः किम् ? । अपि तु शक्त एवाऽस्मीत्यन्वयः। भ्रातृवियोगे जीवितुमशक्तोऽपि त्वां हन्तुं तु बाढं समर्थोऽस्मीति यावत् । मालिनी वृत्तम् ॥ ३६ ॥

युधिष्ठिर—(सहसा उठ कर) हे देवि पाञ्चालि ! डरो मत, डरो मत । कौन है ? । मेरा धनुष और बाणों की भाथी लाओ । अरे दुरात्मन् , पापी दुर्योधन ! आव, आव, मैं तेरा गदा के कौशल से बढा हुआ अभिमान बाणों की वर्षा से दूर करता हूँ। और भी अरे कुरुकुलाङ्गार !

१ क्वचिन्न । २ 'कः कोऽत्र भोः' इति क्वचिन्नास्ति ।
३ 'उपनीयतां मे सज्जं धनुः' । ४ 'मल्ल' ।

(ततः प्रविशति गदापाणिः क्षतजसिक्तसर्वाङ्गो भीमसेनः)।

भीमसेनः—(उद्धतं परिक्रामन्)। भो भोः समन्तपञ्चकसंचारिणः सैनिकाः ! कोऽयमावेगः ?।

नाहं रक्षो न भूतं रिपुरुधिरजलप्लावितातङ्गः प्रकामं
निस्तीर्णोरुप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि ।
भो भो राजन्यवीराः ! समरशिखिशिखादग्धशेषाः ! कृतं व-
स्त्रासेनानेन लीनैर्हतकरितुरगान्तर्हितैरास्यते यत् ? ॥ ३७॥

क्षतजेति । रुधिरसिक्तसर्वाङ्गः । रुधिरप्लावितदेह इत्यर्थः । आवेगः= संत्रासः । क इति । अनुचित इत्यर्थ । नाहमिति । रक्षः=राक्षसः । भूतं= देवयोनिभेदः । (भूत) । रिपुरुधिरेण आप्लावितानि=सिक्तानि अङ्गान्यस्येति विग्रहः। शत्रुरुधिरसंसिक्तगात्र इत्यर्थः । 'प्रकाम'मिति सेचनक्रियाविशेषणम् । प्रकामं=यथेच्छम् । निस्तीर्णः=निर्व्यूढः, उल्लङ्घितः, उरुप्रतिज्ञैव=महती

अपने प्यारे भाई उस जरासन्धशत्रु भीम को, तथा किरातवेषधारी क्रुद्ध शिवजी के साथ युद्ध करने वाले प्रिय भाई अर्जुन को देखे विना यद्यपि मैं जी नहीं सकता हूँ, क्योंकि मैं तेरी तरह कठोर हृदय नहीं हूँ कि दुःशासन के मरने पर भी तूं जी रहा है। पर तो भी क्या बाणों की वर्षा से मैं तेरे प्राणों को भी नाश नहीं कर सकता हूँ ?। अर्थात् इस प्रकार विपत्तिग्रस्त होकर भी मैं तेरे को बाणवर्षा से नाश तो कर ही सकता हूँ ॥ ३६ ॥

[तब गदा हाथ में लिए सब शरीर में रुधिर लीपे हुए भीमसेन का प्रवेश]।

भीमसेन—अहो समन्तपञ्चक में घूमनें फिरने व रहने वाले लोगों ! न मैं राक्षस हूँ, न भूत हूँ, किन्तु शत्रु के रुधिररूपी जल से प्लावितशरीर

१ क्वचिन्न । २ 'ननु भोः समन्तपञ्चकसंचारिणः' । ३ 'रक्षो नाहं' । ४ 'जलाह्लादिताङ्गः' । ५ 'रास्यते किं' ।

कथयन्तु भवन्तः—कस्मिन्नुद्देशे पाञ्चाली तिष्ठति ?।

द्रौपदी—(लब्धसंज्ञा) परित्ताअदु परित्ताअदु महाराओ।
[परित्रायतां परित्रायतां महाराजः]।

कञ्चुकी—देवि पाण्डुस्नुषे ! उत्तिष्ठोत्तिष्ठ। सम्प्रति झटिति चिताप्रवेश एव श्रेयान्।

द्रौपदी—(सहसोत्थाय) कहं ण सम्भावेमि अज्जवि चिदासमीवम् ?।
[कथं न संभावयाम्यद्यापि चितासमीपम् ?]।

युधिष्ठिरः—कः कोऽत्र भोः ?। सनिषङ्गं धनुरुपनय। [परिवृत्यावलोक्य च] कथं न कश्चित्परिजनः !। भवतु। बाहुयुद्धेन

प्रतिज्ञैव जलनिधिः=समुद्रः, स एव गहनं=कृच्छ्रं येनासौ तथाभूतः। क्रोधनः=क्रोधी। राजन्यवीराः=हे क्षत्रियवीराः!। समरेति। युद्धाग्निज्वाला-दग्धावशिष्टा इत्यर्थः। शिखी=अग्निः। कृतं=न प्रयोजनम्। वः=युष्माकम्। लीनैः=गूढं स्थितैः। प्रच्छन्नैः। हतेति। हतहस्तिवाजिशवतिरोहितैरित्यर्थः। आस्यते=स्थीयते। स्रग्धरा वृत्तम्॥ ३७॥

सम्भावयामि=प्रविशामि। सनिषङ्गं=सतूणीरम्। न परिजन इत्यस्य

वाला, अपनी बडी भारी प्रतिज्ञारूपी गहन समुद्र को पार करनेवाला, क्रोध से उन्मत्त मैं एक क्षत्रिय वीर हूँ। अहो क्षत्रियवीरो ! समर [युद्ध] रूपी अग्नि की लपटों से बचे हुए योद्धाओं ! आप लोग ऐसे क्यों डर रहे हैं कि जो मरे हुए हाथी घोडों के ढेर में जाकर छिप रहे हैं !। घबडाइए मत॥ ३७॥

आप लोग कहिए-द्रौपदी कहाँ हैं ?।

द्रौपदी—(चैतन्य होकर) महाराज ! रक्षा करिए, रक्षा करिए।

कञ्चुकी—हे देवी ! आप पाण्डवों की वीर पत्नी है, इस समय जल्दी से चिता में प्रवेश करना ही उत्तम है।

द्रौपदी—(जल्दी से उठकर) अब भी क्या मैं चिता के समीप नहीं जाऊँगी ?।

१ कश्चिन्न। २ 'उपनीयतां सनिषङ्गं धनुः'।
३ 'बाहुयुद्धेनैव दुरात्मानं गाढमालिङ्ग्य'।

संभावनविहस्तमेनं गाढमालिङ्ग्य ज्वलनमभिपातयामि ।

[[1]इति परिकरं बध्नाति] ।

कञ्चुकी—देवि पाण्डुस्नुषे ! संयम्यन्तामिदानीं [2]नयनपथावरोधिनो दुःशासनापकृष्टा [3] मूर्धजाः । अस्तमिता संप्रति प्रतीकाराशा । [4]द्रुतं चितासमीपं संभावय ।

युधिष्ठिरः—कृष्णे ! न खल्वनिहते [5]तस्मिन्दुरात्मनि दुर्योधने संहर्तव्याः केशाः ।

अस्तीति शेषः । सम्भावनविहस्तं=व्यापाररहितं । गाढबन्धननिश्चेष्टम् । परिकरं=गात्रबन्धम् । (कमर कसता है) । पाण्डुस्नुषे = पाण्डुपुत्रवधु ! । संयम्यन्तां=बध्यन्ताम् । नयनेति । लोचनमार्गावरोधिन इत्यर्थः । मूर्धजाः= केशाः । अस्तमिता=विलयङ्गता । प्रतीकाराशा=शत्रुकृतापमानप्रतीकाराशा ।

युधिष्ठिर—कौन है ? बाहर कौन है ! मेरा धनुष और बाणों की भाथी लाओ । हैं ! क्या कारण है कि कोई भी नौकर-चाकर नहीं दिखाई दे रहे हैं ? । इसे अच्छा ! बाहुयुद्ध (कुश्ती) में ही पछाड़ कर पकड़ कर अग्नि में डाल देता हूँ ।

(कुश्ती के लिए कमर कसता है) ।

कञ्चुकी—हे देवी पाण्डु की पुत्रवधु द्रौपदी ! आंखों के सामने आकर मार्ग चलने में बाधा देने वाले दुःशासन से खींचे गए इन केशों को अब बान्ध लीजिए । क्योंकि अब तो बदला लेने की आशा ही जाती रही । और जल्दी ही चिता के पास चलिए ।

युधिष्ठिर—हे द्रौपदी ! उस पापी दुर्योधन के मारे जाने विना तुम अपने केश मत बान्धना ।

---

१ क्वचिन्न ।　　२ 'नयनोपरोधिनो' ।

३ 'ऽपकृष्टा' ।　　४ 'चितासमीपमेव द्रुततरं सम्भावय' ।

५ 'तस्मिन्दुर्योधनहतके' ।

भीमसेनः—पाञ्चालि ! न खलु मयि जीवति संहर्तव्या दुःशासनविलुलिता वेणिरात्मपाणिना । तिष्ठ तिष्ठ । अहमेव संहरामि ।

(द्रौपदी भयादपसर्पति) ।

भीमसेनः—तिष्ठ तिष्ठ भीरु ! क्वाऽधुना गम्यते ? ।

(इति केशेषु ग्रहीतुमिच्छति) ।

युधिष्ठिरः—(बलाद्भीममालिङ्ग्य) दुरात्मन् ! भीमार्जुनशत्रो ! दुर्योधनहतक ! केदानीं यास्यसि ? ।

सम्प्रति=भीमादिवधे जाते सति । द्रुतं=त्वरितम् । दुरात्मनि = पापिनि । संहर्तव्याः=बन्धनीयाः । (वेणीसंहारः=वेणीबन्धनम्) । विलुलिता= आकृष्टा । विकीर्णा । वेणिः=जटीभूताः केशाः । संहरामि=बध्नामि । उन्मो-

---

भीमसेन—हे पाञ्चालि ! मेरे जीते हुए तुम दुःशासन द्वारा खींच कर खोले गए केशों को अपने हाथ से मत बान्धो । ठहरो ठहरो, मैं स्वयं बान्धता हूँ ।

द्रौपदी—डर कर भागती है ।

भीमसेन—हे भीरु ! ठहरो ठहरो, अब कहां जाती हो ।

(ऐसा कहकर उसके केश पकड़ना चाहता है) ।

युधिष्ठिर—[वेग से भीम को पकड़ कर) अरे पापी ! भीम अर्जुन के शत्रु ! दुर्योधन ! अब कहां जाएगा ? ।

---

१ 'पाणिभ्यां' । २ 'तिष्ठतु तिष्ठतु' ।
३ 'स्वयमेवाहं' । ४ 'परिक्रामति' ।
५ 'वेगाद्भीम' । ६ 'सुयोधनहतक' ।
७ 'क्वचिन्न' ।

आशैशवादनुदिनं जनितापराधो
मत्तो[1] बलेन[2] भुजयोर्हतराजपुत्र ! ।
आसाद्य मेऽन्तरमिदं भुजपञ्जरस्य
जीवन्प्रयासि न पदात्पदमद्य पाप[3] ! ॥ ३८ ॥

भीमसेनः—अये[4] ! कथमार्यः सुयोधनशङ्कया क्रोधान्निर्दयं मामालिङ्गति ! । आर्य[5] ! प्रसीद प्रसीद ।

कञ्चुकी—(निरूप्य[6] सहर्षं) कथं[4] कुमारो भीमसेनः ! । महा-

चयामि वा । आशैशवादिति । हे पाप । हतौ राजपुत्रौ=भीमार्जुनौ येनेति तत्सम्बुद्धौ रूपम् । आशैशवात्=बाल्यात्प्रभृति । अनुदिनं=प्रतिदिनम् । जनितापराधः=कृतापराधः। भुजयोर्मदेन=गर्वेण,क्षीब =मत्तः । भुजपञ्जरस्य अन्तरं=बाहुपञ्जरस्य मध्यम् । आसाद्य=प्राप्य । अद्य जीवन् सन् पदात्पदमपि= एकं पदमपि, न प्रयासि=न प्रयातुं शक्नोषि । न प्रयास्यसि । वर्त्तमानसामीप्ये लट् । वसन्ततिलका वृत्तम् ॥ ३८ ॥

प्रसीद=दयस्व । निरूप्य=दृष्ट्वा । कथं=सौभाग्येनास्माकं कथमत्रायात इत्यर्थः ।

बाल्यावस्था से लेकर प्रतिदिन तू अपराध करता आरहा है, बाहुओं के बल से तुझे बड़ा घमण्ड होगया है, तैंने राजपुत्रो को (भीम अर्जुन को) मारा है। अरे पापी ! अब मेरे भुजाओं के पींजरे के बीच में आकर तू जीता हुआ एक पैर भी नहीं जा सकता ॥ ३८ ॥

भीमसेन—अहो ! आर्य युधिष्ठिर मुझे दुर्योधन समझकर क्रोध से निर्दयतापूर्वक दबा रहे हैं । आर्य ! प्रसन्न होइए । क्रोध को दूर करिए । मैं दुर्योधन नहीं हूं । [देव ! अजातशत्रो । भीमार्जुन के बड़े भाई ! आप जैसा समझ रहे हैं वैसा नहीं है] ।

कञ्चुकी—(अच्छी तरह देख कर, हर्षपूर्वक) आह ! ये तो कुमार

१ 'क्षीबो' । २ 'मदेन भुजयोर्हतराजपुत्रः' । ३ 'पापः' । ४ क्वचिन्न । ५ 'देव अजातशत्रो ! भीमार्जुनगुरो ! यथैवाज्ञापयसि न तथैवैतत्' । ६ 'उपसृत्य' ।

राज ! दिष्ट्या वर्धसे। अयं खल्वायुष्मान्भीमसेनः सुयोधनक्षतजारुणीकृतसकलशरीरो दुर्लक्ष्यव्यक्तिः। अलमधुना संदेहेन।

चेटी--[द्रौपदीमालिङ्ग्य] देवि[3] णिवट्टीअदु णिवट्टीअदु। एसो क्खु पूरिदपडिण्णाभारो णाहो दे[4] वेणीसंहारं कादुं तुमं एव्व अण्णेसेदि।

[देवि ! निवर्त्यतां निवर्त्यताम्। एष खलु पूरितप्रतिज्ञाभारो नाथस्ते वेणीसंहारं कर्तुं त्वामेवान्विष्यति]।

द्रौपदी—हञ्जे ! किं मं अलीअवअणेहिं आसासेसि !।

[हञ्जे ! किं मामलीकवचनैराश्वासयसि]।

दिष्ट्या=सौभाग्येन। वर्द्धसे=समृद्धिमानसि। सुयोधनेति। दुर्योधनरुधिरारुणितशरीरवत्त्व इत्यर्थः। दुर्लक्ष्या व्यक्तिश्चिह्नं यस्यासौ-दुर्लक्ष्यव्यक्तिः=अप्रतिज्ञेयव्यक्तिविशेषः।पूरितेति। निर्व्यूढप्रतिज्ञाभार इत्यर्थः। नाथः=प्रियो भर्त्ताभीमः। वेणीसंहारं=बेणीबन्धं कर्त्तुम्। जटीभूतान् संस्कारहितान् केशान् संस्कर्त्तुमिति

भीमसेन हैं !!। महाराज ! बड़े आनन्द की बात है। यह तो आयुष्मान् भीमसेन हैं। दुर्योधन के रुधिरको शरीर पर लीप लेने से इनका सब शरीर लाल हो रहा था, इसीसे पहिचाने नहीं जासके थे। अब सन्देह मत करिए।

चेटी—(द्रौपदी के लिपट कर) देवी ! वापिस आइए, वापिस आइए। प्रतिज्ञारूपी बड़े भारी भार को पूरा करके यह नाथ भीमसेन तुमारी वेणी (जुड़े हुए बालों) को संहार करने (सुलझाना, साफ करना या बान्धने) के लिए आपको खोज रहे हैं।

द्रौपदी—अरी चेटी ! मुझे झूठे वचनों से क्यों आश्वासन दे रही है ?।

---

१ क्वचिन्न। २ 'देहशरीराम्बरो'।
३ 'भट्टिणि'। ४ 'देव्या वेणी'।



दुर्योधनवधः

युधिष्ठिरः—जयन्धर ! किं कथयसि-नायमनुजद्वेषी दुर्योधनहतकः ? ।

भीमसेनः—देव अजातशत्रो ! भीमार्जुनगुरो ! कुतोऽद्यापि दुर्योधनहतकः ? । मया हि—तस्य दुरात्मनः पाण्डुकुलपरिभाविणः—

भूमौ क्षिप्तं शरीरं, निहितमिदमसृक्चन्दनाभं निजाङ्गे
लक्ष्मीरार्ये निषण्णा चतुरुदधिपयःसीमया सार्द्धमुर्व्या ।
भृत्या मित्राणि योधाः कुरुकुलमखिलं दग्धमेतद्रणाग्नौ
नामैकं यद्ब्रवीषि क्षितिप ! तदधुना धार्तराष्ट्रस्य शेषम् ॥

वा । अलीकवचनैः=मिथ्यावचोभिः। आश्वासयसि=सन्तोषयसि। अनुजद्वेषी=भ्रातृशत्रुः । पाण्डुकुलं परिभवितुं शीलमस्य तस्येत्यर्थः । प्रातिपदिकान्तेतिणत्वम् । तस्येति च श्लोकेनाग्रिमणान्वेति ।

भूमाविति । तस्य शरीरं भूमौ क्षिप्तं=प्रक्षिप्तम् । चन्दनाभमसृक्=चन्दनतुल्यं तस्य रुधिरम् । निजाङ्गे=स्वशरीरावयवेषु । निहितं=स्थापितम् । लक्ष्मीः=राजलक्ष्मीः । आर्ये=पूज्ये भवति युधिष्ठिरे । निषण्णा=आस्थिता ।

युधिष्ठिर—जयन्धर ! क्या कहते हो ? क्या यह ठीक है कि यह मेरे भाइयों का वैरी दुर्योधन नहीं है ? ।

भीमसेन—महाराज ! अजातशत्रो ! अब भला दुर्योधन कहाँ है ? । क्योंकि मैने उस पापी का—शरीर भूमि में फेंक दिया, उसका यह रुधिर-चन्दन की तरह अपने शरीर में पोत लिया है, उसकी राजलक्ष्मी को चारों समुद्रों पर्यन्त सीमा

---

१ 'जयंधर ! अपि सत्यं नायं मम वैरी सुयोधनहतकः' ? ।

२ क्वचिन्न ।   ३ 'मसृक्चन्दनं भीमगात्रे' । 'चन्दनाभं मयाऽङ्गे' ।

(युधिष्ठिरः स्वैरं मुक्त्वा भीममवलोकयन्नश्रूणि प्रमार्जयति)।

भीमसेनः—(पादयोः पतित्वा) जयत्वार्यः।

युधिष्ठिरः—वत्स ! वाष्पजलान्तरितनयत्वान्न पश्यामि ते मुखचन्द्रम्। कथय कच्चिज्जीवति भवान्समं किरीटिना ?।

भीमसेनः—निहतसकलरिपुपक्षे त्वयि नराधिपे, जीवति

विश्रान्ता। चतुरुदधिपयःसीमया=चतुरर्णवजलसीमालङ्कृतया। उर्व्या-सह=भूम्या सह। राजलक्ष्मीस्त्वां श्रितेत्यर्थः। भृत्याः=दुर्योधनभृत्यादिवर्गाः। एतद्रणाग्नौ=अस्मिन्युद्धवह्नौ।दग्धम्।हे क्षितिप=हे राजन्। यत् नाम त्वं ब्रवीषि तदेव धार्त्तराष्ट्रस्य दुर्योधनेति नाम एकं=केवलम्, शेषम्=अवशिष्टम् नाम-शेषः सम्प्रति दुर्योधनः। अन्यत्सर्वं तस्य विनष्टमित्यर्थः। स्नग्धरावृत्तम्॥३९॥

स्वैरं=शनैः। त्वयि नराधपे=त्वयि राजनि भूवलयं शासति सति। हतो दुर्योधनः, सम्प्रति भवान् राजेत्याशयः।

वाली पृथ्वीके साथ २ आर्य युधिष्ठिर (आप) के समर्पण कर दी है। उसके भृत्य मित्र, योद्धागण अथच सम्पूर्ण कुरुकुल भी इस रणाग्नि में भस्म हो गया है,अब तो हे राजन्! केवल उसका धार्तराष्ट्र (दुर्योधन) यह नामही अवशिष्ट रह गया है, जिसे आप मुख से उच्चारण कर रहे हैं। और उसका अब कुछ नहीं बचा है॥३९॥

[**युधिष्ठिर**—धीरे से भीमसेन को छोड़ता हुआ अच्छी तरह देखता है, और आंसुओं को पोंछता है]।

भीमसेन—(पैरों पर गिर कर) महाराज की जय हो।

युधिष्ठिर—वत्स ! आंसुओं की धारा से मेरे नेत्र ढके हुए हैं,अतः अच्छी तरह मैं तेरा मुखचन्द्र नहीं देख सक रहा हूँ। कहो क्या तुम और अर्जुन दोनों

१ अस्यस्थाने-'**भीमसेनः**-(पादयोर्निपत्य) जयतु जयतु देवः। **युधिष्ठिरः**-(सत्वरं मुक्त्वा भीमसेनमवलोकयन्नंसे परामृश्य) तात भीम पृथानन्दन ! पाण्डु-कुलप्रदीप !। **भीमसेनः**—आज्ञापय। **युधिष्ठिरः**--वत्स ! बाष्पजलान्तरितं न पश्यामि ते वदनचन्द्रमनवरतम्। कथय कच्चिज्जीवति भवान्समं किरीटिना ?। **भीमसेनः**-देव ! निहतसकलरिपुपक्षे त्वयि जीवति,भीमार्जुनौ जीवतः।'जीवन्तौ'।

२ क्वचिन्न।

भीमोऽर्जुनश्च ।

युधिष्ठिरः—(स्नेहं पुनर्गाढमालिङ्ग्य) तात भीम !—

रिपोरास्तां तावन्निधनमिदमाख्याहि शतशः
प्रियो भ्राता सत्यं त्वमसि मम योऽसौ बकरिपुः ?।

भीमसेनः—आर्य ! सोऽहम् ।

युधिष्ठिरः—

जरासन्धस्योरःसरसि रुधिरासारसलिले
तटाघातक्रीडाललितमकरः संयति भवान् ? ॥ ४० ॥

रिपोरिति । रिपोः=दुर्योधनस्य । निधनं=वधः । आस्तां=तिष्ठतु तावत् । तत्कथयाऽलम् । तत्र न ममादरः । किन्तु इदम्—आख्याहि=वद। शतशः=वारं वारम्। योऽसौ बकरिपुः=बकासुरहा मम भ्राता भीमः, स त्वं सत्यमसि किम् ?। सोऽहं=बकासुरघाती किलाहम्। अस्मीति शेषः। संयति=युद्धे। उर एव सरः, तस्मिन्। रुधिरासार एव सलिलं=जलं यत्र तस्मिन्नित्यर्थः। तटाघातः=सरस्तटताडनं। सैव लीला=क्रीडा, तया ललितः=सुन्दरः, मकरः=जलजन्तुविशेषः। जरासन्धहा भीमस्त्वमेवासि किमित्यर्थः। [1]शिखरिणी वृत्तम् ॥ ४० ॥

अभी जीवित हो ? ।

भीमसेन—सम्पूर्ण शत्रुपक्ष को नाश कर विजयलक्ष्मी से विराजमान आप महाराज की छत्र छाया में हम भीम अर्जुन दोनों ही जीते हैं ।

युधिष्ठिर—(स्नेह से पुनः गाढ़ आलिङ्गन कर) तात भीमसेन !—

शत्रु के वध की बात को तो रहने दो, पहिले मुझे यह बताओ कि क्या सचमुच तुम बकासुर को मारने वाले मेरे भाई भीमसेन हो ? ।

भीमसेन—आर्य ! मैं वही (भीमसेन) हूं ।

युधिष्ठिर—और क्या रुधिर की निकलती हुई प्रचण्ड धारारूपी जल वाले जरासन्ध के उरस्थलरूपी सरोवर में तट में टक्कर मारने में प्रवृत्त लीलाललित मगरमच्छ तुमही हो ? । (अर्थात् क्या जरासन्ध को मारने वाले भीमसेन भी तुमहीं हो ?) ॥ ४० ॥

---

१ क्वचिन्न ।

भीमसेनः—आर्य[1] ! स एवाहम्[2]। मुञ्चतु मुञ्चतु मामार्यः क्षणमेकम्[3]।

युधिष्ठिरः—किमपरमवशिष्टम् ?।

भीमसेनः—आर्य[1] ! सुमहदवशिष्टम्। संयमयामि[4] तावदनेन सुयोधनशोणितोक्षितेन[5] पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम्।

युधिष्ठिरः—सत्वरं[1] गच्छतु भवान्। अनुभवतु तपस्विनी वेणीसंहारमहोत्सवम्।

भीमसेनः—(द्रौपदीमुपसृत्य) देवि[6] ! पाञ्चालराजतनये ! दिष्ट्या वर्द्धसे रिपुकुलक्षयेण।

द्रौपदी—[उपसृत्य] 'जेदु जेदु णाहो। [इति भयादपसर्पति]।
[जयतु जयतु नाथः]

भीमसेनः—राजपुत्रि ! अलमलमेवंविधं[1] मामालोक्य त्रासेन।

उक्षितेन=सिक्तेन। केशहस्तं=केशपाशम्। तपस्विनी=वराकी वेणी-

भीमसेन—आर्य ! मैं वही हूँ। अतः एक क्षण के लिए आप मुझे छोड़िए।

युधिष्ठिर—अब और क्या बाकी है ?।

भीमसेन—अभी तो बहुत बाकी है, दुर्योधन के रुधिर से लिप्त हाथों से मैं दुःशासन द्वारा खीचे गए द्रौपदी के केशपाश को बान्धता हूँ।

युधिष्ठिर—आप शीघ्र जाइए। बेचारी द्रौपदी इतने दिनों के कष्ट सहने के बाद वेणी (केशों की बन्धी हुई लट) के संहार (बान्धना खोलना सुलझाने) का अनुभव करे।

भीमसेन—(द्रौपदी के पास जा कर) देवि ! पाञ्चालराजपुत्रि ! बड़े सौभाग्य की बात है कि तुमारे सब शत्रु नष्ट हो गए।

द्रौपदी—[निकट आकर] नाथ ! आपकी जय जयकार हो।
[भीम को देखकर डरकर भागती है]।

भीमसेन—हे राजपुत्रि ! मुझे इस प्रकार भीषण रूप में देखकर डरो मत, डरो मत।

---

१ कचिन्न। २ 'तन्मुञ्चतु'।
३ 'मुञ्चतु क्षणमेकं भवान्'। ४ 'संयच्छामि'।
५ 'दुश्शासनदुर्योधनरुधिरोक्षितेन'। ६ 'भवति'।

[1]कृष्टा येनासि राज्ञां सदसि नृपशुना तेन दुःशासनेन
स्त्यानान्येतानि तस्य स्पृश मम करयोः पीतशेषाण्यसृञ्जि।
कान्ते ! राज्ञः कुरूणामतिस[2]रसमिदं मद्गदाचूर्णितोरो-
रङ्गेऽङ्गेऽसृङ्[3]निषक्तं तव रिपुजनितस्यानलस्योपशान्त्यै ॥४१॥
बुद्धिमतिके ! क्व सम्प्रति सा भानुमती योपहसति पाण्डव-
दारान् ? । भवति यज्ञवेदिसंभवे ! याज्ञसेनि !

द्रौपदी—आणवेदु णाहो ।
[आज्ञापयतु नाथः] ।

संहारं=वेणीमोचनम् । जटीभूतकेशमोक्षणम् । वेणीबन्धनं वा ।

कृष्टेति । येन नृपशुना=नराधमेन नीचेन दुःशासनेन । राज्ञां सदसि=सभायाम् । कृष्टासि=आकृष्टासि । तस्य=नीचस्य, मम करयोः=हस्तयोः स्थितानि, पीतशेषाणि=मत्पानावशिष्टानि, स्त्यानानि=गाढानि । असृञ्जि=रुधिराणि, स्पृश=संस्पृश । हे कान्ते ! मद्गदया चूर्णितौ ऊरू यस्य तस्य, कुरूणां राज्ञः=दुर्योधनस्य, इदम् असृक्=रुधिरम् । अङ्गेऽङ्गे=मम प्रत्यङ्गम् । तव प्रत्यङ्गमिति वा सम्बन्धः । तव रिपुजनितस्य अनलस्य=अपमानवह्नेः, उपशान्त्यै=शमनाय, निषक्तं=मया स्वाङ्गेषु लिप्तम् । तवाङ्गेषु तद्रक्तं मया लिप्यते इत्यर्थो वा । स्रग्धरा वृत्तम् ॥ ४१ ॥

भानुमती=दुर्योधनपत्नी । पाण्डवदारान्=द्रौपदीम् । उपहसति=उपहसितवती । वर्त्तमानसामीप्ये लट् । चञ्चदितिश्लोकः ९७ पृष्ठे द्रष्टव्यः ।

राजाओं की सभा में जिस नरपशु दुःशासन ने तुझे खींचा था, उस पापी के मेरे पीने से बचे हुए मेरे हाथों में लगे इस गाढ़े २ खून को लो तुम भी स्पर्श करो।

हे प्रिये ! मेरी गदा के आघात से जिसकी ऊरु (जांघ) चूर्णित हो गई हैं ऐसे कौरवराज दुर्योधन का यह अति सरस रुधिर मैंने अपने (या तेरे) अङ्ग अङ्ग में लगा लिया (दिया) है, ताकि शत्रुकृत तेरे सन्ताप की शान्ति हो ॥ ४१ ॥

हे बुद्धिमतिके ! वह भानुमती कहाँ है जो पाण्डववधू द्रौपदी को हंसती थी ? ।

---

१ 'येनाऽऽकृष्टासि' । २ 'मयि रुधिरमिदं' । ३ 'रक्तेष्वङ्गेषु सिक्तं' ।
४ क्वचिन्न ।

भीमसेनः—**स्मरति भवती-यत्तन्मयोक्तं**[1]—('चञ्चद्भुजेति-'[2] १।२१) पूर्वोक्तमेव पठति)।

द्रौपदी—**णाह**[3] **! ण केवलं सुमरामि, अणुहवामि अ णाधस्स प्पसादेण ।**

[नाथ ! न केवलं स्मरामि, अनुभवामि च नाथस्य प्रसादेन]।

भीमसेनः—(वेणीमवधूय[4]) **भवति ! संयम्यतामिदानीं धार्तराष्ट्रकुलकालरात्रिर्दुःशासनविलुलितेयं वेणी ।**

द्रौपदी—**णाह ! विसुमरिदम्हि एदं वावारम् । णाहस्स पसादेण पुणो वि सिक्खिस्सम् ।**

अवधूयेति । धूल्यादिमलापकर्षणाय हि वेणीधूननम् । भवति= हे श्रीमति ! । कालरात्रिरिति । महाकालरात्रिरिवेत्यर्थः । विलुलिता= उन्मुक्ता । वेणी=केशबन्धः । एतं व्यापारं=केशबन्धनव्यापारम् । बहुकालं

अयि श्रीमती यज्ञवेदिसम्भूत द्रौपदी !

द्रौपदी—नाथ ! आज्ञा करिए ।

भीमसेन—क्या आपको याद है जो मैंने पहिले कहा था—कि 'मेरी भुजाओं से भ्रमित गदा के जबरदस्त आघात से संचूर्णित ऊरुवाले दुर्योधन के रुधिर से मैं तेरे केशो को बाधूंगा' ? ।

द्रौपदी—नाथ ! मैं उसे स्मरण ही नहीं कर रही हूं किन्तु नाथ (आप)के प्रसाद (कृपा) से मैं उसे अनुभव भी कर रही हूँ ।

भीमसेन—(वेणी को झाड़कर) देवी ! धार्तराष्ट्र के कुल के नाश करने में कालरात्रि की तरह लहराती हुई, दुःशासन के हाथ से खीचीं व खोली गई इस वेणी को अब बान्ध लीजिए ।

१ 'यन्मयोक्तं' । २ 'भुजेत्यादि पठति' ।

३ 'णाह ! सुमरामि अणुहवामि अ । [नाथ ! स्मरामि अनुभवामि च]।

४ क्वचिन्न ।

[नाथ ! विस्मृताऽस्म्येतं व्यापारम् । नाथस्य प्रसादेन पुनरपि शिक्षिष्ये ।]

(भीमसेनो वेणीं बध्नाति)।

(नेपथ्ये)

[महासमरानलदग्धशेषाय स्वस्ति भवतु राजन्यकुलाय]।
क्रोधान्धैर्यस्य मोक्षात्क्षतनरपतिभिः पाण्डुपुत्रैः कृतानि
प्रत्याशं मुक्तकेशान्यतुलभुजबलैः पार्थिवान्तःपुराणि ।

यावत् परित्यागात्तद्विस्मरणम् । शिक्षिष्ये=अभ्यस्यामि । त्वं मे वेणीं सम्प्रति बधानेत्यर्थः ।

राजन्यकुलाय=क्षत्रियकुलाय । स्वस्ति=कल्याणम् । भवत्विति शेषः । इदमाकाशचारिसिद्धवचनमिति ध्येयम् ।

क्रोधेति । यस्य=कृष्णाकेशपाशस्य, मोक्षात्=उन्मोचनात्, विलोलनात्, क्षतनरपतिभिः=विनाशितसकलराजलोकैः । अतुलभुजबलैः=महाबलैः । पाण्डुपुत्रैः=पाण्डवैः । प्रत्याशं=प्रतिदिशम् । नरपतेनामन्तःपुराणि=तत्स्थाः कामिन्यः । मुक्तकेशानि=विलुलितकेशानि कृतानि । वैधव्यात्केशमोक्षस्तासामित्या-

द्रौपदी—नाथ ! मैं वेणी बान्धना ही भूल गई हूँ । अब आपकी कृपा से फिर उसे सीखूंगी । अर्थात् आप ही मेरी वेणी बांधिए । (भीमसेन वेणी को बान्धता है । पाठान्तर में दासी वेणी को बान्धती है)।

[नेपथ्य में]

महायुद्धरूपी प्रचण्ड अग्नि से बचे हुए क्षत्रियों के कुलों का मङ्गल हो ।

जिस वेणी के खोली जाने से क्रुद्ध हो पाण्डुपुत्रों ने राजाओं का संहार करके घर २ में प्रत्येक दिशाओं में राजाओं के अन्तः पुरों को (उनकी स्त्रियों को)

१ 'चेटी' । २ क्वचिन्न । ३ 'कुरुनरपति' । ४ 'न्यनुदिनमधुना' ।

कृष्णायाः केशपाशः कुपितयमसखो धूमकेतुः कुरूणां
दिष्ट्या बद्धः प्रजानां विरमतु निधनं,स्वस्ति राज्ञां कुलेभ्यः ॥

युधिष्ठिरः—देवि ! एष[2] ते वेणीसंहारोऽभिनन्द्यते नभस्तलसंचारिणा सिद्धजनेन ।

(ततः प्रविशतः कृष्णार्जुनौ[3]) ।

कृष्णः[4]—(युधिष्ठिरमुपगम्य[5]) विजयतां निहतसकलारातिमण्डलः सानुजः पाण्डवकुलचन्द्रो महाराजो[6] युधिष्ठिरः ।

अर्जुनः—जयत्वार्यः ।

शयः । सोऽयं–कृष्णायाः, केशपाशः=धम्मिल्लः, कुपितयमसखः=क्रुद्धान्तकसदृशः । कुरूणां=कुरुकुलस्य । धूमकेतुः=वधोत्पातसूचको धूमकेतुरिव । दिष्ट्याबद्धः=सम्प्रति भीमेन बद्धः । इदानीं प्रजानां=लोकानाम् । निधनं=वधः, विनाशः । विरमतु=शाम्यतु । राज्ञां कुलेभ्यः=शिष्टराजवंशेभ्यः । स्वस्ति=मङ्गलं भवतु । इदं हि सिद्धवचनम् । स्रग्धरा वृत्तम् ॥ ४२ ॥

वेणीसंहारः=केशबन्धनम् । पाठान्तरे–मूर्धजानां=केशानाम् । संहारः=बन्धनम् । अभिनन्दितः=प्रशंसितः। स्तुतः । सिद्धाः=देवयोनिभेदाः। उपगम्य=

अपनी भुजाओं के बल से मुक्तकेश (विधवा) कर दिया है, कुपित यमराज की तरह वह कृष्णा (द्रौपदी) का केशपाश, जो कौरवों के विनाश के लिए धूमकेतु के समान था, अब बान्ध दिया गया है, यह बड़े हर्ष का विषय है । अब बचे-खुचे राजाओं के कुल का कल्याण व मङ्गल हो ॥ ४२ ॥

युधिष्ठिर—देवि ! तेरी वेणी के संहार (केशरचना) का आकाशचारी सिद्धलोगों ने भी अभिनन्दन (प्रशंसा) किया है ।

[कृष्ण और अर्जुन का प्रवेश]

कृष्ण—(युधिष्ठिर के पास जाकर) जिसनें सम्पूर्ण शत्रुओं के समूह को मार दिया है ऐसे पाण्डवकुलचन्द्र महाराज युधिष्ठिर (आप) की जय हो ।

अर्जुन—आर्य की जय हो ।

१ 'सोऽयं बद्धः' ।

२ 'एष ते मूर्धजानां संहारोऽभिनन्दितो नभस्तलचारिणा सिद्धजनेन' ।

३ 'वासुदेवार्जुनौ' । ४ 'वासुदेवः' । ५ 'उपसृत्य' । ६ क्वचिन्न ।

युधिष्ठिरः—(विलोक्य) अये ! कथं भगवान्वासुदेवः किरीटी च ! । भगवन् ! अभिवादये । (किरीटिनं प्रति) एह्येहि वत्स ! परिष्वजस्व माम् । (अर्जुनः प्रणमति) ।

युधिष्ठिरः—(वासुदेवं प्रति) देव ! कुतस्तस्य विजयादन्यद्यस्य खलु भगवान्पुण्डरीकाक्षः स्वयं मङ्गलमाशास्ते ।

कृतगुरुमहदादिक्षोभसम्भूतमूर्तिं
गुणिनमुदयनाशस्थानहेतुं प्रजानाम् ।

उपसृत्य । पुण्डरीकाक्षः=कमललोचनो वासुदेवः । किरीटी=अर्जुनः । पुराणपुरुषः=सनातनः पुमान् । तस्य=तस्य पुंसः । अन्यत्=भिन्नम् । पराजय इत्यर्थः ।

कृतेति । देव=जगत्प्रकाशक । कृतेन=उत्पादितेन । गुरूणां=स्थूलानां ...व्यादिमहाभूतानां, महदादीनां=महत्तत्त्वादीनाञ्च, क्षोभेण=विक्षोभेण, सम्भूता=उद्भाविता मूर्त्तिः=शरीराणि, जगदिदं येनेत्यर्थः । कृताः गुरवः= स्थूलभूतानि, महदादयश्च येन तादृशं यत्प्रधानतत्त्वम्, तस्य क्षोभेण=सृष्ट्यनु- गुणविकारविशेषेण, सम्भूता मूर्त्तिः=अवतारादिविग्रहो यस्येत्यर्थो वा ।

जगद्धरस्तु—हे देव ! जगति त्वां चिन्तयित्वाऽपि जनो दुःखी न भवति । किं पुनर्दृष्ट्वा दुःखी भवति ? । अपि तु न भवतीति

युधिष्ठिर—(देखकर) हैं ! ये तो भगवान् कृष्ण और अर्जुन हैं ! । भगवन् ! अभिवादन करता हूँ । (अर्जुन के प्रति) आओ ! भैया ! मेरी छाती से लगो । (अर्जुन प्रणाम करता है) ।

युधिष्ठिर—(भगवान् के प्रति) भगवन् ! जिसके लिए भगवान् स्वयं मङ्गल की कामना करें भला उसका अमङ्गल कैसे हो सकता है ? ।

---

१ 'अये ! भगवान्पुण्डरीकाक्षो वत्सश्च किरीटी । भगवन् ! कुतस्तस्य विजयादन्यद्यस्य भगवान्पुराणपुरुषो नारायणः स्वयं मङ्गलान्याशास्ते' ।

अजममरमचिन्त्यं चिन्तयित्वापि न त्वां
भवति जगति दुःखी, किं पुनर्देव दृष्ट्वा ॥ ४३ ॥

(अर्जुनमालिङ्ग्य) वत्स ! परिष्वजस्व माम् ।

भावः । कीदृशम् ?। कृता गुरोः स्थूलद्रव्यस्य महदादेमहत्तत्त्वबुद्धितत्त्वादेः पर्वतादेर्वा क्षोभेण परिणामेन सम्भूता व्यापिका मूर्तिस्त्रिनयनत्वादिरूपा येन तम् । यद्वा—कृतो गुरुः पर्वतादिर्येन स तथा (कृतगुरुः), महदादेराकाशादेः क्षोभेण मिलनेन महाभूतसमाधिना सम्भूता कृतास्मदादेर्मूर्तिः शरीरं येन स तथा । पश्चाद्विशेषणसमासः । यद्वा-कृतं गुरुकार्यं द्रव्यं येन तादृशेन महदादिना कालाकाशादिना सम्भूता मिलिता मूर्तिर्यस्य तम् । सामान्यकारणेन सह भगवान्वेदादिकर्तेति भावः । अत एव गुणिनं=वेदादिसृष्टियोग्यप्रयत्नादिमन्तम् । यद्वा—गुणाः = सत्त्वरजस्तमोरूपास्तद्योगिनं । लोकसृष्टिनाशस्थैर्यकारणं च । तथा च सत्त्वरजस्तमोरूपं गुणत्रयं सहकारि समासाद्य हरिहरहिरण्यगर्भैरवतारैरयं भगवान्कार्यत्रयकर्तेति भावः । अजम्=अजन्यम् । अमरम्=अनाश्यम् । अचिन्त्यं=वाङ्मनसा अगोचरम् । तदुक्तम्—'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति । अथ च विरोधाऽऽभासः । यो हि सम्भूतमूर्तिः स कथमजः ?। यो ह्यचिन्त्यस्तस्य कथं चिन्तेति ?। अविरोधस्तु दर्शित एवेत्यर्थमाह—अस्य श्लोकस्य बहवोऽर्था दर्शनभेदेन व्याख्यातुं, शक्यन्ते । ते च गौरवभयान्नेहोच्यन्ते । मालिनी वृत्तम् ॥४३॥

हे भगवन् ! पृथिवी आदि पंचभूत व महत्तत्त्व आदि को उत्पन्न करने वाले अव्यक्त (प्रकृति, माया) के क्षोभ (सृष्ट्यनुगुणप्रवृत्ति) से जिसकी शिव विष्णु आदि मूर्त्तियाँ (अवतार आदि) प्रादुर्भूत होती है, (स्वतः अर्थात् जो मूर्त्ति रहित है), तथा त्रिगुणात्मिका माया के सम्पर्क से ही जो गुणी है, प्रजा की उत्पत्ति स्थिति नाश के प्रति जो कारण है, जो अज है, अजर है, अचिन्त्य है, ऐसे आपको स्मरण करके भी जगत् में मनुष्य दुःखरहित हो जाता है, जो आपका दर्शन करता है उसकी तो बातही क्या है ? ॥ ४३ ॥

---

१ 'भवन्तं' । २ 'जगददुःखं' ।

कृष्णः—महाराज युधिष्ठिर¹ !

एते खलु भगवन्तो व्यासवाल्मीकिजामदग्न्यजाबालिप्रभृतयो महर्षयः कल्पिताभिषेकमङ्गला नकुलसहदेवसात्यकिमुखाश्च सेनापतयो, यादवमत्स्यमागधकुलसम्भवाश्च राजकुमाराः स्कन्धोत्तम्भिततीर्थवारिकलशास्तवाभिषेकं वारयन्ति'।

[व्यासो²ऽयं भगवानमी च मुनयो वाल्मीकिरामादयो,
धृष्टद्युम्नमुखाश्च सैन्यपतयो माद्रीसुताधिष्ठिताः।
प्राप्ता मागधमत्स्ययादवकुलैराज्ञाविधेयैः समं
स्कन्धोत्तम्भिततीर्थवारिकलशा राज्याभिषेकाय ते]॥४४॥

अहं³ पुनश्चार्वाकेण रक्षसा व्याकुलीकृतं भवन्तमुपलभ्यार्जुनेन सह त्वरिततरमायातः।

व्यास इति। रामः=परशुरामः। माद्रीसुताधिष्ठिताः=नकुलसहदेवनियन्त्रिताः। आज्ञाविधेयैः=वशंवदैः। तीर्थवारि=गङ्गादिजलम्। उत्तम्भिताः=उत्थापिताः। ते तव राज्याभिषेकाय। 'समागतास्तिष्ठन्ती'ति शेषः। शार्दूलविक्रीडितं वृत्तम् ॥ ४४ ॥

(अर्जुन को आलिङ्गन करके)

वत्स ! मुझे दृढ आलिङ्गन करो।

वासुदेव—महाराज युधिष्ठिर ! ये अतीतानागत ज्ञाननिधि—व्यास, वाल्मीकि, जामदग्न्य, जावालि प्रभृति महर्षिगण आपके राज्याभिषेकरूपी मङ्गल की सामग्रियों को लेकर आए हैं, और ये नकुल, सहदेव, सात्यकि प्रमुख सेनापतिगण, तथा यादव, मत्स्य, मागध वंश में उत्पन्न हुए राजकुमार अपने कन्धों पर तीर्थों के जल से भरे हुए कलसो को लिए हुए आपके अभिषक के लिए तैयार खड़े हैं।

[भगवान् व्यासजी तथा ये वाल्मीकि प्रभृति मुनिगण, धृष्टद्युम्न प्रभृति सेनापति गण, नकुल सहदेव से अधिष्ठित हो मागध मत्स्य यादव कुलोत्पन्न राजकुमारों के साथ जिन्होंने गङ्गा आदि तीर्थ जल से भरे हुए कलस कन्धों पर ले रखे हैं—आपके राज्याभिषेक महोत्सव के लिए उपस्थित हुए हैं] ॥ ४४ ॥

मैं भी 'आपको चार्वाक नें धोखा दे व्याकुल कर दिया है' यह जान कर अर्जुन के साथ शीघ्रही आया हूँ।

१ क्वचिन्न।

२ गद्यानुसारी पुनरयं श्लोकः पुनरुक्तप्रायः क्वाचित्कः।

३ 'अहमपि चार्वाकेण विप्रकृतं भवन्तमुपलभ्यार्जुनेन सह सत्वरमागतः'।

युधिष्ठिरः—**कथं[1] चार्वाकेण रक्षसा वयमेवं विप्रलब्धाः !।**

भीमसेनः—(सरोषम्) **क्वासौ धार्तराष्ट्रसखो राक्षसः पुण्यजनापसदो येनार्यस्य महांश्चित्तविभ्रमः कृतः ?।**

कृष्णः—**निगृहीतः स दुरात्मा कुमारनकुलेन । तत्कथय[2] महाराज ! किमस्मात्परं समीहितं [सम्पादयामि[2] ?]।**

युधिष्ठिरः—**एवं[3] पुण्डरीकाक्ष[3] ! न किंचिन्न ददाति भगवान्प्रसन्नः। परमपि[3] प्रियमस्ति[3] ?। अहं तु पुरुषसाधारणया बुद्ध्या सन्तुष्यामि । न खल्वतः परमभ्यर्थयितुं क्षमः। पश्यतु देवः—**

क्रोधान्धैः सकलं हतं रिपुकुलं, पञ्चाक्षतास्ते वयं,
पाञ्चाल्या मम दुर्नयो[4]पजनितस्तीर्णो निकारार्णवः।

उपलभ्य=श्रुत्वा । ज्ञात्वा । **पुण्यजनः**=राक्षसः । 'यातुधानः पुण्यजनो-नैर्ऋतो यातुरक्षसी' इत्यमरः । **न किञ्चिन्नेति** । सर्वमेव ददातीत्यर्थः ।

पुरुषेति । साधारणमनुष्योचितयेत्यर्थः । प्राकृतया बुद्धयेति यावत् ।

क्रोधान्धैरिति । क्रोधोपहतैः । पाण्डवैरिति शेषः । ते **वयं**=पाण्डवाः । **अक्षताः**=अव्रणाः । कुशलिनः । **मम दुर्नयेन**=अविनयेन, द्यूतादिना । **उपजनितः**=उद्भूतः । **निकारार्णवः**=कपटाब्धिः । अपमानसागरः ।

युधिष्ठिर— क्या चार्वाक ने हमें ठगा है ? (क्रोध से) वह दुर्योधन का मित्र राक्षसाधम चार्वाक कहाँ है ? । जिसने मेरे मन को इस प्रकार भ्रान्ति मे डाल दिया था । पाठान्तर में—

भीमसेन—वह राक्षस कहां है जिसनें आर्य युधिष्ठिर के चित्तको इस प्रकार भ्रान्ति में डाल दिया था ? ।

कृष्ण—उस पापी को कुमार नकुल नें पकड़ लिया है ।

कहिए महाराज और आपका क्या अभीष्ट सिद्ध करूँ ? ।

१ 'किं नाम ! चार्वाकेण विप्रलब्धा वयम् ?। (सरोषं) क्वासौ धार्तराष्ट्रसखः पुण्यजनापसदो येन मे महांश्चित्तविभ्रमः कृतः' । २ क्वचिन्न ।

३ 'भगवन् ! पुण्डरीकाक्ष ! किं न ददासि प्रसन्नः ? । ४ 'दुर्नये पतितया' ।

त्वं देवः पुरुषोत्तमः सुकृतिनं मामादृतो भाषसे
　　किं नामान्यदतः परं भगवतो याचे प्रसन्नादहम् ? ॥४५॥
तथापि प्रीततरश्चेद्भगवांस्तदिदमस्तु—
अकृपणमतिः कामं जीव्याज्जनः पुरुषायुषं
　　भवतु च भवद्भक्तिर्द्वैधं विना पुरुषोत्तम !'।

पाञ्चाल्या=द्रौपद्या। तीर्णः=उत्तीर्णः। सुकृतिनं=पुण्यात्मानम्। आदृतः=सादरः। प्रसन्नाद्भगवतः=भवतः सकाशात्। याचे=प्रार्थये। शार्दूलविक्रीडितम्॥ ४५॥

अकृपणेति। उदारबुद्धिः। जनः=लोकः, कामं=यथेच्छम्। पुरुषस्यायुः पुरुषायुषम्=शतवत्सरं यावत्। 'शतायुर्वै पुरुष' इति श्रुतेः। भवद्भक्तिः=भवतो भक्तिः। त्वदनुरागः। द्वैधं=संशयं विना। अद्वैतबुद्धिरिति यावत्। दयितं भुवनं यस्यासौ तथा प्रियप्रजालोकः। 'विष्टपं भुवनं जग'दित्यमरः।

युधिष्ठिर—हे कमललोचन! आप प्रसन्न होकर क्या नहीं देते?। इससे अधिक और मेरा प्रिय भी क्या होगा?। मै तो साधारण पुरुषकी सी इस बुद्धि वाला इतने से ही सन्तुष्ट हूँ। इससे अधिक और कुछ नही चाहता हूँ। महाराज! देखिए—

क्रोधान्ध होकर सब शत्रुओं का हमनें विनाश कर दिया, हम पांचो भाई सकुशल बच गए हैं, मेरी भूल से एवं अनीति (जूवे) से जो द्रौपदी का अपमान हुआ था वही एकबड़ा भारी आर समुद्र था, उसे भी हमनें पारकर लिया। (शत्रुओ से बदला ले लिया)। आप स्वयं पुरुषोत्तम होकर मुझ भाग्यशाली से इस प्रकार आदरपूर्वक भाषण करते है, इससे अधिक और क्या हो सकता है जो मै प्रसन्न हुए आप से (भगवान् से) मांगूं? ॥ ४५ ॥

तो भी यदि आप अधिकतर प्रसन्न हैं तो—

अकृपणबुद्धि दाता लोग पूर्णायु हो, हे भगवन् पुरुषोत्तम!—आपमें हमारी दृढ भक्ति विना द्वैत (संशय) के हो। राजा लोग भी प्रजा का रञ्जन करते हुए,

१ 'प्रियतरं यत्प्रार्थये त्वामहम्'।　　२ क्वचिन्न।　　३ 'प्रीतश्चेत्'।
४ 'अकृपणमरुक् श्रान्तं जीव्याज्जनः पुरुषायुषं, भवतु भगवन्! भक्तिर्द्वैतं विना पुरुषोत्तमे'।　　५ 'पुरुषोत्तमे'।

दयितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवि-
त्सततसुकृती भूयाद्भूपः प्रसाधितमण्डलैः ॥ ४६ ॥

कृष्णः—एवमस्तु ।

(इति निष्क्रान्ताः सर्वे) ।

इति वेणीसंहारे षष्ठोऽङ्कः ।

समाप्तमिदं वेणीसंहारं नाम नाटकम् ।

विद्वद्बन्धुः=पण्डितमित्रम् । पण्डितसहचरः । गुणेषु विशेषवित्=गुणानुरागी । गुणिलोकतारतम्यः । प्रसाधितं=वशीकृतं, मण्डलं=राजमण्डलं येनासौ तथाभूतः । वशीकृतराजमण्डलः । भूपः=राजा । भूयात्=भवतु । सिद्ध्यतु । हरिणी वृत्तम् ॥ ४६ ॥

इतिश्रीगुरुप्रसादशास्त्रिविरचितायां वेणीसंहाराभिनवराजलक्ष्म्यां षष्ठोऽङ्कः ।

हरिः ॐ तत्सत् ॥

(कार्त्तिक कृ० ८ शनौ सिद्धमिष्टम् । सं० १९९६)

विद्वानों का आदर करते हुए, गुणों के तारतम्य को समझते हुए, दत्तचित्त हो सदा पुण्यात्मा व धर्मप्रवण हों । तथा सभी राजाओं में और राज्यों के सभी अङ्गों (मन्त्री मण्डल आदि) में पूर्ण अनुराग हो ॥ ४६ ॥

श्रीकृष्ण—अच्छा ! ऐसाही हो ।

[सब जाते हैं] ।

इति श्रीगुरुप्रसादशास्त्रिविरचितायां वेणीसंहारभाषाटीकायां षष्ठोऽङ्कः ।

१ 'प्रसादित' । २ अस्य स्थाने—

'अवनिमवनिपालाः पान्तु, वृष्टिं विधत्तां
जगति जलधराली, शस्यपूर्णाऽस्तु भूमिः ।
त्वयि सुरनरकाऽरौ भक्तिरद्वैतयोगा-
द्भवतु मम सुदीर्घं, हव्यमश्नन्तु देवाः ॥ १ ॥

विदग्धस्निग्धवियोगदुर्मनसा विप्रलपितं तेन कविना-
काव्यालापसुभाषितव्यसनिनस्ते राजहंसा गता-
स्ता गोष्ठ्यः क्षयमागता, गुणलवश्लाघ्या न वाचः सताम्।
सालङ्काररसप्रसन्नमधुराकाराः कवीनां गिरः-
प्राप्ता नाशमयं तु भूमिवलये जीयात्प्रबन्धो महान्॥ ४७॥

विदग्धाः=कुशलाः। स्निग्धा=स्नेहवन्तः। तेषां योऽत्र वियोगो=विश्लेष-स्तेन दुर्मनायमानं मनो यस्य तेन भट्टनारायणेन कविनेदं विप्रलपितम्। तदाह-व्यानामिति। ते राजहंसाः=राजश्रेष्ठा गताः। 'राजवंश्या' इति पाठे ाने इत्यर्थः। कीदृशाः?। काव्यानां किरातादीनां सुभाषिते=सूक्तौ व्यसनं ते तथा। ताश्च गोष्ठ्यः क्षयं नाशमागताः। तथा च सत्कविताग्राहका नरपत्यादयो न सन्त्येवाऽधुनेति भावः। सतां साधूनां वाचः पुनर्गुणलवैर्गुणकणैः श्लाघ्याः=श्लाघाविषयाः। सत्कवीनां या गिरः सालङ्कारा रसोक्त्या वक्रा=अनृजवो मधुराः कोमलाश्च। तासां गुणान्तरं-गुणाधिक्यमिदमस्तु। यथा कामेप्सितानां मनीषितानां गुणान्तरं भवति तथेत्यर्थः। अत्र च [illegible]यमा-शयः-मत्कविताया अप्यलङ्कारशालिता रसयोगिता च स्वभावसिद्धैव, भगवत्प्रसादेन पुनर्गुणान्तरयोगित्वमपि भवतु। तथा च काव्यलक्षणं समस्त-मिहापि स्यात्। तत्कर्तृतया च कीर्तिलाभः प्रीतिलाभश्च स्यादिति। तदुक्तं सरस्वतीकण्ठाभरणे-'निर्दोषं गुणवत्काव्यमलङ्कारैरलंकृतम्। रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिं च विन्दति' इति। इति जगद्धरः॥ ४७॥

इति श्रीगुरुप्रसादशास्त्रिविरचिताऽभिनवराजलक्ष्मीः।

अपि च—

स्वस्ति श्रीस्तनपत्रभङ्गमकरीमुद्राङ्कितोरःस्थलो
हेतुः सर्वजये सुरासुरवधूवक्त्राब्जचन्द्रोदयः।
क्रीडाक्रोडतनोर्नवेन्दुविशदे दंष्ट्राङ्कुरे यस्य भू-
र्भाति स्म प्रलयाब्धिपङ्किलतलोत्खातैकमुस्ताकृतिः॥ २॥

—इति क्वचित्पाठः।

१ क्वचिन्न।